श्री ५ महाराजाधिराज-गीर्वाणयुद्धवीरविक्रम-
शाहदेव-विरचित

सत्कर्मरत्नावली

द्वितीय-भाग

संपादक र प्रकाशक
प्रधान[illegible]र्य श्रीरामनाथ आचार्य
तथा
प्राध्यापक श्रीदाभोदर कोइराला

श्री ५ महाराजाधिराज–गीर्वाणयुद्धवीरविक्रम–शाहदेव–विरचित

सत्कर्मरत्नावली

उत्तरार्ध

वाल्मीकि संस्कृत महाविद्यालयका प्रधानाचार्य श्रीरामनाथ
आचार्य र सोही विद्यालयका प्राध्यापक श्रीदामोदर
कोइरालाद्वारा टिप्पणी आदिले अलंङ्कृत
गरी संपादित र प्रकाशित

२०२९
वैक्रमाब्द

पहिलो आवृत्तिः– १००० प्रति
२०२९ अक्षयतृतीया

(यसको सबै अधिकार प्रकाशकको अधीनमा छ)

पुस्तक पाइने ठाउः–
वाल्मीकि संस्कृत महाविद्यालय,
रामशाहपथ, काठमाडौं, नेपाल,

मूल्य–

–मुद्रक–
श्री ५ को सरकारको छापाखाना

सम्पादकको वक्तव्य

वेद दुइ भागमा विभाजन गरिएको छ कर्मकाण्ड र ज्ञानकाण्ड । कर्मकाण्ड पनि श्रौत र स्मार्त गरी दुइभागमा विभक्त छ । श्रौतकर्ममा शुद्ध वैदिक कर्म अर्थात् यागहरू आउँछन् । जस्तै– दर्शपौर्णमास, चातुर्मास्य, अग्निष्टोम, वाजपेय, राजसूय, चयन, अश्वमेध आदि । यिनमा केवल वैदिक मन्त्रको प्रयोग गरिन्छ । स्मार्तकर्ममा श्रुतिका आधारमा वनेका स्मृति पुराणहरूमा प्रतिपादित कर्महरू आउँछन् । जस्तै– संस्कार, आह्निक, व्रत, नियम, दान, प्रतिष्ठा, पुरश्चरण, पितृकर्म श्राद्ध आदि । यिनमा विभिन्न फलश्रुति देखिन्छन तर यिनीहरूले मुक्तिको बाटो पनि देखाउँछन् ।

मुक्ति मनुष्यको परमपुरुषार्थ हो । मुक्तिमा अखण्ड आनन्द छ, अखण्ड सुख छ । यस्तो अखण्ड आनन्द र सुखस्वरूप भएको मुक्ति पाउने उपाय क हो त भन्दा ज्ञान भन्नु पर्छ ! **'ऋतं ज्ञानान्न मुक्तिः'** यस श्रुतिवाक्यले ज्ञानविना मुक्ति हुन सक्तैन भन्ने कुरा स्पष्ट गराउँछ । कर्मविना ज्ञान पनि सम्भव छैन । यसैकारणले होला वेदले ज्ञानकाण्डमा गएर ज्ञानको उपदेश दिंदा पनि वाँचुन्जेल कर्म गर्दैरहनु पर्छ कर्म गर भनी कर्मको नै प्रशंसा गरेको । जस्तै–

“ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे ।।” –वेद ।

(मुक्तिको लक्ष्य राखर वैदिक कर्महरू गर्दै शयवर्ष (मनुष्यको आयु) पयन्त वाँच्न इच्छा गर । यसैमा तिम्रो कल्याण (मुक्ति) छ । यसभन्दा अर्को वाटो छैन । यसप्रकार गरिएको कर्म मनुष्यमा लिपिएर वस्तैन अथवा कुनै सम्बन्ध राख्तैन)

अर्थात् वाँचुन्जेल मनुष्यले कर्म गर्नै पर्छ यो कुरा निर्विवाद छ । धर्म अर्थ काम मोक्ष यी चार पुरुषार्थमध्ये धर्म, अर्थ र काम सामान्य र मोक्षलाई

विशेष पुरुषार्थको रूपमा मानिएको ले यस्तो परमपुरुषार्थ प्राप्त गर्नु मनुष्यको परम कर्तव्य पनि हुन आउँछ। शुद्ध (निष्काम) कर्मको अनुष्ठानद्वारा मनुष्यको मुक्ति हुन्छ यसभन्दा अर्को उपाय छैन। किनभने काम्यकर्मको कर्तासंग सम्वन्ध रहिरहन्छ र कर्मनै कर्ताको वन्धन भइदिन्छ अर्थात् सकाम कर्मद्वारा कर्ता वाँधिन्छ। जो शुद्ध (निष्काम) कर्म गरिन्छ त्यसको कर्तासंग कुनै सम्वन्ध रहँदैन अर्थात् त्यस्तो कर्मले कर्ता वाँधिदैन। यसकारण यस्तो शुद्ध कर्म मनुष्यको मुक्तिका निमित्त हुन्छ !

हुनत संसारमा कति किसिमका मानिस होलान् तथापि साधारण रूपमा तीन भागमा विभाजन गरिएका पाइन्छन्, व्यवहारमा आसक्त, भक्त र ज्ञानी। यिनमा व्यवहारी मनुष्य व्यवहारमा रहेर पनि वेदविहित कर्मको अनुष्ठानवाट क्रमिक–रूपमा हुँदै गएको चित्तशुद्धिद्वारा परमपुरुषार्थ अर्थात् मुक्ति प्राप्त गर्नमा समर्थ हुन्छ। त्यस्तै भक्त पनि वेदविहित कर्मका साथै आफ्नो उपास्य-देवताको सेवाद्वारा परमपुरुषार्थ प्राप्त गरी मनुष्य–जीवन सार्थक वनाउन समर्थ हुन्छ। ज्ञानीहरू यद्यपि व्यवहारवाट निवृत्त र अन्तः करण शुद्ध भएका हुँदा उनीहरूको कर्म संग कुनै सम्वन्ध रहँदैन। तरपनि मेरो सदाचार तथा सतकर्मको सबैले अनुकरण गरून् र सबैको भलाई होस् भन्ने यस्तो उद्देश्यले लोकलाई शिक्षा दिन आफू कर्म गरेर देखाउँछन् अर्थात् कर्मसंग केही मतलव न भएका ज्ञानावस्थामा पुगेका यस्ता ज्ञानीहरू पनि कर्म गरिरहन्छन्। ठूलोको देखासिकी सानोले गर्छ भन्ने कुरामा गीता पनि प्रमाण छ–

" यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। " –गीता।

अर्थात् ठूलाले जुन काम गर्छ सानाले पनि त्यही काम गर्छ। यसकारण ठूलाले असल काम गरेर देखाइदिनु पर्छ। ज्ञानीले त संधै (कर्म गरिरहनु पर्ने हुँदा) कर्मवाट कहिल्यै फुर्सद पाउँदैन भने अरूको के कुरा।

श्रौतकर्म होस् अथवा स्मार्तकर्म। जुनसुकै पनि कर्म गर्दा शास्त्र-विधि अनुसारको गरिनु पर्छ। अशास्त्रीय र विधिच्युत कर्मद्वारा त्यस्तो कुनै अपूर्व (कर्मफल) पैदा हुन सक्तैन र त्यस्तो कर्मले यसलोक परलोक दुवैलोकमा केही काम दिनसक्तैन।

अर्कोकुरा कर्तव्याकर्तव्य ज्ञान नगरी गरेको कर्म पनि व्यर्थ हुन्छ । शास्त्रविनाको कोरा मनुष्यबुद्धिले यसलाई छुटचाउन सक्तैन । यो कर्तव्य हो र यो अकर्तव्य हो भनी शास्त्रले एक एक विवेचन गरी छुटचाइदिएको छ । अतः शास्त्रको राम्रो अध्ययन गरी शास्त्रप्रमाणद्वारा अकर्तव्यबाट बचेर कर्तव्य कर्मको सेवा गर्नु मनुष्यको परम-कर्तव्य हो । यिनै कुरा गीतामा भगवान् श्रीकृष्णले भन्नुभएको छ–

"यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।" –गीता ।

अर्थात् भगवान्का यी दिव्य उपदेशबाट हामी यिनै कुरा जान्न सक्छौं कि– कर्म गर्नै पर्छ, कर्म गर्दा शास्त्रविधि नछोडी कर्मगर्नू, विधिच्युत भएमा आफ्नो परिश्रम अनुसारको फल पाइँदैन, सुख मिल्दैन परलोक समेत बिग्रन्छ भन्न र आफूले नजानेका नबुझेका कुरामा शास्त्रमा विश्वास राखेर शास्त्रले भने अनुसार विधिपूर्वक कर्म गर्नू इत्यादि ।

यो हाम्रो देश नेपाल पवित्र कर्मभूमि हो । यस पुण्य-भूमिमा जन्मेका हाम्रा प्राचीन आर्य–पुरुखाहरूले भूमि र कर्म दुवैको महत्त्व बुझेकाले विशुद्ध वैदिक-कर्मको अनुष्ठानद्वारा आफूमा अलौकिकशक्ति उपार्जन गरी भूमिको गौरव समेत वृद्धि गराएका थिए । उही पवित्र देशमा जन्मेका हामी पनि उनैका सन्तान ह्वौं । पुरुखाहरूले जुन आदरदृष्टि राखेर जुन महत्त्वले यस पवित्र भूमिमा वैदिक कर्मको विकास गरेका थिए । त्यसै गरी हामीले पनि आदर पूर्वक वैदिक कर्महरूको प्रचार प्रसार गर्नु पर्छ भन्ने अनुभव गरी प्रजाका हितचिन्तक, वैदिक धर्मका प्रतिपालक, संस्कृतिका संरक्षक **श्री ५ महाराजाधिराज गीर्वाणयुद्ध वीरविक्रम साहदेव** बाट शाके १७३४ (विक्रम संवत् १८६९) मा कुनै विद्वान्का सल्लाहले यति विशालकाय भएको **"सत्कर्मरत्नावली"** नामक ग्रन्थ रचना गरिबक्सिएको हो र यो ग्रन्थ नेपालीका निमित्त मात्र नभई समस्त आर्यधर्मावलम्बीहरूको निमित्त समेत ठूलो उपकार गर्ने, सबैको उपयोगमा आउने हुन गएको छ । यो ग्रन्थ खास गरेर कर्मकाण्ड र धर्मशास्त्र निर्णयले

भरिएको छ। यस ग्रन्थमा सत्कर्महरू धेरै परेका छन् भन्ने कुरा त यसको **'सत्कर्मरत्नावली'** भन्ने नामले नै बुझाएकोछ। **श्री ५ गीर्वाणयुद्ध वीरविक्रम**ले रचना गरेको हुँदा यसको **"गीर्वाणरत्नावली"** भन्ने अर्को उपनाम पनि रहेको छ।

पुनः हाम्रो जस्तो हिन्दूराज्यमा पाश्चात्य-शिक्षापद्धतिको पठन-पाठनको प्रभावले उपेक्षा गरिनुका साथै अन्य कतिपय कारणहरूले समेत ह्रास हुँदै जानलागेको वैदिक धर्म तथा आर्य संस्कृतिको पुनरुत्थान र संरक्षणमा यस ग्रन्थको प्रकाशनले पनि केही मद्दत गर्दोहो भनी स्वर्गीय **श्री ५ महाराजाधिराज महेन्द्र वीरविक्रम** सरकारमा जाहेर गर्दा जन उपयोगी छ भने छपाइदिनू भन्ने हुकूम वक्सनुका साथै सरकारी प्रेसको सुविधा र प्रकाशनार्थ जो चाहिने आर्थिक व्ययसमेत प्रदान गरिवक्सेको हुँदा यस ग्रन्थले प्रकाश हुने मौका पायो। कत्तिको जनउपयोगी छ भन्ने विषयमा यसग्रन्थको एकप्रति लेखेर आफ्नो घरमा नराख्ने पुराना विद्वान्हरूमा ज्यादै कम होलान् अर्थात् सबैले एक एक प्रति लेखेर राखेका छन्।

हिन्दुत्व र वैदिक-धर्मको कति सम्बन्ध छ भन्ने विषयमा स्वच्छदिलले विचार गर्ने हो भने वैदिक-धर्म नै हिन्दुत्वको प्राण हो। जस्तो प्राण नभएमा कुनै पनि प्राणी बाँच्न सक्तन त्यस्तै हिन्दुत्वको मूल आधार वैदिक-धर्मपरम्पराको रक्षा नभएमा हिन्दुत्व पनि रहंदैन। यस कारण हिन्दुत्व संरक्षणका निमित्त पनि वैदिक-धर्ममा आधारित कर्मकाण्डको संरक्षा हुनै पर्छ।

तर जे होस्, आजसम्म नेपालमा यसरूपको महानिबन्धग्रन्थ प्रकाशमा आउन सकेको थिएन। आज यस ग्रन्थले प्रकाशित भएर नेपालबाट प्रकाश गरिएका पुस्तकहरूको प्रकाशन संख्याका साथै नेपालको गौरव समेत वृद्धि गराएको छ। यसको पूर्वार्धभाग विक्रम संवत् २०२६ मा नै प्रकाशमा आइसकेको छ। उत्तरार्धभागले आज विक्रम संवत् २०२९ मा आएर बल्ल बल्ल यति बिलम्ब संग प्रकाशमा आउने मौका पाएको छ।

ग्रन्थको पूर्व तथा उत्तर दुवै भागमा परेका विषयहरूको मोटामोटी दिग्दर्शन यहाँ गराइन्छ—

स्वस्तिवाचन, गणेशपूजा, पुण्याहवाचन, मातृकापूजा, ग्रहशान्ति, दान, चक्रोद्धार, मन्त्र, तन्त्र, यन्त्र, पुरश्चरण, श्रौतइष्टि, बलि वैश्वदेव, (पञ्चमहायज्ञ), रुद्रप्रयोग, आह्निककर्म, देवप्रतिष्ठा, उत्सर्ग, विविधश्राद्ध, आशौ-

चनिर्णय, संस्कार, वर्षकृत्य, (तिथिनिर्णय) विविधशान्ति र प्रकीर्णविषय इत्यादि ।

जुन पाण्डुलिपि अर्थात् हस्तलिखित पुस्तकलाई मूल पुस्तक मानेर प्रेसकापी तयार गरियो त्यो मूल पुस्तकको परिचय यसप्रकार छ–

मढचाइएको नेपाली कागतको केही पत्रमा हरिताल लगाइएका र केही पत्रमा न लगाइका गरी जम्मा ४०७ पत्र हरू छन् । पत्रहरूको लमाई १४।। इञ्च र चौडाई ४।। इञ्च छ । ४०७ पत्रहरू मध्ये २५१, ३१३, ३१४, ३१८, ३१९ र ३२० संख्याका पत्रहरू छैनन् अर्थात् खण्डित भएका छन् । ३१७ को पत्रसंख्या पछि ३२१ को पत्रसंख्या देखिन्छ । यसलाई सामान्य दृष्टिले हेर्दा ३ पत्र मात्र खण्डित भएको भन्नुपर्छ । तर विषय हेर्दा यहाँ टुटेको भाग मात्र पनि यौटा सानो सानो ग्रन्थको रूपमा आउन सक्छ । मूल पुस्तकको ३१७ र ३२१ संख्याका पत्र हेर्नु र ग्रन्थकारले ग्रन्थको अन्त्यमा उल्लेख गरेको विषयानुक्रमणिकामा हेर्नु तब यति ग्रन्थ खण्डित भएको रहेछ भन्ने छर्लङ्ग हुन्छ । खण्डित भाग सबै पूरा गरेर छपाउँदा छापिएको पुस्तकमा थप गरिएको भागमात्र उत्तरार्धको ३६० पृष्ठदेखि ५२२ पृष्ठसम्म जम्मा १६२ पृष्ठ हुन आएको छ । मूल पुस्तकमा बाहेक यसग्रन्थका अरू प्रतिहरूमा अर्थात् सहायक पुस्तकका रूपमा लिइएका आफूसंगका पुस्तक र राष्ट्रिय अभिलेखालयमा भएका पुस्तकहरूमा कुनैमा पनि शान्तिप्रकरणको पाठ देखिएन । ग्रन्थकारले विषयानुक्रमणिकामा विषयको उल्लेख गरिदिएको हुँदा खण्डित भाग पूरा नगरी त्यसै छोडिदिएमा देख्ता पनि नराम्रो देखिने र ग्रन्थ पनि पूरा नहुने, अर्को कुरा खण्डित भागको विषय व्यवहारोपयोगी पनि भएकोले स्वर्गीय **श्री ५ महेन्द्र** सरकारमा पुनः विन्ती गर्दा चाँहिदो ग्रन्थ थपेर पनि पूरा गरिदिनू भन्ने हुकूम वक्से बमोजिम शान्तिरत्न, शान्तिसार, शान्तिमयूख तथा नीतिमयूख आदि ग्रन्थहरूको सहायताबाट विषयानुक्रमणिका अनुसारको शान्तिप्रकरणको खण्डित भाग सबै पूरा गरिएको छ । बीच बीचमा खण्डित भएका थोर-थोरै विषयहरू सम्भव भएसम्म सहायक पुस्तकबाट र सम्भव नभएका ठाउँमा तत्तद्विषयका उपलब्ध आकर ग्रन्थहरूबाट पूरा गरिएका छन् ।

मूल पुस्तकदेखि लिएर जति हस्तलिखित पुस्तकहरू उपयोगमा ल्याइए ती सबै पुस्तकमा प्रायः एकै रूपको अशुद्धि देखिन्छ अर्थात् एउटा पुस्तकको जुन

ठाउँमा ग्रन्थ टुटेको अथवा अशुद्धि देखिन्छ अर्को पुस्तकमा पनि ठीक उसै ठाउँमा उसैगरी रहेको पाठको अशुद्धि देखिन्छ ।

यस्तो विशालकाय ग्रन्थमा विषयको बाहुल्य र प्रचुरमात्राको अशुद्धिको कारण संशोधन कार्यमा धेरै कठिनाइहरूको सामना गर्नु पर्‍यो, तरपनि विद्वान्हरू संगको संपर्क र विभिन्न ग्रन्थहरूको अध्ययन द्वारा संपादन र अशुद्धपाठको संशोधन कार्य प्रायः पूरा भएको छ । धेरै विषय भएको यति ठूलो ग्रन्थमा यति प्रचुरमात्राको अशुद्धि संशोधनका लागि विभिन्न विषयको अध्ययन गर्न पुस्तकालयमा धाइरहनु पर्दा धरै परिश्रम र धेरै समय लाग्नु पनि स्वाभाविकै हो । कहीं केही आधार नपाइएका ठाउंको अशुद्धि त्यसै राख्नु पर्दा मनमा त्यति प्रसन्नता आएको छैन । फेरि पाठक वर्गलाई यथा सम्भव सुविधा हुने गरी ग्रन्थ तयार पारेर छपाउं भन्दा भन्दै पनि कतिपय कारणहरूले गर्दा आफुले चिताएको जस्तो हुन सकेको छैन । वैदिकमन्त्रहरू जसरी शुद्ध रूपमा छपाउनु पर्ने थियो, अक्षरको अभावले गर्दा त्यस रूपमा छपाउन सकिएन केवल काम चलाउसम्म गरिएको छ । सबै कुरा आफुले चिताए जस्तो नभए पनि गद्य पद्य छुट्याउन नसकिने, प्रचुरमात्राको अशुद्धि, कहीं सामान्य पाठ टुटेको र कहीं पुरापुर ग्रन्थ नै खण्डित भएको यस्तो हस्तलिखित ग्रन्थबाट यसरूपमा संपादन र संशोधन कार्य गर्दा जति परिश्रम परेको छ त्यसको यहाँ के वर्णन गरौं । यसको मूल्याङ्कन विद्वद्वर्गबाट अवश्य हुने नै छ ।

संपादकको अज्ञान, दृष्टिदोष अथवा मुद्रादोष द्वारा जति त्रुटिहरू भएका छन् । ती दोषहरूमा–

“गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ”

यस उक्तिलाई र ‘अच्युत विष्णुबाहेक अरु सबै च्युत हुन्’ भन्ने कुराको स्मरण गरी विद्वद्वर्गबाट अवश्य पनि दोषदृष्टि राखिने छैन भनी विद्वान्हरूसंग क्षमा प्रार्थना गर्दै वक्तव्य यहीं टुङ्ग्याइन्छ ।

सम्पादक

श्री ५ महाराजाधिराज महेन्द्र वीरविक्रम साहदेव

जन्मसमयः– १९७७ वि. सं.

मृत्युसमयः– २०२८ वि. सं.

विषयानुक्रमः

विषयाः पृष्ठाङ्काः

संस्कारप्रकरणे–

गोत्रप्रवरनिर्णयः १
भृगूणां सप्तान्तर्गणाः „
आङ्गिरसः २
केवलाङ्गिरसः ३
अत्रिभेदाः „
कश्यपभेदाः ४
वासिष्ठाः „
विश्वामित्राः „
अगस्तयः ५
द्व्यामुष्यायणाः ६
सापिण्ड्यनिर्णयः ८
विवाहकालनिर्णयः ९
विवाहपद्धतिः १०
तत्र वाग्दानम् „
वरणीप्रयोगः „
कन्यादानप्रयोगः १३
महासङ्कल्पः १९
विवाहप्रयोगः २४
चतुर्थीकर्म ४५
गर्भाधानम् ५०
पुंसवनम् ५२
सीमन्तोन्नयनम् ५३
जातकर्म ५८
षष्ठिकापूजा ६३
नामकर्म ६६
निष्क्रमणम् „
अन्नप्राशनम् ६७
चूडाकरणम् ६९
कर्णवेधः ७६
उपनयनम् „
वेदारम्भः ८४
समावर्तनम् ८९

तिथिनिर्णयप्रकरणे–

चैत्रमासः–

तत्र शुक्लप्रतिपन्निर्णयः १०२
अधिमासश्चेन्निर्णयः „
तैलाभ्यङ्गः १०३
नवरात्रारम्भः „
प्रपादानम् „
प्रत्यहं धर्मघटदानम् „
चैत्रशुक्लतृतीयानिर्णयः १०४
सौभाग्यशयनव्रतम् „
मन्वादिनिर्णयः „
अत्र श्राद्धम् „
मलमासेऽपि मन्वादिश्राद्धम् १०५
अत्र पिण्डरहितं श्राद्धम् „
अकरणे प्रायश्चितम् „
चैत्रशुक्लतृतीया मत्स्यजयन्ती „

विषयाः	पृष्ठाङ्काः
दशावतारजयन्त्यः	१०५
चैत्रशुक्लपञ्चमीनिर्णयः	१०६
तत्र लक्ष्मीपूजनम्	१०७
चैत्रशुक्लाष्टमीनिर्णयः	”
अत्र भवानीयात्रा	”
अशोककलिकाप्राशनम्	”
चैत्रशुक्लनवमीनिर्णयः	१०८
रामनवमीव्रतम्	”
अकरणे प्रत्यवायः	१०९
रामपूजाविधिः	११०
मलमासे रामनवमीनिर्णयः	११२
चैत्रशुक्लैकादश्यां दोलोत्सवः	”
द्वादश्यां दमनोत्सवः	”
तिथिविशेषे दमनारोपणम्	”
आगमोक्तदीक्षावतां दमनारोपणम्	”
शुक्लान्तादौ विशेषः	११६
शुक्लत्रयोदश्यामनङ्गव्रतम्	”
शुक्लचतुर्दशीनिर्णयः	”
चैत्रशुक्लपूर्णिमानिर्णयः	”
विशेषयोगे चित्रवस्त्रादिदानम्	”
सर्वदेवानां दमनपूजा	”
इयं मन्वादिरपि	”
चैत्रकृष्णत्रयोदश्यां महावारुणियोगः	”
चैत्रकृष्णचतुर्दशीनिर्णयः	११७
अत्र गङ्गास्नाने प्रेतत्वमुक्तिकथनम्	”

वैशाखमासः—

विषयाः	पृष्ठाङ्काः
मेषसंक्रान्तिनिर्णयः	११८
धर्मघटादिदानमाहात्म्यम्	”
वैशाखस्नानम्	”
तत्र मन्त्रः	”
सङ्कल्पे तीर्थनामकथनम्	”
तीर्थनामाज्ञाने विष्णुतीर्थम्	११८
तुलस्या विष्णुपूजनम्	११९
अश्वत्थमूलसेचनम्	”
प्रपा-गलन्तिका	”
उपानच्छत्रव्यजनादिदानम्	१२०
सक्त्वम्बुघटादिदानम्	”
संपूर्णस्नानाशक्तौ	”
मलमासे सति निर्णयः	”
वैशाखव्रतोद्यापनम्	”
अक्षयतृतीयानिर्णयः	१२१
अत्र विशेषयोगे	”
इयं युगादिः	१२२
अत्र श्राद्धम्	”
यवैरेव विष्णुपूजा होमश्च	१२३
अत्र दानविशेषः	”
उदकुम्भदानम्	”
धर्मघटदानम्	”
अत्र पिण्डरहितं श्राद्धम्	”
रात्रिभोजने प्रायश्चित्तम्	”
वैशाखे मलमासे सति तदैव युगादिः कार्या	”
श्राद्धाकरणे प्रायश्चित्तम्	१२४
समुद्रस्नानम्	”
परशुरामजयन्तीनिर्णयः	”
शुक्लसप्तम्यां गङ्गोत्पत्तिः	१२५
शुक्लद्वादश्यां योगविशेषः	”
शुक्लचतुर्दशी नृसिंहजयन्ती	”
वैशाखपौर्णमास्यां विशेषः	१२७

ज्येष्ठमासः—

विषयाः	पृष्ठाङ्काः
ज्येष्ठशुक्लतृतीयायां रम्भाव्रतम्	१२७
दशहरा	१२८

विषयाः पृष्ठाङ्काः
दशयोगाः १२८
बुधभौमयोः कल्पभेदेन व्यवस्था ”
योगाधिक्ये फलाधिक्यम् ”
ज्येष्ठे मलमासेऽपि तत्रैव दशहरा ”
तत्र दशाश्वमेधलिङ्गदर्शनम् ”
गङ्गापूजाविधानम् ”
गङ्गास्तोत्रपाठक्रमः १३०
ज्येष्ठशुक्लैकादशी निर्जला ”
ज्येष्ठपौर्णमास्यां सावित्रीव्रतम् ”
स्त्रीव्रतेषु विशेषः १३२
पूर्णिमायां तिलादिदानम् ”
महाज्येष्ठी ”
इयं मन्वादिरपि ”

आषाढमासः–

आषाढशुक्लद्वितीयायां रथोत्सवः १३३
शुक्लदशमी पौर्णमासी च मन्वादिः ”
शुक्लद्वादश्यां विष्णुशयनोत्सवः ”
द्वदश्यां पारणा १३४
इदं मलमासे न कार्यम् ”
चातुर्मास्यव्रतारम्भः ”
अस्यारम्भः शुक्रास्तादावपि ”
आशौचमध्ये विचारः ”
व्रतग्रहणप्रकारः १३५
चातुर्मास्ये भक्ष्याभक्ष्यविचारः ”
शाकादिव्रतम् ”
मञ्चखट्वादिशयनविचारः १३६
शाकं दशविधम् ”
आमिषाणि १३७
हविष्याणि ”
व्रतभेदेन फलविशेषः १३८
नियमसमाप्तौ दानानि १३९

विषयाः पृष्ठाङ्काः
शयनीबोधनीमध्ये पूजाद्रव्याणि १३९
चातुर्मास्ये तैलाभ्यङ्गादिवर्जनम् ”
तप्तमुद्राधारणविधिः १४०
आषाढपौर्णमास्यां कोकिलाव्रतम् १४१

श्रावणमासः–

तत्र कर्कसंक्रान्तिः १४१
कर्के केशादिकर्तनं निषिद्धम् १४२
नदीनां रजोदोषः ”
क्षुद्रनदीषु स्नाननिषेधः ”
महानद्यः १४३
सप्तनदाः ”
रजोदुष्टजलं गङ्गाजलयोगे १४४
नूतनकूपादौ ”
कुत्रचिद्रजोदोषाभावः ”
श्रावणशुक्लतृतीया मधुश्रवा ”
शुक्लपञ्चमीनिर्णयः ”
अत्र नागपूजा ”
शुक्लद्वादश्यां दधिव्रतम् १४५
अत्रैव विष्णोः पवित्रारोपणम् ”
पवित्रारोपणे गौणकालः ”
सुवर्णादिपवित्रनिर्माणप्रकारः ”
शिवपवित्रम् १४६
पवित्रारोपणेऽधिकारिणः ”
देवताभेदेन तिथयः ”
पवित्रारोपणविधिः १४७
अकरणे प्रायश्चित्तम् १४९
उपाकर्मनिर्णयः ”
श्रावणशुक्लपौर्णमासी यजुर्वेदीपरा ”
श्रवणयुतदिने संक्रान्त्यादौ १५०
ग्रहसंक्रान्तिदूषिते विशेषः ”
सिंहस्थेऽर्के विचारः १५१

विषयाः	पृष्ठाङ्काः
गुरुशुक्रास्तादौ	१५१
अधिमासे	”
उपाकर्मोत्सर्जनकालः	१५२
अत्र ऋषिपूजनम्	१५६
अत्र नदीनां रजोदोषो नास्ति	”
रक्षावन्धनम्	”
श्रावणपूर्णिमायां हयग्रीवोत्पत्तिः	”
अत्रैव श्रवणाकर्म	१५७
श्रावणादिमासकृष्णद्वितीयासु	”

अथ भाद्रपदमासः–

विषयाः	पृष्ठाङ्काः
सिंहसंक्रान्तिनिर्णयः	१५७
सिंहसंक्रान्तौ गोप्रसवे	”
तथा महिष्यादिप्रसवे	”
भाद्रकृष्णतृतीयानिर्णयः	१५८
भाद्रकृष्णचतुर्थीनिर्णयः	”
भाद्रकृष्णषष्ठी हलषष्ठी	”
भाद्रकृष्णसप्तम्यां शीलताव्रतम्	”
जन्माष्टमी	”
अष्टमी द्वेधा	”
जन्माष्टमीव्रतं नित्यम्	१५९
अकरणे प्रत्यवायः	”
जयन्तीव्रतं नित्यं काम्यं च	”
रोहिणीयोगस्य प्राशस्त्यम्	”
अष्टम्यां निशीथवेध एव मुख्यः	१६१
पारणानिर्णयः	१६३
महानिशालक्षणम्	१६४
अष्टम्यां पूजाविशेषः	”
इदं प्रतिमासं कृष्णाष्टम्यां कार्यम्	१६६
भाद्रामावास्यायां कुशग्रहणम्	”
भाद्रशुक्लतृतीयायां हरितालिका	”
चतुर्थ्यां सिद्धिविनायकव्रतम्	”
अत्र चन्द्रदर्शननिषिद्धम्	१६७
ऋषिपञ्चमीनिर्णयः	”
सूर्यषष्ठीनिर्णयः	१६८
दूर्वाष्टमीव्रतम्	”
इदं व्रतं स्त्रीणां नित्यम्	१६९
दूर्वापूजाविधिः	”
अत्रानग्निपक्वभक्षणम्	१७०
भाद्रपदेऽधिमासे सति	”
ज्येष्ठापूजा	”
भाद्रशुक्लद्वादश्यां पारणा	१७१
अत्रैव विष्णुपरिवर्तनोत्सवः	”
श्रवणद्वादशी	१७२
अत्रैव शक्रध्वजोत्थापनम्	”
इयं बुधवारेऽतिप्रशस्ता	”
अत्र पारणा	१७४
श्रवणद्वादश्यां सङ्गमे स्नानम्	”
अत्रैव जलपूर्णघटादिदानम्	”
वामनद्वादशी	१७५
अत्र कल्पभेदाद्व्यवस्था	”
वामनपूजा	१७६
दुग्धव्रतम्	”
चतुर्दश्यामनन्तव्रतम्	१७७
व्रतविधिः	१७८
अनन्तपूजा	”
अगस्त्यर्घः	१८२
भाद्रपौर्णमास्यां श्राद्धम्	१८४

आश्विनमासः–

विषयाः	पृष्ठाङ्काः
कन्यासंक्रान्तिनिर्णयः	१८५
महालयः	”
षोडशमहालयाः	१८६
विधवायाः पार्वणचतुष्टयम्	१८७

विषयाः	पृष्ठाङ्काः
महालये वर्ज्यतिथ्यादि	१८८
अस्यापवादः	”
सन्यासिनां महालयः	१८९
पक्षे श्राद्धाकरणे गौणकालः	”
महालयादिश्राद्धमन्नेनैव कार्यम्	१९०
महालये देवताः	”
पार्वणैकोद्दिष्टव्यवस्था	१९१
वहुब्राह्मणाभावे	”
एकोद्दिष्टस्वरूपम्	”
सन्यस्तपितृकेण जीवत्पितृकेणापि महालयः कार्यः	”
जीवत्पितृके निषेधः	”
महालये तर्पणनिर्णयः	१९२
निषिद्धदिनेऽपि तर्पणम्	”
मलमासे महालयादिनिषेधः	”
इदं नित्यं काम्यं च	”
कालातिक्रमे प्रायश्चित्तम्	१९३
भरणीश्राद्धम्	”
कपिलाषष्ठी	”
अत्र विशेषः स्कान्दे	”
चन्द्रषष्ठी	१९४
मघावर्षश्राद्धम्	”
अष्टम्यां महालक्ष्मीव्रतम्	१९५
नवम्यां अन्वष्टकाश्राद्धम्	१९६
अत्र शाखाभेदेन व्यवस्था	”
इदं जीवत्पितृकेणापि कार्यम्	”
अत्र सुवासिनीभोजनम्	”
अत्राशक्तावनुकल्पः	१९७
अकरणे प्रायश्चित्तम्	”
द्वादश्यां विशेषः	”
मघात्रयोदशीश्राद्धम्	”
एतच्चाविभक्तैरपि पृथक्कार्यम्	१९८
गजच्छायाश्राद्धम्	१९८
योगाधिक्ये फलाधिक्यम्	”
मघात्रयोदशीश्राद्धं मलमासेऽपि कार्यम्	”
एतच्छ्राद्धं पुत्रवतो गृहस्थस्य निषेधः	१९९
चतुर्दशी	”
तत्र शस्त्रादिहतानां श्राद्धम्	”
अमायां विशेषः	२००
आश्विनशुक्लप्रतिपदि मातामहश्राद्धम्	”
इदं जीवत्पितृकेणापि पिण्डरहितं कार्यम्	२०१
नवरात्रारम्भे प्रतिपन्निर्णयः	”
अत्र देवीपूजैव प्रधानम्	२०३
अत्रोपवासादिविचारः	२०४
प्रतिपदि वैधृत्यादियोगनिषेधः	२०५
कलशस्थापनविचारः	”
पूजाविधिः	२०६
कुमारीपूजा	२०७
वेदपारायणम्	२०८
चण्डीपाठः	”
तिथिह्रासे वृद्धौ च विचारः	”
स्वस्याशक्तावन्यद्द्वारा	२०९
देवीपूजनं शुक्रास्तादावपि कार्यम्	”
अश्वपूजनम्	”
प्रतिपदादिषु पूजायां विशेषः	”
आशौचे विशेषः	२१०
स्त्रीव्रते विशेषः	२११
आश्विनशुक्लपञ्चम्यां ललिताव्रतम्	”
सरस्वतीस्थापनम्	”
षष्ठ्यादिदशम्यन्तविशेषकृत्यम्	२१२
षष्ठ्यभावे पूर्वदिनेऽधिवासनम्	”
बिल्वाधिवासनम्	२१३
तत्र क्रमः	”

विषयाः	पृष्ठाङ्काः
नवपत्रिकानामानि	२१३
सप्तम्यां देवीत्रिरात्रव्रतम्	"
अत्र विशेषः	२१४
देवीमूर्तिस्थापने विशेषः	२१५
प्रतिमाभावे	"
सप्तमीपूजाविधिः	२१६
महाष्टमीनिर्णयः	२१८
पुत्रवतो ऽष्टम्यामुपवासनिषेधः	२२१
लौहाभिसारिकं विधानम्	२२२
राजचिह्नानां पूजामन्त्राः	"
महानवमीनिर्णयः	२२८
होमे विशेषः	२३०
वलिदानम्	"
पशुघातविधिः	२३२
कूष्माण्डवलिः	२३६
वलेश्छिन्नशीर्षपातविचारः	"
देवीस्तुतिः	२३७
शतचण्डीविधानम्	२३८
सहस्रचण्डीविधानम्	२३९
नवरात्रपारणानिर्णयः	२४०
पारणाह्ने सूतकादिप्राप्तौ निर्णयः	"
दशम्यां देवीविसर्जनम्	२४१
विजयादशमी	२४२
आश्विनपौर्णमासीनिर्णयः	२४३
अत्र लक्ष्मीपूजनादि	"
आश्वयुजीकर्म	२४४
आग्रयणनिर्णयः	"

कार्तिकमासः—

विषयाः	पृष्ठाङ्काः
कार्तिकस्नानम्	२४४
प्रातःस्नाने नियमः	"
स्नानः मन्त्र	२४५
अर्घ्यमन्त्रः	२४५
संपूर्णस्नानाशक्तौ	२४६
विष्णुपूजने पुष्पाणि	"
धात्रीच्छाये पिण्डदानम्	"
कार्तिके द्विदलादिवर्जनम्	२४७
ग्राह्यहविः	२४८
आकाशदीपदानम्	"
करकचतुर्थीनिर्णयः	"
गोवत्सद्वादशी	"
अत्र विशेषः	२४९
द्वादश्यादिपञ्चदिनेषु नीराजनविधिः	"
त्रयोदश्यां यमदीपदानम्	"
नरकचतुर्दश्यामभ्यङ्गस्नानम्	"
अस्यां दीपोत्सवः	२५२
अस्यामेव माषपत्रशाकभोजनम्	"
यमतर्पणम्	"
तर्पणविधिः	"
इदं जीवत्पितृकेणापि कार्यम्	"
अमावास्यायामभ्यङ्गः	"
लक्ष्मीपूजनम्	"
अत्र पार्वणश्राद्धम्	२५३
दीपावलीसमयनिर्णयः	"
अलक्ष्मीनिःसारणम्	२५४
कार्तिकशुक्लप्रतिपदि गोक्रीडनम्	"
वलिपूजा	"
अत्रैव द्यूतं कर्त्तव्यम्	२५६
गोवर्धनपूजा	"
मार्गपालीबन्धनम्	२५७
यमद्वितीयानिर्णयः	२५८
यमपूजनम्	"
अत्र भगिनीहस्ताद्भोजनम्	"
शुक्लनवमी युगादिः	२५९

विषयाः	पृष्ठाङ्काः
अत्रैव विष्णुत्रिरात्रव्रतम्	२५९
शुक्लैकादश्यां भीष्मपञ्चकव्रतम्	"
शुक्लद्वादश्यां पारणं कार्यम्	२६१
अस्यामेव रात्रौ देवोत्थापनम्	"
चातुर्मास्यव्रतसमाप्तिः	२६२
वाराहोक्तो बोधनीविधिः	"
इदं शुक्रास्तादावपि कार्यम्	"
आशौचे तु अन्यद्द्वारा कारयेत्	"
शुक्लद्वादशी पौर्णमासी च मन्वादिः	२६३
वैकुण्ठचतुर्दशीनिर्णयः	"
अस्यामेव विश्वेश्वरप्रतिष्ठा	
कार्तिकव्रतोद्यापनम्	"
कार्तिकपूर्णिमानिर्णयः	२६४
अत्र विशेषयोगः	"
अस्यामेव प्रयागादिस्नानम्	"
अस्यामेव मत्स्यावतारः	"
त्रिपुरोत्सवः	"
अस्यां वृषोत्सर्गोऽतिप्रशस्तः	२६५
कार्तिकेयदर्शनम्	"

मार्गशीर्षमासः—

वृश्चिकसंक्रान्तिः	२६५
मार्गकृष्णाष्टमी कालाष्टमी	"
तत्रोपवासादिविधिः	"
अत्र कालभैरवपूजा	२६६
मार्गशुक्लपञ्चम्यां नागपूजा	"
मार्गशुक्लषष्ठी चम्पाषष्ठी	"
इयमेव स्कन्दषष्ठी	२६७
शुक्लचतुर्दश्यां कपालमोचनतीर्थे श्राद्धम्	"
मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः	"
मार्गपौर्णिमानन्तराष्टमी अष्टका	"

विषयाः	पृष्ठाङ्काः
अष्टकानिर्णयः	२६७
अन्वष्टकातिथयः	२६८
अत्र कामकालौ विश्वेदेवौ	"
अष्टकाश्राद्धाकरणे प्रायश्चित्तम्	"
मलमासे अष्टकानिर्णयः	"
मार्गादिरविवारे काम्यं व्रतम्	२६९

पौषमासः—

धनुः संक्रान्तिः	२६९
पौषशुक्लाष्टम्यां बुधयोगे सति	"
अत्रैव रोहिण्यार्द्रायोगे पुण्यतमत्वम्	"
पौषशुक्लैकादशी मन्वादिः	"
पौषामावास्यायामर्धोदययोगः	"
अत्र दानविशेषः	२७०

माघमासः—

माघस्नानम्	२७१
अत्राधिकारिणः	"
अशक्तौ उष्णोदकस्नानम्	२७२
विष्णुपूजानिर्णयः	"
मूलीदाने भोजने च	"
माघे मलमासे सति	"
माघस्नानमन्त्रः	"
सूर्यार्घ्यम्	२७३
स्नानकालः	"
इदं स्नानं प्रयागेऽतिप्रशस्तम्	"
समुद्रेऽप्यतिप्रशस्तम्	२७४
माघस्नाने नियमाः	"
प्रयागासंभवे काश्याम्	२७५
स्नानोत्तरकृत्यम्	"
तत्र देयानि	"
अत्रैकादशीवत् व्रतोद्यापनम्	२७६

विषयाः पृष्ठाङ्काः
मकरसंक्रान्तिनिर्णयः २७६
मकरे दानविशेषः २७९
अत्र रात्रावपि श्राद्धम् "
माघामायामर्धोदययोगः "
माघकृष्णचतुर्दश्यां यमतर्पणम् "
माघशुक्लचतुर्थी तिलचतुर्थी "
इयमेव कुन्दचतुर्थी २८०
माघशुक्लपञ्चमी श्रीपञ्चमी "
अत्र कृत्यविधिः "
माघशुक्लसप्तमी रथसप्तमी २८३
तस्यां अरुणोदये स्नानफलम् "
इयमेव अचलासप्तमी "
तस्यां स्नानदीपदानादि "
स्नानमन्त्राः २८४
अर्घ्यादिमन्त्राः "
अत्र दानविशेषः २८५
इयं मन्वादिरपि "
माघशुक्लाष्टमी भीष्माष्टमी "
अत्र भीष्मतर्पणम् "
एतच्च जीवत्पितृकस्यापि भवति २८६
माघशुक्लद्वादशी भीष्मद्वादशी "
माघपूर्णिमानिर्णयः "

फाल्गुनमासः–

फाल्गुनकृष्णाष्टमी सीताष्टमी २८७
फाल्गुनकृष्णचतुर्दशी शिवरात्री "
शिवरात्रिनिर्णयः "
व्रतपारणानिर्णयः २९१
इदं व्रतं नित्यं काम्यं च २९२
अस्यारम्भः २९३
व्रतविधिः २९५
पूजप्रकारः "
विषयाः पृष्ठाङ्काः
शिवरात्रिव्रतकथा २९८
व्रतोद्यापनम् ३१७
माघामावास्या युगादिः ३१९
फाल्गुनीपौर्णमासी होलिका ३२०
भद्रानिर्णयः "
भद्रामुखम् ३२१
ग्रहणे होलिकानिर्णयः ३२२
मलमासे सति निर्णयः "
चैत्रकृष्णप्रतिपदि वसन्तोत्सवः "
अत्र श्वपचस्पर्शनम् "
होलिकाविभूतिवन्दनम् ३२३
अत्र चूतकुसुमप्राशनम् "
चैत्रामावास्यामन्वादिः "
अथ सामान्यपूजा "
तत्र पार्थिवशिवलिङ्गपूजा "
उपचाराः ३२७
पाद्याङ्गानि ३२८
आचमनीयम् "
उद्वर्तनम् "

शान्तिप्रकरणे–

दुष्टरजोदर्शनशान्तिविधिः ३२९
तत्र प्रयोगः ३३१
बौधायनोक्तऋतुशान्तिः ३३५
कन्यायाः बालवैधव्यहेतुलक्षणग्रह–योगशान्तिः ३३६
अर्कविवाहविधिः ३३८
अथ प्रयोगः ३४१
गोमुखप्रसवविधिः ३४४
अथ प्रयोगः ३४७
कृष्णचतुर्दशीजननशान्तिविधिः ३४९
अथ प्रयोगः ३५१

विषयाः	पृष्ठाङ्काः
सिनीवालीकुहूजननशान्तिविधिः	३५३
अथ प्रयोगः	३५६
दर्शजननशान्तिविधिः	३५९
अथ प्रयोगः	३६०
मूलजननशान्तिः	३६२
मूलशान्तिविधिः	३६७
शतमूलानि	३७६
सर्वौषधिगणः	३७७
मूलाश्लेषाशान्तिप्रयोगः	३७८
एकनक्षत्रजननशान्तिविधिः	३८५
अथ प्रयोगः	३८६
नक्षत्रगण्डान्तशान्तिविधिः	"
दिनक्षयादिशान्तिः	३८८
नक्षत्रगण्डान्तशान्तिप्रयोगः	३८९
उत्तरादिशान्तिविधिः	३९०
विषघटिकाशान्तिविधिः	"
ग्रहणोत्पत्तौ शान्तिः	३९३
यमलजननशान्तिः	३९५
सदन्तजननशान्तिः	३९६
त्रिकप्रसवशान्तिः	३९८
सिंहराशौ गोप्रसूते शान्तिः	३९९
वालग्रहशान्तिः	४००
वालग्रहस्तवः	४०२
वालग्रहशान्तौ विशेषः	४०६
ज्वरादिरोगोत्पत्तौ शान्तयः	४१२
वारशान्तयः	४१५
नक्षत्रशान्तयः	४१६
विशेषनक्षत्रेषु रोगोत्पत्तौ शान्तिः	४१७
वलिदानमन्त्रः	४२३
तिथिवारर्क्षेषु साधारणप्रयोगः	४२४
पञ्चकमरणशान्तिः	४२५
अथ प्रयोगः	४२७

विषयाः	पृष्ठाङ्कः
त्रिपुष्करद्विपुष्करशान्तिः	४३१
त्रिपादर्क्षमरणशान्तिविधिः	"
गजशान्तिः	४३२
अश्वशान्तिः	४३५
गोशान्तिः	४३९
काकमैथुनदर्शनशान्तिः	४४१
काकस्पर्शशान्तिः	४४३
पल्लीसरटशान्तिः	४४७
ग्राम्यारण्यादिशान्तिः	४४८
कपोतशान्तिः	४५०
कृत्याशान्तिः	४५१
अशनिदग्धगृहादिशान्तिः	४५२
उत्पातलक्षणानि	"
उल्कादिलक्षणं तत्फलं च	४५७
परिवेषः	४५८
इन्द्रधनुः	"
निर्घातः	४५९
रजः	"
भूकम्पः	"
ग्रहयुद्धम्	४६०
प्रतिसूर्यः	"
रश्मिदण्डः	"
दिग्दाहः	"
छाया	४६१
मेघगर्भोपघातः	"
अद्भुतपाककालः	"
अद्भुतफलस्नानानि	४६३
वृक्षोत्पातफलम्	४६४
उत्पातशान्तिः	"
देवताप्रतिमादिविकारे शान्तिः	४६५
अग्निविकारे	४६६
वृक्षविकारे	४६७

विषयाः पृष्ठाङ्काः
वृष्टिविकारे ४६९
जलाशयविकारे ४७०
उपस्करविकारे ४७१
मृगपक्षिविकारे "
अनिमित्तगृहादिपाते शान्तिः ४७३
नानोत्पातशान्तिः ४७५
क्षीरशान्तिविधिः ४७९
मृतजीवनशान्तिः ४८०
जनमारीशान्तिः "
अकालहस्तिमदशान्तिः ४८१
हस्तिनीधेनुमदशान्तिः ४८२
लिङ्गादिभङ्गे शान्तिः "
स्वप्नाः ४८४
शुभस्वप्नाः ४८५
दुःस्वप्नाः ४८७
दुःस्वप्नशान्तिः ४९०
अनावृष्टिशान्तिः ४९२
राज्याभिषेकः ४९४
अभिषेकमन्त्राः ५०३
प्रतिवर्षाभिषेकः ५१६
सिंहासनच्छत्रलक्षणम् ५१८
दुर्गविधिः ५२०

विषयाः पृष्ठाङ्काः

प्रकीर्णप्रकरणे–

गङ्गास्नानमन्त्रः ५२३
गण्डकीस्नानमन्त्रः "
कौशिकीमन्त्रः "
वाग्वतीमन्त्रः "
गङ्गासागरमन्त्रः "
नर्मदामन्त्रः "
गोमतीमन्त्रः ५२४
तपनीमन्त्रः "
आसनमन्त्रः "
मृत्तिकामन्त्रः "
दन्तधावनमन्त्रः "
पुत्रप्रदोमन्त्रः ५२५
गणेशमन्त्रः "
ग्रहणस्नानमन्त्रः "
वृष्टिकारकमन्त्रः ५२६
गतराज्यप्रदोमन्त्रः ५२७
सर्वशान्तिकृन्मन्त्रः "
सङ्ग्रामविजयमन्त्रः ५२८
गजेन्द्रमोक्षः ५२९
अनुक्रमणिका ५३७
ग्रन्थकर्तुः क्षमायाचना ५४१

इति

–०–

परिशिष्टे विषयानुक्रमः

नवग्रहादिदेवानां जपसूक्तानि–

विषयाः	पृष्ठाङ्काः
सूर्यस्य	१
सोमस्य	२
भौमस्य	३
वुधस्य	"
वृहस्पतेः	"
शुक्रस्य	"
शनेः	"
राहोः	४
केतोः	"
ईश्वरस्य	"
उमायाः	९
स्कन्दस्य	"
विष्णोः	"
व्रह्मणः	१०
इन्द्रस्य	"
यमस्य	११
कालस्य	१२
चित्रगुप्तस्य	"
अग्नेः	"
अपाम्	१३
भूमेः	"
विष्णोः	"
इन्द्रस्य	१४
इन्द्राण्याः	१४
प्रजापतेः	"
सर्पस्य	"
व्रह्मणः	१५
विनायकस्य	"
दुर्गायाः	"
वायोः	"
आकाशस्य	१६
अश्विनोः	"
इन्द्रस्य	"
अग्नेः	१७
यमस्य	"
निर्ऋतेः	"
वरुणस्य	"
वायोः	"
सोमस्य	१८
ईशानस्य	"
सर्पस्य	"
व्रह्मणः	"
ध्रुवाद्यष्टवसूनाम्	"
धात्रादिद्वादशादित्यानाम्	"
वीरभद्राद्येकादशरुद्राणाम्	१९
गौर्यादिषोडशमातृणाम्	"
आवहादिसप्तमरुताम्	"

विषयाः पृष्ठाङ्काः
विनायकस्य १९
ब्रह्मणः ”
विष्णोः ”
रुद्रस्य ”
अर्कस्य २०
वनस्पतेः ”

वारुणमण्डलस्थदेवानां मन्त्राः–

ब्रह्मणः २०
कुबेरस्य ”
ईशानस्य ”
इन्द्रस्य ”
अग्नेः ”
यमस्य २१
निर्ऋतेः ”
वरुणस्य ”
वायोः ”
वीरभद्राद्येकादशरुद्राणाम् ”
धात्रादिद्वादशादित्यानाम् ”
अश्विनोः ”
विश्वेदेवानाम् २२
सप्तयक्षाणाम् ”
भूतनागानाम् ”
गन्धर्वाप्सरसाम् ”
स्कन्दनन्दिनोः ”
शूलमहाकालयोः ”
दक्षादिसप्तानाम् २३
दुर्गायाः ”
विष्णोः ”
स्वधाकारस्य ”
मृत्युरोगयोः ”
गणपतेः ”

विषयाः पृष्ठाङ्काः
अपाम् २३
मरुताम् २४
पृथिव्याः ”
गङ्गादिनदीनाम् ”
सप्तसागराणाम् ”
मेरोः ”
गणेशसूक्तम् ”
सौरसूक्तम् २५
ध्रुवसूक्तम् २९
पितृसूक्तम् ”
नारायणबलिप्रयोगे होममन्त्राः ४३
नारायणबलिप्रयोगे तर्पणमन्त्राः ४५
श्रीसूक्तम् ५०

रुद्रसूक्तानि–

कद्रुदायेति नव ५२
इमारुद्रायेत्येकादश ५३
आतेपितरिति पञ्चदश ५४
इमारुद्राय स्थिरधन्वन इति चतस्रः ५५
आवो राजानमित्येका ”
तमुष्टुहीत्येका ”
भुवनस्य पितरमित्येका ”
त्र्यम्बकमित्येका ”
शन्न इन्द्राग्नीति पञ्चदश ५६

अभिषेकमन्त्राः–

(रजोशान्तिप्रकरणोक्ताः)

आपो हिष्ठेति नव ५७
य एक इद्विदयत इत्येका ”
त्रिभिष्ट्वं देव इति सप्त ”
उभयं शृणवच्च न इत्येका ५८
स्वस्तिदा विश इत्येका ”

विषयाः	पृष्ठाङ्काः
त्र्यम्बकमित्येका	५८
जातवेदस इत्येका	"
समुद्रज्येष्ठा इति चतस्रः	"
त्रायन्तामिति तिस्रः	५९
इमा आप इति तिस्रः	"
देवस्य त्वा इति तिस्रः	"
तमीशानमित्येका	"
त्वमग्ने रुद्र इत्येका	६०
तमुष्टुहीत्येका	"
भुवनस्य पितरमित्येका	"
यातेरुद्र इत्येका	"
यज्जाग्रत इति षट्	"
इन्द्र त्वा वृषभं वयमिति पञ्च	६१
सुरास्त्वामभिषिञ्चन्त्विवति नव	"

महाशान्तिमन्त्राः–

(रजोशान्तिप्रकरणोक्ताः)

आनो भद्रा इति दश	६२
स्वस्ति नो मिमीतामिति पञ्च	६३
त्यमूषु इति तिस्रः	"
तच्छंयोरित्येका	"

जपसूक्तानि–

(कृष्णचतुर्दशीजननशान्तिप्रकरणोक्तानि)

भद्रा अग्न इति द्वादश	६४

जप सूक्तानि––

(मूलशान्तिप्रकरणोक्तानि)

आशुः शिशान इति द्वादश	६५
त्वमग्ने रुद्र इत्यष्टाविंशतिः	६६
त्वभग्ने वृहद्वय इति विंशतिः	६८
रक्षोहणं वाजिनमिति पञ्चविंशतिः	६९

होममन्त्राः–

(मूलशान्तिप्रकरणोक्ताः)

कुणुष्व पाज इति पञ्चदश	७१
त्वन्नः सोम इत्येका	७२

पूर्णाहुतिमन्त्राः–

समुद्रादूर्मिरित्यादि पञ्चदश	७२

अभिषेकन्त्राः–

(मूलशान्तिप्रकारणोक्ताः)

अक्षीभ्यामिति षट्	७३
पवस्व विचर्षणीति त्रिंशत्	७४
सहस्राक्षेणेति तिस्रः	७५
देवस्य त्वा इति तिस्रः	"
यज्जाग्रत इति षट्	७६
तच्छंयोरित्येका	"
शकुन्तसूक्तम्	"

इति

—०—

ग्रन्थकार--



श्री ५ महाराजाधिराज गीर्वाणयुद्ध वीरविक्रम साहदेव

जन्मसमयः- १८५४ वि. सं.

मृत्युसमयः- १८७३ वि. सं.

हरिः ॐ

अथ गोत्रप्रवरनिर्णयः[1] ॥

अथ विवाहोपयोगित्वाद्गोत्रप्रवरनिर्णयः ॥ तत्र बौधायनः– 'गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च । ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥ जमदग्निर्भरद्वाजो विश्वामित्रश्च गौतमः । अत्रिर्वसिष्ठः कश्यप इत्येते सप्तर्षयः ।' सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति । प्रव्रियन्ते होत्रध्वर्युभ्यामुत्कीर्त्यन्त इति प्रवराः । समानप्रवरां समानगोत्रां च नोद्वहेत् । 'पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः । भृग्वङ्गिरोगणेष्वेव शेषेष्वेकोऽपि वार्यते ॥' इति परिभाषा । यानित्यधिकृत्य प्रवरा आम्नातास्तादृशा गणा ऊनपञ्चाशत् । तथाहि–

भृगूणां सप्तान्तर्गणाः । तत्र त्रयो जामदग्न्याः– 'वत्सा बिदा आर्ष्टिषेणाश्चेति' । वत्सानां पञ्चप्रवराः । 'भार्गवच्यावनाप्नवानौर्वजामदग्न्येति' । त्रयो वा – 'भार्गवौर्वजामदग्न्येति, भार्गवच्यावनाप्नवानेति वा' । बिदानां पञ्चप्रवराः– 'भार्गवच्यावनाप्नवानौर्वबिदेति' ।

---

[1] गोत्र र प्रवर समान भएका केटा र केटीको विवाह गर्नु हुंदैन, यदि कुनै पुरुष सगोत्र र समान-प्रवर भित्रकी कन्यासंग विवाह गर्छ भने त्यो पापी हुन्छ भन्ने शास्त्रको वचन भएकाले विवाह भन्दा अगाडि यति यति सगोत्र र यति यति समान-प्रवरका हुन्छन् र यिनिहरूको परस्परमा विवाह हुन सक्तैन भन्ने कुराको यहां निर्णय गरिन्छ ।

त्रयो वा– 'भार्गवौर्वजामदग्न्येति' । आर्ष्टिषेणानाम्– 'भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति' पञ्चप्रवराः । 'भार्गवार्ष्टिषेणानूपेति' त्रयो वा । एषां त्रयाणां परस्परमविवाहः । गोत्रैक्यात्प्रवरैक्याच्च । आर्ष्टिषेणानां केवलभार्गवमतेऽपि स्मृत्यर्थसारादिमतेऽपि बिदवत्साभ्यां सह प्रवरसाम्यादविवाह इति फलं तुल्यमेव । एते पञ्चावर्तिनः । ग्रन्थान्तरे यत्तु– जामदग्न्या वत्सास्तेषामार्षेय एव । 'भार्गवच्यावनाप्नवानेति' वात्स्यानाम् । आर्षेयः – प्रवरः । 'भार्गव च्यावन आप्नवान्' । वात्स्यपुरोधसेति वत्सपुरोधसयोः पञ्चार्षेयः । 'भार्गवच्यावनाप्नवानबैजवनिमथितेति' । पञ्चार्षेयः – प्रवरो बैजवनिमथितयोः । एषामपि परस्परं पूर्वैः सह अविवाहः प्रवरसाम्यात् । चत्वारः शुद्धभृगवः । यस्का मित्रयुवो वैन्याः शुनकाश्च । यस्कानामेव प्रवरः– 'भार्गववैतहव्यसावेतसेति' । मित्रयुवां त्रयः– 'भार्गवदिवोदासवाध्र्यश्वेति' भार्गवच्यावनदिवोदासेति वा' एको वा 'वाध्र्यश्वेति' । वैन्यानां त्रयः– 'भार्गववैन्यपार्थेति' । शुनकानामेकः– 'शौनकेति, गार्त्समदेति वा' । 'भार्गवगार्त्समदेति द्वौ वा' । 'भार्गवशौनहोत्रगार्त्समदेति त्रयो वा' । एषां चतुर्णां परस्परं विवाहोऽस्ति [1] । पूर्वोक्तैस्त्रिभिश्च । क्वचिदधिकं गणद्वयमुक्तम् । वेदविश्वज्योतिषामार्षेयः– प्रवरः– 'भार्गववेदवैश्वज्योतिषेति' । शाठरमाठराणाम्– 'भार्गवशाठरमाठरेति' । भृगोः सप्तवंशा निर्णीताः ।

आङ्गिरसाः षोडश । तत्र गौतमाङ्गिरसां सप्त– 'आयास्याः, शरद्वन्तः, कौमण्ठाः, दीर्घतमसः, कारेणुपालयः, वामदेवा, औशनसाश्चेति' । तत्र आयास्यानां त्रयः प्रवराः– 'आङ्गिरसायास्यगौतमेति' । शरद्वतां त्रयः– 'आङ्गिरसगौतमशारद्वतेति' । त्रयो वा 'आङ्गिरससैन्यगार्ग्येति', 'भारद्वाजसैन्यगार्ग्येति वा', 'आङ्गिरसतैत्तिरकापिकवेति

---

[1] यी यस्कादि चारगणमा आफ्नो गणलाई छोडेरमात्र विवाह हुन्छ ।

वा' । अ (ऋ) क्षाणां पञ्च– 'आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातसवेति' । त्रयो वा– 'आङ्गिरसवान्दनमातसवेति' । कपीनां त्रयः प्रवराः– 'आङ्गिरसामहीयवौरुक्षयसेति', 'आङ्गिरसबार्हस्पत्यभारद्वाजेति वा', 'आङ्गिरसबार्हस्पत्यकापेयेति वा' । एषां चतुर्णां भारद्वाजानां गोत्रैक्यात्प्रायेण प्रवरैक्याच्च नान्वयः । केचित्तु– 'आमहीयव औरुक्षयसप्रवरस्य कपेर्विष्णुवृद्धादिवत्केवलाङ्गिरसत्वं स्वीकृत्य भारद्वाजैः सहान्वयमिच्छन्ति तन्नादर्तव्यम्, गोत्रप्रवरमञ्जरीप्रयोगपारिजातस्मृत्यर्थसारादिबहुग्रन्थविरोधात् ।

केवलाङ्गिरसस्तु पञ्च– 'विष्णुवृद्धाः कण्वा हारिता रथीतरा मुद्गलाश्चेति' । तत्र विष्णुवृद्धानां त्रयः– 'आङ्गिरसपौरुकुत्स्यत्रासदस्यवेति' । काण्वानां त्रयः– 'आङ्गिरसाजमीढकाण्वेति' । हारितानां त्रयः– 'आङ्गिरसाम्बरीषयौवनाश्वेति', 'मान्धाताम्बरीषयौवनाश्वेति वा' । रथीतराणां त्रयः– 'आङ्गिरसवैरूपराथीतरेति', 'आङ्गिरसवैरूपपार्षदश्वेति वा' । मुद्गलानां त्रयः–'आङ्गिरसभार्म्याश्वमौद्गल्येति', 'तार्क्ष्यभार्म्याश्वमौद्गल्येति वा'। विष्णुवृद्धानां पञ्चानामपि केवलाङ्गिरसां स्वं स्वं गणं हित्वा अन्यैः सह विवाहोऽस्ति । क्वचित्तु, अन्येऽपि केवलाङ्गिरसः पठ्यन्ते । यथा– कुत्सानां त्रयः– 'आङ्गिरसमान्धातृकौत्सेति' । एषां हारितैरविवाहः । 'हारितकुत्सपिसङ्गदर्भभैमगवानाम्' इत्याश्वलायनेन सर्वप्रवरसाम्योक्तेः । पृषदश्वानां त्रयः– 'आङ्गिरसपार्षदश्ववैरूपेति', 'अष्टादंष्ट्रपार्षदश्ववैरूपेति वा' । एषां रथीतरैरविवाहः । प्रवरद्वयसाम्यात् । इत्थमङ्गिरसां षोडशगणा निर्णीताः ॥

अत्रेश्चत्वारो भेदाः । अत्रयः, वाद्भुतकाः, गविष्ठिराः, मुद्गला इति । आद्यात्रीणां त्रयः प्रवराः– 'आत्रेयार्चनानसश्यावाश्वेति' । गविष्ठिराणां त्रयः– 'आत्रेयार्चनानसगाविष्ठिरेति', 'आत्रेयगाविष्ठिरपूर्वातिथेति वा' । वाद्भुतकानां त्रयः– 'आत्रेयार्चनानसवाद्भुतकेति' । मुद्गलानां त्रयः– 'आत्रेयार्चनानसपौर्वातिथेति' । एषां चतुर्णां पर-

स्परमविवाहः । क्वचित्तु, अतिथीनां त्रयः– 'आत्रेयार्चनानसपौर्वातिथेति' । धनञ्जयानां त्रयः– 'आत्रेयार्चनानसधानञ्जयेति' । सुमङ्गलानां त्रयः– 'अत्रिसुमङ्गलश्यावाश्वेति' । इत्यत्रिवंशा निर्णीताः ।

कश्यपानां त्रयो भेदाः । निध्रुवाः, रैभाः, शाण्डिला इति । तत्र निध्रुवाणां त्रयः– 'काश्यपावत्सारनैध्रुवेति' । रैभाणां त्रयः– 'काश्यपावत्साररैभेति' । शाण्डिलानाम्– 'काश्यपावत्सारशाण्डिलेति', 'काश्यपावत्सारदैवलेति वा' । 'काश्यपावत्सारासितेति वा', 'शाण्डिलासितदैवलेति वा', 'काश्यपासितदैवलेति वा' । 'दैवलासितेति द्वौ वा' । एषां त्रयाणां कश्यपानां परस्परं नोद्वाहः । क्वचित्तु पञ्चभेदा उक्ताः । तत्र त्रयः पूर्वोक्ता एव । कश्यपानां त्रयः– 'काश्यपावत्सारासितेति' । लौगाक्षाणाम्– 'काश्यपावत्सारवासिष्ठेति' ।

वसिष्ठानां चत्वारो भेदाः । वसिष्ठाः, कुण्डिनाः, उपमन्यवः, पराशरा इति । वसिष्ठानामेकः– 'वासिष्ठेति' । त्रयो वा– 'वासिष्ठेन्द्रप्रमदाभरद्वस्विति' । कुण्डिनानां त्रयः– 'वासिष्ठमैत्रावरुणकौण्डिन्येति' । उपमन्यूनां त्रयः– 'वासिष्ठेन्द्रप्रमदाभरद्वस्विति' । पराशराणां त्रयः– 'वासिष्ठशाक्त्यपाराशर्येति' । एषां चतुर्णां वासिष्ठानां परस्परमविवाहः । क्वचित्पञ्चभेदाः । तत्र चत्वारः पूर्वोक्ता एव । जातूकर्ण्यानां त्रयः– 'वासिष्ठात्रिजातूकर्ण्येति' ।

अथ विश्वामित्राः । ते दश– कुशिकाः, लोहिताः, रौक्षकाः, कामकायनाः, धनञ्जयाः, कताः, अजाः, अघमर्षणाः, पूरणाः, इन्द्रकौशिका इति । तत्र कुशिकानां त्रयः– 'विश्वामित्रदेवरातौदलेति' । लोहितानां त्रयः– 'विश्वामित्राष्टकलौहितेति', 'विश्वामित्रमाधुच्छन्दसाष्टकेति वा' 'विश्वामित्राष्टकेति द्वौ वा' । रौक्षकाणां त्रयः– 'वैश्वामित्ररौक्षकरैवणेति', 'वैश्वामित्रगाधिनरैवणेति वा' । कामकायनानां त्रयः– 'वैश्वामित्रदैवश्रवसदैवतसेति' । धनञ्जयानां त्रयः– 'वैश्वामित्रमाधुच्छन्दसधानञ्जयेति', 'वैश्वामित्रमाधुच्छ-

न्दसाघमर्षणेति वा' । कतानां त्रयः– 'वैश्वामित्रकात्यात्कीलेति' । अजानां त्रयः– 'वैश्वामित्रमाधुच्छन्दसाजेति' । अघमर्षणानां त्रयः– 'वैश्वामित्राघमर्षणकौशिकेति' । पूरणानां द्वौ– 'वैश्वामित्रपूरणेति' । इन्द्रकौशिकानां द्वौ– 'वैश्वामित्रेन्द्रकौशिकेति' । एषां दशानां परस्परमविवाहः । क्वचित्त्वन्येऽप्युक्ताः । अजानां कुशिकानां च त्रयः– 'वैश्वामित्रास्मरथ्यबान्धुलेति' । हर्यश्वादीनां त्रयः– 'विश्वामित्रगाधिनरैवणेति' । वेणूनां त्रयः । 'वैश्वामित्रगाधिनवैणवेति' । शालङ्कायनानां त्रयः– 'वैश्वामित्रशालङ्कायनकौशिकेति' । रौहिणानां त्रयः– 'वैश्वामित्रमाधुच्छन्दसरौहिणेति' । कथकानां त्रयः– 'वैश्वामित्रकाथकक्राथकेति' । साहुलानां त्रयः– 'वैश्वामित्रसाहुलबाहुलेति' । हिरण्यरेतसां द्वौ– 'वैश्वामित्रहैरण्यरेतसेति' । सुवर्णरेतसां द्वौ– 'वैश्वामित्रसौवर्णरेतसेति ' । कपोतरेतसां द्वौ– 'वैश्वामित्रकापोतरेतसेति' । घृतकौशिकानां द्वौ– 'वैश्वामित्रघृतकौशिकेति' ।

अथागस्तयः । ते चत्वारः– इध्मवाहाः, साम्भवाहाः, सोमवाहाः, यज्ञवाहा इति । (इध्मवाहानां त्रयः– 'आगस्त्यदार्ढ्यच्युतैध्मवाहेति' । एको वा– 'आगस्त्येति' । साम्भवाहानां त्रयः– 'आगस्त्यदार्ढ्यच्युतसाम्भवाहेति[1] ' ।) सोमवाहानां त्रयः– 'आगस्त्यदार्ढ्यच्युतसोमवाहेति' । यज्ञवाहानां त्रयः– 'आगस्त्यदार्ढ्यच्युतयज्ञवाहेति' । एषां चतुर्णां परस्परमविवाहः । कात्यायनसूत्रे तु, पुलस्त्यपुलहक्रतूनां (दर्भवाहानां) त्रयः– 'आगस्त्यदार्ढ्यच्युतदार्भवाहेति' । शुकहंसादीनां त्रयः–'आगस्त्यहैमवर्चिहैमोदकेति' । पाणिकादीनां त्रयः–'आगस्त्यपैनायकपाणिकेति' । इत्यगस्तयः ।

इत्थं भृगवः सप्त ७। अङ्गिरसः षोडश १६। द्व्यामुष्यायणेषु वक्ष्यमाणाः साङ्कृतपोथ्याङ्गिरसस्ते एके १। अत्रयश्चत्वारः ४। कश्यपास्त्रयः ३।

---

[1] यो कोष्ठभित्रको पाठ मूलमा छैन ।

वसिष्ठाश्चत्वारः ४। विश्वामित्रा दश १०। अगस्तयश्चत्वारः ४। इत्थमेकोनपञ्चाशद्गणा निर्णीताः।

अथ द्व्यामुष्यायणाः। देवरातानां त्रयः– 'वैश्वामित्रदैवरातऔदलेति'। एषां विश्वामित्रजमदग्निभ्यां नान्वयः। शौङ्गशैशिरीणां पञ्च – 'आङ्गिरसबार्हस्पत्यभारद्वाजकात्याक्षीलेति', 'आङ्गिरसबार्हस्पत्यभारद्वाजशौङ्गशैशिरेति वा' त्रयो वा–'आङ्गिरसकात्याक्षीलेति', 'भारद्वाजकात्याक्षीलेति वा'। एवं विश्वामित्रभरद्वाजाभ्यां नान्वयः। कतानां त्रयः– 'वैश्वामित्रकात्याक्षीलेति'। एषामपि विश्वामित्रभरद्वाजाभ्यां नान्वयः। कपिलानां पञ्च– 'आङ्गिरसबार्हस्पत्यभारद्वाजवादनमानवचसेति'। एषामपि भरद्वाजविश्वामित्राभ्यां नान्वयः। वामरथ्यानां त्रयः– 'आत्रेयवामरथ्यपौत्रिकेति'। एषामत्रिविश्वामित्राभ्यां नान्वयः। धनञ्जयानां त्रयः–'वैश्वामित्रमाधुच्छसधानञ्जयेति'। एषामप्यत्रिविश्वामित्राभ्यां नान्वयः। जातूकर्ण्यानां त्रयः– 'वासिष्ठात्रेयजातूकर्ण्येति'। एषामत्रिवसिष्ठाभ्यां नान्वयः। सङ्कृतीनां त्रयः– 'आङ्गिरसगौरीवीतसाङ्कृत्येति'। एषां स्वगणस्थैस्तथा वसिष्ठैः कश्यपैश्च न संबन्धः। एषां केवलाङ्गिरोमध्यपाठस्य फलं चिन्त्यम्। सूतिमाषाणां सर्वं सङ्कृतिवत्। लौगाक्षीणां त्रयः – 'काश्यपावत्सारासितेति'। इदं त्ववधेयम्। इदानीन्तनानामपि दत्तकानां द्वयोरपि पित्रोः सगोत्रैरविवाहः। 'गोत्ररिक्थे जनयितुर्न भजेदमित्रः सुतः' इति मनुवचनात्। दत्तस्योत्पादकगोत्रसंबन्धाभावेऽपि पितृसगोत्रत्वप्रतिषेधात्। 'असगोत्रा च या पितुः' इत्यत्र पितृग्रहणस्य ह्येतदेव प्रयोजनं स्मृतिचन्द्रिकादौ स्थितम्। नन्वेवं दत्तकस्य पुत्रपौत्रादीनां गोत्रद्वयविवाहनिषेधो न लभ्येतेति चेन्न। तत्रापि पारिजातोदाहृतवचनान्तरान्तर्लाभात्। अत एव दत्तस्य देवरातस्य द्व्यामुष्यायणेषु गणनं सङ्गच्छते। गोत्रप्रवरमञ्जरीकारोऽप्याह– 'एवं पुत्रिकापुत्रदत्तक्रीतपुत्रादीनामपि द्वयोरपि गोत्रयोरविवाहः' इति। 'न चैवं गोत्ररिक्थे'

इति मनुवचनस्य निर्विषयत्वं शङ्क्यम् । आर्षेयवरणाभिवादनादिषु श्राद्धदेवतात्वे च जनकगोत्रनिवृत्त्यर्थत्वात्तस्येति दिक् । आपस्तम्बधर्मव्याख्यायामुज्ज्वलायां हरदत्तकृतायां पैठीनसिः-- 'अथ दत्तक्रीतकृत्रिमपुत्राः परपरिग्रहेणार्षेयेण जातास्ते संहताः कुलीना द्व्यामुष्यायणा भवन्तीति' । इति द्व्यामुष्यायणवर्गः ।।

गोत्रप्रवरेत्येतौ च भिन्नौ निषेधनिमित्तम् । 'सगोत्राय दुहितरं न प्रयच्छेत्' इत्यापस्तम्बोक्तेः । 'असमानप्रवरैर्विवाहः' इति गौतमोक्तेश्च । तत्र गोत्रप्रवरलक्षणमाह प्रवरमञ्जर्यां बौधायनः— 'विश्वामित्रो जमदग्निर्भरद्वाजो गौतमोऽत्रिर्वसिष्ठः कश्यप एते सप्तर्षयः । सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति' । यद्यपि केवलभार्गवेषु आर्ष्टिषेणादिषु च केवलाङ्गिरसेषु च हारितादिषु नैतत् । भृग्वङ्गिरसोरुक्तेष्वनन्तर्गतेः । तथाप्यत्रेष्टापत्तिरेवेति केचित् । अत एव स्मृत्यर्थसारे— प्रवरैक्यादेवात्राविवाहः । यद्यपि वसिष्ठादीनां न गोत्रत्वं युक्तम् । तेषां सप्तर्षित्वेन तदपत्याभावात् । तथापि तत्पूर्वभाविवसिष्ठाद्यपत्यत्वेन गोत्रत्वं युक्तम् । अत एव पूर्वेषां परेषां चैतद्गोत्रम् । अत्र विशेषः प्रवरदर्पणेऽवध्येयः । प्रवरास्तु— प्रवरणानि प्रवराः । कल्पकारा हि— 'वासिष्ठेति होता, वसिष्ठवदित्यध्वर्यु' रित्यादिना येषां वरणमामनन्ति ते प्रवराः । ततश्च वरणम् । यद्यपि गोत्रभूतस्यापि दृश्यते तथापि पूर्ववदृषिभेदो द्रष्टव्यः । अन्यथा तेषामार्षेये 'एकार्षेय' इत्यादिनिर्देशानुपपत्तेः । अन्ये तु तद्गोत्राणामार्षे क्वचिद्भेदमाहुरिति दिक् । तत्त्वं तु गोत्रभूतस्य पितृपितामहा एव प्रवराः । 'पितैवाग्रेऽथ पुत्रोऽथपौत्रः' इति शतपथश्रुतेः । 'परं परं प्रथमम्' इत्याश्वलायनोक्तेश्च । अत्र विशेषमाह बौधायनः— 'एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वमन्यत्र भृग्वङ्गिरसां गणात् ।।' इति । स्मृत्यर्थसारः— "म्रियमाणतया वापि सत्तया वानुवर्तनम् । एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ।।" भृग्वङ्गिरोगणेषु तु माधवीये स्मृत्यन्तरे— 'पञ्चानां

त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः । भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोऽपि वारयेत् ।।' शेषगोत्रेषु एकोऽपि समानप्रवरो विवाहं वारयेदित्यर्थः । बौधायनोऽपि भृग्वङ्गिरसावधिकृत्य--- 'द्व्यार्षेयसन्निपातेऽविवाहस्त्र्यार्षेयाणां, त्र्यार्षेयसन्निपातेऽविवाहः पञ्चार्षेयाणाम्' इति । भृग्वङ्गिरोगणेष्वपि जमदग्निगौतमभरद्वाजेषु एव प्रवरसाम्ये सर्वेषामप्यसाम्ये वा सगोत्रत्वादेवाविवाह इति दिक् । इति गोत्रप्रवरनिर्णयः ।।

अथ साषिण्ड्यनिर्णयः[1] ।।

अथ विवाहौपयिकानि वचनानि । याज्ञवल्क्यः -- 'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।। अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्[2] ।' मनुः--- 'असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ।।' नारदः--- 'वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः । पञ्चमी चेत्तयोर्माता तत्साषिण्ड्यं निवर्तते ।। आ सप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः । अविवाह्या सगोत्रा च समानप्रवरा तथा ।।' विश्वरूपनिबन्धे--- 'एवमुक्तप्रकारेण पितृबन्धुषु सप्तमात् । ऊर्ध्वमेव विवाह्यत्वं पञ्चमान्मातृबन्धुतः ।। सन्तानो भिद्यते यस्मात्पूर्वजादुभयत्र च । तमादाय गणेद्धीमान् वरं यावच्च कन्यकाम् ।।' ब्राह्मे--- 'सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी । सपिण्डता ततः पश्चात्समानोदकधर्मता ।।' आपदि पराशरः--- 'चतुर्थीमुद्वहेत्कन्यां चतुर्थः

---

[1] १. साषिण्ड्य भित्रका नाता-गोतासंग विवाह नगर्नू भन्ने शास्त्रको वचन छ । यदि कुनै पुरुष शास्त्रको उल्लङ्घन गरी सापिण्ड्यभित्रकी कन्यासंग विवाह गर्छ भने त्यो पापको भागी हुन्छ र प्रायश्चित्तले मात्र शुद्ध हुन्छ । कुनै त्यस्तो भुलचुकबाट सापिड्यभित्र विवाह भैहाले पनि त्यस्ती पत्नीलाई भोग नगरी आमा समान भरण पोषण गर्नुपर्छ । त्यसकारण अर्थात् कति नाता-सम्वन्ध भित्रलाई सापिण्ड्यभित्रका र कतिदेखि सापिण्ड्य बाहिरका हुन्छन् भन्ने यिनै कुराको यहाँ निर्णय गरिन्छ ।

[2] २, मूलमा 'असपिण्डार्षगोत्रजाम्' पाठ छ ।

पञ्चमोऽपि वा । पराशरमते षष्ठीं पञ्चमो न तु पञ्चमीम् ।।' शातातपः-- 'मातृष्वसुः सुतां कश्चित्पितृष्वसुः सुतां तथा । विवहन्ति क्वचिद्देशे सङ्कोच्यापि सपिण्डताम् ।।' स एव-- 'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ।।' बृहस्पतिः-- 'उद्वाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः । मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ।। उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वलाः ।' इत्यनाचारत्वमाह । ब्राह्मे- 'यत्र मातुलजोद्वाही यत्र वै वृषलीपतिः । श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषम् ।।' मात्स्ये- 'समानप्रवरा चैव शिष्यसन्ततिरेव च । ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते ।।' बौधायनः-- 'मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत् । पितृव्यपत्न्या भगिनीं तत्सुतां च विवर्जयेत् ।। गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद् द्विजः । गुरोश्च कन्यां शिष्यो वा तत्सन्तत्यापि नेष्यते ।।' मनुः-- 'उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता' इति । 'पुरुषत्रयपर्यन्तं सापिण्ड्यं गुरुणेष्यते' । केचित्तु-- 'पुरुषत्रयपर्यन्तं भ्रात्रादेर्नैतदिष्यते । वाक्संबन्धकृतानां तु स्नेहसंबन्धभागिनाम् ।। विवाहोऽत्र न कर्तव्यो लोकगर्हा प्रसज्यते ।।' इत्याहुस्तत्र मूलं मृग्यम् । मनुः-- 'इत्थं सगोत्रसंबन्धविवाहविषये स्थिते । यदि कश्चिज्ज्ञानतस्तां कन्यामूढ्वोपगच्छति ।। गुरुतल्पव्रताच्छुद्ध्येद्गर्भस्तज्जोऽन्त्यतां व्रजेत् । भोगतस्तां परित्यज्य पालयेज्जननीमिव ।। अज्ञानादैन्दवैः शुद्ध्येत्त्रिभिर्गर्भस्तु काश्यपः । सपिण्डापत्यदारेषु प्राणत्यागो विधीयते ।।'

इति सापिण्ड्यनिर्णयः ।।

अथ विवाहकालो ज्योतिर्निबन्धे-- 'षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः । सोमो भुङक्ते ततस्तद्वद्गन्धर्वश्च ततोऽनलः ।।' राजमार्तण्डे-- 'अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् । तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ।। मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेऽपि

मासत्रयमेव यावत् । विवाहशुद्धिं प्रवदन्ति सन्तो वात्स्यादयः स्त्रीजनियुग्ममासात् ।।' इति ।।

अथ विवाहपद्धतिः[१] । तत्रादौ वाग्दानम् --

तत्र कन्याप्रदः प्रक्षालितपाणिपादः प्राङ्मुख उपविश्य आचम्य कुशादिकमादाय, ॐ अद्येत्यादि देशकालकीर्तनान्ते ... ... शर्माहं ... गोत्रोत्पन्नायाः ... ... कन्यायाः दीपकलशगणेशपूजनपूर्वकं करिष्यमाणविवाहाङ्गभूतं वाग्दानाख्यं कर्म करिष्ये । इति सङ्कल्प्य दीपं कलशं गणेशं च यथाविधि संपूज्य पुण्याहं वाचयित्वा धौतोत्तरीयनारिकेलताम्बूलपूगीफलयज्ञोपवीतद्रव्यादियुतं · पात्रं हस्ताभ्यामादाय-- "ॐ वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया । कन्यावलोकनविधौ निश्चिन्तस्त्वं सुखी भव" ।। इति पठित्वा वरपित्रादिहस्ते दद्यात् । ततो वरपित्रादिः-"ॐ वाचा दत्ता त्वया कन्या पुत्रार्थं स्वीकृता मया । वरावलोकनविधौ निश्चिन्तस्त्वं सुखी भव" ।। इति पठेत् । ततः कन्यापिता ब्राह्मणान् कन्यां च यथाचारं पूजयेत् । ब्राह्मणा आशीर्मन्त्रान् पठेयुः।

इति संक्षेपवाग्दानः विधि ।।

अथ वरणी-- कन्याप्रदः स्वयं हस्तौ पादौ प्रक्षाल्य शुद्धासने प्रत्यङमुख उपविश्य, वरं च प्राङमुखमुपवेश्य आचम्य कर्मपात्रं कृत्वा कुशयवतिलजलान्यादाय, ॐ अद्येत्यादिदेशकालौ संङ्कीर्त्य ... ... शर्माहं ... ... गोत्रोत्पन्नायाः ... ... नाम्न्याः कन्यायाः करिष्यमाणविवाहकर्मणि दीपकलशगणेशपूजनपूर्वकं समागतस्य ... ... गोत्रस्य ... ... शर्मणो वरस्य यथामिलितोपचारैर्वरणीकर्माङ्गपूजनं करिष्ये । इति सङ्कल्प्य दीपादिपूजां विधाय वरस्य श्वशुरकर्तृकं पादप्रक्षालनादिकं कृत्वा

१, विवाहप्रकरणमा मूलमा नभएका केही प्रचलित विषयहरू समावेश गरिएका छन् । जस्तै-यसको मूलमा वाग्दानकर्म छैन, वरणी र अरू पनि कर्महरू सूत्ररूपमा मात्र छन् । यसै पुस्तकको आधारवाट काम चलाउन सुविधा होस् भन्ने उद्देश्यले मूललाई यथासम्भव कायम राखी केही परिवर्धन गरिएको छ ।

चम्पककाष्ठनिर्मितपीठोपरि पीतवस्त्रमाच्छाद्य तदुपरि वरं प्राङ्मुखमवस्थाप्य स्वयं चाभिमुखीभूय मध्ये पीतं पटं प्रसार्य बद्धाञ्जलिः सन् एतान् मन्त्रान् पठेत्––

ॐ नमः श्रीपते नाथ नमस्तुभ्यमुमापते । गजवक्त्र नमस्तुभ्यं भारति त्वां नमाम्यहम् ।। ॐ स्वस्ति नवग्रहाः स्वस्ति स्वस्ति नारायणः सदा । स्वस्ति सुरेश्वर इन्द्रो द्यौर्भूमिर्वायुः स्वस्तये ।। ॐ स्वस्ति वैश्वानरः स्वस्ति विश्वेदेवाश्च स्वस्तये । स्वस्ति रुद्रः पिता स्वस्ति स्वस्तिकर्ता महेश्वरः ।। ॐ स्वस्ति वायुर्धनं स्वस्ति स्वस्तिदाता नृपः स्वयम् । स्वस्ति श्रीर्गणपतिश्चैव स्वस्ति श्रीर्माधवप्रिया ।। ॐप्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो वृद्धिः ।

अथ वरं वृणीते श्रियः प्रयाणे सुखाय कल्याणं धर्मार्थकाममोक्षरतो देवाय दातव्यम् । अविरलसन्तानचिरजीविनं सुखाय विन्दानं सुतवर एवं कामान् यस्तु वरः । प्रियसावित्रीं गुणसंयुक्तां दोषरहितां बहुकुलनिर्मलसंयुक्ताम् । तुष्यन्ति देवता मातृगणो वरोऽभिषिक्ते दीर्घमायुः स्वस्तिव्रता ब्रूहि ।। आवाहयाम्यहं देवं सुन्दरं कामरूपिणम् । मम पापविनाशाय प्रजापतेति च क्रमात् ।। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयꣳ स्याम पतयो रयीणाम् ।। हिमाचलो यथा देवं रुद्रमावाहयत् पुरा । तथा भवन्तं प्रवरं रुद्रमावाहयाम्यहम् ।। ॐ नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुत ते नमः ।। त्वं च ब्रह्मा त्वं च विष्णुस्त्वं च देवो महेश्वरः । आगच्छन् दिव्यमूर्तिस्त्वं सर्वपापहरो भव ।। ॐ असङ्ख्याता सहस्राणि ये रुद्राऽअधिभूम्याम् । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।। धर्मदं मोक्षदं चैव सर्वारिष्टविनाशनम् । नारायणस्वरूपस्य पश्यामि वदनं तव ।।

ॐ अथ वरं वृणीते बलवद्ध वै देवाऽएतस्य ग्रहस्य होमं प्रेप्सन्ति तेस्मा ऽ एतं वरꣳ समर्द्धयन्ति क्षिप्रे नऽ इमं ग्रहं जुहवदिति तस्माद्

वरं वृणीते ।। अथ वरं वृणीते यꣳ ह वै कं च सुषुवाणो वरं वृणीते सोऽस्मै सर्वः समृद्ध्यते तस्माद् वरं वृणीते ।। अथ वाराह्याऽ उपानहाऽ उपमुञ्चते । अग्नौ ह वै देवा घृतकुम्भं प्रवेशयाञ्चक्रुस्ततो वराहः सम्बभूव तस्माद्वराहो मेदुरो घृताद्धि संभूतस्तस्माद्वराहे गावः सञ्जानते स्वमेवैतद्रसमभिसञ्जानते तत्पशूनामेवैतद्रसे प्रतितिष्ठति तस्माद्वाराह्याऽ उपानहाऽ उपमुञ्चते ।। अथ वरुणाय धर्मपतये वारुणं यवमयं चरुं निर्वपति तदेनं वरुणऽ एव धर्मपतिर्धर्मस्य पतिं करोति परमता वै सायो धर्मस्य पतिरसद्यो हि परमतां गच्छति तꣳ हि धर्मऽ उपयन्ति तस्माद्वरुणाय धर्मपतये । सऽ आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहार्योदकमाहारयाञ्चकाराथ हास्माऽ अर्घं चकार ।। स होवाच वरं भवते गौतमाय दद्म इति स होवाच प्रतिज्ञातो मऽ एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ।। स होवाच देवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ।। स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोऽ अश्वानां दासीनां प्रवराणां परिधानानां मा नो भवान् बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति स वै गौतम तीर्थे नेच्छासाऽ इत्युपैम्यहं भगवन्तमिति वाचा ह स्मैव पूर्वऽ उपयन्ति ।।

ॐ असौ यस्ताम्रोऽ अरुणऽ उत बभ्रुः सुमङ्गलः । ये चैनꣳ रुद्राऽ अभितो दिक्षु श्रिताः सहस्रशो वैषाꣳ हेडऽ ईमहे ।।

इति मन्त्रान् पठित्वा पीतं पटमपसार्य 'ॐ साधु भवानास्ताम् अर्चयिष्यामो भवन्तम्' इति कन्याप्रदो ब्रूयात् । ॐ 'अर्चय' इति वरेणोक्ते हस्ताभ्यां जलपूर्णं भृङ्गारकमादाय–ॐ यानि कानि च पापानि ब्रह्महत्यासमानि च । तानि सर्वाणि नश्यन्तु प्रदक्षिणपदेपदे ।। इति जलधारां कुर्वन् वरं त्रिः प्रदक्षिणीकृत्य बद्धाञ्जलिः पठेत्– ॐ आगतोऽ सि वरश्रेष्ठ सर्वकामार्थसिद्धये । प्रतिग्रहसमर्थोऽ सि अर्घ्यं गृह्णातु मे वर ।। इति मन्त्रं पठित्वा 'ॐ गृह्णामि' इति वरेणोक्ते वरहस्तोपरि क्रमेण– विष्टरम्, गन्धम्, अक्षतान्, विविधानि कुसुमानि– (जाति-

चम्पकादीनि), आम्राश्वत्थादिपल्लवान्, पञ्चरत्नानि, गङ्गोदकम्, यवान्, कर्पूरम्, पूगफलम्, यज्ञोपवीतम्, ताम्बूलम्, दूर्वाङ्कुरान्, सर्षपान्, लाजान्, नारिकेलफलम्, सुगन्धम्, द्रव्यं च धृत्वा पीतवस्त्रोपरि स्थितं पञ्चरत्नाशोकपल्लवोपेतं कुशाग्रजलदुग्धदधितिलतण्डुलयवसिद्धार्थैरष्टपदार्थैश्च संयुतं शङ्खार्घं गृहीत्वा वरस्य– नाभौ, हस्तयोः, हृदि, स्कन्धे, शिरसि, पादयोः, जानुनोः, उदरे चार्घ्यं दत्त्वा गन्धाक्षतपुष्पयज्ञोपवीतधूपदीपनैवेद्यमाल्यादिभिः – ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे। सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।। इति मन्त्रेण वरं पूजयेत् । ततो वरः– ॐ द्यौः शान्तिरिति मन्त्रेण ह्यर्चकमभिषिच्य, ॐ आ ब्रह्मन्नित्याद्याशीर्मन्त्रान् पठित्वा तिलकं च कुर्यात् । ततः कन्याप्रदः वरस्य दक्षहस्ताङ्गुष्ठं गृहीत्वा– ॐ दूरदेशागतो भद्र शान्तिक प्रियदर्शन । कालक्षेपो न कर्तव्यो लग्नवेला प्रवर्तते ।। इति पठित्वा वरं पीठादुत्तारयेत् । ततो नमस्कृत्य यथास्थानं नयेत् । इति वरणीविधिः ।।

अथ कन्यादानम्–– (विवाहे कन्याहस्तेन षोडशहस्तं मण्डपं, तद्दक्षिणदिशि पश्चिमां दिशमाश्रित्य मण्डपसंलग्नमुत्तराभिमुखं कौतुकागारं, मण्डपाद्बहिरैशान्यां जामातृचतुर्हस्तां सिकतादिपरिष्कृतां तुषकेशशर्करादिशून्यां वेणुशोभितां वेदीं च कारयेत् । विवाहदिने कृतनित्यक्रियेण जामातृपित्रा मातृपूजापूर्वकमाभ्युदयिकं कर्तव्यम् । कन्यापिता च शुचिराचान्तः शुक्लाम्बरधरः कृतनित्यक्रियो मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं कुर्यात् इति) ।

अर्हणवेलायां कन्याप्रदः प्रत्यङ्मुख उपविश्य प्राङ्मुखम् ऊर्ध्वजानुं वरं संबोध्य–ॐ साधु भवानास्तामित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्मादेवता वरार्चने विनियोगः । ॐ साधु भवानास्ताम् अर्चयिष्यामो भवन्तम् । इति ब्रूयात् । ॐ अर्चय । इति प्रत्युक्ते वरोपवेशनार्थं शुद्ध-

मासनं दत्त्वा, ॐ विष्टरो विष्टरो विष्टरः[1]। इत्यन्येनोक्ते विष्टरमादाय कन्याप्रदः, ॐ विष्टरः प्रतिगृह्यताम् । इति वदेत् । ततो वरः, ॐविष्टरं प्रतिगृह्णामि । इत्यभिधाय विष्टरं गृहीत्वा, ॐ वर्ष्मोस्मीत्याथर्वणऋषिर्विष्टरो देवता अनुष्टुछन्दः आत्मस्तुतिपूर्वकोपवेशने विनियोगः । ॐ वर्ष्मोस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासति ।। इत्यनेन स्वासनाधो निधाय विष्टरोपरि उपविशति । ततः– ॐ पाद्यं पाद्यं पाद्यम् । इत्यन्येनोक्ते कन्याप्रदः अञ्जलिना पाद्यमादाय, ॐ पाद्यं प्रतिगृह्यताम् । इति वदेत् । ॐ पाद्यं प्रतिगृह्णामि । इत्यभिधाय दातृकरस्थं पाद्यं स्वाञ्जलिनाऽऽदाय वरः– ॐ विराजो दोहोसीति प्रजापतिर्ऋषिरापो देवता यजुश्छन्दः पादप्रक्षालने विनियोगः । ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह । इति मन्त्रेण दक्षिणं पादं प्रक्षालयति । अनेनैव क्रमेण वामपादं प्रक्षालयति[2]। ततो वरः पूर्ववद्विष्टरान्तरं गृहीत्वा चरणयोरधस्तादुत्तराग्रं स्थापयेत् । ततः, ॐ अर्घोऽर्घोऽर्घः । इत्यन्येनोक्ते कन्याप्रदः दूर्वाक्षतदधिफलचन्दनजलादियुतं शङ्खार्घपात्रं गृहीत्वा, ॐ अर्घः प्रतिगृह्यताम् । इति वदेत् । ततो वरः– ॐ अर्घं प्रतिगृह्णामि । इत्यभिधाय, ॐ आपः स्थेति प्रजापतिर्ऋषिरापो देवता यजुश्छन्दः अर्घग्रहणे विनियोगः । ॐ आपः स्थ युष्माभिः सर्वान् कामानवाप्नवानि । इति पठन् यजमानहस्तादर्घं गृहीत्वा किञ्चिदक्षतादिकं शिरसि दत्त्वा, ॐसमुद्रं व इत्याथर्वण ऋषिरापो देवता अनुष्टुप्छन्दः अर्घाभिमन्त्रणे विनियोगः । ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ।

---

[1] विष्टरको लक्षण– 'त्रयोदशकुशा विप्रे छत्रिये तु कुशाष्टकम् । षड्दर्भा वैश्यजातीये ऋष्युक्ता विष्टरे कुशाः ।। त्रयोदशादिभिर्दर्भैः सदलैः सूत्रवेष्टितः । बाहुमात्रप्रमाणेन वर्तुलो विष्टरः स्मृतः ।' इति । 'पञ्चाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरः । दक्षिणावर्तको ब्रह्मा वामावर्तस्तु विष्टरः।।' इति स्मार्तोल्लासे ।

[2] क्षत्रियादि वर भएमा पहिले वायां गोडा धोएर पछि दाहिने गोडा धुनु प ।

अरिष्टा अस्माकं वीरा मा परासेचि मत्पयः। इति मन्त्रं पठन् अर्घपात्रं शिरसाऽभिवन्द्य ऐशान्यां दिशि असञ्चरे निनयेत्। ततः, ॐ आचमनीयम् आचमनीयम् आचमनीयम्। इत्यन्येनोक्ते कन्याप्रदः आचमनीयमादाय, ॐ आचमनीयं प्रतिगृह्यताम्। इति वदेत्। ततो वरः– ॐ आचमनीयं प्रतिगृह्णामि। इत्यभिधाय यजमानहस्तादाचमनीयमादाय, ॐ आमागन्निति परमेष्ठीऋषिरापो देवता बृहतीछन्दः आचमने विनियोगः। ॐ आमागन् यशसा स ꣳ सृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥ इति मन्त्रेण सकृदाचामति। द्विस्तूष्णीम्। ततः, ॐ मधुपर्को मधुपर्को मधुपर्कः। इत्यन्येनोक्ते कन्याप्रदः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रेण पिहितान्यादाय, ॐ मधुपर्कः प्रतिगृह्यताम्। इति वदेत्। ततो वरः– ॐ मधुपर्कं प्रतिगृह्णामि। इत्यभिधाय, ॐ मित्रस्य त्वेति बृहस्पतिर्ऋषिर्मधुपर्को देवता यजुश्छन्दः मधुपर्कावेक्षणे विनियोगः। ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे। इति दातृकरस्थमेव मधुपर्कं निरीक्ष्य, ॐ देवस्य त्वेति बृहस्पतिराङ्गिरसऋषिः सविता देवता यजुश्छन्दः मधुपर्कग्रहणे विनियोगः। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि। इति मन्त्रेण मधुपर्कं गृहीत्वा वामहस्ते कृत्वा, ॐ नमः श्यावेति प्रजापतिर्ऋषिः सविता देवता यजुश्छन्दः मधुपर्कालोडने विनियोगः। ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि। इति दक्षहस्तानामिकया प्रदक्षिणं त्रिवारमालोड्य अनामिकाङ्गुष्ठाभ्यां किञ्चिद्भूमौ निः क्षिपेत्। पुनस्तथैव द्विर्निःक्षिपेत्। ततः, ॐ यन्मधुन इति कुत्सऋषिर्मधुपर्को देवता जगतीछन्दो मधुपर्कप्राशने विनियोगः।

ॐ यन्मधुनो मधव्यं परम ꣳ रूपमन्नाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोसानि। इति मन्त्रेण वारत्रयं मधुपर्कं प्राशयेत्। प्रतिप्राशने मन्त्रावृत्तिः। ततो मधुपर्कशेषमसञ्चरे निनयेत्। तत आचम्य, ॐ वाङ्म इत्यादीनां सप्तानां परमेष्ठीऋषि-

दैवीगायत्रीछन्दः परमात्मा देवता प्राणोपस्पर्शने विनियोगः । ॐ वाङ्म आस्येऽस्तु । (इति दक्षकराग्रेण मुखम्) । ॐ नसोर्मे प्राणोऽस्तु । (इति तर्जन्यङ्गुष्ठाभ्यां युगपद्दक्षिणादिनासारन्ध्रे) । ॐ अक्ष्णोर्मे चक्षुरस्तु । (इति अनामिकागुङ्ष्ठाभ्यां युगपच्चक्षुषी) । ॐ कर्णयोर्मे श्रोत्रमस्तु । (इति मन्त्रावृत्या मध्यमाङ्गुष्ठाभ्यां क्रमेण दक्षिणोत्तरौ कर्णौ) । ॐ बाह्वोर्मे बलमस्तु । (इति कर्णवद्बाहू) । ॐ ऊर्वोर्मे ओजोऽस्तु । (इति युगपद्धस्तेन ऊरुद्वयम्) । ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु । (इति शिरः प्रभृतीनि पादान्तानि सर्वाण्यङ्गान्युभाभ्यां हस्ताभ्यामालभेत) । ततस्त्रिराचामेत् । ततः, ॐ गौर्गौर्गौः । इत्यन्येनाभिहिते कन्याप्रदः गोप्रतिनिधित्वेन कुशमादाय, ॐ गौर्गृह्यताम् । इति वदेत् । वरश्च, ॐ गृह्णामि । इत्युक्त्वा दातृहस्तात्कुशं गृहीत्वा, ॐ माता रुद्राणामिति ब्रह्माऋषिर्गौर्देवता त्रिष्टुप्छन्दो गोरभिमन्त्रणे विनियोगः । ॐ माता रुद्राणां दुहिता वसूना ँ स्वसादित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ।। मम चामुष्य (कन्याप्रदस्य) च पाप्मा हत । ॐ उत्सृजत तृणान्यत्तु ।। इत्युच्चार्य कुशं छिन्द्यात् । इति मधुपर्कविधिः ।।

ततः तुषकेशशर्करादिशून्यायां वेदिकायां हस्तमात्रां चतुरस्रां भूमिं कुशैः परिसमुह्य, तानैशान्यां परित्यज्य, गोमयोदकेनोपलिप्य, स्फ्येन स्रुवमूलेन वा प्रागग्रं प्रादेशमितमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य, उल्लेखनक्रमेण दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां त्रिः पांसूनुद्धृत्य, जलेनाभ्युक्ष्य, तूष्णीं कांस्यपात्रस्थं वह्निं (योजकनामानम्) प्रत्यङ्मुखमुपसमाधाय, तद्रक्षार्थं कंचन ब्राह्मणं नियुज्य कन्यादानप्रदेशं गच्छेत् ।

ततः कौतुकागारात् मण्डपे कन्यामानीय वरःकन्यायै प्रदेयमन्तरीयवस्त्रं गृहीत्वा, ॐ जरां गच्छेति प्रजापतिर्ऋषिर्वासो देवता त्रिष्टुप्छन्दः वस्त्रपरिधापने विनियोगः । ॐ जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा । शतं च जीव शरदः सुवर्चा रयिं च

पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥ इति पठित्वा परिधानवस्त्रं तस्यै दद्यात् । तत उत्तरीयमादाय, ॐ या अकृन्तन्निति प्रजापतिर्ऋषिर्वासो देवता जगतीछन्दः उत्तरीयपरिधापने विनियोगः । ॐ या अकृन्तन्नवयन् या अतन्वत । याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥ इति पठित्वा उत्तरीयं तस्यै दद्यात् । ततः कन्याप्रदः वराय परिधानवस्त्रं दद्यात् तद्गृह्णन् वरः– ॐ परिधास्या इत्याथर्वणऋषिर्लिङ्गोक्ता देवता पङ्क्तश्छन्दः वस्त्रपरिधाने विनियोगः । ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये ॥ इति पठित्वा अन्तरीयवस्त्रं परिधत्ते । तथैव उत्तरीयमादाय, ॐ यशसामेत्याथर्वणऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दः उत्तरीयवस्त्रपरिधाने विनियोगः । ॐ यशसा मा द्यावापृथिवी यश सेन्द्राबृहस्पती । यशो भगश्च माविदद्यशो मा प्रतिपद्यताम् ॥ इति पठित्वा परिदध्यात् । ततो वरस्य कन्यायाश्च द्विराचमनम् । ततः कन्याप्रदः 'परस्परं समञ्जेथाम्' इति प्रैषेण कन्यावरयोः परस्पराभिमुखौ कुर्यात् । वरश्च कन्यां पश्यन्– ॐ समञ्जन्त्वित्याथर्वणऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दः समञ्जने विनियोगः । ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । संमातरिश्वा संधाता समुदेष्ट्री दधातु नौ ॥ इति पठेत् । ततः कन्याप्रदकर्तृकं ग्रन्थिबन्धनं साक्षतदूर्वाहरिद्रादधिपूगैः[१] ।

१, अञ्चल ग्रन्थिबन्धन (लगनगांठो) मा विशेष– दुलहा र दुलही दुवै पक्षको कपडा विच्छयाएर दुवैतिरको वरावर रूपियां पैसा, सुपारी गोटा २, जनै जोर २, पान विरा २, हलेदो टुक्रा २, सर्स्यूं, कुङ्कुम, दहिअक्षता, दूवो यी वस्तुहरू राखेर संकल्प गरुञ्जेल पूजा गर्दै रहनू र कन्यादानको वेलामा वलियो गांठो पारिदिनू । गांठो पार्दा कहीं 'एतन्ते देव सवितर्यज्ञम्०' भन्ने यो मन्त्र पढ्छन् । कहीं यस्तो पूजाको क्रम पाइन्छ ।

यस्यार्चां प्रविधाय विश्वकरणेसंसक्तचेता विधिः
संप्राप्तो धिषणां सुसृष्टिरचनावैशारदीं मानसीम् ।
गीर्वाणार्चितपादपङ्कजयुगो लम्बोदरो विघ्नहा
दम्पत्योः सुपरस्परं प्रतिदिनं प्रीतिं विदध्यात् स्थिराम् ॥

ॐ गणानान्त्वा० । ॐ गणपतये नमः ।

या सृष्टयुद्भवकारिणी कमलभूहृत्तोषिणी सर्वदा
हंसाधोरणगामिनी सुरगणैर्वन्द्याङ्घ्रिपद्मद्वया ।
मालासूत्रकमण्डलून्धृतवती दण्डं च कृष्णाजिनं
दम्पत्योः प्रतिवासरं सुखकरीं प्रीतिं क्रियाद्धातृका ॥
ॐ ब्रह्माणि मे मतयः श ठं॰ सुतासः शुष्मऽइर्यति प्रभृतो मेऽअद्रिः ।
आशासते प्रतिहर्यन्त्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥
ॐ वाण्यै नमः ।

पद्मालालितपादपद्मयुगलो नाभ्यब्जसंस्थात्मभूः
कण्ठालङ्कृतकौस्तुभो भृगुपदश्रीवत्सवक्षःस्थलः ।
शङ्खार्यब्जगदाधरः श्रुतिधृतस्वर्णीयमत्स्यद्वयो–
र्दम्पत्योः प्रतिवासरं सुखकरो भूयाद्धरिः श्रीपतिः ॥
ॐ विष्णो रराटम्॰ । ॐ विष्णवे नमः ।

या विष्णोर्हृदि संस्थिता रघुपतेः सीताभिधा जानकी
या स्वर्गेन्द्रविभूषणा गजरथाश्वच्छत्ररूपा बिभुः ।
राज्ञां सद्मनि राजती द्विजगृहेष्वाचाररूपेन्दिरा
दम्पत्योः प्रतिवासरं सुविमलां प्रीतिं क्रियात् सा रमा ॥
ॐ श्रीश्च ते॰ । ॐ लक्ष्म्यै नमः ।

गङ्गावीचिसमीरचञ्चलजटाजूटोऽर्धचन्द्रीविभु–
र्गोगामी गजराजचर्मवसनो वामाङ्गशैलेन्द्रजः ।
शुभ्रस्वच्छविभूतिभूषितवपुः सूर्याग्निचन्द्रत्रिदृक्
भूयाद्वै वरकन्ययोः प्रतिदिनं भूतिप्रदः शङ्करः ॥
ॐ नमः शम्भवाय॰ । ॐ शिवाय नमः ।

या माता शशिमौलिमानसमहोत्साहप्रदा सर्वदा
चन्द्रास्यं दधती विशाखजननी श्रीकण्ठवामाङ्गना ।
नानाबल्युपहारपूजनपरैर्भक्तैः सुरैः सेविता
सा गौरी वरकन्ययोः सुविमलां प्रीतिं क्रियान्निर्मलाम् ॥
ॐ अम्बेऽअम्बिके॰ । ॐ गौर्ये नमः ।

इत्यादि मन्त्रहरूले पूजागरेर स्वस्तिवाचन पढ्दै बलियो संग बाध्नू र––

रामलक्ष्मणयोः प्रीतिर्यथा श्रीपतिब्रह्मणोः ।
शिवशक्तयोर्यथा प्रीतिर्युवयोर्वर्धतां तथा ॥

यो मन्त्र पढेर दुलहा दुलही दुवैको कांध कांधमा पर्ने गरी राखिदिनू इति ।

ततः लग्नशुद्धये गोदानं कृत्वा[1] प्रतिज्ञासङ्कल्पं कुर्यात् । कुशतिलयवजलान्यादाय, ॐ अद्येत्यादिपूर्वसङ्कल्पमुच्चार्य .... गोत्रः.... शर्माहं समस्तपितॄणां निरतिशयानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तनिखिलफलावाप्तये, तथा अनेन वरेण अस्यां कन्यायामुत्पादयिष्यमाणया सन्तत्या द्वादश परान् द्वादशावरान् आत्मना सपञ्चविंशान् पुरुषान् पवित्रीकर्तुं श्रीमल्लक्ष्मीनारायणप्रीतिसिद्धये ब्राह्मेण विधिना अलङ्कृतायाः कन्यायाः प्रदानं करिष्ये । इति प्रतिज्ञासङ्कल्पं विधाय कृताञ्जलिः– ॐ दाताहं वरुणो राजा द्रव्यमादित्यदैवतम् । वरोऽसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः ।। दाता शङ्खस्थदूर्वाक्षतकुशजलान्यादाय जामातृदक्षिणकरोपरि कन्यादक्षिणकरं निधाय महासङ्कल्पं कुर्यात्–

हरिः ॐ ३ ॐ तत्सत् ३ ॐ विष्णुः ३ श्रीमदादिनारायणस्य अचिन्त्यापरिमेयशक्त्याभिध्रियमाणजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽ व्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेऽस्मिन्महति ब्रह्माण्डखण्डमण्डले आधारशक्तिश्रीमदादिवराहदंष्ट्राग्रविराजिते कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशङ्खाद्यष्टमहानागैर्ध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठितानामतलवितलसुतलतलातलमहातलरसातलपाताललोकानामुपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकाख्यानां सप्तानां लोकानामधोभागे महाकायफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डादण्डोत्तम्भितपञ्चाशत्कोटियोजनविस्तीर्णलोकालोकाचलवलयिते

---

१. लग्नशुद्धिगोदानवाक्यम्– ॐ अद्येह....गोत्रः...शर्माहं....राशेः अस्याः कन्यायाः विवाहलग्नात् निषिद्धस्थानस्थितानां......ग्रहाणां दुष्टफलनिवृत्तिपूर्वकं शुभस्थानस्थितानां ग्रहाणां शुभफलाधिकत्वावाप्तये इदं गोनिष्क्रयीभूतं.....द्रव्यं....दैवतं....गोत्राय.... शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । प्रार्थना– कपिले० । दानप्रतिष्ठा– ॐअद्यकृतैतदित्यादि० ।

लवणेक्षुरससुरासर्पिर्दधिक्षीरोदकार्णवैः परिवृते जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपदीपिते उपद्वीप- कांस्यताम्रगभस्तिनाभससौम्यगान्धर्ववारुणभारताख्यनवखण्डात्मके महासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णभूमण्डलमध्ये मेरुनिषधत्रिकूटहिमविन्ध्याचलानां किंपुरुषहरिवर्षयोश्च दक्षिणे नवसहस्रयोजनविस्तीर्णमलयाचलादुत्तरतः स्वामिप्रस्थादारभ्य पाञ्चजन्यसिंहललङ्काख्यनवभागात्मकभरतखण्डे स्वामिशैलावन्तिकुरुक्षेत्रादिसमस्तभूमध्यदेशे दण्डकारण्यचम्पकारण्यवदरिकारण्यनैमिषारण्यादिसमस्तपुण्यारण्यविराजिते भास्करक्षेत्रे सकलजगत्स्रष्टुः परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे पञ्चाशतातीते परमार्धे नवममासे षोडशे दिवसे द्वितीये यामे तृतीये मुहूर्ते सप्तमे श्वेतधाराहकल्पे वैवस्वतमन्वन्तरे बौद्धावतारे अष्टाविंशतितमे महाकलियुगे प्रथमचरणे भारतवर्षे भरतखण्डे जम्बूद्वीपे कर्मभूमौ भूमध्यरेखायाः पश्चिमदिग्भागे गोदावरीनर्मदयोर्मध्यदेशे तपत्या उत्तरे तीरे अमुकक्षेत्रे चान्द्रसौरसावननाक्षत्रादिमानेनागतानां प्रभवविभवादिषष्टिसंवत्सराणां मध्ये वर्तमान....संवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवारे अमुकनक्षत्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ अमुकराशिस्थिते चन्द्रमसि शेषेषु ग्रहेषु यथायथाराशिस्थितेषु सत्सु एवं ग्रहगणविशेषविशिष्टायां पुण्यतिथौ अस्मिन् संसारचक्रे विचित्राभिः कर्मगतिभिर्विचित्रासु योनिषु पुनः पुनरनेकशः जनयि (नि) त्वा केनापि पुण्यविशेषेणेदानीन्तनमानुष्ये द्विजजन्मविशेषं प्राप्तवतो ऽमुकशाखीयस्यामुकप्रवरस्यामुकशर्मणो मम नानाजन्माभ्यासवशादाजन्मप्रभृति एतावत्कालपर्यन्तं बाल्ययौवनवार्धक्येषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनोवाक्कायव्यापारैः कामक्रोधलोभमोहमदमात्सर्यकृतानां वाक्पाणिपादपायूपस्थहृत्त्वक्चक्षुःश्रोत्रजिह्वानासिकाभिश्च कृतानां प्रकाशाप्रकाशब्रह्महत्यासुरापानसुवर्णस्तेयगुरुदाराभिगमनतत्संसर्गित्वनामधेयप्रपञ्चितमहापातकव्यतिरिक्तानां पितृमातृगुरु-

भ्रात्रादिताडनतर्जनब्राह्मणमर्मदोषकथनद्विजदेवसंबन्धिभूम्यपहरणान्यायोपार्जितद्विजवित्तहरणगुरुवधाक्षेपतडागद्रुमच्छेदनदहनकर्मविषप्रयोगाभिचारसहसङ्ग्रामोन्मादनाशकशास्त्राभ्यासचिकित्साप्रायश्चित्तशकुनित्वशास्त्रप्रयोगादिच्छन्दोनिन्दाकरणकृत्याकरणधरणीवित्तहरणधर्मकार्यविघ्नाचरणोत्कर्षपरनिन्दाकरणापवादानृतभाषणपङ्क्तिभेदवृथापाकप्रतिश्रुताप्रदानादीनां ब्रह्महत्यासमानानां पुष्पिणीमुखास्वादनक्षालनोदकपानमुखनिः सृतनीरपानकपिलाक्षीरपानपञ्चयज्ञोपासनपरित्यागकूटसाक्षित्वादीनां मद्यपानसमानानां पितृमातृसपत्नीभ्रातृव्यभार्यातनयाभगिन्याचार्यतनयासखिभार्याप्रव्रजिताशरणागताधात्रीसाध्वीवर्णोत्तमान्त्यजागम्यागमनानां शूद्रसेवनाधीनत्वभृतकाध्यापकान्नाशित्वपौरोहित्यदेवलकाध्वसंरक्षणकृषिकर्महयादिशिक्षाभारवाहित्वशिल्पविद्याभ्यासादीनां स्वर्णस्तेयसमानानां गजाश्वोष्ट्रखरखड्गमहिषशरभशार्दूलसिंहव्याघ्रादिप्राणिवधादीनां सङ्करीकरणानां मयूरचाषहंसगृहगोधास्वेदजोद्भिज्जभारद्वाजादिपक्षिवधजानां मद्यानुगतभोज्यफलेक्षुकुसुमस्तेयादीनां मलिनीकरणानां ब्राह्मणऋक्थहरणप्रियाघ्राणमैथुनादिविषयासक्तकृतघ्नादीनां अपात्रीकरणानां अयोनिपशुयोनिरेतोविसर्जनयतिब्रह्मचारिब्राह्मणशास्त्रनिन्दागोसञ्चित (गोनिमित्तक) तृणसञ्चयाग्निप्रदानादीनां जातिभ्रंशकरणानां मुखनासिकाकरचरणहननहिंसनविषमवृद्ध्युपजीवनविषमव्यवहारवाक्पारुष्यसहसङ्ग्रहणक्रीडनच्युतदत्तकालनिन्दाकरदन्तधावननिषिद्धदिनमैथुनक्षौरदिवास्वापादीनां वैश्यादासीकन्याप्रतिलोमजामातृसाधारणाङ्गनासत्यङ्गनागमनैकादश्यन्नगणिकान्नभिक्षुकान्नकांस्य (पात्र) भोजनखट्वाहंसगमनविचित्रवस्त्रालङ्कारस्वप्नेन्द्रियपातानां चतुर्दश्यष्टमीदिवाभोजनभानुवारपर्वद्वयरात्रिभोजनात्मगृहिणीगर्भिणीमनोरथक्षारणव्रात्यान्नपतितान्नयतिप्रेतान्नतुरुष्कान्नकारागृहनिवासभोजनतुरुष्कमध्यनिवासतुरुष्कस्पृष्टद्रव्योपभोगकुग्रामवासदुष्टप्रतिग्रहदुष्टभोजनपक्वपाकपत्रमसूरान्नकटुकान्ननखकृन्तना-

कृतस्नानसन्ध्योपासनसुरार्चनवैश्वदेवकर्मरहितोदक्यादृष्टभोजनम्लेच्छसेवासंसर्गभाषणादिपापोक्तप्रतारणलशुनगृञ्जनाद्यभक्ष्यभक्षणकांस्यपात्रस्थितनारिकेलजलपानाद्यपेयपानचाण्डालाद्यस्पृष्टस्पर्शनपतितादिसंभाषणवृन्ताककूष्माण्डादिनिषिद्धतिथिभोजनदेवब्राह्मणफलादिहरणाविक्रेयविक्रयणपुस्तकौषध्यादिविक्रयणप्रबालरत्नादिविक्रयणाङ्गुल्यायोर्निविदारर्णविवाहभञ्जनगुरुद्रोहमत्कुणयूकासरीसृपवधाकृताग्निशुश्रूषातदवज्ञातिथिभिक्षुवञ्चनतीर्थगमनासक्तविप्रकरकृतव्रतोद्यापनाकरणचाण्डालादिगीतश्रवणानिमित्तभोजननदीलङ्घनसमुद्रस्नानादिप्रकीर्णकानामेतेषां नानाविधपातकानामपहरणाय ... (गोत्रस्य ... प्रवरस्य माध्यन्दिनीयशाखान्तर्गतशुक्लयजुर्वेदाध्यायिनः ... शर्मणः प्रपौत्राय, ... गोत्रस्य ... प्रवरस्य ... वेदाध्यायिनः ... शर्मणः पौत्राय,...गोत्रस्य ... प्रवरस्य... वेदाध्यायिनः शर्मणः पुत्राय,...गोत्रस्य...प्रवरस्य...वेदाध्यायिनः शर्मणः प्रपौत्रीम्,...गोत्रस्य...प्रवरस्य...वेदाध्यायिनः...शर्मणः पौत्रीम्,...गोत्रस्य ...प्रवरस्य... वेदाध्यायिनः ... शर्मणः पुत्रीम् (इत्येवं वारत्रयं पठित्वा) अनेन वरेण अस्यां कन्यायाम् उत्पत्स्यमानसन्तत्या द्वादशावरान् द्वादश परान् आत्मना सपञ्चविंशान् पुरुषान् पवित्रीकर्तुं श्रीमल्लक्ष्मीनारायणप्रीतये ... गोत्राय .. प्रवराय .. वेदाध्यायिने ... शर्मणे नारायणस्वरूपाय कन्यार्थिने वराय ... गोत्रोत्पन्नाम् ... नाम्नीम् इमां यथाशक्त्यलङ्कृताम् प्रजापतिदैवतां श्रीरूपिणीं कन्यां देवद्विजाग्निसाक्षिकतया सहधर्माचरणाय स्वर्गकामः पत्नीत्वेन तुभ्यमहं संप्रददे । प्रतिगृह्णातु भवान् । इति कन्याहस्तं वरहस्ते दत्त्वा, ॐ प्रजापतिः प्रीयताम् । इति वदेत् । ततो वरः – ॐ द्यौस्त्वेति प्रजापतिर्ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दः कन्याग्रहणे[१] विनियोगः । ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु । इति पठेत् । ततः कन्याप्रदः– ॐ कन्यां

---

[१] कहीं 'भूमिस्पर्शने, यस्तो पाठ छ ।

कनकसंपन्नां कनकाभरणैर्युताम् । ददामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ।। इति पठेत् । पुनः कन्यामुद्दिश्य– ॐ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः । कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ।। इति पठित्वा कन्यादानप्रतिष्ठायै कुशयवतिलसहितं सुवर्णं तन्निष्क्रयद्रव्यं वा ऽऽदाय, ॐ अद्यकृतैतत्कन्यादानप्रतिष्ठार्थं इदं सुवर्णं वह्निदैवतं (... द्रव्यं ... दैवतं वा) ... गोत्राय ... शर्मणे वराय दानप्रतिष्ठात्वेन तुभ्यमहं संप्रददे । ॐ तत्सन्नमम । इत्युक्त्वा वरहस्ते दद्यात् । ततः कृताञ्जलिः – ॐ कन्या मम कुले जाता पालिता ... वत्सरान् । तुभ्यमद्य मया दत्ता पुत्रपौत्रप्रवर्धिनी ।। धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयम् । इति वरं प्रार्थयेत् । वरश्च– नातिचरामि । इति प्रतिज्ञां कुर्यात् । ततः कन्याप्रदः वराय गोमिथुनं (गामेव वा) दद्यात् । गां संपूज्य कुशादीन्यादाय, ॐ अद्येत्याद्युक्त्वा ... गोत्रः ... शर्माहमद्यकृतैतत्कन्यादानसाङ्गतासिद्धिद्वारा कन्यादानकल्पोक्तसंपूर्णफलावाप्तये यथोपपन्नालङ्कारसमन्वितां सवत्साम् इमां गाम् (समन्वितम् इदं गोमिथुनं वा) ... गोत्राय ... शर्मणे वराय तुभ्यं संप्रददे । प्रार्थना– ॐ कपिले० । ततो दानप्रतिष्ठाद्रव्यं कुशादिसहितमादाय, ॐ अद्यकृतैतदित्याद्युच्चार्य वरहस्ते दद्यात् । ततः कुशादिसहितं भूयसीं दक्षिणामादाय, ॐ अद्येत्याद्युच्चार्य ... गोत्रः शर्माहं कृतस्य कन्यादानकर्मणः साङ्गतासिद्धिद्वारा श्रीलक्ष्मीनारायणप्रीतिपुरः सरं श्रुतिस्मृतिपुराणोक्तसकलफलावाप्तये इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो ऽन्येभ्यो दीनानाथेभ्यश्च दातुमुत्सृजे । ॐ तत्सन्न मम । इत्युत्सृज्य यथार्हं दद्यात् ।

ततो वरः गन्धपुष्पादीन्यादाय, ॐ ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातु दक्षिणम् । अस्मद्द्राता देवत्रा गच्छत प्रदातारमाविशत ।। ॐ अग्नये त्वा मह्यं वरुणो ददातु सोमृतत्वमशीयायुर्दत्त्रऽ एधि मयो मह्यं प्रतिग्रहीत्त्रे रुद्राय त्वा मह्यं व्वरुणो ददातु

सोमृतत्वमशीय प्राणो दात्त्रऽ एधि व्वयो मह्यं प्रतिग्रहीत्त्रे बृहस्पतये त्वा मह्यं व्वरुणो ददातु सोमृतत्वमशीय त्वग्दात्त्रऽ एधि मयो मह्यं प्रतिग्रहीत्त्रे यमाय त्वा मह्यं व्वरुणो ददातु सोमृतत्वमशीय हयो दात्त्रऽ एधि व्वयो मह्यं प्रतिग्रहीत्त्रे ।। ॐ कोदात् कस्माऽ अदात् कामोदात् कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते ।। इति पठित्वा सपत्नीकं कन्यापितरं तिलकं कुर्यात् । ततः कन्यां पाणौ गृहीत्वा, ॐ यदैषीत्याथर्वणऋषिर्लिङ्गोक्ता देवता अनुष्टुप्छन्दः निष्क्रमणे विनियोग :। ॐ यदैषि मनसा दूरं दिशो नु पवमानो वा । हिरण्यपर्णो वै कर्णः स त्वा मन्मनसां करोतु (अमुकि देवि) इत्युच्चार्य कन्यामादायोत्थाय वेदिं प्रति निष्क्रामेत् ।। इति कन्यादानविधिः ।।

अथ विवाहविधिः ।।

ततः सवधूको वरो वधूं दक्षिणतः कृत्वा वेद्याः समीपे उदङ्मुख उपविशेत् । ततो वेदिदक्षिणस्यां वारिपूर्णकलशमेकमूर्ध्वं तिष्ठतो मौनिनः पुरुषस्य स्कन्धेऽभिषेकपर्यन्तं धारयेत् । ततः कन्याप्रदः 'परस्परं समीक्षेथाम्' इति प्रैषं दत्त्वा वधूवरौ परस्परमीक्षयेत् ।। ईक्षमाणां वधूम् ईक्षमाण एव वरः – ॐ अघोरचक्षुरित्यादीनां चतुर्णां प्रजापतिर्ऋषिः आद्यन्तयोस्त्रिष्टुप्छन्दः मध्यमयोरनुष्टुप्छन्दः कुमारी देवता समीक्षणे विनियोगः । ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे ।। सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयोग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।। सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ।। सा नः पूषा शिवतमामैरय सा नऽ ऊरूऽ उशती विहर । यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्यै।। इति पठेत् । ततः वधूसहितो वरः अग्निं प्रदक्षिणीकृत्य अग्नेः पश्चिमतः शुचिवस्त्रवेष्टिततृणपूलके कटे वा प्रथमं दक्षिणं चरणं निधाय वधूं दक्षिणतः कृत्वा वर उपविश्य पुष्पचन्दनताम्बूलवस्त्राण्यादाय ब्रह्माणं

वृणुयात् । तत्र वाक्यम्– ॐ अद्येत्यादिपूर्वसङ्कल्पमुच्चार्य ... गोत्रः... शर्माहं धर्मार्थकामसिद्धिद्वारा श्रीमत्परमेश्वरप्रीतिजननाय ब्राह्मेण विधिना पित्रा प्रदत्तया अनया कन्यकया सह करिष्यमाणे विवाहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं ... गोत्रं ... शर्माणं ब्राह्मणमेभिश्चन्दनपुष्पाक्षतताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे । इति ब्रह्माणं वृणुयात् । ॐ वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु । इति वरेणोक्ते– ॐ करवाणीति ब्रूयात् । ततो वरः अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ब्रह्माणमग्निप्रदक्षिणक्रमेण आनीय 'अत्र त्वं मे ब्रह्मा भव' इत्यभिधाय कल्पितासने उपवेशयेत् । ततः कृताञ्जलिः – यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः । तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।। इति प्रार्थयेत् । ततः प्रणीताप्रणयनादिकुशकण्डिकामारभ्य प्रोक्षण्युत्पवनान्तं कर्म समाप्य उपयमनकुशान् वामहस्ते कृत्वोत्तिष्ठन् प्रजापतिं मनसा ध्यात्वा समिद्धतमेऽग्नौ समिधः प्रक्षिप्य उपविश्य सपवित्रप्रोक्षण्युदकेन ईशानाद्युदगपवर्गं प्रदक्षिणक्रमेण अग्निं पर्युक्ष्य पवित्रे प्रणीतापात्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः स्रुवेण आज्याहुतीर्जुहुयात् । तत्राघारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताऽऽज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) । ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवताऽऽज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम । (इत्याघारौ) । ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो ऽग्निर्देवताऽऽज्यहोमे विनियोगः । ॐअग्नये स्वाहा । इदमग्नये न मम । ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता ऽऽज्यहोमे विनियोगः । ॐ सोमाय स्वाहा । इदं सोमाय न मम । (इत्याज्यभागौ) । ॐ महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभ-

श्छन्दांसि अग्निवायुसूर्या देवता होमे विनियोगः। ॐ भूः स्वाहा। इदमग्नये न मम। ॐ भुवः स्वाहा। इदं वायवे न मम। ॐ स्वः स्वाहा। इदं सूर्याय न मम। ॐ त्वन्नोऽ अग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः। ॐ त्वन्नोऽ अग्ने व्वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः। यजिष्ठो वह्नितमः। शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥ इदमग्नीवरुणाभ्यां न मम। ॐ स त्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः। ॐ स त्वन्नोऽ अग्नेवमो भवोती नेदिष्ठोऽ अस्याऽ उषसो व्युष्टौ। अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो नऽ एधि स्वाहा॥ इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता सर्वप्रायश्चित्तहोमे विनियोगः। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽ असि। अया नो यज्ञं व्वहास्यया नो धेहि भेषजꣳ स्वाहा॥ इदमग्नये न मम। ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वेमरुतः स्वर्का देवताः सर्वप्रायश्चित्तहोमे विनियोगः। ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम। ॐ उदुत्तममिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता सर्वप्रायश्चित्तहोमे विनियोगः। ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय। अथा व्वयमादित्य व्रते तवानागसोऽ अदितये स्याम स्वाहा॥ इदं वरुणाय न मम।

(ततो ब्रह्माऽऽचार्यो वा वधूवरौ अभिषिञ्चेत्। तत्र मन्त्रौ—"ॐ गणाधिनाथवरुणब्रह्मविष्णुशिवादयः। दम्पत्योः कुशलं कुर्युः पूजिता इह देवताः॥ उत्सर्गे वारुणे चैव वरुणो विष्णुना सह। तुष्टिपुष्टिकरोभूयादुभयोः स्त्रीकुमारयोः")।

अथ राष्ट्रभृत्– ॐ ऋताषाडिति प्रजापतिर्ऋषिर्यजुश्छन्दः ऋताषाडृतधामाग्निर्गन्धर्वो देवता होमे विनियोगः । ॐ ऋताषाडृतधामाग्निर्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदम् ऋतासाहे ऋतधाम्ने अग्नये गन्धर्वाय न मम ।।१।। ॐ ऋताषाडिति प्रजापतिर्ऋषिः ओषधयोप्सरसो मुदो देवता यजुः होमे विनियोगः । ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसो मुदो नाम ताभ्यः स्वाहा । इदमोषधिभ्योप्सरोभ्यो मुद्भ्यो न मम ।।२।। ॐ सꣳहित इति प्रजापतिर्ऋषिः सꣳहितो विश्वसामा सूर्यो गन्धर्वो देवता यजुः होमे विनियोगः । ॐ स हितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् । इदं सꣳहिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम ।।३।। ॐ सꣳहित इति प्रजापतिर्ऋषिः मरीचयोप्सरस आयुवो देवता यजुः होमे विनियोगः । ॐ सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽ प्सरस आयुवो नाम ताभ्यः स्वाहा । इदं मरीचिभ्योप्सरोभ्य आयुभ्यो न मम ।।४।। ॐ सुषुम्ण इति प्रजापतिर्ऋषिः सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वो देवता यजुः होमे विनियोगः । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ।। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम ।।५।। ॐ सुषुम्ण इति प्रजापतिर्ऋषिः नक्षत्राण्यप्सरसो भेकुरयो देवताः यजुः होमे विनियोगः । ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ।। इदं नक्षत्रेभ्योप्सरोभ्यो भेकुरिभ्यो न मम ।।६।। ॐ इषिर इति प्रजापतिर्ऋषिः इषिरो विश्वव्यचा वातो गन्धर्वो देवता यजुः होमे विनियोगः । ॐ इषिरो विश्वव्यचा वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट् ।। इदम् इषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम ।।७।। ॐ इषिर इति प्रजापतिर्ऋषिः आपोप्सरस ऊर्जो देवता यजुः होमे विनियोगः । ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोप्सरस ऊर्जो नाम ताभ्यः

स्वाहा ।। इदम् अद्भ्योप्सरोभ्य ऊर्ग्भ्यो न मम ।।८।। ॐ भुज्युरिति प्रजापतिर्ऋषिः सुपर्णो यज्ञो गन्धर्वो देवता यजुः होमे विनियोगः । ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।। इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम ।।९।। ॐ भुज्युरिति प्रजापतिर्ऋषिः दक्षिणाप्सरसस्तावा देवता यजुः होमे विनियोगः । ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावानाम ताभ्यः स्वाहा ।। इदं दक्षिणाभ्योप्सरोभ्यस्तावाभ्यो न मम ।।१०।। ॐ प्रजापतिरिति प्रजापतिर्ऋषिः प्रजापतिर्विश्वकर्मा मनो गन्धर्वो देवता यजुः होमे विनियोगः । ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् । इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम ।।११।। ॐ प्रजापतिरिति प्रजापतिर्ऋषिःऋक्सामान्यप्सरस एष्टयो देवता यजुः होमे विनियोगः । ॐ प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा । इदम् ऋक्सामभ्योप्सरोभ्य एष्टिभ्यो न मम ।।१२।। इति राष्टभृद्धोमः ।

ततो वधूवरौ अभिषिञ्चेत् एतैर्मन्त्रैः – वारुणे चैव उत्सर्गे वरुणो विष्णुरेव च । कुरुतां सुखसौभाग्यमुभौ तौ च फलद्वयम् ।। पञ्च वै लोकपालाश्च ऋषयश्च ध्रुवस्तथा । गन्धर्वा देवताश्चैव प्रयच्छन्तु यशः श्रियम् ।। आयुरारोग्यसौख्यं च पुत्रपौत्रप्रवर्धनम् ।। ऋताषाड्ढोमकालेषु श्रियं दद्याद्धुताशनः ।। नारदस्तुम्बुरुश्चैव विश्वावसुपुरोगमाः । दम्पत्योश्च चिरायुष्यं दद्यासुः सुखसम्पदः ।।

अथ जयाहोमः – ॐ चित्तं चेति परमेष्ठीर्ऋषिः चित्तं देवता यजुर्जयाहोमे विनियोगः । ॐ चित्तं च स्वाहा । इदं चित्ताय न मम ।।१।। ॐ चित्तिश्चेति परमेष्ठीर्ऋषिः चित्तिर्देवता यजुर्जयाहोमे विनियोगः । ॐ चित्तिश्च स्वाहा । इदं चित्यै न मम ।।२।। ॐ आकूतं चेति परमेष्ठीर्ऋषिः आकूतं देवता यजुर्जयाहोमे विनियोगः । ॐ आकूतं च

स्वाहा । इदमाकूताय न मम ।।३।। ॐ आकूतिश्चेति परमेष्ठीऋषिः आकूतिर्देवता यजुर्जयाहोमे विनियोगः । ॐ आकूतिश्च स्वाहा । इदमाकूत्यै न मम ।।४।। ॐ विज्ञातं चेति परमेष्ठीऋषिर्विज्ञातं देवता यजुर्जयाहोमे विनियोगः । ॐ विज्ञातं च स्वाहा । इदं विज्ञाताय न मम ।।५।। ॐ विज्ञातिश्चेति परमेष्ठीऋषिर्विज्ञातिर्देवता यजुर्जयाहोमे विनियोगः । ॐ विज्ञातिश्च स्वाहा । इदं विज्ञात्यै न मम ।।६।। ॐ मनश्चेति परमेष्ठीऋषिर्मनो देवता यजुर्जयाहोमे विनियोगः । ॐ मनश्च स्वाहा । इदं मनसे न मम ।।७।। ॐ शक्वरीश्चेति परमेष्ठीऋषिः शक्वरीदेवता यजुर्जयाहोमे विनियोगः । ॐ शक्वरीश्च स्वाहा । इदं शक्वरीभ्यो न मम ।।८।। ॐ दर्शश्चेति परमेष्ठीऋषिर्दर्शोदेवता यजुर्जयाहोमे विनियोगः । ॐ दर्शश्च स्वाहा । इदं दर्शाय न मम ।।९।। ॐ पौर्णमासं चेति परमेष्ठीऋषिः पौर्णमासं देवता यजुर्जयाहोमे विनियोगः । ॐ पौर्णमासं च स्वाहा ।। इदं पौर्णमासाय न मम ।।१०।। ॐ बृहच्चेति परमेष्ठीऋषिर्बृहद्देवता यजुर्जयाहोमे विनियोगः । ॐ बृहच्च स्वाहा । इदं बृहते न मम ।।११।। ॐ रथन्तरं चेति परमेष्ठीऋषी रथन्तरं देवता यजुर्जयाहोमे विनियोग :। ॐ रथन्तरं च स्वाहा । इदं रथन्तराय न मम ।।१२।। ॐ प्रजापतिरिति परमेष्ठीऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता यजुर्जयाहोमे विनियोगः । ॐ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा । इदं प्रजापतये न मम ।।१३।। इति जयाहोमः ।।

ततो वधूवरौ अभिषिञ्चेत्– वधूवराभ्यां यच्छन्तु होमेनानेन तर्पिताः । चिरमायुर्महत्तेजश्चित्ताद्यास्त्रिदिवौकसः ।। गौरी लक्ष्मीस्तथेन्द्राणी लोपामुद्रा शुभप्रदा । कुर्यात् सदाचारवतीं स्वतुल्यां कन्यकामिमाम् ।।

अथ अभ्यातानहोमः— ॐ अग्निर्भूतानामिति प्रजापतिर्ऋषिरग्निर्भूतानामधिपतिर्देवता पङ्क्तिश्छन्दः[1] अभ्यातानहोमे विनियोगः। ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा ।। इदमग्नये भूतानामधिपतये न मम ।।१।। ॐ इन्द्रो ज्येष्ठानामिति प्रजापतिर्ऋषिरिन्द्रो ज्येष्ठानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः। ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा। इदमिन्द्राय ज्येष्ठानामधिपतये न मम ।।२।। ॐ यमः पृथिव्या इति प्रजापतिर्ऋषिर्यमः पृथिव्या अधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः। ॐ यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा। इदं यमाय पृथिव्या अधिपतये न मम ।। (अत्र प्रणीतोदकस्पर्शः) ।।३।। ॐ वायुरिति प्रजापतिर्ऋषिर्वायुरन्तरिक्षस्याधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः। ॐ वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा। इदं वायवेऽन्तरिक्षस्याधिपतये न मम ।।४।। ॐ सूर्यो दिवोऽधिपतिरिति प्रजापतिर्ऋषिः सूर्यो दिवोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः। ॐ सूर्यो दिवोधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा। इदं सूर्याय दिवोऽधिपतये न मम ।।५।। ॐ चन्द्रमा नक्षत्राणामिति प्रजापतिर्ऋषिश्चन्द्रमा नक्षत्राणामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः।

---

[1] यी अभ्यातानका मन्त्र कसैले 'त्रिष्टुब्छन्द' कसैले 'पंक्तिश्छन्द' भनेर पढेका छन्। इयादिपूरण गरेमा एक अक्षर बढी भएको 'भूरिक्त्रिष्टुब्' र इयादिपूरण नगरेमा एक अक्षर घटी भएको 'निचृत्पङ्क्तिश्छन्द' हुन्छ।

ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं चन्द्रमसे नक्षत्राणामधिपतये न मम ।।६।। ॐ बृहस्पतिरिति प्रजापतिर्ऋषिर्बृहस्पतिर्ब्रह्मणोऽधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ बृहस्पतिर्ब्रह्मणोधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम ।।७।। ॐमित्र इति प्रजापतिर्ऋषिर्मित्रः सत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं मित्राय सत्यानामधिपतये न मम ।।८।। ॐ वरुण इति प्रजापतिर्ऋषिर्वरुणोऽपामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ वरुणोपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं वरुणायापामधिपतये न मम ।।९।। ॐ समुद्र इति प्रजापतिर्ऋषिः समुद्रः स्रोत्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं समुद्राय स्रोत्यानामधिपतये न मम ।।१०।। ॐअन्नमिति प्रजापतिर्ऋषिरन्नꣳ साम्राज्यानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ अन्नꣳ साम्राज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदमन्नाय साम्राज्यानामधिपतये न मम ।।११।। ॐ सोम इति प्रजापतिर्ऋषिः सोम ओषधीनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳ स्वाहा । इदं सोमायौ-

षधीनामधिपतये न मम ।।१२।। ॐ सवितेति प्रजापतिर्ऋषिः सविता प्रसवानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं सवित्रे प्रसवानामधिपतये न मम ।।१३।। ॐ रुद्र इति प्रजापतिर्ऋषी रुद्रः पशूनामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ रुद्रः पशूनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं रुद्राय पशूनामधिपतये न मम । (अत्र प्रणीतोदकस्पर्शः) ।।१४।। ॐ त्वष्टेति प्रजापतिर्ऋषिस्त्वष्टा रूपाणामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं त्वष्ट्रे रूपाणामधिपतये न मम ।।१५।। ॐ विष्णुरिति प्रजापतिर्ऋषिर्विष्णुः पर्वतानामधिपतिर्देवता पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः । ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं विष्णवे पर्वतानामधिपतये न मम ।।१६।। ॐ मरुत इति प्रजापतिर्ऋषिर्मरुतो गणानामधिपतयो देवताः पङ्क्तिश्छन्द अभ्यातानहोमे विनियोगः । ॐ मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं मरुद्भ्यो गणानामधिपतिभ्यो न मम ।।१७।। ॐ पितर इति प्रजापतिर्ऋषिः पितरः पितामहाः परे ऽवरे ततास्तता महा देवताः पङ्क्तिश्छन्दः अभ्यातानहोमे विनियोगः ॐ पितरः पितामहाः परे ऽवरे ततास्ततामहा इह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याᳫं स्वाहा । इदं पितृभ्यः पितामहेभ्यस्ततेभ्यस्ततामहेभ्यो न मम । (अत्र प्रणीतोदकस्पर्शः) ।।१८।। इत्यभ्यातानहोमः ।।

ततः श्लोकद्वयेन वधूवरौ अभिषिञ्चेत् । ॐ ब्रह्मा विष्णुस्तथा रुद्रो गुरुः शुक्रश्च भार्गवः । आयुर्दीर्घं च सौख्यं च प्रयच्छन्त्वनयोर्द्वयोः ।। अग्निर्भूरपि यज्ञेऽस्मिन् श्रीधरश्च श्रिया सह । पुत्राँल्लक्ष्मीँस्तथा कामान् सौभाग्यं चैव अर्पयेत् ।।

अथ गुप्ताहुतयः । (वधूवरयोः पुरस्तात् पटं प्रसार्य अग्निमन्तर्धाय) ॐ अग्निरैतु इति प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्दो होमे विनियोगः । ॐ अग्निरैतु प्रथमो देवतानाꣳ सोस्यै प्रजां मुञ्चतु मृत्युपाशात् ।तदयग्ँ राजा वरुणोनुमन्यतां यथेयग्ँ स्त्री पौत्रमघं न रोदात् स्वाहा । इदमग्नये न मम ।। ॐ इमामग्निरिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः । ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियग्ँ स्वाहा । इदमग्नये न मम ।। ॐ स्वस्ति न इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः । ॐ स्वस्ति नो ऽ अग्ने दिव ऽ आ पृथिव्या विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा । इदमग्नये न मम ।। ॐ सुगन्नु पन्थामिति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वैवस्वतो देवता होमे विनियोगः । ॐ सुगन्नु पन्थां प्रदिशन्न ऽ एहि ज्योतिष्मद्धेह्यजरन्न ऽ आयुः । अपैतु मृत्युरमृतं न ऽ आगाद्वैवस्वतो नोऽ अभयं कृणोतु स्वाहा । इदं वैवस्वताय न मम ।। (अत्र प्रणीतोदकस्पर्शः) ।। ॐ परं मृत्यो इति सङ्कुसुकऋषिस्त्रिष्टुप्छन्दो मृत्युर्देवता होमे विनियोगः। ॐ परं मृत्यो ऽ अनु परेहि पन्थां यस्ते ऽ अन्य ऽ इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् स्वाहा।। इदं मृत्यवे न मम । (अत्र प्रणीतोदकस्पर्शः) ।। (प्रसारितं वस्त्रमुत्तार्य वधूवरौ अभिषिञ्चेत्) – ॐ गोविन्दो गोकुले तिष्ठन् गोपीभिर्विहरन् सह । तुष्टिपुष्टिकरो भूयादनयोर्वरकन्ययोः ।। इति गुप्ताहुतयः ।

अथ शिलापूजा । तत्रादौ लाजाहुतयः । तत्प्रकारश्च– वधूर्वेद्याः पश्चिमतः प्राङ्मुखीभूय तिष्ठेत्, तस्या वामतो वरस्तिष्ठेत् । आज्येनाभिघार्य शमीपत्राणि संमिश्र्य शूर्पे चतुरो लाजपुञ्जान् विधाय प्रथममपि पुञ्जं त्रिभागं कृत्वा प्रथमपुञ्जस्य प्रथमभागतो भ्रात्रा दत्ताँल्लाजानञ्जलिनाऽऽदाय वरेण वामतस्तिष्ठताऽन्वारब्धा त्रिवारं जुहुयात् । मन्त्रांश्च वधूरेव पठेत् । तत्र मन्त्राः – ॐ अर्यमणमित्याथर्वणऋषिरनुष्टुप्छन्दो लाजहोमे विनियोगः । ॐ अर्यमणं देवं कन्या अग्निमयक्षत । स नो अर्यमा देवः प्रेतो मुञ्चन्तु मा पते स्वाहा ।। इदमर्यम्णे न मम ।। ॐ इयं नारीत्याथर्वणऋषिरनुष्टुप्छन्दोऽग्निर्देवता लाजहोमे विनियोगः । ॐ इयं नार्युपब्रूते लाजानावपन्तिका । आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ।। इदमग्नये न मम ।। ॐ इमाँल्लाजानित्याथर्वणऋषिरनुष्टुप्छन्दो ऽग्निर्देवता लाजहोमे विनियोगः। ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव । मम तुभ्यं च संवननं तदग्निरनुमन्यतामियꣳ स्वाहा ।। इदमग्नये न मम ।।

ततो वधूहस्तं साङ्गुष्ठं गृहीत्वा मन्त्रान् पठति वरः– ॐ गृभ्णामीत्यादीनां चतुर्णां याज्ञवल्क्यभरद्वाजाथर्वणप्रजापतय ऋषयस्त्रिष्टुबुष्णिगनुष्टुब्यजुश्छन्दांसि (भगो देवता) पाणिग्रहणे विनियोगः । ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः । भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ।। ॐ अमोहमस्मि सा त्वꣳ सा त्वमस्य मोहम् ।। ऋक् त्वं द्यौरहं पृथिवी त्वम् ।। तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून् ।। ते सन्तु जरदष्टयः सम्प्रियौ रोचिष्णू सुमनस्यमानौ । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ।।

अथ वधूमग्नेरुत्तरतः प्राङ्मुखीं पूर्वोपकल्पितदृषदुपलं दक्षिणपादेन आरोहयति वरः – ॐ आरोहेममित्याथर्वणऋषिः अनुष्टुप्छन्दो वधूर्देवता अस्मारोहणे विनियोगः । ॐ आरोहेममश्मानमश्मेव त्वꣳ

स्थिरा भव । अभितिष्ठ पृतन्यतो वबाधस्व पृतनायतः ।। आरूढायामेव तस्यां वरो गाथां गायति । ॐ सरस्वती प्रेदमिति विश्वामित्रऋषिः सरस्वतीदेवताऽनुष्टुप्छन्दः गाथागाने विनियोगः । ॐसरस्वती प्रेदमव सुभगे वाजिनीवति । यान्त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः, यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ।। इति ।

ततो वरो वधूमग्रतः कृत्वा मन्त्रं पठन् प्रदक्षिणमग्निं परिक्रामेत्—ॐ तुभ्यमग्न इत्याथर्वणऋषिरग्निर्देवता ऽनुष्टुप्छन्दः परिक्रमणे विनियोगः । ॐ तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतु ना सह । पुनः पतिभ्यो जायां दाग्ने प्रजया सह ।। इति

एवमेव पश्चादग्नेः पूर्ववत्स्थित्वा समन्त्रपाठं लाजहोमम्, पाणिग्रहणम्, अश्मारोहणम्, गाथागानम्, अग्निप्रदक्षिणं च वारद्वयं कुर्याताम् । एवं तृतीयपरिक्रमणे समापिते भ्रात्रा दत्तस्य शूर्पस्य कोणेन सर्वानेव लाजान् समन्त्रपाठं जुहुयात् । ॐ भगायेति मन्त्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दो भगो देवता लाजहोमे विनियोगः । ॐ भगाय स्वाहा । इदं भगाय न मम । ततस्तूष्णीं परिक्रमणम् ।

(तत आचाराद्वधूवरौ पूर्वप्रकल्पितां शिलामारोहणक्रमेण गन्धाक्षतपुष्पाण्यादाय पूजयेतामेभिर्मन्त्रैः— तमालपुष्पप्रतिमाङ्गि मातः सनालनीलोत्पलयुग्महस्ते ।। स्फुरत्सरस्वद्बृहदम्बरे त्वं धरे समागच्छ वरं प्रदातुम् ।। ॐ भूरसि भूमिरस्यदितिरसि विश्वधा या विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीं मा हिꣳसीः ।। मातरं वसुधां देवीं पितरं च महेश्वरम् । आवां प्रपन्नौ स्वः कामान्प्राप्नुयाव यथेप्सितान् ।।१।। ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ।।२।। देहल्यां स्थापिता सेयं भक्तितोऽभ्यर्चिता शिला । ददातु विपुलान्भोगान्

पुत्रपौत्रादिसंयुतान् ।। ॐस्थिरो भव वीड्वङ्ग ऽ आशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।।३।। इति)

ततो वर उपविश्य ब्रह्मणान्वारब्धः प्रजापतिं ध्यायन् आज्येन जुहुयात् । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ।। (हुतशेषस्य आज्यस्य प्रोक्षणीपात्रे प्रक्षेपः) ।

(अथाष्टपर्वतपूजा । अष्टदिक्षु वस्त्रोपरि पुञ्जीकृतैस्तण्डुलैर्लाजैर्वा प्रकल्पितान् अष्टौ पर्वतान् वधूवरौ गन्धाक्षतपुष्पाद्यैः प्रत्येकमुत्तरादिवायव्यान्तं पूजयेताम् – सुमेरुं काञ्चनमयं चतुःशृङ्गविराजितम् । मण्डलस्योत्तरे भागे चन्द्रमा इति पूजये ।। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽ अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। ॐ सुमेरुपर्वताय नमः ।।१।। शिखिरं च महादेवं पाण्डुरं हेमभूषितम् । ये ते शतमितीशाने विदिग्भागे प्रपूजये।। ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो ऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।। ॐ शिखिराय नमः ।।२।। उदयं पर्वतं पीतरक्तश्वेतविभूषितम् । त्रातारमिति मन्त्रेण साधिष्ठातारमर्चये ।। ॐ त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ꣳ स्वस्ति नो मघवा धात्विन्द्रः ।। ॐ उदयाचलाय नमः ।।३।। समुन्नतं कृष्णवर्णं मरुतं नाम पर्वतम् । आग्नेय्यां स्थितमत्युग्रं मरुत्वानिति पूजये ।। ॐ मरुत्वाँ ऽ इन्द्र वृषभो रणाय पिबा सोममनुष्वधम्मदाय । आसिञ्चस्व जठरे मद्ध्व ऽ ऊर्मिन्त्व ꣳ राजासि प्रतिपत्सुतानाम् । उपयामगृहीतोसीन्द्राय त्वा मरुत्वत ऽ एष ते योनिरिन्द्राय त्वा मरुत्वते ।। ॐ मरुताय नमः ।।४।। आरक्तश्वेतवपुषं दक्षिणस्यां दिशि स्थितम् । धामच्छदिति मन्त्रेण विन्ध्यं पर्वतमर्चये ।। ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वेदेवा यज्ञं प्रावन्तु नः शुभे ।। ॐ विन्ध्याचलाय नमः ।।५।। नैर्ऋत्यामुषितं तुङ्गं

मणिहेमादिभूषितम् । हिरण्यगर्भमन्त्रेण हिमवन्तं समर्चये ।। ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ।। ॐ हिमाचलाय नमः ।।६।। पाण्डवैर्गुप्तचर्यार्थमाश्रितं पश्चिमे स्थितम् । धन्वनागेति मन्त्रेण वैराटं गिरिमर्चये ।। ॐ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्रदिशो जयेम ।। ॐ वैराटाय नमः ।।७।। ॐ शारदं शुभ्रवर्णाढ्यं ज्ञानदं करुणायुतम् । वायव्यां दिशि वायव्यैर्वायव्यानिति पूजये ।। ॐ वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम् । कुम्भीभ्यामम्भृणौ सुते स्थालीभिः स्थालीराप्नोति ।। ॐ शारदाय नमः ।।८।।[१])

अथ सप्तपदी– वेद्या उत्तरत आस्तृते वस्त्रे सिन्दूराद्यालेपनेनोत्तरोत्तरकृतसप्तमण्डलेषु सप्तपदाक्रमणं वरो वधूं कारयति । सा च वामं पादं नाग्रतो चालयन्ती क्रामेत् । तत्र मन्त्राः– ॐ एकमिषे विष्णुस्त्वा नयतु ।(इति प्रथमे मण्डले प्रथमं पदाक्रमणं कारयेत्)। ॐ द्वे ऊर्जे विष्णुस्त्वा नयतु । (इति द्वितीये द्वितीयम्) । ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु । (इति तृतीये तृतीयम्) । ॐ चत्वारि मायोभवाय विष्णुस्त्वा नयतु ।(इति चतुर्थे चतुर्थम्)। ॐ पञ्च पशुभ्यो विष्णुस्त्वा नयतु ।(इति पञ्चमे पञ्चमम्)। ॐ षड्ऋतुभ्यो विष्णुस्त्वा नयतु ।(इति षष्ठे षष्ठम्) ॐ सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु । (इति सप्तमे सप्तमम्) । (ततस्तेषु सप्तसु मण्डलेषु सप्तर्षिपूजनम् । तत्र वधूवरौ गन्धाक्षतपुष्पाण्यादाय पूजयेताम् । मन्त्राश्च– अत्रिं मुनिं सपत्नीकमावाह्य प्रथमे पदे । पत्न्यानयाभिनवया संयुक्तः पूजयाम्यहम् ।। ॐ आदित्यङ्गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हर सा माभिमꣳ स्थाः शतायुषङ्कृणुहि

---

[१] यो कोष्ठ भित्रको अष्टपर्यंतपूजाको पाठ मूलमा छैन । 'प्रपर्वतस्य' यो मन्त्र छ ।

चीयमानः ।। ॐ अत्रये नमः ।।१।। पदे द्वितीये सूर्येन्दुरूपं पत्नीसमन्वितम् । मुनिं वसिष्ठमावाह्य सदारः पूजयाम्यहम् ।। ॐ व्वातो वा मनो वा गन्धर्वः सप्तविꣳ शतिः । ते ऽ अग्रेश्वमयुञ्जँस्ते ऽ अस्मिञ्जवमादधुः ।। ॐ वसिष्ठाय नमः ।।२।। पदे तृतीयेऽ ङ्गिरसं मुनिवर्गसमर्चितम् । दम्पत्योर्जयदातारं सदारः पूजयाम्यहम् ।। ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ।। ॐ अङ्गिरसे नमः ।।३।। उद्भावितहरिश्चन्द्रमहिमानं मुनीश्वरम् । पदे चतुर्थे गाधेयं सदारः पूजयाम्यहम् ।। ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।। ॐ विश्वामित्राय नमः ।।४।। पराशरसुतं व्यासं मत्स्यगर्भा समुद्भवम् । पञ्चमेऽत्र पदे प्रातः सदारः पूजयाम्यहम् ।। ॐ सोमो धेनुꣳ सोमो ऽ अर्वन्तमाशुꣳ सोमो व्वीरङ्कर्मण्यन्ददाति । सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ।। ॐ व्यासाय नमः ।।५।। षष्ठे पदे भरद्वाजं मुनिं षडृतुविग्रहम् । आवाह्य यज्ञरक्षायै सदारः पूजयाम्यहम् ।। ॐ वसन्तेन ऽ ऋतुना देवा वसवस्त्रिवृतास्तुताः । रथन्तरेण तेजसा हविरिन्द्रे व्वयो दधुः ।। ॐ भरद्वाजाय नमः ।।६।। सप्तमेऽत्र पदे शम्भोरंशभूतं मुनीश्वरम् । दुर्वाससं शुभावाप्त्यै सदारः पूजयाम्यहम् ।। ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जाग्रतोऽअस्वप्नजौ सत्रसदौ च देवौ ।। ॐ दुर्वाससे नमः ।।७।।[1]) इत्थं संपूज्य वधूवरौ सप्तब्राह्मणान् दक्षिणाभोजनादिभिः सन्तोषयेताम्[2] ।

ततोऽग्नेः पश्चादुपविश्य मौनीपुरुषस्कन्धस्थितकुम्भजलेन साम्रपल्लवेन वधूं मूर्धनि अभिषिञ्चति वरः— ॐ आप इति प्रजापतिर्ऋषि-

---

१, यो कोष्ठभित्रको सप्तर्षिपूजाको पाठ मूलमा पूरा छैन । 'सप्त ऋषयः' यो मन्त्र छ ।

२, यसै अवसरमा राजाको वंशावली जान्ने कुनै एक फूर्तिलो क्षत्रियादि पुरुषले म्यानबाट तर्वार झिकेर सुन्नेलाई हौसला फूर्ति बढ्ने किसिमको राजाहरूको दिग्विजयको प्रशस्ति उच्चस्वरले गाउनू भन्ने नेपालीहरूको चलन छ । यसैलाई खांडो (तर्वार) जगाउनू भन्दछन् ।

लिङ्गोक्ता देवता सुप्रतिष्ठँश्छन्दो (यजुश्छन्दो) मूर्धाभिषेचने विनियोगः। ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ।। इत्यनेन। पुनस्तत एव कुम्भात्तथैव जलमानीय अभिषिञ्चति। ॐ आपो हि ष्ठेति त्र्यृचस्य सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता मूर्धाभिषेके विनियोगः। ॐ आपो हि ष्ठा मयोभुवस्ता नऽ ऊर्जे दधातन। महे रणाय चक्षसे ।। ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ।। ॐ तस्माऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः।। इति तिसृभिः।

ततो (दिवाविवाहे) 'सूर्यमुदीक्षस्व' इति वधूं संबोध्य वर आह– ॐ तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिर्ब्राह्मीत्रिष्टुप्छन्दः सूर्यो देवता सूर्यप्रेक्षणे विनियोगः। ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।। इति मन्त्रं वरः पठति वधूः सूर्यं पश्यति। अस्तमिते सूर्ये 'ध्रुवमुदीक्षस्व' इति प्रैषानन्तरं वरः मन्त्रं पठति वधूः ध्रुवं पश्यति। तत्र पठनीयो मन्त्रः – ॐ ध्रुवमसीति प्रजापतिर्ऋषिर्ध्रुवो देवता पङ्क्तिश्छन्दः ध्रुवोदीक्षणे विनियोगः। ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि। मह्यं त्वादाद्बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्। इति पृष्टा यदि न पश्यति तथापि 'पश्यामि'। इति ब्रूयात्।

अथ वरो वध्वा दक्षिणस्यांसस्योपरि हस्तं नीत्वा तस्या हृदयमालभते– ॐ मम व्रत इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता हृदयालम्भने विनियोगः। ॐ मम व्रते ते हृदयं दधामि। मम चित्तमनु चित्तं तेऽस्तु। मम वाचमेकमना जुषस्व। प्रजापतिष्ट्वा नियुनक्तु मह्यम्। इति।

अथ वधूमभिमन्त्रयति वरः (वध्वाः सीमन्ते सिन्दूरमर्पयति वरः)– ॐ सुमङ्गलीरिति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो वधूर्देवताऽभिम-

न्त्रणे विनियोगः । ॐ सुमङ्गलीरियं वधूरिमा ᳪ समेत पश्यत । सौभाग्यमस्यै दत्त्वा याथास्तं विपरेत न ।। (इति वधूमभिमन्त्र्य यथाचारं तस्याः सीमन्ते त्रिवारं सिन्दूरं निः क्षिप्य ललाटमध्यं च सिन्दूरबिन्दुविभूषितं कृत्वा ऽवशिष्टसिन्दूरसहितं पात्रं तस्यै दद्यात्) ।

अथ वधूं बलवान् कश्चिद्ब्राह्मणः वरो वा उत्थाप्य प्रागुदग्वा गुप्तागारे लोहिते आनडुहे चर्मणि उपरिलोमास्तीर्णे (कलौ तु प्रागग्रैरुदगग्रैर्वा कुशैरास्तृते आसने) तामुपवेशयेत्– ॐ इह गाव इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता उपवेशने विनियोगः । ॐ इह गावो निषीदन्त्विहाश्वा ऽ इह पूरुषाः । इहो सहस्रदक्षिणो यज्ञ ऽइह पूषा निषीदतु ।। (उपविष्टा वधूश्च वरस्य वस्त्रान्तमाकृष्य स्थीयतामिति वदन्ती तं स्वदक्षिणत उपवेशयेत् पादयोः प्रणमेच्च[१] ।)

(अथ वर आचार्याय गोयुगं (गां वा) दद्यात् । गोयुगं (गां वा) ब्राह्मणं च त्रिः संपूज्य कुशादीन्यादाय, देशकालौ संकीर्त्य ...गोत्रः... शर्मा ऽहम् कृतस्यैतावतो वैवाहिकस्य कर्मणः साङ्गतासिद्धये रुद्रदेवताकम् इदं गोयुगं (इमां रुद्रदेवताकां गां वा) ... गोत्राय शर्मणे तुभ्यं संप्रददे । इति दद्यात् । ब्राह्मणः–कोदादिति, स्वस्तीति च ब्रूयात् । कपिले० इति गां प्रार्थ्य, सङ्कल्प्य दानप्रतिष्ठाद्रव्यं दद्यादिति ।

अथ दधिमधु (माहुर) प्राशनमाचारात् । दधिमधुघृतं पिहितं कांस्यपात्रे समानीतं वह्नौ तापितं पुरस्तात् कृत्वा पिधानमपसार्य वधूवरौ समालोडयेताम्, कनिष्ठिकया समं विभज्य अहंपूर्विकामालम्ब्य मन्त्रपाठं विनैव परस्परं प्राशयेतां हस्तौ प्रक्षाल्य आचामेताम् च[२]) ।

अथादित्यदुहिता, शैलराजदुहिता च । (वधूवरौ परस्परं संमुखीभूय यथासुखं स्थित्वा पणविन्यासपूर्वकमक्षैर्दिव्येताम् । तयोरुपरि वस्त्रं प्रसार्य तत्र लाजान् प्रक्षिप्य चामराभ्याम् चेटिके बीजयेताम् च यावत्

---

[१] यो कोष्ठको पाठ मूलमा छैन । [२] यो कोष्ठको पाठ मूलमा छैन ।

न मन्त्रपाठः समाप्यते । आचार्यः – ॐ तपसस्तेजसा प्रभाविता जटाभाराजिनसंछन्नाऽऽदित्यदुहिता बहूनि वर्षसहस्राणि ततापं । तेजसा तपन्ती च सा तपतीति विख्याता बभूव । अथैकदा सन्नद्धधन्वा सेनया सहितो वने विचरन् धृतातपत्रो नृपः संवरणः समुपसृत्याऽवोचत्प्रेक्षन्तीं सुभ्रुवं नीलकेशीं यौवनवतीं पीनस्तनीं पृथुश्रोणीं ताम् । हे त्वं कस्यासि किंनामा दुहितेति । सा होवाच, यस्यैकचक्रं भुजगनियमितं सप्ताश्वमचरणेन सारथिनारुणेन प्रणुद्यमानं स्यन्दनं, य एष भ्राजमानः प्रातरुद्यति, तस्याहं दुहिताशीनर्मिति, देवरूपी कुण्डलाभरणो महाबाहुः कस्त्वं भोः ! कया कामनया मामेत्यादरेण पृच्छसीति । स होवाच, तस्या अमृतोपमां वाचं निशम्य नृपवरः सुन्दरि ? नृपः संवरणो ऽहं भार्या मे भव रूपिणीति श्रुत्वा सा होवाच, य एवं मामजीजनत् तं गत्वा तेजोराशिमुद्यन्तं भास्करं वृणुष्वेति । स निशितैः कामशरैस्तुद्यमानः स्वपुरोहितं भगवन्तं वसिष्ठमुपातिष्ठत, मदर्थे तां ब्रध्नं वृणुष्वेति । स होवाच, ब्रध्नस्तेन गत्वा ऋग्भिर्यजुर्भिः सामभिस्तूयमानो वसिष्ठा ३ यङ्कामं कामयसे तन्ते दास्यामीति । स होवाच, स एष कामो याज्यो मे नृपः संवरणस्तस्यार्थे दुहितरं ते वृणोमीति । दत्तेति, स होवाच, प्रतिगृहाणेति । अथ वसिष्ठस्तां वाचमनुश्रुत्य तुष्टः प्रतीचीं दिशमागतस्ततसर्वं तस्मै निवेदयामास । अथ तेन निवेदिते सुदिने सुमुहूर्ते सुनक्षत्रे सुयोगे पुण्याहे पाणिं जग्राह संवरणः पाणिनाऽऽदौ पित्राऽनुमङ्गलं प्रत्तम् ।

उभावध्वर्युरन्वारेभे । कुशैर्लाजैः शमीपलाशैः समिद्भिः समन्त्रं हव्यवाहे हूयमाने देवतानामृषीणां गन्धर्वाणामप्सरसां सतां पश्यतां मङ्गलध्वनिभिर्ऋग्यजुः सामाथर्वाङ्गिरसेतिहासपुराणमन्त्रध्वनिमिलितैः सनृत्यवादित्रगीतैर्विवाहः संवृत्तः । अथ हैतद्भानुर्धनं ददौ, गोश्वानां दासीनां महिषीणामजाविकानां कुञ्जराणां शतं साहस्रं वस्त्रमपरिमितं रजतं काञ्चनम् । तद्गृहीत्वा स्वपुरं रथेन वाजिभिर्युक्तेन गच्छन्तौ संमोदमानौ दम्पती जगाद तौ भानुः – भोः संवरण धरणीपते तपती नाम

सेयं भार्या ते संवृत्ता, शृणुत मद्वाक्यम् – ब्राह्मणवत्सलो भव, एषा ते दारक दारिका अविधवा अष्टपुत्रा जीववत्सा अनुत्तरवादिनी प्रैषकारिणी सत्यवादिनी ब्राह्मणस्तवा दैवतस्तवा मातरꣳ सन्त्यज्य पितरꣳ सन्त्यज्य भ्रातॄन्सन्त्यज्य भर्तारमर्चितं सुपूजितं चानुयाति त्वाम् । यथेन्द्रस्येन्द्राणी, यथा दशरथस्य कौशल्या, यथा रामस्य सीता, यथा रावणस्य मन्दोदरी, यथा बालिनश्च तारा, यथा वायोश्चाञ्जनी, यथा नलस्य दमयन्ती, यथा सौदासस्य मदयन्ती, यथा पुरूरवस उर्वशी, यथा पुरुकुत्सस्य नर्मदा, यथा सन्तनोश्च गङ्गा, यथा धृतराष्ट्रस्य गान्धारी, यथा पाण्डोश्च कुन्ती, यथा पाण्डवानां द्रौपदी, यथा भीमसेनस्य हिडिम्बा, यथार्जुनस्य सुभद्रा, यथा दुर्योधनस्य भानुमती, यथादित्यस्य (मम) च्छाया, यथा चन्द्रस्य रोहिणी, यथा गणेशस्य सिद्धिबुद्धी, यथाऽगस्त्यस्य लोपामुद्रा, यथा योगेश्वरस्य मैत्रेयी, यथा वसिष्ठस्यारुन्धती, यथात्रेरनसूया, यथा ब्रह्मणः सावित्री, यथा कृष्णस्य रुक्मिणी, यथा पशुपतेरुमा, यथा गौतमस्याहल्या, यथा हिमालयस्य मेनका, यथैवमन्येषामन्या, तथा तवेयमनुगामिनीति ।

अथ शैलराजगृहे मेनका कन्यकां प्रजाता । कपर्दिने भवाय प्रत्तां च तां दुहितरं सा होवाच पत्यौ शृण्वति, अविधवा सुभगा कल्याणवती धनवती पुत्रवती यौवनवती यशोवती भवेति । भवं चोवाच – श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्म ऽ इषाण इति । अथ भवः प्रत्युवाच सदा सुप्रीता वरदा भव, अथात इयं सर्वमङ्गला भूयात्, माहेन्द्रीव वारुणीवोत्तमानि लप्सीष्ट शोभनानि, नाहमेनां जह्याम्, त्रैलोक्ये सन्ति ये देवि ब्रह्मविष्ण्वादयः सुराः । एते त्वत्साक्षिणस्त्वं मेऽभवः प्रागङ्गना सती ।। त्यज्यते समयान्माता त्यज्यन्ते भ्रातरो ऽ पि वा । त्यज्यन्ते बान्धवाः सर्वे नाङ्गना सहगामिनी ।। न रोचयेऽश्वं न गजं हिरण्यं कौशेयं वासो विविधं च रत्नम् । शुद्धा कन्या करगा शैलभर्तस्तव प्रसादान्मम

शङ्करस्य ।। लोके कीर्तिः कुले वृद्धिर्लक्ष्मीश्च गृहमागता । स्त्रीरत्नं च मया प्राप्तं त्वत्प्रसादाद्धिमालय ।। यद्यत्कल्याणकल्लोके या च भक्तिरधोक्षजे । आवयोर्दत्तचित्तानां सर्वं भवतु तत्सदा ।। इति ।। इत्यादित्यदुहिता, शैलराजदुहिता च ।।)

अथ ग्रहतिलकम् ।। वधूवरयोरभिमुखीभूतः कश्चन ब्राह्मणः सदधिसिन्दूराक्तैरक्षतैः पूर्वं वरस्य पश्चाद्वध्वा ललाटे प्रतिमन्त्रान्तं तिलकं कुर्यात् । मन्त्राश्च यथा— ॐ गजाननो मूषकवाहनश्च सिन्दूररक्ताम्बरभूषितोऽसौ । लम्बोदरो विघ्नहरोऽम्बिकाजो वरस्य वध्वा वितनोतु भूतिम् ।।१।। हंसाधिरूढश्चतुराननोऽसौ वेदाधिवासो जगदादिकर्ता । कमण्डलूसूत्रपवित्रमाली वरस्य वध्वा वितनोतु भूतिम् ।।२।। शङ्खं गदां चक्रसरोरुहे च करैर्दधानो गरुडाधिरूढः । जगत्पतिर्दिक्पतिपूजितश्च वरस्य वध्वा वितनोतु भूतिम् ।।३।। वृषाधिरूढोऽमृतरश्मिचूडो विभूतिस्वच्छस्फटिकावभासः । गिरीन्द्रजाशोभितवामभागो वरस्य वध्वा० ।।४।। सिंहाधिरूढा जगदम्बिकेयं त्रिशूलचक्रासिसुपाशहस्ता । त्रैलोक्यमाता वरदा सदा हि वरस्य वध्वा० ।।५।। अरुन्धती सत्यवती च कुन्ती श्रीरामपत्नी गिरिजा शची च । श्रीरोहिणी द्रौपदराजकन्या वरस्य वध्वा० ।।६।। त्रिदेवमूर्तिर्जगदेकचक्षुर्विरिञ्चिनारायणशङ्करात्मा । छायासमेतोऽम्बुजिनीप्रबोधी वरस्य वध्वा० ।।७।। कलानिधिः कैरववर्गबन्धुः सुधामयः शुक्लतरैकहेतुः । नक्षत्रनाथो द्विजराजनामा वरस्य वध्वा० ।।८।। महीसुतो लोहितकस्वरूपो ज्योतिर्गरीयान् जगति प्रपूज्यः । श्रीमङ्गलाख्यः शुभशान्तिदाता वरस्य वध्वा० ।।९।। शशाङ्कसूनुर्जगति प्रसिद्धो मनोज्ञदाता कनकस्वरूपी । बुधश्च विज्ञानविचक्षणोऽसौ वरस्य वध्वा० ।।१०।। बृहस्पतिर्देवगणैकपूज्यः सदा प्रसन्नः सुरराजवन्द्यः । वाचस्पतिश्चाङ्गिरसः सुपीतो वरस्य वध्वा० ।।११।। हिमस्वरूपी दनुजेन्द्रपूज्यो महामहीयो भृगुवंशनाथः । सञ्जीविनी येन सुखानुभूता वरस्य वध्वा० ।।१२।। शनैश्चरोऽसावतिकृष्ण-

रूपः क्रूरस्वभावो गमनातिमन्दः । छायासुतो भास्करदेहजातो वरस्य वध्वा० ।।१३।। यो धावते पर्वसु चन्द्रसूर्यौ यः सिंहिकायाः खलु वीरपुत्रः । खड्गप्रदाता शुभशान्तिकर्ता वरस्य वध्वा० ।।१४।। समस्तसम्पत्समवाप्तिहेतुः केतुः प्रसन्नश्च विलग्नराशौ । विच्छिन्नमूर्धापि च खेटपूज्यो वरस्य वध्वा० ।।१५।। सप्तार्चिजिह्वश्च सुधूम्रवर्णः शाण्डिल्यपुत्रोऽरणिसूनुरेव । वैश्वानरो वायुसखश्च नित्यं वरस्य वध्वा० ।।१६।। लक्ष्मीर्मुकुन्दो गिरिजा महेशो वागीश्वरी चाम्बुजगर्भजातः । शचिः सुरेन्द्रो रतिकामदेवौ वरस्य वध्वाश्च शुभानि कुर्युः ।।१७।। सुराश्च सर्वे ग्रहदेवताश्च सप्तर्षयो दिक्पतयो नगाश्च । विधाय चान्ते तिलकप्रदानं वरस्य वध्वा अपि मङ्गलाय ।।१८।। इति ग्रहतिलकम् ।।

अथ स्विष्टकृद्धोमः – ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिरग्निर्देवता स्विष्टकृद्धोमे विनियोगः । ॐ अग्नये स्विष्टकृते स्वाहा ।। इदमग्नये स्विष्टकृते न मम । इति स्रुवावस्थितहुतशेषस्याग्नौ प्रक्षेपः । (अयं च होमो ब्रह्मणाऽनन्वारब्धकर्तृकः) तत आचम्य संस्रवप्राशनम् । पुनराचम्य तत्रैव स्नानम् । ततो वरः पूर्णपात्रं दद्यात् । ॐ अद्य कृतैतद्वैवाहिकहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे । इति ब्रह्मणे दक्षिणां दद्यात् । ततः सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता आदानप्रक्षेपयोः (प्रणीताविमोके) विनियोगः । ॐ सुमित्रिया नऽ आपऽ ओषधयः सन्तु । इति पवित्रं गृहीत्वा प्रणीताजलेन शिरः संमृज्य, ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च व्वयं द्विष्मः । इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् ।

ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव बर्हींषि जुहुयात् । तत्र मन्त्रः – ॐ देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत ऽ इमन्देव यज्ञꣳ स्वाहा वाते धाः ।। इति । तत उत्थाय वध्वा दक्षिण-

हस्तेन स्रुवे स्पृष्टे घृतपुष्पफलैः पूर्णाहुतिः । तत्र मन्त्रः – ॐ मूर्धानन्दिवो ऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कविꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा ।। इति । ततः स्रुवेण भस्मानीय दक्षिणकरानामिकया, ॐ त्र्यायुषं जमदग्नेः । इति ललाटे । ॐ कश्यपस्य त्र्यायुषम् । इति ग्रीवायाम् । ॐ यद्देवेषु त्र्यायुषम् । इति दक्षिणबाहुमूले । ॐ तन्नो ऽ अस्तु त्र्यायुषम् । इति हृदि त्र्यायुषं कुर्यात् । अनेनैव क्रमेण वध्वा अपि । तत्र 'तन्नो' इत्यस्य स्थाने 'तत्ते' इति विशेषः[१] । ततस्त्रिरात्रमक्षारलवणाशिनौ निवृत्तमैथुनौ च भवतः । इति विवाहपद्धतिः ।।

अथ चतुर्थ्यामपररात्रे चतुर्थीकर्म – तच्च गृहाभ्यन्तर एव कर्तव्यम् । तैलोद्वर्तनादिकं कृत्वा युगकाष्ठ उपविश्य स्नात्वा शुचिवस्त्रं परिधाय गृहं प्रविश्य प्राङ्मुखौ वधूवरावुपविशतः ।

तत्र कुशकण्डिकारम्भः – कुशैर्हस्तमात्रं चतुरस्रभूमिं परिसमुह्य कुशानैशान्यां निक्षिप्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरोत्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य वारिणा तं देशमभिषिच्य कांस्यपात्रेणाग्निमादाय तत्र (शिखिनामानमग्निम्) प्रत्यङ्मुखं निदध्यात् । ततो वरः कुशमादाय, ॐ अद्येह अस्यां रात्रौ कर्तव्यचतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे । इति ब्रह्माणं वृणुयात् । वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु । इति वरेणोक्ते, ॐ करवाणीति प्रतिवचनम् । ततोऽग्नेर्दक्षिणतः शुद्धमासनं निधाय तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निं प्रदक्षिणीकृत्य, अस्मिन् कर्मणि त्वं मे ब्रह्मा भव । इत्यभिधाय, ॐ भवानीति तेनोक्ते तत्र ब्रह्माणमुदङ्मुखमुपवेशयेत् । एवमाचार्यादीन् वृणुयात् ।

---

[१] यहां यसबेला दुलाहाको बाबु र दुलहीको बाबु दुइजना परस्परमा अङ्कमाल गर्दछन् भन्ने यस्तो उल्लेख पनि कहीं कहीं देखिन्छ ।

तत आचार्यः प्रणीतापात्रं पुरतः कृत्वा वारिणापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम्– बर्हिषश्चतुर्थभागमादाय, आग्नेयादीशानान्तम् । अपरचतुर्थभागमादाय, ब्रह्मणोऽग्निपर्यन्तम् । पुनरपरभागमादाय, नैर्ऋत्याद्वायव्यान्तम् । अवशिष्टेन अग्नितः प्रणीतापर्यन्तं स्तृणीयात् । ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, सम्मार्जनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यं, तण्डुलाः, पूर्णपात्रम् । एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि । (अग्नेरुत्तरतः प्रोक्षणीपात्रसमीपे जलपूर्णं पृथूदकं नाम पात्रं च स्थापयेत्)।

अथ पवित्रच्छेदनकुशैर्वरस्य प्रादेशमिते पवित्रे छित्वा प्रणीतोदकं सपवित्रकरेण त्रिः प्रोक्षणीपात्रे निधाय कराभ्यां उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं कुर्यात् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षहस्तस्यानामिकाङ्गुष्ठाभ्यां त्रिरुद्दिङ्गनं, प्रणीतोदकेन प्रोक्षणीप्रोक्षणं, प्रोक्षणीजलेनाऽऽसादितवस्तुसेचनं च कृत्वा अग्नेरुत्तरतः प्रणीतादक्षिणदिशि प्रोक्षणीपात्रं निदध्यात् । आज्यस्थाल्यामाज्यनिर्वापः प्रणीताजलं किञ्चिच्च दत्त्वा प्रणीताजलेन तण्डुलान् प्रक्षाल्य चरुस्थाल्यां प्रक्षिपेत् । स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निदध्यात् । तत आज्यमग्नितश्चरोःपूर्वेणाऽऽनीय अग्रे धृत्वा पश्चिमेन चरुमानीय आज्यस्योत्तरतो निदध्यात् । ततो वारत्रयं प्रोक्षणीवदाज्यस्योतपवनम्, अवेक्ष्य सत्यपद्रव्ये तन्निरसनं, पुनः पूर्ववत् प्रोक्षण्युतपवनं च कुर्यात् । तत उपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा उत्तिष्ठन् समिधस्तूष्णीमग्नौ प्रक्षिपेत् । तत उपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणं पर्युक्ष्य पवित्रे प्रोक्षणीपात्रे धृत्वा ब्रह्मणान्वारब्धः सुसमिद्धतमेऽग्नौ पातितदक्षिणजानुर्जुहुयात् । तत्राघारादारभ्याहुतिचतुष्टये तत्तदाहुत्यनन्तरं स्रुवावस्थितघृतस्य प्रोक्षणीपात्रे संस्रवप्रक्षेपः ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता चतुर्थीहोमे विनियोगः। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। (इति मनसा)। ॐइन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता चतुर्थीहोमे विनियोगः। ॐ इन्द्राय स्वाहा। इदमिन्द्राय न मम। (इत्याघारौ) ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता चतुर्थीहोमे विनियोगः। ॐ अग्नये स्वाहा। इदमग्नये न मम। ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता चतुर्थीहोमे विनियोगः। ॐ सोमाय स्वाहा। इदं सोमाय न मम। (इत्याज्यभागौ)।

तत आज्याहुतिपञ्चतये स्थालीपाकाहुतौ च पूर्वोपकल्पितपृथूदकपात्रे तत्तदाहुत्यनन्तरं हुतशेषप्रक्षेपः। आज्याहुतिपञ्चके नान्वारब्धः। ॐअग्ने प्रायश्चित्त इत्यादीनां पञ्चानां परमेष्ठीऋषिः अग्निवायुसूर्य चन्द्रगन्धर्वा देवताः अनुष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि। यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये न मम। (इति हुत्वा पृथूदकपात्रे संस्रवं प्रक्षिपेत्, एवमग्रेऽपि)॥ ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि। यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं वायवे न मम। ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि। यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं सूर्याय न मम। ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि। यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं चन्द्राय न मम। ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि। यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं गन्धर्वाय न मम।

ततः स्थालीपाकेन जुहोति। ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। (इति मनसा)। अग्रिमाहुतिदशतये तत्तदाहुत्यनन्तरं हुत-

शेषस्य प्रोक्षणीपात्रे प्रक्षेपः। तत्र ब्रह्मणान्वारब्ध आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम। तत आज्येन— ॐ व्याहृतीनां प्रजापतिर्ऋषिरग्निवायुसूर्या देवता गायत्र्युष्णिगनुष्टुभश्छन्दांसि चतुर्थीहोमे विनियोगः। ॐ भूः स्वाहा। इदमग्नये न मम। ॐ भुवः स्वाहा। इदं वायवे न मम। ॐ स्वः स्वाहा। इदं सूर्याय न मम। (एता महाव्याहृतयः)। ॐ त्वन्नोऽअग्नऽ इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ त्वन्नोऽअग्ने व्वरुणस्य व्विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳ सि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्नीवरुणाभ्यां न मम। ॐ स त्वन्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ स त्वन्नोऽअग्नेवमोभवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ। अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो नऽएधि स्वाहा। इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽअसि। अया नो यज्ञं व्वहास्यया नो धेहि भेषजꣳ स्वाहा। इदमग्नये न मम। ॐ येतेशतमिति वामदेवऋषिर्वरुणः सविताविष्णुर्विश्वे (देवाः) मरुतः स्वर्का देवतास्त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा व्वितता महान्तः। तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम। ॐ उदुत्तममिति शुनः शेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दश्चतुर्थीहोमे विनियोगः। ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय। अथा व्वयमादित्य व्व्रते तवानागसोऽअदितये स्याम स्वाहा। इदं वरुणाय न मम। (इति सर्वप्रायश्चित्तसंज्ञकाः)। ततः, ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता

चतुर्थीहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) । ततः संस्रवप्राशनम्, आचमनं च (वधूवरयोः) ।

ततः पूर्णपात्रदानम्– ॐ अद्येत्यादि पूर्वसङ्कल्पमुच्चार्य, अस्यां रात्रौ कृतैतच्चतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय (ब्रह्मस्वरुपाय) दक्षिणां तुभ्यमहं संप्रददे । इति ब्रह्मणे दक्षिणां (पूर्णपात्रं) दद्यात् । ॐस्वस्तीति प्रतिवचनम् । ॐ सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवताः प्रणीताविमोके विनियोगः । ॐ सुमित्रिया न ऽआपऽ ओषधयः सन्तु । इति पवित्राभ्यां शिर उन्मृज्य, ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यं च वयं द्विष्मः । इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् । ततस्तरणक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव जुहुयात् । ॐ देवा गातुविद इति मन्त्रस्य वनस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः । ॐ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा वाते धाः स्वाहा । इति ।

ततः पृथूदकपात्रस्थमुदकमाम्रपल्लवेनानीय वरो वधूमभिषिञ्चति– ॐ या त इत्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वधूर्देवताऽभिषेचने विनियोगः । ॐ या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दितातनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह ... ... देवि[1] । इति मन्त्रेण । ततो वधूं (स्वभुक्तशेष) स्थालीपाकं प्राशयति वरः– ॐ प्राणैस्त इति मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्वधूर्देवता चरुशेषभोजने विनियोगः । ॐ प्राणैस्ते प्राणान् संदधामि । ॐ अस्थिभिस्ते अस्थीनि संदधामि । ॐ मांसैस्ते मांसानि संदधामि । ॐ त्वचा ते त्वचं संदधामि । इति मन्त्रचतुष्टयेन प्रतिमन्त्रान्ते प्राशनम् ।

१, यो ठाउँमा अघि विवाहमा राखेको नाउले दुलहीलाई बोलाउनु पर्छ, कसैको मतमा यहाँ अर्कै नाउँ राख्नू भन्ने पनि छ ।

ततो वरः स्वदक्षिणपाणितलेन वधूहृदयं स्पृष्ट्वा जपति– ॐ यत्ते इति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो वधूर्देवता हृदयालम्भने विनियोगः । ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां दद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् । इति । ततः कङ्कणविमोचनम्, द्यूतग्रन्थिविमोकादीनि आचारप्राप्तानि कुर्यात् । ततो होता उत्थाय वधूदक्षिणहस्तस्पृष्टस्रुवेण घृतपुष्पफलपूर्णेन– ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दो ऽग्निर्देवता चतुर्थीकर्मणि पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽ अरतिं पृथिव्या वैश्वानरमृतऽ आजातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा । इति जुहुयात् । ततः स्रुवेण भस्मानीय दक्षिणकरानामिकया–– ॐ त्र्यायुषञ्जमदग्नेः । (इति ललाटे) ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) ॐ यद्देवेषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) ॐ तन्नोऽ अस्तु त्र्यायुषम् । (इति हृदि) अनेनैव क्रमेण वध्वा अपि तिलकं कुर्यात् । तत्र 'तन्नो' स्थाने 'तत्ते' इति विशेषः ।)ततो वरः होमकर्मणः साङ्गतायै गां, भूयसीं, दक्षिणां च दत्त्वा यज्ञसमाप्तिं कुर्यात् ।।(इति चतुर्थीकर्म ।। इति विवाहपद्धतिः समाप्ता ।।

अथ गर्भाधानम्[1] ।।

तत्र ऋतौ स्नाता चतुर्थदिने वधूः प्रातः 'आदित्यङ्गर्भम्[2]' इति तूष्णीं वा आदित्यमुपतिष्ठेत । ततस्तद्दिने मातृपूजापूर्वकमाभ्युदयिक-

---

[1] गर्भाधान संस्कारको पद्धतिको विशेष उल्लेख सूत्रमा केही छैन । यहाँ मूलमा भएको पाठ मात्र राखिएको छ । गदाधरको पद्धतिमा भएको प्रतिज्ञासङ्कल्प यस प्रकार छ– "देशकालौ स्मृत्वा अस्या मम भार्यायाः प्रतिगर्भं संस्कारातिशयद्वाराऽस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्ये" इति ।

[2] ॐ आदित्यङ्गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हरसा माभिम ठं० स्थाः शतायुषङ्कृणुहि चीयमानाः ।।

श्राद्धं कृत्वा षोडशवासरादर्वाक् शुभरात्रौ दक्षिणकरेण पतिर्वंध्वा उपस्थमभिमृशति– ॐ पूषा भग ꣳ सविता मे दधातु रुद्रः कल्पयतु ललामं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पि ꣳ शतु आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते (जो) वैश्वानर आदधातु। इति मन्त्रेण। ततः प्राङ्मुख उपविष्ट उदङ्मुखो वा एनामभिमन्त्रयेत् – गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके[1]। गर्भं ते अश्विनौ देवा वाधत्तां पुष्करस्रजौ ॥ इति मन्त्रेण।

ततो वधूकर्णसमीपे मुखं कृत्वा– ॐ रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणा वृतऽ उल्बं जहाति जन्मना ॥ इति मन्त्रं पठित्वा रेतः स्रावणं कुर्यात्। अथ तस्या हृदयमालभेत– ॐ यत्ते सुसीम इति मन्त्रस्य प्रजापतिर्ऋषिर्जगती छन्दो हृदयं देवता हृदयस्पर्शने विनियोगः। ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्मां दद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शत ꣳ शृणुयाम शरदः शतम् ॥ इति मन्त्रेण। ततः स्वस्थो हृष्टमना हृद्ये प्रदेशे प्रसन्नामनातुरां कामयमानामभग्नशय्यायां प्रदोषादूर्ध्वं स्त्रियमभिगच्छेत्।

अथ गर्भधारणोपायः– सा यदि गर्भं न दधीत तदा पतिः कृतोपवासः पुष्यनक्षत्रे श्वेतपुष्पकण्टकारिकाया मूलमुत्पाटच उदकेन पिष्ट्वा चतुर्थेऽहनि स्नाताया वध्वा दक्षिणनासापुटे नस्यं दद्यादनेन मन्त्रेण– ॐ इयमोषधीरिति मन्त्रस्य प्रजापतिर्ऋषिर्जगतीछन्द ओषधीर्देवता आसेके विनियोगः। ॐ इयमोषधी त्रायमाणा सहमाना सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति ॥ इति गर्भाधानम्।

१, 'पृथुष्टुके' को पाठमा 'सरस्वति' यो पाठ पनि देखिन्छ।

अथ पुंसवनम्[1] ।।

तच्च गर्भमासापेक्षया द्वितीयतृतीययोरन्यतरस्मिन् करणीयम् । पुष्यपुनर्वसुमृगशिरोहस्तमूलश्रवणस्वात्यन्यतमपुन्नामकनक्षत्रयुतोभयचन्द्रतारानुकूलं दिवसमवगत्य तत्पूर्वदिवसे वधूमुपवासं कारयित्वा अग्रिमदिने तस्याः स्नातायाः अहतवासोयुगपरिधानं तदनन्तरं पतिः स्नातः शुचिः कृताचमनो मातृपूजापूर्वकाभ्युदयिकश्राद्धं कृत्वा वटशाखां वटशुङ्गाग्राँश्च आचारतः कुशकण्टकमपि शिशिरेण (जलेन) पिष्ट्वा वधूदक्षिणनासापुटे नस्यं दद्यात्–

ॐ हिरण्यगर्भ इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आसेके विनियोगः । ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽ आसीत् । स दाधार पृथिवीं द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ।। ॐ अद्भ्यः सम्भृत इति मन्त्रस्य नारायणऋषिस्त्रिष्टुप्छन्दः पुरुषो देवता आसेके विनियोगः । ॐ अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ।। इति मन्त्राभ्याम्[2] । इति पुंसवनम् ।।

---

[1] १, पुंसवन संस्कारको प्रतिज्ञासङ्कल्पवाक्य गदाधरभाष्यमा यस प्रकार छ –
"देशकालौ स्मृत्वाऽस्यां भार्यायामुत्पत्स्यमानगर्भस्य वैजिकगार्भिकदोषपरिहारसुरूपताज्ञानोदयप्रतिरोधिपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनं करिष्ये" । इति ।

[2] २, यस पछि सूत्रमा यस्तो विशेष विधान गरेको छ–
"कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्त्स्यादिति विकृत्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः" अर्थात् गर्भको बालक शक्तिमान् होस् भन्ने इच्छा भएमा पुरुषले कतारोमा पानी भरेर गर्भवतीको काखमा राख्नू र यो मन्त्र भन्नू– ॐसुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा छन्दा ँ्स्यङ्गानि यजू ँ्षि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छन्धिष्ण्याः शफाः । सुपर्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ।। इति ।

अथ सीमन्तोन्नयनम् ।।

तच्च पुंसवनवद्गर्भमासापेक्षया षष्ठेऽष्टमे वा पूर्वोक्तपुन्नामकसप्तनक्षत्रान्यतमनक्षत्रयुक्ते चन्द्रतारानुकूलविहितदिने मातृपूजाभ्युदयिके कृत्वा बहिः शालायां[1] कुशकण्डिकां कुर्यात् । तत्र क्रमः[2]–

कुशत्रयेण हस्तपरिमितचतुरस्रभूमिं परिसमुह्य कुशानैशान्यां परिक्षिप्य गोमयोदकेनोपलिप्य कुशमूलेन स्फ्येन वा उत्तरोत्तरतस्त्रिरुल्लिख्य उल्लेखनक्रमेणोद्धृत्य वारिणा तं देशमभ्युक्ष्य कांस्यपात्रेणाग्निमानीय तत्र प्रत्यङमुखं निदध्यात् ।

ततो वरः ब्रह्मवरणं कुर्यात् । तत्र वाक्यम्– ॐ अद्यकर्तव्यसीमन्तोन्नयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पताम्बूलयज्ञोपवीतवासोभिर्ब्रह्मत्वेन त्वामहं वृणे । इति ब्रह्माणं वृणुयात् । ॐ वृतोऽस्मीति प्रतिवचनम् । ॐ यथाविहितं कर्म कुरु । इति होत्राभिहिते, ॐ करवाणीति प्रतिवचनानन्तरं दक्षिणतो ब्रह्मासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य, ॐअस्मिन् सीमन्तोन्नयनकर्मणि त्वं मे ब्रह्मा भव । इत्यभिधाय, ॐ भवानीति तेनोक्ते अग्निप्रदक्षिणं कारयित्वा ब्रह्माणं पूर्वोपकल्पिते कुशास्तृते आसने उपवेशयेत् ।

ततः प्रणीतापात्रं पुरतः कृत्वा जलेनापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम्– बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानान्तम्, ब्रह्मणोऽग्निपर्यन्तं,

---

१. विवाह, चूडा, उपनयन, केशान्त र सीमन्तोन्नयन संस्कारहरूमा घरभित्र मण्डप बनाएर कर्म नगर्नू भन्ने शास्त्रको भनाइ छ ।

२, गृह्यसूत्रमा गदाधरले सीमन्तोन्नयनको प्रतिज्ञासंकल्प यस प्रकार लेखेका छन्–
''देशकालौ स्मृत्वा तनुरुधिरप्रियाऽलक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वारा प्रतिगर्भं बीजगर्भसमुद्भवैनोनिबर्हणजनकातिशयद्वारा च श्रीपरमेश्वरप्रीन्यर्थं स्त्रीसंस्काररूपं सीमन्तोन्नयनाख्यं कर्म करिष्ये ।

नैर्ऋत्याद्वायव्यान्तं, अग्नितः प्रणीतापर्यन्तमिति परिस्तीर्य, ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशपत्रत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, संमार्जनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यम्, षट्पञ्चाशदुत्तरशतद्वययजमानमुष्टिपरिमिताऽऽमतण्डुलपूर्णपात्रम्, तिलमुद्गमिश्रास्तण्डुलाः एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणाऽऽसादनीयानि । तदुत्तरतो वीणागाथिनौ, प्रादेशमितसाग्राश्वत्थशङ्कुः, त्रिश्वेतशललकीकण्टकम्, पीतसूत्रपूर्णस्तर्कुः, दर्भपिञ्जुलिकात्रयम्, औदुम्बरयुग्मफलान्वितशाखा, (औदुम्बरयुग्मफलसुवर्णघटितदेवा (व) कर्करादियुक्तसूत्रदोरकपुष्पबिल्वादिफलयुतवाराष्टतयादि ?) अन्यदपि स्वाचारपरिप्राप्तद्रव्यमासादनीयम् ।

ततः पवित्रच्छेदनकुशैः प्रादेशमिते पवित्रे कृत्वा, सपवित्रेण पाणिना त्रिः प्रोक्षणीपात्रे प्रणीतोदकं कृत्वा अनामिकाङ्गुष्ठाभ्यामुत्तराग्रे गृहीत्वा त्रिरुत्पवनं, ततः प्रोक्षणीपात्रस्य सव्यहस्तकरणं, अनामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुद्दिङ्गनं, प्रणीतोदकेन प्रोक्षणीप्रोक्षणं, प्रोक्षणीजलेनाऽऽसादितवस्तुसेचनं, अग्निप्रणीतयोर्मध्ये प्रोक्षणीनिधानम् । तत आज्यस्थाल्यामाज्यनिर्वापः, चरौ तु तिलमुद्गमिश्रतण्डुलानां प्रणीतोदकेन प्रक्षाल्य तज्जलं किञ्चिद्दत्त्वा प्रक्षेपः, ततः स्वयं चरुं गृहीत्वा ब्रह्मणा चाज्यं वह्नेरुत्तरतश्चरुं दक्षिणत आज्यं निदध्यात् । सिद्धे चरौ ज्वलत्तृणं प्रदक्षिणमुभयोरुपरि भ्रामयित्वा वह्नौ तत्प्रक्षेपः । ततः स्रुवप्रतपनं, संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा, आज्यपश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् । तत आज्यस्य प्रोक्षणीवदुत्पवनम्, अवेक्ष्य सत्यपद्रव्ये तन्निरसनम् । ततः पूर्ववत्प्रोक्षण्युत्पवनम् । तत उपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा उत्थाय तूष्णीमग्नौ समिधः प्रक्षि-

पेत् । अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेण पर्युक्ष्य प्रोक्षणीपात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात् । तत्राहुतिचतुष्टये प्रत्याहुत्यनन्तरं हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः, समिद्धतमेऽग्नौ होमः ।

ॐप्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) । ॐइन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम । (इत्याघारौ) ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये स्वाहा । इदमग्नये न मम । ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐसोमाय स्वाहा । इदं सोमाय न मम । (इत्याज्यभागौ) । ततो ऽनन्वारब्धः स्थालीपाकेन होमः । ॐप्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) । ततोऽन्वारब्धो जुहुयात् । तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः । तत्रैवाज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः । ॐअग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देवता सीमन्तोन्नयनहोमे विनियोगः । ॐअग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवताः सीमन्तोन्नयनहोमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐ स्वः स्वाहा । इदं सूर्याय । (एता महाव्याहृतयः) । ॐ त्वन्नोऽ अग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः सीमन्तोन्नयहोमे विनियोगः । ॐ त्वन्नोऽ अग्ने ववरुणस्य विद्वान् देवस्य हेडोऽ अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳ सि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्यां न मम । ॐ स त्वन्न इति वामदेवऋषिरग्नीवरुणौ

देवते त्रिष्टुप्छन्दः सीमन्तोन्नयनहोमे विनियोगः । ॐ स त्वन्नोऽ अग्नेवमो भवोती नेदिष्ठो ऽ अस्या ऽ उषसो व्युष्टौ । अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽ एधि स्वाहा । इदमग्नीवरुणाभ्यां न मम । ॐअयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्दः सीमन्तोन्नयनहोमे विनियोगः । ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्यमित्त्वमया ऽ असि । अया नो यज्ञं व्वहास्यया नो धेहि भेषजꣳ स्वाहा । इदमग्नये न मम । ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वेदेवामरुतः स्वर्का देवता सीमन्तोन्नयनहोमे विनियोगः । ॐये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो ऽ अद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम । ॐउदुत्तममिति शुनः शेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः सीमन्तोन्नयनहोमे विनियोगः । ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्वि मध्यमꣳ श्रथाय । अथा व्वयमादित्यव्रते तवानागसोऽ अदितये स्याम स्वाहा । इदं वरुणाय न मम । (एताः सर्वप्रायश्चित्तसंज्ञकाः) । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता सीमन्तोन्नयनहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम । (इति मनसा) इति प्राजापत्यम् । ततः संस्रवप्राशनं कृत्वा ऽऽचम्य पूर्णपात्रं कुर्यात् । देशकालौ सङ्कीर्त्य एतस्मिन् सीमन्तोन्नयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणात्वेन तुभ्यमहं संप्रददे । इति ब्रह्मणे दक्षिणां (पूर्णपात्रं) दद्यात् । ततः प्रणीताविमोको बर्हिर्होमश्च ।

ततः पश्चादग्नेर्वधूमहते वाससी परिधाप्य भद्रपीठ उपवेशयेत् । ततस्त्रिश्वेतशललकीकण्टकाश्वत्थसाग्रशंकुपीततन्तुपरिपूर्णकर्कुदर्भपिञ्जुलीत्रितयोदुम्बरयुग्मफलान्वितप्रादेशमितशाखाभिर्वर्तुलीकृत्य (वेणी-

कृत्य) सीमन्तमूर्ध्वं विनयति । ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः क्रमेण गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवता विनयने विनियोगः । ॐ भूर्भुवः स्वर्विनयानि । (इति मन्त्रेण सकृत्) । ॐ भूर्विनयामि । ॐ भुवर्विनयामि । ॐ स्वर्विनयामि । (इति मन्त्रत्रयेण प्रत्येकं वा) । (ततो विनयनसाधनं) औदुम्बरफलयुगलान्वितशल्लकीकण्टकादिपञ्चकं वधूसीमन्तं दक्षिणतो वेणीकृत्य पतिर्बध्नाति । ॐ अयमूर्जावतो वृक्ष इति मन्त्रस्य प्रजापतिर्ऋषिस्तुरीयश्छन्दः फलिनी देवता वेणीबन्धने विनियोगः । ॐअयमूर्जावतो वृक्ष उर्जीव फलिनी भव । इति मन्त्रेण ।(तत औदुम्बरयुग्मफलादिसमन्वितसूत्रदोरकं वधूग्रीवायामाचारतोऽनेनैव मन्त्रेण बध्नीयात् । ततो बिल्वफलादिसमन्वितवाराष्टतयेन स्नपनम् । तच्च फलपुष्पादिकं नूतनवस्त्रेण वध्वा प्रतीक्ष्य क(ध)र्तव्यम् ? ।) प्रतिस्नपने स्वामिपठनीयो मन्त्रः । ॐ अयमूर्जावतो वृक्ष उर्जीव फलिनी भव। इति ।

ततः– ॐ राजानं सङ्गायेताम् । इति प्रैषानन्तरम्– ॐ राजानमिति प्रजापतिर्ऋषिर्गायत्रीछन्दः सोमो देवता गाथागाने विनियोगः । ॐसोम एव नो राजेमा मानुषीः प्रजाः । अविमुक्तचक्र आसीरंस्तीरे तुभ्यमसौ (श्रीअमुकदेवी) । इति वीणागाथिनौ गायतः । अन्यो वा वीरतरः । ततो या ग्रामसन्निहिता नदी तस्या नाम गृह्लीयात् । तत उत्थाय वध्वा दक्षिणकरेण स्रुवे स्पृष्टे फलपुष्पसमन्वितघृतेन– ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृत ऽ आजातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवा : स्वाहा । इति पूर्णाहुतिं दत्त्वोपविश्य स्रुवेण भस्मानीय दक्षकरानामिकया– ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः । ॐ त्र्यायुषञ्जमदग्नेः । (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) । ॐ यद्देवेषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) ।

ॐ तन्नोऽअस्तु त्र्यायुषम् । (इति हृदि) । इति त्र्यायुषं कुर्यात् । तत्र 'तन्नो' इत्यस्य स्थाने 'तत्ते' इति प्रयोगः । ततो ब्राह्मणभोजनम् । इति सीमन्तोन्नयनम् ।।

अथ जातकर्म ।।

तत्र प्रथमं प्रसवशूलवतीमद्भिः पतिरभिषिञ्चति-- ॐ एजतु दशमास्य इति प्रजापतिर्ऋषिर्महापङ्क्तिश्छन्दो गर्भो देवता अभ्युक्षणे विनियोगः । ॐ एजतु दशमास्यो गर्भो जरायुणा सह । यथायं वायुरेजति यथा समुद्रऽ एजति । एवायं दशमास्योऽअस्रज्जरायुणा सह ।। इति मन्त्रेण । ततो (अवरावपतनमन्त्रं) वधूसमीपे पतिर्जपति- ॐ अवैतु पृश्नीत्यस्य प्रजापतिर्ऋषिर्बृहतीछन्दोऽग्निर्देवता अवपातने विनियोगः । ॐ अवैतु पृश्निशेवल ꣳ[1] शुने जरायवत्तवे । नैव माꣳसेन पीवरि न कस्मिँश्च नायतनमवजरायुपद्यताम् । इति ।

ततः पुत्रे जाते नाभेर्वर्धनात् प्राक् (नालच्छेदात्पूर्वं)पिता (तस्य मुखं निरीक्ष्य सचैलं स्नात्वा) - अद्येत्यादि देशकालौ स्मृत्वा ममास्य कुमारस्य गर्भाम्बुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबीजगर्भ-समुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माहं करिष्ये; तदङ्गतया गणेशपूजां पुण्याहवाचनं मातृपूजां नान्दीश्राद्धं चाहं करिष्ये । इति ।

(अथ मेधाजननम्) - ततः कृताभ्युदयिकः कुमारं दक्षिणकरस्यानामिकया सुवर्णान्तर्हितया मधु घृतेनैकीकृत्य घृतमेव वा पिता प्राशयति ।

ॐ भूस्त्वयीत्यादीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता मधुघृतप्राशने (मेधाजनने) विनियोगः ।

---

[1] सूत्रमा "पृश्निशेवलावल ठँ० " पाठ छ तापनि अर्थानुसन्धान गर्दा मूलमा भएको पाठ नै ठीक देखिन्छ ।

ॐ भूस्त्वयि दधामि, ॐ भुवस्त्वयि दधामि, ॐ स्वस्त्वयि दधामि, ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि[1]। इति मेधाजननम् ।।

(अथायुष्यकरणम्) – ततः कुमारस्य दक्षिणे कर्णे नाभ्यां वा मुखं दत्त्वा, ॐ अग्निरायुष्मानित्यादीनां प्रजापतिर्ऋषिर्गायत्रीछन्दो लिङ्गोक्ता देवता आयुष्यकरणे विनियोगः। ॐ अग्निरायुष्मान् स वनस्पतिभिरायुष्माँस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि । ॐ सोम आयुष्मान् स ओषधीभिरायुष्माँस्तेन त्वाऽऽ युषाऽऽ युष्मन्तं करोमि । ॐ ब्रह्मायुष्मत्तद् ब्राह्मणैरायुष्मत्तेन त्वाऽऽयुषाऽऽ युष्मन्तं करोमि । देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वा ऽऽ युषा ऽऽ युष्मन्तं करोमि । ॐ ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वा ऽऽ युषा ऽऽ युष्मन्तं करोमि । ॐ पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वा ऽऽ युषा ऽऽयुष्मन्तं करोमि । ॐयज्ञ आयुष्मान् स दक्षिणाभिरायुष्माँस्तेन त्वा ऽऽ युषा ऽऽ युष्मन्तं करोमि । ॐ समुद्र आयुष्मान् स स्रवन्तीभिरायुष्माँस्तेन त्वा ऽऽ युषा ऽऽ युष्मन्तं करोमि । इति त्रिर्जपित्वा, ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् । इति च त्रिर्जपति । इति आयुष्यकरणम् ।।

अथ तस्य दीर्घमायुः कामयमानः पुत्रमभिस्पृशन्ननुवाकं जपति । स चायम्––

ॐ दिवस्परीत्येकादशर्चस्य वत्सप्रीर्भालन्दनऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता अभिमर्शने विनियोगः । ॐ दिवस्परि प्रथमं जज्ञेऽअग्निरस्मद्द्वितीयं परिजातवेदाः । तृतीयमप्सु नृमणा ऽ अजस्रमिन्धान ऽ एनं जरते स्वाधीः ।। विद्मा तेऽ अग्ने त्रेधा त्रयाणि विद्मा ते धाम बिभृता पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत ऽ आजगन्थ ।। समुद्रे त्वा नृमणा ऽ अप्स्वन्तर्नृचक्षा ऽ ईधे दिवो ऽ अग्न ऽ ऊधन् । तृतीये त्वा रजसि

---

[1] यो सबै व्याहृति एकै मन्त्र हो, अतः सबै व्याहृतिस्वरूप मन्त्र भनेर एकपल्ट मात्र खुवाइन्छ । हरिहरको भनाइ पनि यही छ ।

तस्थिवाँ समपामुपस्थे महिषा ऽ अवर्धन् ।। अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो ऽ अख्यदारोदसी भानुना भात्यन्तः ।। श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः । वसुः सूनुः सहसो ऽ अप्सु राजा विभात्यग्र ऽ उषसामिधानः ।। विश्वस्य केतुर्भुवनस्य गर्भ ऽ आ रोदसी ऽ अपृणाज्जायमानः। वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ।। उशिक् पावको ऽरतिः सुमेधा मर्त्येष्वग्निरमृतो निधायि । इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ।। दृशानो रुक्म ऽ उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतोऽअभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ।। यस्ते ऽ अद्य कृणवद्भद्रशोचेपूपन्देवघृतवन्तमग्ने । प्रतन्नय प्रतरं वस्यो ऽअच्छाभि सुम्नं देवभक्तं यविष्ठ ।। आतम्भज सौश्रवसेष्वग्न ऽ उक्थ ऽउक्थ ऽ आभज शस्यमाने । प्रियः सूर्ये प्रियो ऽ अग्ना भवात्युज्जातेनभिनददुज्जनित्वैः ।। त्वामग्ने यजमाना ऽ अनु द्यून्विश्वा वसु दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ।।
(इत्येककण्डिकान्यूनो वात्सप्रानुवाकः)

ततः कुमारस्य प्रतिदिशमेकैकं ब्राह्मणं मध्ये पञ्चममूर्ध्वमवेक्ष्यमाणमवस्थाप्य[1] तानुद्दिश्य, ॐ इममनुप्राणीत । इति पिता ब्रूयात् । ततस्तेषु मध्ये 'प्राण' इति पूर्वो 'व्यान' इति दक्षिणः 'अपान' इत्यपर 'उदान' इत्युत्तर उपरिष्ठादवेक्ष्यमाणः पञ्चमः 'समान' इति ब्रूयात् । एषामसंभवे स्वयमेव तत्र तत्रोपगम्य तथैव ब्रूयात्[2] ।

अथ कुमारजन्मभूमिमभिमन्त्रयेत्– वेद ते भूमि हृदयमित्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो (लिङ्गोक्ता देवता) भूम्यभिमन्त्रणे विनियोगः । ॐवेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम् । वेदाहं तन्मां

---

[1] बालकका चारतिर बसेका चारजना ब्राह्मणहरू बालकलाई हेरेर बस्तछन् र बीचमा बसेका एकजना ब्राह्मण आकाश तर्फ हेरेर बस्तछन् ।

[2]. आफैंले गरेमा प्रैषवाक्य गर्नु पर्दैन ।

तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ।।

अथ कुमारमभिमृशति– ॐ अश्मा भवेत्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो लिङ्गोक्ता देवता अभिमन्त्रणे विनियोगः । ॐ अश्मा भव परशुर्भव हिरण्यमस्तुतं भव । आत्मा वै पुत्रनामासि स जीव शरदः शतम् ।। इति ।

ततः कुमारमातरमभिमन्त्रयेत्– ॐ इडासीत्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द इडा देवता अभिमन्त्रणे विनियोगः । ॐ इडासि मैत्रावरुणी वीरे वीरमजीजनथाः । सा त्वं वीरती भव यास्मान्वीरवतोकरत् ।। इति मन्त्रेणाभिमन्त्रणानन्तरं मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छति- ॐ इमꣳ स्तनमित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता स्तनदाने विनियोगः । ॐ इमꣳ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ।। एवं वामस्तनं प्रक्षाल्य प्रयच्छति– ॐ यस्ते स्तन इत्यस्य दीर्घतमाऋषिस्त्रिष्टुप्छन्दो वाग्देवता स्तनदाने विनियोगः । ॐ यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः । येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेकः ।।

ततः प्रसववतीशयनीयमस्तकोपरि भूमौ वारिपूर्णं पात्रं निदधाति– ॐ आपो देवेष्वित्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो आपो देवता उदपात्रनिधाने विनियोगः । ॐ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ । एवमस्याꣳ सूतिकायाꣳ सपुत्रिकायां जाग्रथ ।। इति मन्त्रेण । तच्च सूतिकोत्थानदिवसपर्यन्तं तत्रैव धर्तव्यम् ।

ततः सूतिकागृहद्वारदेशे पञ्चभूसंस्कारान् कृत्वा अग्नेरुपसमाधानम् – (कुशत्रयेण हस्तपरिमितचतुरस्रभूमिं परिसमुह्य तानैशान्यां प्रक्षिप्य, गोमयोदकेनोपलिप्य, स्रुवमूलेन स्फ्येन वा उत्तरोत्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेणोद्धृत्य, वारिणा तं देशमभ्युक्ष्य, कांस्यपात्रे-

णाग्निमानीय तत्र प्रत्यङ्मुखं निदध्यात्, इत्यग्नेरुपसमाधानम्) । स चाग्निः सूतिकोत्थानपर्यन्तं धार्यः । तत्र चाग्नौ उभयोः सन्ध्ययोः फलीकरणमिश्रसर्षपान् दशदिनानि पिता अन्यो ब्राह्मणो वा ऋजुहस्तेन जुहुयात् । (तत्र प्रथमाहुतौ मन्त्रः)– ॐ शण्डामर्केति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द आलिखता देवता फलीकरणमिश्रसर्षपहोमे विनियोगः । ॐ शण्डामर्का उपवीरः शौण्डिकेय उलूखलः । मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ।। इदं शण्डामर्काभ्यामुपवीराय शौण्डिकेयायोलूखलाय मलिम्लुचाय द्रोणेभ्यश्च्यवनाय न मम । (द्वितीयाहुतौ)– ॐ आलिखन्नित्यस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द आलिखता देवता फलीकरणमिश्रसर्षपहोमे विनियोगः । ॐ आलिखन्ननिमिषः किम्वदन्त उपश्रुतिर्हर्यक्षः कुम्भीशत्रुः पात्रमाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा ।। इदमालिखतेऽनिमिषाय किम्वदन्ताय उपश्रुतये हर्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हन्त्रीमुखाय सर्षपारुणाय च्यवनाय न मम ।

अथ च यदि दशाहाभ्यन्तरे कुमारग्रहो बालमाविशेत् । (तदाविष्टो न नामयति न रोदिति न हृष्यति न तुष्यति न ग्लायति च तदैतन्नैमित्तिकं कर्म कर्तव्यम्) । तदा तं बालं जालेन उत्तरीयेण वाससा वा प्रच्छाद्य अङ्के आदाय पिता जपति– ॐ कूर्कुर इत्यादि त्रयाणां प्रजापतिर्ऋषिरनुष्टुप्छन्दः शुनको देवता जपे विनियोगः । ॐ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः । चेच्चेच्छुनक सृज नमस्तेऽअस्तु सीसरो लपेतापह्वर । ततसत्यं यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः । चेच्चेच्छुनक सृज नमस्तेऽअस्तु सीसरो लपेताह्वर ।। ततसत्यं यत्ते सरमा माता सीसरः पिता श्यामशबलौ भ्रातरौ । चेच्चेच्छुनक सृज नमस्तेऽअस्तु सीसरो लपेतापह्वर ।। इति जपः । न नामयति न रोदिति

न हृष्यति न तुष्यति[1] न ग्लायति यदा तदा[2] यत्र वयं वदामो यत्र चाभिमृषामसि । इति मन्त्रेण पिता कुमारमभिमृशति । इति जातकर्म ।।

अथ षष्ठिकापूजा ।।

अथ पुत्रे जाते षष्ठे दिने रात्रौ षष्ठिकापूजा । तत्र कुमारपिता प्रदोषसमये सूतिकागृहे पूजामण्डपं विधाय प्राङमुख उदङमुखो वोपविश्य दीपं प्रज्वाल्य यवान् गौरसर्षपाँश्च सूतिकागृहे पूजास्थाने विकिरेत् । तत्र रक्षोहणमिति त्रिभिर्मन्त्रैः[3], ॐअपक्रामन्तु ते भूता ये भूता भूमिमाश्रिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।। इति मन्त्रेण च ।

अथ प्रयोगः– कुशतिलजलान्यादाय, ॐ अद्येत्यादि देशकालौ स्मृत्वा अमुकगोत्रोऽमुकशर्माहं समातृकस्य नवोत्पन्नकुमारस्य आयुरारोग्यैश्वर्यबलपुष्टिवृद्धचर्थं कुमारजन्मतो दुष्टस्थानस्थितानां ग्रहाणां दुष्टदोषोपशान्त्यर्थं शुभस्थानस्थिताधिकशुभफलप्राप्त्यर्थं बालग्रहदशान्तर्दशाजनितदोषोपशान्त्यर्थं विशेषतो रक्षोभूतपिशाचराक्षसवेतालभैरवनानाविधयोगिनीगणयक्षगन्धर्वविद्याधराप्सरोगणदेवगणमातृगणडाकिनीशाकिनीशकुनीरेवतीगणादिभ्यो रक्षार्थं त्रिविधोत्पातशान्त्यर्थं गणेशमातृकापूजापूर्वकं षष्ठिकादेव्याः पूजनमहं करिष्ये । इति सङ्कल्प्य ब्राह्मणान् वृणुयात् । दीपदाने– प्रातः सूर्योदय-

---

१. 'न तुष्यति' यो पाठ सूत्रको पाठभन्दा बढी देखिन्छ ।

२. 'यदा तदा' यो पाठ सूत्रमा पढेको छैन । ३. ॐरक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यं मे निष्टचो यममात्यो निचखानेदमहन्तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ।। स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ।। रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो वलगहनोवनयामि वैष्णवान्रक्षोहणो वो वलगहनोवस्तृणामि वैष्णवान्रक्षोहणौ वां वलगहनाऽ उपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ ।।

पर्यन्तं दीपदानमहं करिष्ये । इति सङ्कल्प्य, नमोऽस्त्वनन्तायेति दीपं संपूज्य, कलशस्थापनविधिना कलशं संस्थाप्य संपूज्य, गणानान्त्वेति मन्त्रेण गणपतिं संपूज्य 'वक्रतुण्डेत्यादिना प्रार्थयित्वा पीठादावक्षतपुञ्जेषु वा गौर्यादिषोडशमातॄः पूजयेत्–'[1] ॐ गौरि इहागच्छेह तिष्ठेत्यादि प्रत्येकमावाह्य पाद्यादिना प्रणवादिचतुर्थ्यन्तनमोऽन्तनाममन्त्रेण संपूज्य गौर्यादिषोडशमातरः क्षमध्वमिति विसर्जयेत् ।

ततः षष्ठिके इहागच्छेह तिष्ठेत्यावाहनादिभिः संपूज्य प्रार्थयेत्–

रूपं देहि यशो देहि भगं भवति देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे ।। इति ।।
ॐ षष्ठिके पूजितासि क्षमस्वेति विसर्जयेत् ।

ततः षट्कृत्तिकाः पूजयेत्– ॐ शिवे इहागच्छेह तिष्ठेत्यादिक्रमेण संभूतिम्, कीर्तिम्, अनुसूयाम्, क्षमां पूजयित्वा षट्कृत्तिकाः पूजिताः स्थ क्षमध्वमिति विसर्जयित्वा, ॐ यदक्रन्द[2] इति मन्त्रेण स्कन्दं पूजयित्वा–

यो नन्दनः पशुपतेर्मातॄणां पावकस्य च ।
गङ्गोमाकृत्तिकानां च स नो देवः प्रसीदतु ।।
इति प्रार्थयित्वा, स्कन्द क्षमस्वेति विसर्जयेत् ।

ततश्चतुः षष्टियोगिनीः समुदायेनैव पूजयेत् । ॐ चतुः षष्टियोगिन्य इहागच्छतेह तिष्ठतेत्यावाहनादिभिःपूजयित्वा विसर्जयेत् ।

---

[1] गौर्यादिषोडशमातृका यी हुन्– "गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः ।। धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ।"

[2] ॐयदक्रन्दः प्रथमं जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महिजातं तेऽअर्वन् ।।

अथ ब्रह्मसूत्रमन्त्रणमन्त्राः– मनोजूतिः[1], सूर्यरश्मिः[2]०, सोमो धेनुम्[3]०, पितृभ्यः स्वधायिभ्यः[4]०, प्रजापतेन०[5], वातो वा[6]०, नमः शम्भवाय[7]०, त्रातारमिन्द्रम्[8]०, नमोस्तु सर्पेभ्यः[9]०, अग्निर्देवता[10]०, ब्रह्म जज्ञानम्[11]० इति ब्रह्मसूत्रमन्त्रणम् ।

अथ षष्ठे दिने बालग्रहहरणम् ।। प्रयोगसारे–

"षष्ठे दिने च फेत्कारी ग्रही गृह्णाति बालकम् ।
तच्चेष्टा गात्रविक्षेपो हास्यरोदनमोहनम् ।।
कुष्ठगुग्गुलुसिद्धार्थगजदन्तैर्घृतेन च ।
धूपयेल्लेपयेद्वापि ततो मुञ्चति सा ग्रही ।।"

बलिमन्त्रश्च नारायणीये–

दधिभक्तमत्स्यमांसादिसाधितबलिमादाय बालकोपरि भ्रामयेदनेन मन्त्रेण– "ॐ फेत्कारिणि कूष्माण्डि भगवति सुरार्गिणि सुमण्डिते मुञ्च मुञ्च दह दह पच पच सर सर गच्छ गच्छ स्वाहा" इति मन्त्रेण बालकोपरि भ्रामयित्वा चतुष्पथे क्षिपेत् ।

१, मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ठं० समिमन्दधातु । विश्वेदेवासऽ इह मादयन्तामों ३ प्रतिष्ठ ।। २, सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ २।। अजस्रम् । तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ।। ३, सोमो धेनु ठं० सोमोऽ अर्वन्तमाशु ठं० सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्य ठं० सभेयं पितृश्रवणं यो ददाशमस्मै ।। ४, पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ।। ५, प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽ अस्तु वय ठं० स्याम पतयो रयीणाम् ।। ६, वातो वा मनो वा गन्धर्वाः सप्तवि ठं० शतिः । तेऽ अग्रेश्वमयुञ्जंस्तेऽ अस्मिञ्जवमादधुः ।। ७, नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च । नमः शिवाय च शिवतराय च ।। ८, त्रातारमिन्द्रमवितारमिन्द्र ठं० हवे हवे सुहव ठं० शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ठं० स्वस्ति नो मघवा धात्विन्द्रः ।। ९, नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।। १०, अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ।। ११, ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः । स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ।।

ततो बालरक्षार्थं मृत्युञ्जयपूजनं, मन्थनीपूजनं, द्वारदेशे मुसलस्थापनं, जालं पूर्वमेव सूतिकोपरिस्थापितपोटलिकां काण्डेन[1] बेधनं, छागकर्णमोटनं[2], बालग्रहहरस्तोत्रपाठादि कृत्वा ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्त्वा रात्रौ जागरणं कुर्यात् ।

षष्ठीपूजादानादिषु शुद्धिरुक्ता व्यासेन–
"सूतिकावासनिलया जन्मदा नाम देवताः ।
तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ।।
प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ।
त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि ।।" इति ।
इति षष्ठिकापूजाप्रयोगः ।।

अथ नामकर्म ।।

तत्र दशमेऽहनि सूतिकामुत्थाप्य एकादशेऽहनि विहितदिनान्तरे वा पिता नाम करोति । तत्र प्रथमं मातृपूजाऽऽभ्युदकादि[3] कृत्वा ब्राह्मणान् भोजयित्वा कुमारं संस्नाप्य अहतं वासः परिधाप्य कृतस्वस्त्ययनं प्राङ्मुखं दक्षिणकर्णे 'अमुकनामासि' इति त्रिः श्रावयति । नाम च, द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् । अयुजाक्षरमाकारान्तं स्त्रियै तद्धितान्तम् । शर्मान्तं ब्राह्मणस्य, वर्मान्तं क्षत्रियस्य, गुप्तान्तं वैश्यस्य, दासान्तं शूद्रस्य । इति नामकरणम् ।

अथ निष्क्रमणम् ।।

तत्र चतुर्थे मासि चन्द्रतारानुकूले दिने स्नातमलङ्कृत्य गृहाद्बहि-

---

१. वाणेन। २. एउटा बोको ढोकामा राखेर कराउने गरी कान निमोठ्नू भन्ने यस्तो आचार देखिन्छ ।

३. नामकरणमा– 'देशकालौ स्मृत्वाऽस्यशिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये' यो प्रतिज्ञा सङ्कल्प गरेर मातृकापूजा, आभ्युदयिकश्राद्ध र अग्निस्थापन समेत गरेर नामकरण गर्नुपर्छ भन्ने सूत्रमा उल्लेख छ ।

रानीय पिता अन्यो वा ब्राह्मणः सूर्यमुदीक्षयति[1] । तत्र मन्त्रः– ॐ तच्चक्षुरित्यस्य दध्यङ्ङाथर्वणऋषिः पुरउष्णिक्छन्दः सूर्योदेवता सूर्योदीक्षणे विनियोगः । ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।। अत्र च फलपुष्पसमन्वितेन पयसा भगवते भास्कराय अर्घ्यो दीयते । इति समाचारः । इति निष्क्रमणम् ।।

अथान्नप्राशनम् ।।

तत्र षष्ठे मासि चन्द्रतारानुकूले शुभदिने स्नातः शुचिराचान्तः पिता गृह एव कुशकण्डिकां कुर्यात् । तत्र क्रमः–

कुशैः परिसमुह्य तानैशान्यां परित्यज्य, गोमयोदकेनोपलिप्य, स्रुवमूलेन प्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य , वारिणाऽभ्युक्ष्य, कांस्यपात्रेणाग्निमादाय प्रत्यङ्मुखः अग्नेरुपसमाधानं कुर्यात्,[2] । ततो ब्रह्मवरणादि आज्यभागहवनान्तं कर्म कुर्यात् ।

ततोऽनन्वारब्धेन साधारणाहुतिद्वयं दद्यात् । तत्र प्रथमाहुतौ मन्त्रः– ॐ देवीं वाचमिति मन्त्रस्य भार्गवऋषिस्त्रिष्टुप्छन्दो देवी वाग्देवता आज्यहोमे विनियोगः । ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा ।

१, निष्क्रमण-संस्कार चौथो महीनामा जन्मदिन अथवा जन्मनक्षत्र परेको, चन्द्र र तारा राम्रो भएको दिनमा-' देशकालौ संस्मृत्य अस्य कुमारस्य गृहान्निष्क्रमणं करिष्ये' यस्तो प्रतिज्ञासङ्कल्पपूर्वक मातृकापूजा र आभ्युदयिकश्राद्ध समेत गरी यो कर्म (सूर्यदर्शन) गरिन्छ । तर सूर्य र चन्द्र संबन्धी कर्ममा श्राद्ध गर्नु पर्दैन भन्ने ' छन्दोगपरिशिष्ट' को वचन भएकाले सामवेदीले भने श्राद्ध गर्नु पर्दैन ।

२, यहाँ गदाधरले यस प्रकारको प्रतिज्ञासंकल्प पढेका छन्– 'देशकालौ स्मृत्वा ममास्य शिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्रह्मवर्चसतेजइन्द्रियायुर्लक्षणफलसिद्धिवीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थमस्य कुमारस्यान्नप्राशनाख्यं कर्माहं करिष्ये ।'

३, ब्रह्मवरणदेखि आज्यभागहवनसम्मको विधि पृष्ठ ४५ देखि हेर्नुहोस् ।

इदं वाचे । द्वितीयाहुतौ तु– (देवीं वाचमिति मन्त्रं पुनः पठित्वा) ॐ वाजो नो अद्येति मन्त्रस्य देवा ऋषयस्त्रिष्टुप्छन्दोऽन्नं देवता आज्यहोमे विनियोगः । ॐ वाजो नोऽअद्य प्रसुवाति दानं वाजो देवाँ२।। ऋतुभिः कल्पयाति । वाजो हि मा सर्ववीरञ्जजान विश्वाऽआशा वाजपतिर्जयेय स्वाहा । इदं वाचे वाजाय इति । ततः स्थालीपाकेनाऽऽहुति चतुष्टयम्– ॐ प्राणेनान्नमशीय स्वाहा । इदं प्राणाय । ॐ अपानेन गन्धानशीय स्वाहा । इदमपानाय । ॐ चक्षुषा रूपाण्यशीय स्वाहा । इदं चक्षुषे । ॐश्रोत्रेण यशोऽशीय स्वाहा । इदं श्रोत्राय ।

ततोऽन्वारब्धः स्विष्टकृदादिर्बर्हिर्होमान्तं कर्म कृत्वा[1], अन्नप्राशनं कुर्यात्– सर्वान् कटुमधुरलवणाम्लतिक्तक्षारादिरसान् सर्वाणि च शाल्यन्नानि यथासंभवमुद्धृत्य एकस्मिन्नुत्तमपात्रे कृत्वा कृतमङ्गलस्नानालङ्करणमहतवाससं कुमारं तूष्णीं 'हन्त' इति मन्त्रेण वा सकृदेव प्राशयेत् । ततः कुमारस्य वाक्प्रचारकामेन भारद्वाजीमांसं, अन्नाद्यकामेन कपिञ्जलमांसं, जवकामेन मत्स्यमांसं, आयुः कामेन कृकषाया मांसं, ब्रह्मवर्चसकामेनाऽऽडिमांसं, सर्वफलकामेन क्वथितसर्वमांसम्, अलाभे पिष्टकमयभारद्वाज्यादीनामेकदेशः प्राशयितव्यः ।

तत आचम्योत्थाय फलपुष्पसमन्वितघृतेन स्रुवं परिपूर्य पूर्णाहुतिं कुर्यात्– ॐ मूर्धानमिति मन्त्रस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐमूर्धानन्दिवोऽ अरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कवि ꣳ सम्राजमतिथिं जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा ।। इति पूर्णाहुतिः । तत उपविश्य स्रुवेण भस्मानीय दक्षिणकरानामिकया– ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः । ॐत्र्यायुषं जमदग्नेः (इति ललाटे) । ॐकश्यपस्य त्र्यायुषम् (इति ग्रीवायाम्) । ॐयद्देवेषु त्र्यायुषम्

---

[1] स्विष्टकृत् हवनदेखि बर्हिर्होमसम्मको विधि पृष्ठ ४८ देखि हेर्नुहोस् ।

(इति दक्षिणबाहुमूले) । ॐ तन्नो अस्तु त्र्यायुषम् (इति हृदये) । इति त्र्यायुषाणि कृत्वा ब्राह्मणाशीर्वादप्रसादं च गृहीत्वा ततो ब्राह्मणभोजनम् ।। इत्यन्नप्राशनम् ।।

अथ चूडाकरणम् ।।

तत्र संवत्सरानन्तरमादित्यादिशुद्धौ उदगयन आपूर्यमाणपक्षे शुक्रास्तादिदोषरहिते रिक्तादिदोषवर्जिते सोमबुधगुरुशुक्रान्यतमवासरे विहितनक्षत्रसमन्वितायां तिथौ कृतनित्यक्रियो यजमानो मातृपूजापूर्वकाऽऽभ्युदयिकश्राद्धादि कृत्वा ब्राह्मणान् भोजयित्वा तस्मिन्नेवदिने रात्रौ जूटिकानिमन्त्रणं कुर्यात् । तद्यथा–

पीतवस्त्रे गौरसर्षपदध्यक्षतदूर्वागोरोचनकुङ्कुमहरिद्रायवचन्दन कुशखण्डगोमयादिभिः पोटलिकात्रयं कृत्वा, ब्रह्मजज्ञानम्०[1] । विष्णो रराटम्०[2] । नमः शम्भवाय०[3] । इति त्रिभिर्मन्त्रैः पोटलिकात्रये क्रमेण संपूज्य, एकया पोटलिकया माणवकस्य शिरोदक्षिणतः स्थितान् केशान् बध्नीयात् । एवमेव पश्चादुत्तरतश्च । ततः पीतोष्णीषेण शिरसो वेष्टनं कुर्यात् ।

ततोऽपरदिने प्रातः कृतनित्यक्रियो यजमानः मण्डपे परिष्कृतभूमौ कुशकाण्डिकामारभेत । तत्रादौ कर्मपात्रं कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्– ॐ अद्येत्यादि देशकालौ स्मृत्वा ममास्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणेन बलायुर्वर्चोऽभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चूडाकरणाख्यं कर्म करिष्ये । इति सङ्कल्प्य ततः कुशैः परिसमुह्य तानैशान्यां परित्यज्य, गोमयोदकेनोपलिप्य, स्रुवमूलेन प्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य, वारिणाऽभ्युक्ष्य, कांस्य-

---

१, ॐब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः । स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ।। २,ॐविष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ।। ३, ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।।

पात्रेणाग्निमादाय 'क्रव्यादाय नमः' इति क्रव्यादांशं नैर्ऋत्यदिशि परित्यज्य प्रत्यङ्मुखाग्नेरुपसमाधानं कुर्यात् ।

ततोऽग्नेः पश्चिमतो यजमानदक्षिणदिशि स्नापितमहतं वासः परिधाप्य कुमारमङ्के निधाय माता उपविशति ।

ततः पुष्पचन्दनताम्बूलवस्त्राण्यादाय ब्रह्मवरणं कुर्यात्– ॐ अद्य ममास्य कुमारस्य चूडाकरणहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे। इति ब्रह्माणं वृणुयात् ।ॐ वृतोऽस्मीति प्रतिवचनम् । ॐयथाविहितं कर्म कुरु। इति यजमानोक्ते, ॐ करवाणीति प्रतिवचनम् । ततो यजमानोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्याग्निप्रक्षिणं कारयित्वा, अस्मिन् कर्मणि त्वं मे ब्रह्मा भव । इत्यभिधाय, ॐ भवानि । इति तेनोक्ते शुद्धासनोपरि ब्रह्माणमुदङ्मुखमुपवेशयेत् ।

ततः प्रणीतापात्रं पुरतः कृत्वा वारिणाऽऽपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात्। ततः परिस्तरणम्- बर्हिषश्चतुर्थभागमादाय, आग्नेयादीशानान्तं, ब्रह्मणोऽग्निपर्यन्तं, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीतापर्यन्तम् । ततोऽग्नेरुत्तरतः पश्चिमायां दिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयम्, प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः प्रादेशमात्राः पालाश्यः, स्रुवः, आज्यम्, षट्पञ्चाशदुत्तरशतद्वयं २५६ यजमानमुष्टिपरिमितं तण्डुलाद्यन्नपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेण आसादनीयम् । अमीषामुत्तरतोऽ साधारणवस्तून्युपकल्पनीयानि। तत्र– शीतोदकम्, उष्णोदकं च, घृतदधिनवनीताद्यन्यतमपिण्डाः, त्रिश्वेतशल्लकीकण्टकम्, प्रादेशमितसाग्रसप्तविंशतिकुशपत्राणि, ताम्रपरिष्कृतलोहक्षुरः, नापितः,

वृषभगोमयपिण्डः, अन्यान्यप्याचारप्राप्तनलिनीदलादीनि आसादयेत् ।

ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे कृत्वा अनामिकाङ्गुष्ठाभ्यां उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनम् । ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा अनामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीपात्रमभिषिच्य प्रोक्षणीजलेन यथासादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । तत आज्यस्थाल्यामाज्यं निधायाधिश्रित्य ज्वलत्तृणमादायाज्योपरि प्रदक्षिणं भ्रमयित्वा वह्नौ तत्प्रक्षेपः । ततस्त्रिः स्रुवप्रतपनं कृत्वा संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत् त्रिस्त्रिः प्रतप्य दक्षिणतो निदध्यात् । ततोऽग्निप्रदक्षिणक्रमेणाज्यमवतार्य स्वाग्रतो निदध्यात् । ततः प्रोक्षणीवत्त्रिरुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य प्रोक्षणीश्च पूर्ववदुत्पूय उत्थाय उपयमनकुशान् वामहस्तेनादाय प्रजापतिं मनसा ध्यात्वा तूष्णीं समित्त्रयमादायाग्नौ क्षिपेत् । तत उपविश्य सपवित्रप्रोक्षण्युदकेन दक्षिणचुलुकगृहीतेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ जुहुयात् । ततः प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये (इति मनसा) । ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय । (इत्याघारौ) । ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये स्वाहा । इदमग्नये । ॐ सोमायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा । इदं सोमाय । (इत्याज्यभागौ) ।

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवताऽऽज्यहोमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । ॐभुवः स्वाहा । इदं वायवे । ॐस्वः स्वाहा । इदं सूर्याय । एता महाव्याहृतयः ।

ॐ त्वन्नोऽअग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः आज्यहोमे विनियोगः । ॐ त्वन्नोऽअग्ने वरुणस्य व्विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्याम् । ॐस त्वन्न इति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः । ॐस त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्व नो व्वरुण ꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽ एधि स्वाहा । इदमग्नीवरुणाभ्याम् । ॐ अयाश्चाग्न इति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽऽज्यहोमे विनियोगः । ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया ऽ असि । अया नो यज्ञं व्वहास्यया नो धेहि भेषज ꣳ स्वाहा । इदमग्नये । ॐ ये ते शतमिति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणःसविताविष्णुर्विश्वेदेवामरुतः स्वर्का देवता आज्यहोमे विनियोगः । ॐ येते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः । ॐ उदुत्तममिति शुनःशेपऋषिर्वरुणो देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । ॐ उदुत्तमं वरुण पाशमस्मदवाधमं व्विमध्यम ꣳ श्रथाय । अथा व्वयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा ।। इदं वरुणाय । (एताः प्रायश्चित्तसंज्ञकाः) । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताऽऽ ज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये । (इति मनसा) ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिरग्निर्देवता गायत्री

छन्दः स्विष्टकृद्धोमे विनियोगः । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । (इति स्विष्टकृद्धोमः)

ततःसंस्रवं प्राश्याचम्य पूर्णपात्रं दद्यात्– ॐ अद्यकृतैतच्चूडाकरणहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय (ब्रह्मणे) दक्षिणां तुभ्यमहं संप्रददे । इति दद्यात् । ॐ स्वस्तीति प्रतिवचनम् । ततः प्रणीताविमोकः । ततः, सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता प्रणीताविमोके विनियोगः । ॐ सुमित्रिया नऽ आपऽ ओषधयः सन्तु । इति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य, ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः । इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् । ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य, ॐ देवा गातुविद इत्यस्य वनस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः । ॐ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पतऽइमं देव यज्ञꣳ स्वाहा वाते धाः स्वाहा ।। (इति बर्हिर्होमः)

ततः शीतोदके उष्णोदकम्– ॐ उष्णेन वाय इति मन्त्रस्य परमेष्ठी ऋषिः प्रतिष्ठाछन्दोऽदितिर्देवता उदकासेके विनियोगः । ॐ उष्णेन वाय उदकेनेह्यदिते केशान् वप । इति मन्त्रेणाभिषिच्य तत्र मिश्रितोदके नवनीतपिण्डं घृतपिण्डं दधिपिण्डं वा तूष्णीं प्रक्षिप्य दक्षिणपश्चिमोत्तरक्रमेण पूर्वनिशाबद्धकुमारकेशजूटिकात्रये दक्षिणजूटिकायामनेनैवोदकेनोन्दनम्– ॐ सवित्रेति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्री छन्द आपो देवता क्लेदने विनियोगः । ॐ सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय बलाय वर्चसे । इति मन्त्रान्ते आर्द्रं कुर्यात् । ततस्त्रिस्थानश्वेतेन शल्लकीकण्टकेन तूष्णीं विनयनं कृत्वा भागत्रयं कुर्यात् । ततः सप्तविंशतिकुशपत्रेभ्यः कुशपत्रत्रयमानीय तत्केशमूलसँल्लग्नाग्रं जूटिकाप्रथमभागमध्यान्तरितं कुर्यात्– ॐ ओषधे त्रायस्वेति मन्त्रस्य प्रजापतिर्ऋषिर्यजुः कुशतरुणं देवता कुशान्तर्धाने विनियोगः । ॐ

ओषधे त्रायस्व। इति मन्त्रेणान्तर्दध्यात्। ततः सकुशदक्षिणप्रथमभागजूटिकां वामहस्तेन गृहीत्वा दक्षिणहस्तेन, ॐ शिवोनामेति मन्त्रस्य प्रजापतिर्ऋषिर्यजुः क्षुरो देवता क्षुरग्रहणे विनियोगः। ॐ शिवो नामासि स्वधितिस्ते पिता नमस्तेऽ अस्तु मा माहि ꣳ सीः। इति मन्त्रेण लोहक्षुरमादाय– ॐ निवर्तयामीति मन्त्रस्य प्रजापतिर्ऋषिर्यजुः क्षुरो देवता क्षुरकेशसंयोगे विनियोगः। ॐ निवर्तयास्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। इति मन्त्रेण सकेशकुशपत्रेषु संयोजयेत्। ततः कुशपत्रत्रयसहितजूटिकाप्रथमभागम्– ॐ येनावपदिति मन्त्रस्याऽऽलम्बायनऋषिः पङ्क्तिश्छन्दः सवितादेवता सकेशकुशपत्रच्छेदने विनियोगः। ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ब्रह्मणोवपतेदमस्यायुष्यञ्जरदष्टिर्यथासत्॥ इति मन्त्रेण छित्वा अग्नेरुत्तरतो भगिन्या ध्रियमाणे कांस्यपात्रस्थापितवृषभगोमयपिण्डे केशान् प्रक्षिपेत्। ततो दक्षिणमेव जूटिकायाम्– उन्दनं, विनयनं, कुशपत्रत्रयान्तर्धानं, क्षुरादानं, क्षुरकेशसंयोजनं, सकेशकुशपत्रच्छेदनं गोमयपिण्डे प्रक्षेपणं पूर्ववत्तूष्णीं (मन्त्रं विना) सर्वं कुर्यात्। पुनरपि दक्षिण एव, जूटिकायांउन्दनादिविधिस्तूष्णीं सर्वं कुर्यात्।

ततः पश्चिमजूटिकायाम्– ॐ सवित्रेति मन्त्रेणोन्दनं, शल्लकीकण्टकेन तूष्णीं केशानां पृथक्करणम्, ॐ ओषध इति मन्त्रेण कुशपत्रत्रयान्तर्धानम्, ॐ शिवो नामेति क्षुरादानम्, ॐ निवर्तयामीति मन्त्रेण क्षुरकेशसंयोजनं कृत्वा, ॐ त्र्यायुषमिति मन्त्रस्य नारायणऋषिरुष्णिक्छन्द आशीर्देवता सकेशकुशपत्रच्छेदने विनियोगः। ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम्॥ इति मन्त्रेण सकेशकुशपत्राणि छित्वा गोमयपिण्डे प्रक्षिपेत्। पश्चिम एव जूटिकायां एवमेव द्विरपरं तूष्णीं कुर्यात्।

तत उत्तरभागजूटिकायाम्– ॐ सवित्रेति मन्त्रेणोन्दनम्, शल्लकीकण्टकेन केशानां तूष्णीं पृथक्करणम्, ॐ ओषध इति मन्त्रेण कुशान्तर्धा

नम्, ॐ शिवो नामेति क्षुरादानम्, ॐ निवर्तयामीति मन्त्रेण क्षुरकेशसंयोजनं कृत्वा, ॐ येन भूरिश्चरेति मन्त्रस्य वामदेवऋषिर्यजुः क्षुरो देवता सकेशकुशपत्रच्छेदने विनियोगः । ॐ येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यम् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये ।। इति मन्त्रेण उत्तरजूटिकायाः प्रथमभागं छित्वा गोमयपिण्डे प्रक्षिपेत् । एवमेव द्विवारं तूष्णीं कुर्यात् ।

ततः समस्तं शिरस्त्रिः क्षुरं प्रदक्षिणक्रमेणानुप्तकेशे भ्रामयति । ॐ यत्क्षुरेणेति मन्त्रस्य वामदेवऋषिर्यजुश्छन्दः क्षुरो देवता क्षुरभ्रामणे विनियोगः । ॐ यत्क्षुरेण मज्जयता सुपेशसा वप्त्वाऽऽवपति केशाञ्छिन्धि शिरो मास्यायुः प्रमोषीः ।। इति मन्त्रेण सकृद्भ्रामणम् । द्विस्तूष्णीं भ्रामणं दक्षिणकर्णादारभ्य दक्षिणकर्णपर्यन्तम् । ततस्ताभिरेवाद्भिः समस्तं शिरः प्रक्षाल्य– ॐ अक्षण्वन्निति मन्त्रस्य वामदेवऋषिर्यजुश्छन्दः क्षुरो देवता क्षुरदाने विनियोगः । ॐ अक्षण्वन् परिवप । इति मन्त्रेण नापिताय क्षुरं प्रयच्छति । अथ नापितः शिखां धृत्वा समस्तशिरोवपनं वा यथाकुलं कुर्यात् । ताँल्लूनकेशान्नूतनवस्त्रेण प्रतीक्ष्य माता दधिभक्तसमन्वितगोमयपिण्डोपरि निदध्यादिति समाचारः ।

ततः पूर्णाहुतिः– ॐ मूर्धानमिति मन्त्रस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कवि ꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा ।। इति पूर्णाहुतिं हुत्वा ततःस्रुवेण भस्मानीय त्र्यायुषं कुर्यात् । ॐ त्र्यायुषमिति मन्त्रस्य नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः । ॐ त्र्यायुषं जमदग्नेः । (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) । ॐ यद्देवेषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) । ॐ तन्नोऽअस्तु त्र्यायुषम् (इति हृदि) । ततस्तान् केशान् गोमयपिण्डान् सरितसरस्तीरेऽन्यस्मि-

न्नुदकान्तरे वा निदध्यात् । तत आचार्याय गोदानं दत्त्वा तत्राऽऽचाराद्ब्राह्मणभोजनादिकर्मापि कुर्यात् । इति चूडाकरणम् ।।

अथ कर्णवेधः ।।

तत्र तृतीये वर्षे पञ्चमे वा पुष्येन्दुचित्राहरिरेवत्यन्यतमनक्षत्रसमन्विते विहिततिथिपूर्वाह्णे पिताऽन्यो वा पूर्वाभिमुखोपविष्टः कुमारस्य दक्षिणकर्णमभिमन्त्रयेत्–

ॐ भद्रं कर्णेभिरिति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता कर्णाभिमन्त्रणे विनियोगः । ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।। इति मन्त्रेण दक्षिणकर्णमभिमन्त्र्य पुनः– ॐ वक्ष्यन्तीति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता कर्णाभिमन्त्रणे विनियोगः । ॐ वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेवशिङ्क्ते वितताधि धन्वञ्ज्याऽइयꣳ समने पारयन्ती ।। इति वामकर्णमभिमन्त्रयेत् । ततो मध्यं निरीक्ष्य नापितद्वारा वेधयेत् । तस्मिन्समये मधुरादिदानमाचरेत् । ततो नापिताय वेतनं दत्त्वा विसर्जयेत् । ततो ब्राह्मणभोजनम् ।। इति कर्णवेधः ।।

अथोपनयनम् ।।

तत्र शुद्धसमये रविचन्द्रादिशुद्धौ गर्भाष्टमेऽष्टमे वा, अनुकल्पे– षोडशाभ्यन्तरवत्सरान्तरे, ब्रह्मवर्चसकामस्य पञ्चमेऽपि । उदगयन आपूर्यमाणपक्षे, अनध्यायषष्ठीरिक्तान्यतिथौ, रविगुरुशुक्रान्यतमवारे, मध्याह्नादर्वाक् कुमारपित्रा मातृपूजापूर्वकाभ्युदयिके कृते तदभावे आचार्येणैव तस्मिन् कृते ब्राह्मणान् माणवकं च भोजयित्वा सशिखं कृतक्षौरं[1] स्नानानन्तरं यथाशक्त्यलङ्कृतं कृत्वा बहिः शालायां तुषकेशशर्करादिशून्यपरिष्कृतभूमौ आचार्योऽग्निस्थापनं कुर्यात् ।

---

[1] आफ्नो आचार र परम्परा अनुसार मुण्डन गर्नुपर्छ ।

तत्र हस्तपरिमितचतुरस्रकुशकरणकभूमिपरिसमूहनानन्तरं गोमयोदकेनोपलिप्य, स्फ्येन स्रुवमूलेन वा प्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य, जलेनाभ्युक्ष्य, कांस्यपात्रेणाग्निमादाय स्वाभिमुखं तदुपरि निदध्यात् ।

ततः कुमारमाचार्यः शिष्यद्वाराऽग्नेः पश्चात् स्वदक्षिणपार्श्वेऽवस्थापयति । ततः कुमारं बद्धाञ्जलिं संबोध्य 'ब्रह्मचर्यमागाम्' इति ब्रूहीति प्रैषानन्तरं 'ॐ ब्रह्मचर्यमागाम्' इति कुमार आह । ततो 'ब्रह्मचार्यसानि' इति ब्रूहीति आचार्येणोक्ते 'ॐ ब्रह्मचार्यसानि' इति कुमार आह ।

अथ माणवकमाचार्यो वासः परिधापयति । (तत्राचार्यपठनीयो मन्त्रः)– ॐ येनेन्द्रायेति मन्त्रस्याङ्गिरसऋषिर्बृहतीछन्दो बृहस्पतिर्देवता वासःपरिधापने विनियोगः । ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् । तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ।। ततो माणवको वस्त्रपरिधाननिमित्तकं द्विराचमनं कुर्यात् । अथ माणवकवेष्टनत्रयेण माणवकप्रवरसंख्यग्रन्थियुतां कृत्वा मेखलामाचार्यो बध्नाति[1] । (तत्र माणवकपठनीयो मन्त्र[2]:)– ॐ इयं दुरुक्तमिति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दो मार्तण्डो देवता मेखलाबन्धने विनियोगः । ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम् ।। (अथवा)– ॐ युवा सुवासा इति मन्त्रस्य विश्वामित्रऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता मेखलाबन्धने विनियोगः । ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।। इति मन्त्रेण, तूष्णीं वा परिधत्ते । (ततः कुमारः शिखाबन्धनमाचमनं च कुर्यात्) ।

---

[1] १, तेस्रो वेष्टनमा प्रवरसंख्याले युक्त ग्रन्थि वनाउनु पर्छ । गदाधरले पनि यसै भनेका छन् ।

[2] २, हरिहरले यो मन्त्र माणवकले पढ्नु भनेका छन् । आचार्यले नै पढ्ने हो भनेर गदाधरले भनेका छन् ।

अथ यज्ञोपवीताष्टकं सफलं नूतन (कांस्य) भाण्डाष्टके स्थितं ब्राह्मणाष्टकेभ्यो दद्यात् । तत्र वाक्यम्– ॐ अद्येत्यादि, अमुकगोत्रोत्पन्नस्य कुमारस्यास्मिन्नुपनयनकर्मणि शूद्राचारचरणात् स्वजात्युक्तद्विजाचारचरणप्राप्तये इमानि सफलनूतनभाण्डाष्टकसहितानि यज्ञोपवीतानि ब्रह्मदैवतानि नानानामगोत्रेभ्यो शर्मभ्यो ब्राह्मणाष्टकेभ्यो दातुमहमुत्सृजे । इति सङ्कल्प्य दक्षिणादानं च कृत्वा ब्राह्मणाष्टकेभ्यो दद्यात् । तत आचार्य एकं यज्ञोपवीतमादाय– ॐ यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणे विनियोगः । ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।। ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ।। इति माणवकपठितेन मन्त्रेण उपवीतं परिधापयति । तत आचामेत् । तत ऐणेयमजिनमादाय– ॐ मित्रस्य चक्षुरिति मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता ऐणेयोत्तरीयधारणे विनियोगः । ॐ मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वी स्थविरꣳ समिद्धम् । अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेहम् ।। इति मन्त्रेण बहिर्लोम यथास्यात्तथा परिधत्ते । ततो माणवककेशसंमितं पालाशदण्डमाचार्यस्तस्मै तूष्णीं प्रयच्छति, तं च– ॐ यो मे दण्ड इति मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्दण्डो देवता दण्डग्रहणे विनियोगः । ॐ यो मे दण्डः परापतद्वैहायसोधिभूम्याम् । तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय ।। इति मन्त्रेण माणवको गृह्णाति ।

तत आचार्यो वारिणा स्वाञ्जलिं पूरयित्वा कुमारस्याञ्जलिं तेनैवाञ्जलिजलेन पूरयति वारत्रयम्– ॐ आपो हि ष्ठेति तिसृणां सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता उदकासेके विनियोगः । ॐ आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ।। ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।। ॐ

तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ।। इति तिसृभिर्ऋग्भिः कुमारश्चोर्ध्वमुत्क्षिपेत् । ततः 'सूर्यमुदीक्षस्व' इत्याचार्यप्रैषानन्तरम्– ॐ तच्चक्षुरिति मन्त्रस्य दध्यङ्ङाथर्वणऋषिः पुरउष्णिक्छन्दः सूर्योदेवता सूर्योदीक्षणे विनियोगः । ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।। इति मन्त्रेण सूर्यं पश्येत् । अथाचार्यो माणवकस्य दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वा हृदयमालभते– ॐ मम व्रत इति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो बृहस्पतिर्देवता हृदयालम्भने विनियोगः । ॐ मम व्रते ते हृदयं दधामि । मम चित्तमनुचित्तं ते अस्तु । मम वाचमेकमना जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यम् । इति । ततः कुमारस्य साङ्गुष्ठं दक्षिणहस्तं गृहीत्वा तं पृच्छति आचार्यः– 'ॐ को नामासि' एवं पृष्टः कुमारः 'अमुकशर्माहं भो ३' इति प्रत्याह । पुनराचार्यः 'ॐ कस्य ब्रह्मचार्यसि' इति पृच्छति । कुमारश्च 'ॐ भवतः' इत्याह । तत आचार्यः– ॐ इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यः श्रीअमुकशर्मन् । इति पठति ।

अथ माणवकं बद्धाञ्जलिं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयति[1], तत्राचार्यस्य मन्त्रपाठः । ॐ प्रजापतये त्वेत्यादीनां प्रजापतिर्ऋषिर्यजुर्लिङ्गोक्ता देवता रक्षणे विनियोगः । ॐ प्रजापतये त्वा परिददामि, (इति प्राच्याम्)। ॐ देवाय त्वा सवित्रे परिददामि, (इति दक्षिणस्याम्) ॐ अद्भ्यस्त्वौषधीभ्यः परिददामि, (इति प्रतीच्याम्) । ॐ द्यावापृथिवीभ्यां त्वा परिददामि, (इत्युदीच्याम्) । ॐ विश्वेभ्यस्त्वा देवेभ्यः परिददामि, (इत्यधः) । ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिददामि, (इत्यूर्ध्वम्) ।

---

[1] १, सूत्रमा पूर्वादि दिशामा प्रदक्षिणा गर्नु पर्छ भन्ने कुराको उल्लेख नगरेकोले केवल मन्त्रमात्र पढे हुन्छ ।

ततो माणवकोऽग्नि प्रदक्षिणीकृत्याऽऽचार्यस्य दक्षिणदिश्युपविशति[1] ।

तत आचार्यः, ॐ अद्यकर्तव्योपनयनहोमकर्मणीत्यादिर्बर्हिर्होमान्तं कर्मकुर्यात्[2] ।

ततः कुमारस्यानुशासनं करोति– 'ॐ ब्रह्मचार्यसि' इत्याचार्यः । 'ॐ असानि' इति कुमारः । 'ॐ अपोशान' इत्याचार्यः । 'ॐ अश्नानि' इति कुमारः । 'ॐ कर्म कुरु' इत्याचार्यः । 'ॐ करवाणि' इति माणवकः । 'ॐ मा दिवा सुषुप्थाः' इत्याचार्यः । 'ॐ न स्वपानि' इति माणवकः । 'ॐ वाचं यच्छ' इत्याचार्यः । 'ॐ यच्छानि' इति कुमारः । 'ॐ समिधमाधेहि' इत्याचार्यः । 'ॐ आदधानि' इति कुमारः । 'ॐ अपोशान' इत्याचार्यः । 'ॐ अश्नानि' इति कुमारः ।

अथ गायत्रीदानम्– तत्राग्नेरुत्तरतः प्रत्यङमुखायोपविष्टाय, आचार्यचरणोपसङग्रहपूर्वकमुपसन्नाय आचार्यं समीक्षमाणाय स्वयमप्याचार्येण समीक्षिताय अस्मै निवारितशङखतूर्यादिशब्द इष्टांशके सावित्रीमन्वाह । तत्र प्रथमावृत्तौ त्रिपदायाः सावित्र्याः सप्रणवव्याहृतिपूर्वकैकः पादः । द्वितीयावृत्तौ द्विपादः । तृतीयावृत्तौ त्रिपादः समग्रः । तत्रेत्थं रूपम्–

प्रथमावृत्तौ, 'ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्' । द्वितीयावृत्तौ– 'ॐ भूर्भुवः: स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि' । तृतीयावृत्तौ– 'ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' । तृतीयावृत्तौ सहपाठो विशेषः ।

---

[1] सूत्रमा हरिहर, गदाधर दुवैले 'आचार्यस्योत्तरत उपविशति' यस्तो पाठ पढेकाले उत्तरपट्टि वस्नु पर्ने देखिन्छ ।

[2] ब्रह्मरणदेखि लिएर बर्हिर्होमसम्मको सबै प्रयोग पृष्ठ ४५ देखि ४६ सम्म हेर्नुहोस् । यसमध्ये पात्रासादनमा– 'समिधस्तिस्रः पालाश्यः, समिन्धनकाष्ठानि दश, भिक्षापात्रम्' यति बढी पात्रासादन गर्नुपर्छ ।

(क्षत्रियाय त्रिष्टुप्छन्दस्कां बृहस्पतिदृष्टां सवितृदैवत्यां 'देवस्य सवितुः' इत्यादिकामृचं ब्रूयात् । यथा– 'ॐ देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ।।' इति । वैश्याय प्रजापतिदृष्टां जगतीछन्दस्कां सवितृदेवत्यां 'विश्वा रूपाणि' इति ऋचं ब्रूयात् । यथा– 'ॐ विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । विनाकमख्यत्सविता वरेण्योनु प्रयाणमुषसो विराजति ।।' इति ।)

ततो ब्रह्मचारी स्वाचार्याय वरं दद्यात् । ॐ अद्येह अमुकराशिरमुकगोत्रोऽमुकशर्माहं कृतैतद्गायत्रीश्रवणकर्मणः साद्गुण्यार्थमिदं सुवर्णं वह्निदैवतं वस्त्रं बृहस्पतिदैवतं (अन्यच्च यद्यद्वस्तु तत्तद्दैवतं) आचार्याय तुभ्यमहं संप्रददे । इति सङ्कल्प्य गुरोः पादयोः प्रणिपत्य समर्पयेत् । गुरुरप्याशीर्भिः प्रतिनन्द्याऽधीतानिराकरणं कारयेत् । बद्धाञ्जलिर्वटुरिमं मन्त्रं पठेत् ।

'अथातोऽधीत्याधीत्यानिराकरणम्'– प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः । कर्णाभ्यां भूरि शुश्रुवे मा त्व ꣳ हार्षीः श्रुतं मयि ।। ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्मकोशं मे विश । वाचा त्वाऽपिदधामि वाचा त्वाऽपिदधामि ।। स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ।। इति वटुं पाठयेत् । एतदधीतानिराकरणं नाम ।।

अथ माणवक आचार्यदक्षिणदिशि अग्निपश्चिमोपविष्टो घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात्–

ॐ अग्ने सुश्रव इत्यादीनां पञ्चानां ब्रह्माऋषिर्यजूँष्यग्निर्देवता समीन्धने विनियोगः । ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु स्वाहा ।। ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि स्वाहा ।। ॐ एवं मा ꣳ सुश्रवः सौश्रवसं कुरु स्वाहा ।। ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि

स्वाहा ॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासꣳ स्वाहा ॥ इति । ततः प्रदक्षिणमग्निं (ईशानादीशानपर्यन्तं) वारिणा पर्युक्ष्य उत्थाय कराभ्यां स्वप्रादेशमितां घृताक्तां पलाशसमिधमादाय—

ॐ अग्नये समिधमिति मन्त्रस्य प्रजापतिर्ऋषिराकृतिश्छन्दः समिद्देवता समिदाधाने विनियोगः। ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा ॥ इति मन्त्रेणैकां समिधं जुहुयात् । ततस्तेनैव क्रमेण द्वितीयां तृतीयामपि समिधं जुहुयात् ।

तत उपविश्य (पूर्वोक्तक्रमेण) घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात्—

ॐ अग्ने सुश्रव इत्यादिनां पञ्चानां ब्रह्माऋषिर्यजूंष्यग्निर्देवता समीन्धने विनियोगः । ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु स्वाहा ॥ ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि स्वाहा ॥ ॐ एवं माꣳ सुश्रवः सौश्रवसं कुरु स्वाहा ॥ ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि स्वाहा ॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासꣳ स्वाहा ॥

ततः प्रदक्षिणमग्निं (ईशानादीशानपर्यन्तं) वारिणा पर्युक्ष्य तूष्णीं पाणिं प्रतप्य मुखं प्रतिमन्त्रान्तेऽवमृशति—

ॐ तनूपा अग्न इत्यादीनां बृहद्देवता ऋषयो यजूंष्यग्निर्देवता मुखविमर्शने विनियोगः । ॐ तनूपा अग्नेसि तन्वं मे पाहि । ॐ आयुर्दा अग्ने स्यायुर्मे देहि । ॐ वर्चोदा अग्नेसि वर्चो मे देहि । ॐ अग्ने यन्मे तन्वा ऊनन्तन्म आपृण । ॐ मेधां मे देवः सविता आदधातु । ॐ मेधां मे देवी सरस्वती आदधातु । ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ । इति ।

ततः कुमारः सर्वगात्रादिषु दक्षिणपाणिना स्पृष्ट्वा मन्त्राञ्जपेत्—

ॐ अङ्गानि च म इत्यादीनां प्रजापतिर्ऋषिर्यजूंषि लिङ्गोक्ता

देवता अङ्गाप्यायने विनियोगः । ॐ अङ्गानि च म आप्यायताम् । (इति सर्वगात्रमालभेत)। ॐ वाक्च म आप्यायताम् (इति मुखम्)। ॐ प्राणश्च म आप्यायताम् (इति नासिकयोः) । ॐ चक्षुश्च म आप्यायताम् (इति चक्षुषोः) । ॐ श्रोत्रं च म आप्यायताम् (इति श्रोत्रयोः)। ॐ यशो बलं च म आप्यायताम् (इति जपमात्रम्) ।

यदि तस्मिन्नेव दिने वेदारम्भसमावर्तने क्रियेते तदा तत्र पूर्णाहुतिः– ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दो ऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽ अरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् । कवि ६ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा ।। इति । ततः स्रुवेण भस्मानीय त्र्यायुषं कुर्यात्– ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः। ॐ त्र्यायुषं जमदग्नेः । (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) । ॐ यद्देवेषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) । ॐ तन्नोऽ अस्तु त्र्यायुषम् (इति हृदि) ।

ततो व्यत्यस्तपाणिभ्यां पृथिवीं स्पृशन्नभिवादयेत्[1]। तत्प्रकारश्च– ॐ अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं भो वैश्वानर त्वामभिवादये । ततस्तेनैव क्रमेण सम्बोध्य वरुणमभिवादयेत् । तेनैव क्रमेण सम्बोध्य गुरुमभिवादयेत् । गुरुश्च–आयुष्मान् भव सौम्याऽमुकशर्मन् ३ । इति ब्रूयात् ।

ततो भिक्षार्थं पात्रमादाय मातुः सकाशात् प्रथमं भिक्षेत । भिक्षाप्रकारश्चैवम्[2] – तत्र ब्राह्मणः– भवति भिक्षां मे देहि । क्षत्रियः– भिक्षां भवति मे देहि । वैश्यः– भिक्षां मे देहि भवति । इति । ततो

१, अभिवादनमा हरिहरले यस्तो क्रम लेखेका छन्– "कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां दक्षिणपाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोऽ वनमनम् । अभिवादने पादग्रहणं नास्ति पादस्पर्शनं कार्यं न वा " इति ।

२, 'आदिमध्यावसानेषु ब्रह्मक्षत्रविशां क्रमात् । भवति, भिक्षां, मे देहि, क्रमतो विनियोजयेत् ।।'

मातृदत्तामादाय 'भो गुरो ! इयं भिक्षा मया लब्धा' इत्याचार्याय निवेद्य तथैव भिक्षान्तरं याचेत । तत आचार्येण भुङ्क्ष्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ।

अथ क्षारलवणमधुमांसादिनिवृत्तिः । उध्दृतजलस्नानस्यापि निवृत्तिः । दण्डकृष्णाजिनधारणम् । वृक्षारोहणविषमभूमिलङ्घननग्नस्त्रीनिरीक्षणस्त्रीसहोपवेशनव्यावृत्तिरूपब्रह्मचारिणो नियमाः । तद्दिने ब्रह्मचारी वाग्यतोऽह्नः शेषं स्थित एव नयेत् ।

ततः सायं सन्ध्यां कृत्वा तस्मिन्नेवाग्नौ पूर्ववत्पर्युक्षणपरिसमूहने कृत्वा वाचं विसृजेत् । परिसमूहनं तु, शुष्कनिषिद्धेतरेन्धनस्याग्नौ प्रक्षेपः । तच्च सन्ध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्तव्यम् । इत्युपनयनम् ।।

अथ वेदारम्भः ।।

तत्र कृतनित्यक्रिय आचार्यः कुशैर्हस्तमात्रपरिमितचतुरस्रभूमिं परिसमुह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरतः प्रागग्रं प्रादेशमात्रं त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमादाय स्वाभिमुखमुपसमाधाय पुष्पचन्दनताम्बूलवस्त्राण्यादाय— ॐ अद्यकर्तव्यवेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे। इति ब्रह्माणं वृणुयात् । ॐ वृतोऽस्मीति प्रतिवचनम् । यथाविहितं कर्म कुरु । इत्युक्ते, ॐ करवाणीति प्रतिवचनम् । इति ब्रह्मवरणं कृत्वा, अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निप्रदक्षिणं कारयित्वा, अस्मिन् कर्मणि त्वं मे ब्रह्मा भव । इत्यभिधाय, ॐ भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखमुपवेशयेत् ।

ततः प्रणीतापात्रं पुरतः कृत्वा वारिणापूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्य अग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम्—

बर्हिषो मुष्टिमादाय चतुर्भागं कृत्वा, आग्नेयादीशानान्तं, ब्रह्मणोऽग्निपर्यन्तं, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीतापर्यन्तम् ।

ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं, पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं, प्रणीतापात्रं, आज्यस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः, आज्यं, तण्डुलपूर्णपात्रं, पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयम् । ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पूय ततः प्रोक्षणीपात्रं वामहस्ते कृत्वाऽनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुद्दिङ्गनम् । ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तून्यभिषिच्याऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । तत आज्यस्थाल्यामाज्यं निरूप्याऽधिश्रयणम् । ततः कुशं प्रज्वाल्याऽऽज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षेपः । ततस्त्रिः स्रुवं प्रतप्य संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्निप्रदक्षिणं कारयित्वाऽवतार्य स्वाग्रतो निदध्यात् । तत आज्यं प्रोक्षणीवदुत्पवनमवेक्षणं सत्यपद्रव्ये तन्निरसनम् । ततः प्रोक्षण्युत्पवनम् । तत उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ समिधः प्रक्षिपेत् । तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमेऽग्नौ जुहुयात् । तत्र प्रथमाहुतिचतुष्टये स्रुवावशिष्टहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये (इति मनसा) । ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय । (इत्याघारौ) । ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये

स्वाहा । इदमग्नये । ॐ सोमायेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा । इदं सोमाय । (इत्याज्यभागौ) ।

ततोऽनन्वारब्धकर्तृको होमः[१] (आज्येनैव)– ॐ अन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय । ॐ वायवे स्वाहा । इदं वायवे । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये (इति मनसा) । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यः । ऋषिभ्यः स्वाहा । इदं ऋषिभ्यः । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै । ॐ मेधायै स्वाहा । इदं मेधायै । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये । ॐ अनुमतये स्वाहा । इदमनुमतये ।

(अथ प्रत्येकम्– ॐ पृथिव्यै स्वाहा । इदं पृथिव्यै । ॐअग्नये स्वाहा । इदमग्नये । (इति ऋग्वेदे) । ॐवायवे स्वाहा । इदं वायेवे । ॐ अन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय । (इति यजुर्वेदे) । ॐ दिवे स्वाहा । इदं दिवे । ॐ सूर्याय स्वाहा । इदं सूर्याय । (इति सामवेदे) । ॐ दिग्भ्यः स्वाहा । इदं दिग्भ्यः । ॐ चन्द्रमसे स्वाहा । इदं चन्द्रमसे । (इत्यथर्ववेदे) । । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यः । इति सर्वत्र । स्वस्ववेदाहुतिः प्रथमम् ।)

ततोऽन्वारब्धकर्तृको होमः । तत्र तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ भूर्भुवः स्वरिति महाव्याहृतीनां

---

[१] यो वेदारम्भको आहुतिक्रम यसप्रकार छ– "यदि ऋग्वेदमारभते तदा पृथिव्यै स्वाहा, अग्नये स्वाहेति द्वे आज्याहुती हुत्वा, ब्रह्मणे छन्दोभ्यः इत्याद्या नवाहुतीर्हुत्वा शेषं समापयेत् । यदि यजुर्वेदं तदाऽऽज्यभागानन्तरम् अन्तरिक्षाय स्वाहा, चन्द्रमसे स्वाहेति विशेषः । यदा सामवेदं तदाऽज्यभगानन्तरं– दिवे स्वाहा, सूर्याय स्वाहेति विशेषः । यदाथर्ववेदं तदाज्यभागानन्तरं–दिग्भ्यः स्वाहा, चन्द्रमसे स्वाहेति विशेषः । यद्येकदा सर्ववेदारम्भस्तदाऽऽज्यभागानन्तरं क्रमेण प्रतिवेदं वेदाहुतिद्वयं द्वयं हुत्वा ब्रह्मणे छन्दोभ्यः इत्याहुतिद्वयं च हुत्वा प्रजापतये इत्याद्याः सप्त मन्त्रेण जुहुयात् । अनन्तरं महाव्याहृत्यादिस्विष्टकृदन्ता दशाहुतीः"– पारस्करगृह्यसूत्रे हरिहरः ।

प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐ स्वः स्वाहा । इदं सूर्याय । एता महाव्याहृतयः ।

ॐ त्वन्नो अग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्दः आज्यहोमे विनियोगः । ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो वह्नितमःशोशुचानो विश्वा द्वेषा ᳪ सि प्रमुमुग्ध्यस्मत् स्वाहा ।। इदमग्नीवरुणाभ्याम् । ॐ स त्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दः अग्नीवरुणौ देवते आज्यहोमे विनियोगः । ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्व नो व्वरुणᳪ रराणो व्वीहि मृडीकᳪ सुहवो नऽएधि स्वाहा ।। इमग्नीवरुणाभ्याम् । ॐ अयाश्चाग्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताऽऽज्यहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि । अया नो यज्ञं व्वहास्यया नो धेहि भेषजᳪ स्वाहा ।। इदमग्नये । ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वेदेवा मरुतः स्वर्का देवता आज्यहोमे विनियोगः । ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः । ॐ उदुत्तममिति शुनः शेपऋषिर्वरुणो देवता त्रिष्टुप्छन्दः आज्यहोमे विनियोगः । ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं विमध्यमᳪ श्रथाय । अथा व्वयमादित्य व्रते तवानागसोऽअदितये स्याम स्वाहा ।। इदं वरुणाय । (एताः प्रायश्चित्तसंज्ञकाः) । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवताऽऽज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा ।। इदं प्रजापतये । (इति मनसा) । ॐ अग्नये स्विष्टकृत इति प्रजापतिर्ऋषिरग्निर्देवता गायत्रीछन्दः स्विष्टकृद्धोमे विनियोगः । ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । (इति स्विष्टकृत्) ।

ततः संस्रवं प्राश्याचम्य पूर्णपात्रं दद्यात्– ॐ अद्यकृतैतद्वेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे । इति दद्यात् । ॐस्वस्तीति प्रतिवचनम् । ॐसुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता प्रणीताविमोके विनियोगः । ॐ सुमित्रिया नऽआपऽओषधयः सन्तु । इति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य, ॐदुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः । इत्यैशान्यां प्रणीतापात्रं न्युब्जीकुर्यात् । ततस्तरणक्रमेण बर्हिरुत्थाप्याज्येनाभिघार्य, ॐ देवा गातुविद इति वनस्पतिर्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः । ॐ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पतऽ इमं देवयज्ञꣳ स्वाहा वाते धाः स्वाहा ।। (इति बर्हिर्होमः)

तत इष्टांशके गुरुर्वेदारम्भं कारयेत् ।(तत्र गणेशं सरस्वतीं नारायणं लक्ष्मीं वेदपुस्तकं च संपूज्य पूर्वोक्तप्रकारेणोपसङ्ग्रहणं कृत्वा प्रत्यङ्मुखोपविष्टेन मुखमीक्षमाणेन गुरुणा ‘अधीष्व भो’ इत्युक्तेन प्रणवव्याहृतिपूर्वां प्रणवान्तां सावित्रीं पठितवता ब्रह्मचारिणा वेदारम्भं कारयेत्)।

ॐ समिधाग्निम्० । सुसमिद्धाय शोचिषे । इति कण्डिकान्तं फक्किकान्तं वा पाठयेत् । ततः सप्रणवं स्वस्ति वाचयित्वा उत्थाय फलपुष्पसमन्वितब्रह्मचारिकरस्पृष्टस्रुवस्थघृतेन पूर्णाहुतिं जुहुयात् ।

ॐ मूर्धानमिति मन्त्रस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽ आजातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः स्वाहा । इति पूर्णाहुतिं हुत्वा स्रुवेण भस्मानीय त्र्यायुषं कुर्यात्– ॐ त्र्यायुषञ्जमदग्नेः । (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) । ॐ यद्देषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) । ॐ तन्नोऽ अस्तु त्र्यायुषम् । (इति हृदि) । इति त्र्यायुषं कुर्यात् । इति वेदारम्भः ।।

अथ समावर्तनम् ।।

तत्र शुद्धदिने प्रह्वीभूय 'भो गुरो स्नास्यामि' इति कुमार आचार्यं भाषते । ततः 'स्नाहि' इत्याचार्यः । ततो ब्रह्मचारिणि आचार्यसन्निहितदक्षिणप्रदेशे उपविष्टे कृतस्नानादिराचार्यः कुशैर्हस्तमात्रपरिमितचतुरस्रभूमिं परिसमुह्य तानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानीय प्रत्यङ्मुखं तदुपरि निदध्यात् । ततः पुष्पचन्दनताम्बूलवस्त्राण्यादाय– ॐ अद्यकर्तव्यसमावर्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिश्चन्दनपुष्पताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे । इति ब्रह्माणं वृणुयात् । ॐ वृतोऽस्मि, इति तेनोक्ते, ॐ यथाविहितं कर्म कुरु । इत्यभिधाय, ॐ करवाणि, इति तेनोक्ते, अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य अग्निप्रदक्षिणं कारयित्वा, अस्मिन् कर्मणि त्वं मे ब्रह्मा भव । इत्यभिधाय, ॐ भवानि । इति तेनोक्ते ब्रह्माणमुदङ्मुखमुपवेशयेत् ।

ततः प्रणीतापात्रं पुरतः कृत्वा वारिणाऽऽपूर्य कुशैराच्छाद्य ब्रह्मणोमुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् । ततो बर्हिषो मुष्टिमादाय चतुर्भागं कृत्वा– आग्नेयादीशानान्तं, ब्रह्मणोऽग्निपर्यन्तं, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीतापर्यन्तं परिस्तरणं कुर्यात् । ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं, पवित्रकरणार्थं कुशपत्रद्वयं, प्रोक्षणीपात्रम्, आज्यस्थाली, संमार्जनकुशाः, उपयमनकुशाः, समिधस्तिस्रः, स्रुवः, आज्यं गव्यम्, तण्डुलपूर्णपात्रम्, (समिन्धनकाष्ठानि दश, समिधस्तिस्रः पालाश्यः, पर्युक्षणार्थमुदकम्, हरितकुशान्, अष्टौ उदककुम्भान्, द्वादशाङ्गुलमौदुम्बरं दन्तकाष्ठम्, दधि, नापितम्, स्नानार्थमुदककुम्भम्, उद्वर्तनद्रव्यम्, चन्दनाद्यनुलेपनम्, अहते वाससी, यज्ञोपवीते, पुष्पमाल्यादीनि, उष्णीषम्, कुण्डले, कज्जलम्, आदर्शम्, छत्रम्, उपानहौ, वेणुदण्डम्)पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ।

ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकाङ्गुष्ठाभ्यां पवित्रे गृहीत्वा तज्जलं किञ्चिद्भूमौ त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीमभिषिच्य प्रोक्षणीजलेनाऽऽसादितवस्तुसेचनं कृत्वा अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् । तत आज्यस्थाल्यामाज्यं निरूप्याऽग्नावारोप्य तृणं प्रज्वाल्याऽऽज्यस्याग्नेश्चोपरि भ्रामयित्वा वह्नौ तत्प्रक्षिप्य स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य सकृत्प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् । तत आज्यमग्निप्रदक्षिणं कारयित्वावतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरस्य पुनः प्रोक्षणी च पूर्ववदुत्पूय उपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तिस्रःसमिधः प्रक्षिप्योपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतासु पवित्रे निधाय पातितदक्षिणजानुः समिद्धतमेऽग्नौ ब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहोति । तत्र प्रथमाहुतिचतुष्टये प्रत्याहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ।

ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये । (इति मनसा) । ॐ इन्द्रायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः । ॐ इन्द्राय स्वाहा । इदमिन्द्राय । (इत्याघारौ) । ॐ अग्नय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः । ॐ अग्नये स्वाहा । इदमग्नये । ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः । ॐ सोमाय स्वाहा । इदं सोमाय । (इत्याज्यभागौ) ।

ततोऽनन्वारब्धकर्तृको होमः । (आज्येनैव) – ॐ अन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय । ॐ वायवे स्वाहा । इदं वायवे । ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यः । ॐ प्रजापतये स्वाहा । इदं प्रजापतये । (इति मनसा) । ॐ देवेभ्यः स्वाहा । इदं देवेभ्यः ।

ॐ ऋषिभ्यः स्वाहा । इदं ऋषिभ्यः । ॐ श्रद्धायै स्वाहा । इदं श्रद्धायै । ॐ मेधायै स्वाहा । इदं मेधायै । ॐ सदसस्पतये स्वाहा । इदं सदसस्पतये । ॐ अनुमतये स्वाहा । इदमनुमतये ।

(अथ प्रत्येकम्– ॐ वायवे स्वाहा । इदं वायवे । ॐ अन्तरिक्षाय स्वाहा । इदमन्तरिक्षाय । (इति यजुर्वेदे) । ॐ पृथिव्यै स्वाहा । इदं पृथिव्यै । ॐ अग्नये स्वाहा । इदग्नये । (इति ऋग्वेदे) । ॐ दिवे स्वाहा । इदं दिवे । ॐ सूर्याय स्वाहा । इदं सूर्याय । (इति सामवेदे) । ॐ दिग्भ्यः स्वाहा । इदं दिग्भ्यः । ॐ चन्द्रमसे स्वाहा । इदं चन्द्रमसे । (इत्यथर्ववेदे) ॐ ब्रह्मणे स्वाहा । इदं ब्रह्मणे । ॐ छन्दोभ्यः स्वाहा । इदं छन्दोभ्यः । इति सर्वत्र । स्वस्ववेदाहुतिः प्रथमम् ।।)

ततो ब्रह्मणान्वारब्धो जुहुयात् । तत्राहुतिदशतये तत्तदाहुत्यनन्तरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः । ॐ भूर्भुवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः । ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । ॐ स्वः स्वाहा । इदं सूर्याय । एता महाव्याहृतयः ।

ॐ त्वन्नो अग्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द आज्यहोमे विनियोगः । ॐ त्वन्नो ऽ अग्ने वरुणस्य विद्वान् देवस्य हेडोऽ अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्याम् । ॐ स त्वन्न इति वामदेवऋषिरग्नीवरुणौ देवते त्रिष्टुप्छन्द आज्यहोमे विनियोगः । ॐ सत्वन्नो ऽ अग्नेवमो भवोती नेदिष्ठो ऽ अस्या ऽ उषसो व्युष्टौ । अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽ एधि स्वाहा ।। इदमग्नीवरुणाभ्याम् । ॐ अयाश्चाग्न इति वामदेवऋषिरग्निर्देवता त्रिष्टुप्छन्द आज्यहोमे विनियोगः । ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि । अया नो यज्ञं व्वहास्यया नो धेहि भेषजꣳ

स्वाहा ।। इदमग्नये । ॐ ये ते शतमिति वामदेवऋषिस्त्रिष्टुप्छन्दो वरुणः सविताविष्णुर्विश्वेदेवामरुतः स्वर्का देवता आज्यहोमे विनियोगः । ॐ ये ते शतं व्वरुणं ये सहस्रं यज्ञियाः पाशा व्वितता महान्तः । तेभिर्नोऽ अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः । ॐ उदुत्तममिति शुनःशेपऋषिर्वरुणो देवता त्रिष्टुछन्द आज्यहोमे विनियोगः । ॐ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्विमध्यमꣳ श्रथाय । अथा व्वयमादित्यव्रते तवानागसोऽ अदितये स्याम स्वाहा ।। इदं वरुणाय । (एताः प्रायश्चित्तसंज्ञकाः) । ॐ प्रजापतय इति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः । ॐ प्रजापतये स्वाहा ।। इदं प्रजापतये । (इति मनसा) । ॐ अग्नये स्विष्टकृत इति मन्त्रस्य प्रजापतिर्ऋषिरग्निर्देवता गायत्रीछन्दः स्विष्टकृद्धोमे विनियोगः। ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते । (इति स्विष्टकृद्धोमः) ।

ततः संस्रवं प्राश्याचम्य पूर्णपात्रं दद्यात्– ॐ अद्यकृतैतत्समावर्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय ब्रह्मणे दक्षिणां तुभ्यमहं संप्रददे । इति दक्षिणां दद्यात् । ॐ स्वस्ति, इति प्रतिवचनम् । ततः प्रणीताविमोकः– ॐ सुमित्रिया दुर्मित्रिया इति द्वयोर्यजुषोः प्रजापतिर्ऋषिरापो देवता प्रणीताविमोके विनियोगः । ॐ सुमित्रिया नऽ आपऽ ओषधयः सन्तु । इति प्रणीताजलेन शिरः संमृज्य, ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान् द्वेष्टि यं च वयं द्विष्मः । इत्यैशान्यां प्रणीतापात्रं न्युब्जी कुर्यात् । ततस्तरणक्रमेण बर्हिरानीय– ॐ देवा गातुविद इति वनस्पति र्ऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे विनियोगः । ॐ देवा गातुविदो गातुं वित्वा गातुमित । मनसस्पतऽ इमन्देव यज्ञꣳ स्वाहा वाते धाः स्वाहा ।। इति जुहुयात् ।

ततोऽग्नेः पश्चादुपविष्टो ब्रह्मचारी परिसमूहनं कुर्यात् । तत्र घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्हस्तेन जुहुयात्– ॐ अग्ने सुश्रव इत्यादिनां पञ्चानां ब्रह्माऋषिर्यजूंष्यग्निर्देवता समिन्धने विनियोगः। ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु स्वाहा ।। ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि स्वाहा ।। एवं माꣳ सुश्रवः सौश्रवसं कुरु स्वाहा ।। ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि स्वाहा ।। ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासꣳ स्वाहा ।। इति । ततः प्रदक्षिणमग्निं (ईशानादीशानपर्यन्तं) वारिणा पर्युक्ष्य उत्थाय कराभ्यां स्वप्रादेशमितां घृताक्तां पलाशसमिधमादाय–

ॐ अग्नये समिधमिति प्रजापतिर्ऋषिराकृतिश्छन्दः समिद्देवता समिदाधाने विनियोगः । ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराककरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा ।। इति मन्त्रेणैकां समिधं जुहुयात् । ततस्तेनैव क्रमेण द्वितीयां तृतीयामपि समिधं जुहुयात् ।

तत उपविश्य (पूर्वोक्तक्रमेण) घृताक्तशुष्कनिषिद्धेतरेन्धनेन पञ्चाहुतीर्जुहुयात् । ॐ अग्ने सुश्रव इत्यादीनां पञ्चानां ब्रह्माऋषिर्यजूंष्यग्निर्देवता समिन्धने विनियोगः । ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु स्वाहा ।। ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि स्वाहा ।। ॐ एवं माꣳ सुश्रवः सौश्रवसं कुरु स्वाहा । ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि स्वाहा ।। ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासꣳ स्वाहा ।।

ततः प्रदक्षिणमग्निं (ईशानादीशानान्तं) वारिणा पर्युक्ष्य तूष्णीं पाणिं प्रतप्य मुखं प्रतिमन्त्रान्तेऽवमृशति–

ॐ तनूपा अग्न इत्यादीनां बृहद्देवताऋषयो यजूंष्यग्निर्देवता मुखविमर्शने विनियोगः । ॐ तनूपा अग्नेसि तन्वं मे पाहि । ॐ आयुर्दा अग्नेस्यायुर्मे देहि । ॐ वर्चोदा अग्नेसि वर्चो मे देहि । ॐ अग्ने यन्मे तन्वा ऊनन्तन्म आपृण । ॐ मेधां मे देवः सविता आदधातु । ॐ मेधां मे देवी सरस्वती आदधातु । ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ । इति ।

ततः कुमारः सर्वगात्रादिषु दक्षिणपाणिना स्पृष्ट्वा मन्त्राञ्जपेत् । ॐ अङ्गानि च म इत्यादीनां प्रजापतिर्ऋषिर्यजूंषि लिङ्गोक्ता देवता अङ्गाप्यायने विनियोगः । ॐ अङ्गानि च म आप्यायताम् । (इति सर्वगात्रमालभेत) । ॐ वाक्चम आप्यायताम् । (इति मुखम्) । ॐ प्राणश्च म आप्यायताम् । (इति चक्षुषोः) । ॐ श्रोत्रं च म आप्यायताम् । (इति श्रोत्रयोः) । ॐ यशोबलं च म आप्यायताम् । (इति जपमात्रम्) ।

ततः पूर्णाहुतिः– ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः । ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽ आजातमग्निम् । कवि ꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा ।। इति । ततः स्रुवेण भस्मानीय त्र्यायुषं कुर्यात्– ॐ त्र्यायुषमिति नारायणऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः । ॐ त्र्यायुषञ्जमदग्नेः । (इति ललाटे) । ॐ कश्यपस्य त्र्यायुषम् । (इति ग्रीवायाम्) । ॐ यद्देवेषु त्र्यायुषम् । (इति दक्षिणबाहुमूले) । ॐ तन्नोऽअस्तु त्र्यायुषम् । (इति हृदि) ।

ततो व्यत्यस्तपाणिभ्यां पृथिवीं स्पृशन् प्रथमं वैश्वानरं संबोध्य अभिवादयेत् । तत्प्रकारश्च– ॐ अमुकगोत्रोऽमुकशर्माहं भो वैश्वानर त्वामभिवादये । ततस्तथैव वरुणं समभिवाद्य तथैवाऽऽचार्यमभिवादयेत् । गुरुश्च– 'आयुष्मान् भव सौम्याऽमुकशर्म३न्' । इति ब्रूयात् ।

ततोऽग्नेरुत्तरतः प्रागग्रान् कुशानास्तीर्य तदुपरि दक्षिणोत्तरक्रमेणाऽऽसादितवारिपूर्णकलशाष्टतये कलशानां पुरतः प्रागग्रेषु कुशेषु आदौ

दक्षिणकलशसमीपे स्नानकर्ता उदङ्मुख ऊर्ध्वीभूय स्थित्वा प्रथमकुम्भादाम्रपल्लवेन जलम्– ॐ येप्स्वन्तरिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता उदकग्रहणे विनियोगः। ॐ येप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूखो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि ।। इति मन्त्रेण जलं गृहीत्वा–– ॐ तेन मामितिमन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता अभिषेचने विनियोगः। ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय ।। इति मन्त्रेणात्मानमभिषिञ्चेत् ।

ततो द्वितीयकलशसमीपं गत्वा दक्षिणहस्तेन तस्मात्कुम्भाज्जलम्– 'ॐ येप्स्वन्तः०' इति मन्त्रेण गृहीत्वा– ॐ येन श्रियमिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता अभिषेचने विनियोगः। ॐ येन श्रियमकृणुतां येनावमृशताꣳ सुराम् । येनाक्षावभ्यषिञ्चतां यद्वां तदश्विना यशः ।। इति मन्त्रेणाभिषिञ्चेत् ।

ततस्तेनैव क्रमेण तृतीयकलशस्थजलम्– 'ॐयेप्स्वन्तः०' इति मन्त्रेणादाय, ॐआपो हि ष्ठेति तृचस्य सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता अभिषेचने विनियोगः। ॐ आपो हि ष्ठा मयोभुवस्तानऽ ऊर्जे दधातन । महे रणाय चक्षसे ।। इति मन्त्रेणाभिषिञ्चेत् ।

ततस्तेनैव क्रमेण चतुर्थकलशाज्जलम्– 'ॐयेप्स्वन्तः०' इति मन्त्रेणादाय, ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ।। इति मन्त्रेणाभिषिञ्चेत् ।

ततः पञ्चमकलशाज्जलम्– 'ॐ येप्स्वन्तः०' इति मन्त्रेणादाय, ॐ तस्माऽ अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।। इत्यभिषिञ्चेत् ।

ततः पुनः पूर्ववत् 'ॐ येप्स्वन्तरग्नयः' इति मन्त्रेण षष्ठसप्तमाष्टमकुम्भेभ्यः प्रत्येकमुदकमादाय तूष्णीं वारत्रयमभिषिञ्चेत् ।

तत उदुत्तममिति मन्त्रस्य शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलोन्मोचने विनियोगः । ॐउदुत्तमं वरुण पाशमस्मदवाधमं व्वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसोऽ अदितये स्याम ॥ इति मन्त्रेण शिरोमार्गेण मेखलामुन्मुच्य निधाय दण्डकृष्णाजिने च तूष्णीं भूमौ निधाय वासोऽन्यत्परिधाय सूर्यमुपतिष्ठेत–

ॐउद्यन् भ्राजभृष्णुरिति मन्त्रस्य प्रजापतिर्ऋषिरतिशक्वरीछन्द आदित्यो देवता आदित्योपस्थाने विनियोगः । ॐ उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमय । उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमय । उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय ॥ इति मन्त्रेणोपस्थाय ततो दक्षिणहस्तमध्यगतसोमतीर्थेन दधिप्राशनं तिलप्राशनं वा कुर्यात् । ततो जटालोमनखानि वापयित्वा स्नात्वाचम्य द्वादशाङ्गुलसम्मितेन कनिष्ठिकाग्रवत्स्थूलेन उदुम्बरकाष्ठेन– ॐ अन्नाद्यायेति मन्त्रस्याथर्वणऋषिरनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः । ॐ अन्नाद्याय व्यूहध्वꣳ सोमो राजाऽयमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च ॥ इति मन्त्रेण दन्तधावनं कृत्वा दन्तकाष्ठं परित्यज्य द्वादशभिर्गण्डूषैर्मुखं प्रक्षाल्याचम्य सुगन्धिद्रव्यमिश्रितेन यवादिचूर्णेन तैलसन्नीतेन शरीरमुद्वर्त्य[१] पुनः सशिरस्कं स्नात्वा

---

१. प्रचलित पद्धतिहरूमा उद्वर्तन गर्नुभन्दा अघि यस्तो विधि पाइन्छ– "तैलसर्मन्वितसुगन्धिद्रव्यमिश्रितसिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता अभिषेचने विनियोगः । १ आपो हि ष्ठा मयोभुवस्तानऽ ऊर्जे दधातन । महे रणाय चक्षसे ॥ इति मन्त्रेणाभिषिञ्चेत् । ततश्चतुर्थकलशसमीपं गत्वा दक्षिणहस्तेन तस्मात्कुम्भाज्जलम्– ॐ येस्वन्तरिति मन्त्रेण गृहीत्वा तेन जलेन शिरः – ॐयो वः शिवतमो रसस्तस्यभाजयतेह नः । उशतीरिव मातरः ॥ इति मन्त्रेणाभिषिञ्चेत् । ततः पञ्चमकलशसमीपं गत्वा दक्षिणहस्तेन तस्मात्कुम्भाज्जलम्– ॐयेप्स्वन्तरिति मन्त्रेण गृहीत्वा तेन जलेन शिरः – ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ इति मन्त्रेणाभिषिञ्चेत् ।" तर यो पाठ मूल र सूत्र दुवैमा छैन ।

द्विराचम्य चन्दनाद्यनुलेपनं पाणिभ्यां गृहीत्वा मुखं नासिकां च– ॐ प्राणापानाविति मन्त्रस्य प्रजापतिर्ऋषिर्यजुः प्राणापानौ देवते चन्दनोपग्रहणे विनियोगः । ॐ प्राणापानौ मे तर्पय, चक्षुर्मे तर्पय, श्रोत्रं मे तर्पय । इत्यनेन मन्त्रेणानुलिम्पेत् ।

ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा अञ्जलिना उदकमादाय पितृतीर्थेन– 'ॐ पितरः शुन्धध्वम्' इति मन्त्रेण दक्षिणस्यां दिशि निक्षिपेत् । ततः सव्येनाचम्य चन्दनेनात्मानमनुलिम्पेत्– ॐसुचक्षा अहमिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुराशीर्देवता जपे विनियोगः । ॐ सुचक्षा अहमक्षीभ्यां भूयासꣳ सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् ।। इति ।

ततोऽहते वाससी हस्तेनादाय– ॐ परिधास्या इति मन्त्रस्य आलम्बायनऋषिः पङ्क्तिश्छन्दो वासो देवता वस्त्रपरिधाने विनियोगः। ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये ।। इति मन्त्रेण परिधाय द्विराचम्य द्वितीयं यज्ञोपवीतमादाय– ॐ यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिस्त्रिष्टुप्छन्दो लिङ्गोक्ता देवता श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणे विनियोगः । ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ।। यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ।। इति मन्त्रेण वामस्कन्धे धारयेत् । तत आचम्य उत्तरीयं वस्त्रमादाय– ॐ यशसा मेति मन्त्रस्याऽऽथर्वणऋषिः पङ्क्तिश्छन्दो लिङ्गोक्ता देवता उत्तरीयवस्त्रधारणे विनियोगः । ॐ यशसा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम् । इति मन्त्रेण परिदध्यात् ।

ततः पुष्पाणि– ॐया आहरदिति मन्त्रस्य भारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता पुष्पग्रहणे विनियोगः । ॐ या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन च ।। इति मन्त्रेण

प्रतिगृह्य– ॐ यद्यश इति मन्त्रस्य भारद्वाजऋषिरनुष्टुप्छन्दः सुमनसो देवता पुष्पबन्धने विनियोगः। ॐ यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु। तेन सङ्ग्रथिताः सुमनस आबध्नामि यशो मयि॥ इति मन्त्रेण शिरसि बध्नीयात्। तत उष्णीषमादाय– ॐ युवा सुवासा इति विश्वामित्रऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता उष्णीषेण शिरोवेष्टने विनियोगः। ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः। इति मन्त्रेण शिरो वेष्टयेत्।

ततः कर्णे कुण्डलम्– ॐ अलङ्करणमिति मन्त्रस्य भारद्वाजऋषिरुष्णिक्छन्दोऽलङ्करणं देवतालङ्करणे विनियोगः। ॐ अलङ्करणसि भूयोऽलङ्करणं भूयात्॥ इति मन्त्रेण दक्षिणं कर्णमलङ्कृत्य मन्त्रावृत्या वामकर्णमप्यलङ्कुर्यात्।

अथ चक्षुषोरञ्जनम्– ॐवृत्रस्येति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्दोऽञ्जनं देवता चक्षुषोरञ्जने विनियोगः। ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा ऽअसि चक्षुर्मे देहि॥ इति मन्त्रेण प्रथमं दक्षिणं पुनस्तेनैव वामं चक्षुः अङ्क्ते। तत आदर्शे– ॐ रोचिष्णुरिति मन्त्रस्य सूर्यऋषिर्यजुरादर्शो देवता आदर्शवीक्षणे विनियोगः। ॐ रोचिष्णुरसि। इति मन्त्रेण मुखं पश्यति। अथ छत्रम्– ॐ बृहस्पतेरिति मन्त्रस्य गौतमऋषिर्बृहद्गायत्रीछन्दश्छत्रं देवता छत्रग्रहणे विनियोगः। ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो मामन्तर्द्धेहि। इति मन्त्रेण प्रतिगृह्णीयात्। तत उपानहौ– ॐ प्रतिष्ठेस्थ इति मन्त्रस्य विश्वामित्रऋषिर्यजुर्लिङ्गोक्ता देवता उपानहोः परिधाने विनियोगः। ॐप्रतिष्ठे स्थो विश्वतो मा पातम्। इति मन्त्रेण उपानहौ पादयोर्युगपत्परिदधाति। ततो वंशदण्डम्– ॐ विश्वाभ्य इति मन्त्रस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो दण्डो देवता दण्डग्रहणे विनियोगः। ॐविश्वाभ्यो मा नाष्ट्राभ्यः-परिपाहि सर्वतः॥ इति मन्त्रेणाददीत। ततो रथमारुह्य पूर्वोत्तरं

गच्छेत्[१]। ततो विवाहाय वचो वदेत्।

अथ गोदानम्— तत आचार्याय सालङ्कारगोवरं दद्यात्। तत्र क्रमः— 'नमो गोभ्यः' इति मन्त्रेण गां संपूज्य आचार्यं च संपूज्य, ॐ अद्येत्यादि देशकालौ स्मृत्वा अमुकगोत्रस्यामुकशर्मणो मम समावर्तनकर्मणस्तथा ब्रह्मचर्यव्रतस्य च साङ्गतासिद्ध्यर्थमिमां सवत्सां सालङ्कारां गां रुद्रदैवताममुकगोत्रायामुकशर्मणे आचार्याय दक्षिणात्वेन तुभ्यमहं संप्रददे। ततः— ॐकपिले सर्वदेवानां पूजनीयासि रोहिणी। तीर्थदेवमयी यस्मात्तस्माच्छान्तिं प्रयच्छ मे। इति संप्रार्थ्य, ॐ अद्यकृतैतद्गोदानप्रतिष्ठार्थमिदं सुवर्णं वह्निदैवतममुकगोत्रायेत्यादि। ततो भूहिरण्यवस्त्रान्नं यथाशक्ति दद्यात्।

ततः पूर्णाहुतिः—ॐ मूर्धानमिति मन्त्रस्य भारद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः। ॐ मूर्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कविꣳ सम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्त देवाः स्वाहा॥ इति जुहुयात्। ततः स्रुवेण भस्मानीय— ॐ त्र्यायुषञ्जमदग्नेः। (इति ललाटे)। ॐ कश्यपस्य त्र्यायुषम्। (इति ग्रीवायाम्)। ॐ यद्देवेषु त्र्यायुषम्। (इति दक्षिणबाहुमूले)। ॐ तन्नोऽअस्तु त्र्यायुषम्। (इति हृदि)।

तत 'एधोस्येधिषीमहि०' इति वस्त्रहोमः। 'अभ्यादधामि' इति चरुहोमः। तत स्त्र्यायुषं विधाय— 'ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा। एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा॥ इति यज्ञं विसृज्य 'देवस्य त्वा, सर्वे समुद्राः' इत्यादिमन्त्रैरभिषिक्तो यजमान आज्यमवेक्ष्य भूयसीं दक्षिणां दत्त्वा ब्राह्मणान् भोजयित्वा स्वयमपि भुञ्जीतेति। इत्युपनयनपद्धतिः॥

---

[१] कुनै पुस्तकामा देशान्तरको पाठ पनि छ, जुन यस प्रकार—

अथ देशान्तरम्— "वसिष्ठ उवाच। गर्भाष्टमेऽष्टमे वापि व्रतबन्धे कृते द्विजः। मातरं पितरं नत्वा गतो देशान्तरं सुतः॥१॥ सुत उवाच। शृणु मातर्मयोक्तं यदहं यास्ये वनान्तरे। यत्रैव

शारदा देवी वरार्थे प्रार्थयाम्यहम् ।।२।। गुरुसेवाकृते तस्मिन्काश्मीरे देशशोभने । विद्यासङ्ग्रहणं कृत्वा ह्यागमिष्ये पुनर्गृहम् ।।३।। मातोवाच । पालितोऽसि मया पुत्र पालितं कृच्छ्रतः सदा । वृद्धावस्था त्वहं जाता पुत्र त्वं पालनं कुरु ।।४।। इदं कर्म परित्यज्य कथं यास्यसि काननम् । सुत उवाच । ब्रह्मचर्ये कृते तस्मिन्गुरोः शुश्रूषपूर्वकम् ।।५।। संस्नाय सर्वतीर्थेषु ह्यागमिष्ये पुनर्गृहम् । उद्धरेत्सप्तगोत्राणि तीर्थानि भ्रमतो वहु । आगमिष्ये तथा मातः पञ्चविंशतिमध्यतः ।।६।। मातोवाच । देशान्तरं महादुःखं महाघोरं च दारुणम् । शीतवातातपश्चैव क्षुत्तृड्भ्यां पीड्यते सुत ।।७।। पितोवाच । कन्दमूलफलाहारः भूमिशय्या निरालयः । वने कष्टं सदा दुःखं गृहे तिष्ठ सदा सुत ।।८।। सुत उवाच । धन्या माता पिता धन्यो यस्य पुत्रो व्रताश्रितः । पितॄणां तारको यस्तु दशपूर्वं दशापरम् ।।९।। मातोवाच । देशान्तरं न याहीति महाघोरं च दारुणम् । दुर्गमं पर्वतं शैलं दुर्गमं च हिमालयम् ।।१०।। पितोवाच । सिंहव्याघ्रगजक्रोडचौरतस्करकैर्वृतम् । एकाकी च निराहारो न याहीति वनान्तरम् ।।११।। सुत उवाच । जातोऽहं ब्रह्मवंशेऽस्मिन्कुलीनस्तव पुत्रक । करिष्येऽहं व्रतं सर्वं पितृवर्गस्य तारणम् ।।१२।। पितोवाच । कष्टेन पालितः पुत्र आत्मार्थे तु मया सुत । त्वयि देशान्तरे याते मम पुत्रक का गतिः ।।१३।। मातोवाच । दशमासे धृते गर्भे जितं निद्राक्षुधादिकम् । त्वयि देशान्तरे याते का गतिर्मम पुत्रक ।।१४।। सुत उवाच । पञ्चविंशे च सम्पूर्णे वनवासी जितेन्द्रियः । व्रतं चरिष्ये येनैव तच्च तारयते पितॄन् ।।१५।। मातोवाच । दुर्गमः पर्वतः शैलो दुर्गमञ्च हिमालयः । दुर्गमा शारदा देवी दुर्गमं वनगह्वरम् ।।१६।। पितोवाच । दुर्गमः काश्मीरो देशो विद्यासङ्ग्रहणं तथा । दुर्गमा गुरुसेवा च देशे देशे च दुर्गमम् ।।१७।। मां त्यक्त्वाऽतो न याहीति वालबुद्धिपरिग्रहः । त्वां विना मम वंशस्य नाशमायाति पुत्रक ।।१८।। सुत उवाच । द्वादशे वर्षसम्पूर्णे गुरुसेवाकृते मया ।। आगमिष्ये व्रते पूर्णे पुनश्च स्वगृहं प्रति ।।१९।। मातोवाच । गृहे सत्यं गृहे धर्मो गृहे चेन्द्रियनिग्रहः । गृहे विद्या गृहे लक्ष्मीर्गुरुसेवा गृहे भवेत् ।।२०।। पितोवाच । गुरुः स्वगुरुरेवान्ये गुरवश्चैव बान्धवाः । तेषां वाक्यावमानेन दुःखं चैव पदे पदे ।।२१।। गतेऽरण्ये त्वयि प्राप्ते रुदन्ति पितृमातरः । महाभारं परित्यज्य कथं यातोऽसि हे सुत ।।२२।। रुदन्ति बान्धवाः सर्वे हा हा बालकुमारक । रुदन्ति गुरवस्तत्र स्वजना भृत्यवर्गकाः ।।२३।। आचार्य उवाच । देहे पित्रोरिदं कष्टं किं स्वर्गं पितृदैवतम् । का गतिश्च भवेत्पुत्र पित्रोः सन्तोषणं विना ।।२४।। माता गङ्गासमं तीर्थं पिता पुष्करमेव च । गुरुः केदारकं तीर्थं माता तीर्थं पुनः पुनः ।।२५।। माता तीर्थं पिता तीर्थं तीर्थं स्वजनबान्धवाः । वचने वचने तीर्थं गुरुरभ्यागतः परम् ।।२६।। एतद्वाक्यं मया चोक्तं जानीहि हितकारणम् । उत्साहं वृद्धिमाङ्गल्यं कुरु पुत्र गृहे वसन् ।।२७।। हर्षिता यस्य माता च पिता हर्षेण संयुतः । सहर्षा बान्धवा भृत्या वादित्रं वहुवादितम् ।।२८।। भक्ष्यभोज्यं लेह्यपेयं चोष्यं च विविधं रसम् । भोगं तु कारयामासुर्बालकं परिचारकाः ।।२९।। भरणं पोषणं चैव भोजनं रससंयुतम् । कारितं मेऽद्य भो तात पितृदेव नमोऽस्तु ते ।।३०।। गुरुणा सर्वशास्त्राणि दत्तानि ज्ञानवृद्धये । गुरुसन्तोषणार्थाय दक्षिणां दातुमुत्सहे ।।३१।। द्वादशवार्षिकात्मकव्रतपूर्णाय दक्षिणाम् । हिताय मम भो तात दीयते गौः सदक्षिणा ।।३२।।

इति देशान्तरम् ।।

इति श्रीगिरीराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानमहाराजाधिराजश्री ५ गीर्वाणयुद्धविक्रमसाहदेवकृतायां सत्कर्मरत्नावल्यां संस्कारप्रकरणरत्नं नाम चतुर्दशं प्रकरणम् ।।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र संस्कारपद्धतिर्गता ।।

अथ तिथिनिर्णयः ।।

अथ संवत्सरप्रतिपदमारभ्य तिथिनिर्णयः । तत्र चैत्रशुक्लप्रतिपदि वत्सरारम्भः । तत्रौदयिकी ग्राह्या–

‘चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रे तु तदा सूर्योदये सति ।।’ इति ब्राह्मोक्तेः ।।

तदुक्तं ज्योतिर्निबन्धे–

‘चैत्रसितप्रतिपदि यो वारोऽर्कोदये स वर्षेशः ।
उदयद्वितये पूर्वो नोदययुगलेऽपि पूर्वः स्यात् ।।
यस्माच्चैत्रसितादेरुदयाद्भानोः प्रवृत्तिरब्दादेः’ ।। इति ।
‘वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ।।’ इति वृद्धवशिष्ठोक्तेः ।
‘चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् ।
तदह्नि ब्रह्मणः कृत्वा सोपवासस्तु पूजनम् ।।
संवत्सरमवाप्नोति सौख्यानि भृगुनन्दन ।।’ इति विष्णुधर्मोक्तेः ।

प्रथमा पूर्वा । यदा तु चैत्रे मलमासो भवति तदा दैवकार्यस्य तत्र निषिद्धत्वाच्छुद्धे मासि संवत्सरारम्भः कार्य इति केचिदाहुः । निष्कर्षस्तु– ‘शुक्लादेर्मलमासस्य सोन्तर्भवति चोत्तरः’ इत्यादिवचनादग्रिमवर्षान्तःपातान्मलमाससमारभ्यैव वर्षप्रवृत्तेः शुक्रास्तादाविव मलमास एव कार्य इति वयं प्रतीमः । ननु शुक्रास्तादौ चैत्रशुक्लप्रतिपदन्तरस्याभावादयुक्तं तन्मध्यपर्वानुष्ठानम् । मलमासे तु शुद्धप्रतिपदं संभवात् शुक्ल एव वत्सरारम्भो युक्त इति भवेत् । भ्रान्तोऽसि । नहि प्रतिपदन्तर-

सत्त्वं प्रयोजकं द्विकरणापन्ने वर्षे क्षयद्वयापत्तेश्च । अपि तु वत्सरारम्भः । स तु मलमासेऽपीत्युक्तं प्राक् । न हि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेऽन्तर्भवतीति ब्रह्मणाऽपि सुवचम् । अत्र तैलाभ्यङ्गो नित्यः–

'वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ।।' इति वृद्धवसिष्ठोक्तेः ।

अस्यामेव नवरात्रारम्भः । तत्र परयुतैव ग्राह्या–

'अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकाऽर्चने ।
मुहूर्तमात्रं कर्तव्या द्वितीया द्विगुणान्विता ।।' इति देवीपुराणवचनात् ।

'तिस्रो ह्येताः पराः प्रोक्तास्तिथयः कुरुनन्दन ।
कार्तिकाश्वयुजोर्मासोश्चैत्रमासि च भारत ।।' इति ब्राह्मोक्तेः ।
पराः परयुताः । अत्र प्रपादानमुक्तमपरार्के, भविष्ये–

'अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि विप्र कथिते प्रपादानं समारभेत् ।।' इत्युपक्रम्य–

'ततश्चोत्सर्जयेद्विद्वान् मन्त्रेणानेन मानवः ।
प्रपेयं सर्वसामान्याद्भूतेभ्यः प्रतिपादिता ।।
अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः ।
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ।।' इति ।

यथा– 'प्रपां कर्तुमशक्तेन विशेषाद्धर्ममीप्सुना ।
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ।।
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ।'

तत्र मन्त्रः–

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः ।
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ।। इति ।

चैत्र शुक्लतृतीयायां गौरीमीश्वरयुतां संपूज्य दोलोत्सवं कुर्यात् । तदुक्तं देवीपुराणे–

'तृतीयायां यजेद्देवीं शङ्करेण समन्विताम् ।
कुङ्कुमागरुकर्पूरमणिवस्त्रसुगन्धकैः ।।
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः ।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा ।।' इति ।

अत्र चतुर्थीयुता ग्राह्या । 'मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे' इति माधवोक्तेः । अत्रैव सौभाग्यशयनव्रतमुक्तं मात्स्ये–

'वसन्तमासमासाद्य तृतीयायां जनप्रिये ।
सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः ।।'

तत्रापि परयुतैव । इयं मन्वादिरपि । अत्रैव प्रसङ्गात् सर्वमन्वादिनिर्णय उच्यते । ताश्चोक्ता दीपिकायाम्–

'तिथ्यग्नी न तिथिस्तिथ्याशे कृष्णेभोऽनलो ग्रहः ।
तिथ्यर्को न शिवोऽश्वोऽमातिथी मन्वादयो मधोः ।।' इति । तिथिः पूर्णिमा, अग्निस्तृतीया, नेति वैशाखे नास्तीत्यर्थः । आशा दशमी, कृष्णेभः कृष्णाष्टमी, अनलस्तृतीया, ग्रहो नवमी, अर्को द्वादशी, शिव एकादशी, अश्वः सप्तमी । मधोश्चैत्रादारभ्यैता मन्वादय इत्यर्थः । एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्षस्थाः पौर्वाह्णिकाः । कृष्णपक्षस्था अपराह्णिका ग्राह्याः–

'पूर्वाह्णिकाः सदा ग्राह्याः शुक्ला मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ।।'

इति गारुडवचनात् ।

'अथो मन्वादियुगादिकर्मतिथयः पूर्वाह्णिकाः स्युः सिते विज्ञेया अपराह्णिकाश्च बहुले' इति दीपिकोक्तेश्च । अत्र च श्राद्धमुक्तं मात्स्ये–

'कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ।।' इति ।

मन्वादिश्राद्धं मलमासे सति मासद्वयेऽपि कार्यम्—'मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि चेति' स्मृतिः । अत्र पिण्डरहितं श्राद्धं कुर्यात् । तदुक्तं कालादर्शे—

'विषुवायनसंक्रान्तिमन्वादिषु युगादिषु ।
विहाय पिण्डनिर्वापं सर्वं श्राद्धं समाचरेत् ॥' इति ।

मन्वादिश्राद्धं च नित्यम् । अकरणे प्रायश्चित्तदर्शनात् । तदुक्तमृग्विधाने—

'त्वं भुवः प्रतिमन्त्रं च शतवारं जले जपेत् ।
मन्वादयो यदा न्यूनाः कुरुते नैव चापि यः ॥' इति ।

एवं यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि षण्णवतिश्राद्धानि नित्यानि । तानि तु—

'अमामनुयुगक्रान्तिधृतिपातमहालयाः ।
अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तितताः ॥'

इत्युक्तानि । चकारादष्टकाग्रहणम् । चैत्रशुक्लतृतीयैव मत्स्यजयन्ती । अत्रैव प्रसङ्गाद्दशावतारजयन्त्यो निर्णीयन्ते । तत्र पुराणसमुच्चये—

"मत्स्योऽभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे
वाराहो गिरिजासुते नभसि यद्भूते सिते माधवे ।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे
रामो गौरितिथावतः परमभूद्रामो नवम्यां मधोः ॥
कृष्णोऽष्टम्यां नभसि सितपरे चाश्विने यद्दशम्यां
बुद्धः कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण ॥
अह्नो मध्ये वामनो रामरामौ
मत्स्यः क्रोडश्चापराह्णे विभागे ।
कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णे रात्रौ कालसाम्ये च पूर्वे ॥" इति ।

तथा– "चैत्रे तु शुक्लपञ्चम्यां भगवान् मीनरूपधृक् ।
ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः ।।
चैत्रे कृष्णे नवम्यां तु हरिर्वाराहरूपधृक् ।
नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके ।।
मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः ।
राधशुद्धतृतीयायां रामो भार्गवरूपधृक् ।।
चैत्रशुक्लनवम्यां तु रामो दशरथात्मजः ।
नभस्ये तु द्वितीयायां बलभद्रोऽभवद्धरिः ।।
श्रावणे बहुलेऽष्टम्यां कृष्णोऽभूल्लोकरक्षकः ।
ज्येष्ठे शुक्लद्वितीयायां बौद्धः कल्की भविष्यति ।।"

तथा वाराहपुराणे–

"आषाढे शुक्लपक्षे तु एकादश्यां महातिथौ ।
जयन्ती मत्स्यनाम्नीति तस्यां कार्यमुपोषणम् ।।
नभोमासि तृतीयायां हरिः कमठरूपधृक् ।
नभस्ये शुक्लपञ्चम्यां वराहस्य जयन्तिका ।।
वैशाखे तु चतुर्दश्यां नृसिंहः समपद्यत ।
मासि भाद्रपदे शुक्लैकादश्यां वामनो हरिः ।।
चैत्रे नवम्यां रामोऽभूत्कौशल्यायां परः पुमान् ।
श्रावणे बहुलेऽष्टम्यां वासुदेवो जनार्दनः ।।
पौषे शुक्ले तु सप्तम्यां कुर्याद्बौद्धस्य पूजनम् ।
माघशुक्लतृतीयायां कल्किनः पूजनं हरेः ।।
प्रातः प्रातस्तु मध्याह्ने सायं सायं तथा निशि ।
मध्याह्ने मध्यरात्रौ च सायं प्रातरनुक्रमात् ।।" इति ।

चैत्रशुक्लपञ्चमी कल्पादिः । तदुक्तं मात्स्ये–

"ब्रह्मणो या दिनस्यादिः कल्पादिः सा प्रकीर्तिता ।
वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च ।।

पञ्चमी चैत्रमासस्य तथैवान्त्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी ।।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः ।।"

अत्र सर्वोऽपि निर्णयो मन्वादिवज्ज्ञेयः । हेमाद्रौ ब्राह्मे–

'शुक्लायामथ पञ्चम्यां चैत्रे मासि शुभानना ।
श्रीर्ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ।।
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति ।'

चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः । तत्र नवमीयुता ग्राह्या–

'अष्टमी नवमीयुक्ता नवमी चाष्टमी युता' इति ब्रह्मवैवर्तात् ।

अत्र भवानीयात्रोक्ता काशीखण्डे–

'भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः ।
न जातु शोकं लभते सदानन्दमयो भवेत् ।।' इति ।

अत्रैवाशोककलिकाप्राशनमुक्तं लैङ्गे–

'अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रमाससिताष्टम्यां न ते शोकमवाप्नुयुः ।।'

प्राशनमन्त्रस्तु– 'त्वामशोक नराभीष्टं मधुमाससमुद्भवम् ।
पिबामि शोकसंतप्तो मामशोकं सदा कुरु ।।' इति ।

अत्र विष्णुः– 'पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी ।
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत् ।।'

तिथितत्त्वे, कालिकापुराणे–

'चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदम् ।।
चैत्रं तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नायात्स कैवल्यमवाप्नुयात् ।।'

लौहित्यो ब्रह्मपुत्रः । मन्त्रस्तु–

ब्रह्मपुत्र महाभाग शन्तनोः कुलसंभव ।
अमोघागर्भसंभूत पापं लौहित्य मे हर ।।

चैत्रशुक्लनवमी रामनवमी । तदुक्तमगस्त्यसंहितायाम्–

‘चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
उदये गुरुगौरांश्वोः स्वोच्चस्थे ग्रहपञ्चके ।।
मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीतसकलया कौशल्यायां परः पुमान् ।
तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्याद्रघुनाथपरो भुवि ।।’

इयञ्च मध्याह्नयोगिनी ग्राह्या–

‘चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत्।।’ इति तत्रैवोक्तेः । तथा–
‘चैत्रे मासि नवम्यां तु जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ।।
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।’
तथा– ‘केवलापि सदोपास्या नवमीशब्दसंग्रहात् ।
तस्मातसर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ।।’

पूर्वेद्युरेव मध्याह्नयोगे कर्मकालव्याप्तेः सैव ग्राह्या । दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्षयुक्तामपि त्यक्त्वा परैव कार्या । तदुक्तं माधवीये, अगस्त्यसंहितायाम्–

‘नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां च दशम्यां चैव पारणम् ।।’

अष्टमीविद्धा सऋक्षापि नोपेक्ष्येति माधवः ।

रामार्चनचन्द्रिकायामपि–

‘विद्धैव चेदृक्षयुक्ता व्रतं तत्र कथं भवेत् ।
विद्धा निषेधश्रवणान्नवमी चेति वाक्यतः ।।

वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि ।
दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः ।।
तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम् ।' इति ।

अत्र दशम्यादिषु वृद्धिश्चेदिति, तदन्येषामिति च वदन् यदा प्रातस्त्रिमुहूर्ता नवमी दशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते तदा स्मार्तानां तत्रैव । एकादशी निमित्तोपवासात् नवमीव्रताङ्गपारणालोपः स्यात् । अतोऽष्टमीविद्धैव स्मार्तैः कार्या । वैष्णवानां त्वरुणोदयविद्धैवोपोष्येत्यर्थसिद्धम् । इदं व्रतं संयोगपृथक्त्वन्यायेन काम्यं नित्यञ्च । तदुक्तं हेमाद्रावगस्त्यसंहितायाम्---

'उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ।।
सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधनः ।
अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ।।
पूज्यः स्यात्सर्वभूतानां यथारामस्तथैव सः ।
यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः ।।
कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः ।'
तथा– 'अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ।।
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुंभीपाकेषु पच्यते ।।'

अत्र केचित्तदुपासकानामेवेदं व्रतं नत्वन्येषामित्याहुः । अन्ये त्वकरणे दोषश्रवणात् 'तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम्' इति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यम् । अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां वक्तुः को वारयितेत्याहुः । अत्र विशेषोऽगस्त्यसंहितायाम्–

---

१. 'अष्टभिर्वापि यः कुर्यादिदं व्रतमनुत्तमम्' कुनै पुस्तकमा यो पाठ छ ।

'आचार्यं चैव संपूज्य वृणुयात्प्रार्थयेन्निशि ।
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ।।
भक्त्याचार्यो भव प्रीतः रामोसि त्वं ममैव च ।'

तथा– 'स्वगृहे चोत्तरे देशे दानस्योज्ज्वलमण्डपम् ।
शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलङ्कृतम् ।।
गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलङ्कृतम् ।
गदाखड्गाङ्गदैश्चैव पश्चिमे सुविभूषितम् ।।
पद्मस्वस्तिकनीलैश्च कौबेरे समलङ्कृतम् ।
मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तमायतम् ।।
ततः सङ्कल्पयेद्देवं राममेव स्मरन्मुने ।
अस्यां रामनवम्यां च रामाराधनतत्परः ।।
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ।
इमां स्वर्णमयीं राम प्रतिमां च प्रयत्नतः ।।
श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ।
प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे ।।
अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ।
ततः स्वर्णमयीं रामप्रतिमां पलमात्रतः ।।
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् ।
बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ।।
वामेनाधः करेणाराद्देवीमालिङ्ग्य संस्थिताम् ।
सिहासने राजतेऽत्र पलद्वयविनिर्मिते ।।'

तथा– 'अशक्तो यो महाभागः स तु वित्तानुसारतः ।
पलेनार्धतदर्धार्धतदर्धार्धेन वा मुने ।।
सौवर्णं राजतं वापि कारयेद्रघुनन्दनम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ।।

चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् ।
दक्षिणाङ्गे दशरथं पुत्रावेक्षणतत्परम् ।।

मातुरङ्कगतं राममिन्द्रनीलसमप्रभम् ।
पञ्चामृतस्नानपूर्वं संपूज्य विधिवत्ततः ।।'

कौशल्यामन्त्रस्तु—

'रामस्य जननी चासि रामरूपमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ।।
नमो दशरथायेति पूजयेत्पितरं ततः ।'

अत्र दशावरणपञ्चावरणादिपूजाऽन्यत्र ज्ञेया ।

'अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः ।
दशाननवधार्थाय धर्मसंस्थापनाय च ।।

राक्षसानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ।।

गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामे प्रपूजयेत् ।।

दिवैवं विधिवत्कृत्वा रात्रौ जागरणं ततः ।
ततः प्रभात उत्थाय स्नानसन्ध्यादिकाः क्रियाः ।।

समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ।।
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ।।
साज्येन पायसेनैव स्मरन् राममनन्यधीः ।
ततो भक्त्या सुसन्तोष्य आचार्यं पूजयेन्मुने ।।
ततो रामं स्मरन् दद्यादेवं मन्त्रमुदीरयन् ।
इमां स्वर्णमयीं राम प्रतिमां समलङ्कृताम् ।।

चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते ।
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ।।
इति दत्त्वा विधानेन दद्याद्वै दक्षिणां भुवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ।।' इति ।

इयं मलमासे न कार्या--

'सुजप्तमप्यजप्तं स्यान्नोपवासः कृतो भवेत्' इति ।

'न कुर्यान्मलमासे तु महादानं व्रतानि वा' इति च माधवीये संग्रहवचनात् । ननु रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्तव्यता स्यादिति चेत्, अत्र ब्रूमः । नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः । किन्तु--

'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।'

इत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात् । कृष्णैकादश्यां पुत्रवद्गृहिण इवार्थादुपवासः प्रसज्यते । न त्विह तथेति व्रतत्वेन प्राप्तिर्वाच्या । सा च निषिद्धेत्यप्रसङ्गः । 'स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।' इति निषेधाच्च । एवं जन्माष्टम्यादावपि बोद्धव्यम् ।

इति रामनवमी ।।

चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे--

'चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः ।।'

चैत्रशुक्लद्वादश्यां दमनोत्सवः--

'द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम् ।।' इति

रामार्चनचन्द्रिकोक्तेः ।

'ऊर्जेव्रतं मधौ दोला श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ।।'

इति पाद्मवचनाच्च । शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्यम् ।

'तत्र स्यात्स्वीयतिथिषु वह्न्यादेर्दमनार्पणम् ।' इति तत्रैवोक्तेः । तिथयस्तु—

'वह्निर्विरिञ्चिर्गिरिजा गणेशः फणी विशाखो दिनकृन्महेशः ।
दुर्गान्तको विश्वहरिःस्मरश्च शर्वः शशी चेति तिथीषु पूज्याः ॥'

इत्युक्ताः ।

अथागमोक्तदीक्षावतो दमनारोपणविधिः । रामार्चनचन्द्रिकोक्तेः । तत्रैकादश्याम्--

'क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
उपवासेन त्वां देव तोषयामि जगत्पते ॥
कामक्रोधादयोऽप्येते न मे स्युः प्रतिघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते ।'

इति देवं संप्रार्थ्य दमनमादाय पञ्चगव्येन प्रोक्ष्य वारिणा प्रक्षाल्याशोकमूले देवाग्रे वा--

अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥ इत्यशोकम् ।

त्रुटयादिकालपर्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥ इति कालम् ।

वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताश्रय ।
सहस्रमुखसंवास कामरूप नमोऽस्तु ते ॥ इति वसन्तम् ।

कामभस्मसमुद्भूत रतिवाष्पपरिप्लुत ।
ऋषिगन्धर्वदेवादिविमोहक नमोऽस्तु ते ॥ इति दमनं च संपूज्य--

नमोऽस्तुपञ्चबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ।। इति मदनमुपस्थाय, 'ॐ कामाय नमः' इति संपूज्य निशायां देवाग्रे पञ्चवर्णैश्चन्दनेन वाष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिर्वृत्तं चतुरस्रं च कृत्वा तत्र कुम्भं संस्थाप्योपरि दमनं पूजयित्वा–

पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ।
दमन त्वमिहागच्छ सान्निध्यं कुरु ते नमः ।।

ॐ क्लीँ कामदेवाय नमः । ॐ ह्रीं रत्यै नमः । इत्यावाह्य दिक्षु पूर्वादितः– स्मरशरीराय नमः । अनङ्गाय नमः । मन्मथाय नमः । कामाय नमः । क्लीं वसन्तसखाय नमः । स्मराय नमः । इक्षुचापाय नमः । पुष्पास्त्राय नमः । इति पूजयित्वा– ॐ तत्स्वरूपाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् । इत्यष्टोत्तरशतं संमन्त्र्य पूजयित्वा 'ह्रीँ नमः' इति पुष्पाञ्जलिं दत्त्वा–

नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ।। इति नत्वा–
आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ।।
क्षीरोदधिमहानागशय्यायां स्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ।।
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ।।

इति देवं संप्रार्थ्य पुष्पाञ्जलिं दत्त्वा अस्त्रेण चक्रमन्त्रेण वा रक्षणं कुर्यात् । ततः प्रातर्नित्यपूजां कृत्वा देवं संपूज्य दूर्वागन्धाक्षत-युक्तं दमनमादाय मूलमन्त्रं पठित्वा--

देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ।
हृदिस्थान् पूरयेः कामान् मम कामेश्वरीप्रिय ।।

इदं दमनकं देव गृहाण त्वमनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन् परिपूरय ।। इति मन्त्रान्ते पुनर्मूलमन्त्रेण देवं समर्पयेत् । ततोऽङ्गदेवताभ्यः स्वस्वमन्त्रेण दत्त्वा प्रार्थयेत्--

मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरीं पूजां तवास्तु गरुडध्वज ।।

वनमालां यथा विष्णो कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजां च हृदये वह ।।

जानताऽजानता वापि कृतं यद्यत्तवार्चनम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ।।

नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ।।

मन्त्रहीनमिति संप्रार्थ्य पञ्चोपचारैः पुनः संपूज्य नीराजनं कुर्यादिति । दीक्षारहितानां तु नाम्नैव समर्पणम् । अत्र च द्वादशीमतन्त्रीकृत्य पारणाहो ग्राह्यम् ।

'पारणाहे न लभ्येत द्वादशी घटिकापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ।।' इति तत्रैवोक्तेः । इदं च मलमासे न कार्यम् ।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ।'

इति कालादर्शे मलमासवर्ज्येषु परिगणनात् ।

'उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा ।
उत्तरे नियतं कुर्यात्पूर्वे तन्निष्फलं भवेत् ।।' इति माधवीये

प्रजापतिवचनाच्च । शुक्रास्तादौ तु कार्यमेव पूर्वोक्तवचनात् ।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ।
ईशानस्य बलिं विष्णोः शयनं परिवर्तनम् ।।
कुर्याच्छुक्रस्य च गुरोरस्तेऽपीति विनिश्चयः ।।'

इति ज्योतिर्निबन्धे वृद्धगार्ग्यवचनाच्च । इति दमनारोपणम् । चैत्रशुक्लत्रयोदश्यामनङ्गव्रतं हेमाद्रौ, भविष्ये--

'चैत्रोत्सवे सकललोकमनोनिवासे
कामं त्रयोदशतिथौ च वसन्तयुक्तम् ।
पत्न्या सहार्च्य पुरुषप्रवरोऽपि योषित्
सौभाग्यरूपसुतसौख्ययुतः सदा स्यात् ।।'

तत्र सा पूर्वा ग्राह्या । 'त्रयोदशतिथिः पूर्वः सितः' इति दीपिकोक्तेः । चैत्रशुक्लचतुर्दशी पूर्वा ग्राह्या--

'मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन'।। इति बौधायनोक्तेः।

'परा पूर्वाह्णगामिनी' इति वा पाठः ।

चैत्रपूर्णिमा सामान्यनिर्णयात् परैव । अत्र विशेषो निर्णयामृते विष्णुस्मृतौ– 'चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्य माप्नोति, इति । तथा ब्राह्मे कल्पतरौ–

'मन्दे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ।।' इति ।

अत्र सर्वदेवानां दमनपूजोक्ता वायवीये–

'संवत्सरकृतार्चायाः साफल्यायाखिलान्सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ।।' इति । इयं मन्वादिरपि । चैत्रकृष्णत्रयोदश्यां महावारुणिसंज्ञको योगो गौडेषु प्रसिद्धः ।

तदुक्तं वाचस्पतिकृतौ शूलपाणौ च स्कान्दे–

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत शतसूर्यग्रहैः समा ।।
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ।।
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ।।' तत्रैव ज्यौतिषे--

'चैत्रासिते वारुणऋक्षयुक्ता
त्रयोदशी सूर्यसुतस्य वारे ।
योगे शुभे सा महती महत्या
गङ्गाजलेऽर्कग्रहकोटितुल्या ।।' इति ।

त्रिस्थलीसेतौ ब्रह्माण्डपुराणेऽपि–

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत शतसूर्यग्रहैः समा ।।' इति ।

कल्पतरौ ब्राह्मे–

'मधौ कृष्णत्रयोदश्यां शनौ शतभिषायुते ।
वारुणीति समाख्याता शुभे तु महती स्मृता ।।'

चैत्रकृष्णचतुर्दश्यां पुलस्त्यः–

'चैत्रे कृष्णेचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गङ्गायां तु विशेषतः ।।' इति ।

अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात् ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतश्चैत्रस्य निर्णयः ।।

अथ वैशाखमासः ।।

तत्र मेषसंक्रान्तिः । मेषसंक्रमे प्रागपरा दशघटिकाः पुण्यकालः । रात्रौ तु प्रागुक्तम् । अत्र धर्मघटादिदानमुक्तं पृथ्वीचन्द्रोदये, पाद्मे–

‘तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ।।
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम् ।’

अथ वैशाखस्नानम् । तत्र विष्णुस्मृतिपाद्मयोः–

‘तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।।’ इति सौरमास उक्तः ।

अन्यत्पक्षद्वयमुक्तं पाद्मे–

‘मधुमासस्य शुक्लायामेकादश्यामुपोषितः ।
पञ्चदश्यां च भो वीर मेषसंक्रमणे तु वा ।।
वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।’
‘मधुसूदनमभ्यर्च्य कुर्यात्सङ्कल्पपूर्वकम् ।।’

तत्र मन्त्रः– ‘वैशाखं सकलं मासं मेषसङ्क्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ।।
मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघनमस्तु मे पुण्यं वैशाखस्नानमन्वहम् ।।
माधवे मेषगे भानौ मुरारे मधुसूदन ।
प्रातः स्नानेन मे नाथ फलदो भव पापहन् ।’ इति ।

तीर्थविशेषोऽपि तत्रैवोक्तः–

‘मेषसंक्रमणे भानोर्माधवे मासि यत्नतः ।
महानद्यां नदीतीर्थे नदे सरसि निर्झरे ।।
देवखातेऽथवा स्नायाद्यथाप्राप्ते जलाशये ।
दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन् ।।’ इति । संकल्पे च तत्तीर्थनामग्राह्यम् । अज्ञाने तु विष्णुतीर्थमिति वदेत्–

'यदा न ज्ञायते नाम यस्य तीर्थस्य भो द्विजाः ।
तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदं त्विति ।।
तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः ।' इति तत्रैवोक्तेः ।

तथान्योऽपि विशेषस्तत्रैव पाद्मे–

'तुलसी कृष्णगौराख्या तयाभ्यर्च्य मधुद्विषम् ।
विशेषेण तु वैशाखे नरो नारायणो भवेत् ।।

माधवं सकलं मासं तुलस्या योऽर्चयेन्नरः ।
त्रिसन्ध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः ।।'

तथा– 'प्रातः स्नात्वा विधानेन माधवे माधवप्रियम् ।
योऽश्वत्थमूलमासिञ्चेत्तोयेन बहुना सदा ।।

कुर्यात्प्रदक्षिणं तं तु सर्वदेवमयं ततः ।
पितृदेवमनुष्यांश्च तर्पयेत्सचराचरम् ।।

योऽश्वत्थमर्चयेद्देवमुदकेन समन्ततः ।
कुलानामयुतं तेन तारितं स्यान्न संशयः ।।

कण्डूय पृष्ठतो गां तु स्नात्वा पिप्पलतर्पणम् ।
कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयात् ।।'

तथा– 'एकभक्तमथो नक्तमयाचितमतन्द्रितः ।
माधवे मासि यः कुर्याल्लभते सर्वमीप्सितम् ।।

वैशाखे विधिना स्नानं देवनद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ।।

व्रतं दानं दमो देवि मधुसूदनपूजनम् ।
अपि जन्मसहस्रोत्थं पापं दहति दारुणम् ।।'

मदनरत्ने, स्कान्दे–

'प्रपा कार्या च वैशाखे देवे देया गलन्तिका ।

उपानद्व्यजनच्छत्रसूक्ष्मवासांसि चन्दनम् ॥
जलपात्राणि देयानि तथा पुष्पगृहाणि च ।
पानकानि च चित्राणि द्राक्षारम्भाफलान्यपि ॥'

तिथितत्त्वे– 'ददाति यो हि मेषादौ सक्तूनम्बुघटान्वितान् ।
पितृनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते ॥'

तथा– 'वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ।
ददाति सुरराजेन्द्र स याति परमां गतिम् ॥'

एवं संपूर्णस्नानाशक्तौ त्र्यहं वा स्नायात् । तदुक्तं तत्रैव पाद्मे--

'त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥
प्रातः स्नातः सनियमः सर्वपापैः प्रमुच्यते ।' इति ।

यदा तु वैशाखो मलमासो भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वयं स्नानं तन्नियमाश्च कर्तव्याः । मासोपवासचान्द्रायणादि तु मलमास एव समापयेत् । तदुक्तं दीपिकायाम्-- 'नियतत्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समापयेत् मलमासोपवासव्रतमिति' । अत्र दानविशेष उक्तोऽ परार्के, वामनपुराणे–

'गन्धाश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥'

एवं स्नाने कृते तस्योद्यापनं कार्यम् । तदुक्तं तत्रैव–

'मासमेवं बहिः स्नात्वा नद्यादौ विमले जले ।
एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा ॥

उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।
मण्डपं कारयेदादौ कलशं तत्र विन्यसेत् ॥
निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः ।
शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितम् ॥

लक्ष्मीयुतं जगन्नाथं पूजयेदासने बुधः ।
भूषणैश्चन्दनैः पुष्पैर्दीपनैवेद्यसञ्चयैः ।।
एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ।
श्वोभूते कृतमैत्रोऽथ ग्रहवेद्यां ग्रहान् यजेत् ।।
होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः ।
तिलाज्येन यवैर्वापि सर्वैर्वापि स्वशक्तितः ।।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
'प्रतद्विष्णु' रनेनैव 'इदं विष्णु' रनेन वा ।।
व्रतसंपूर्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीम् ।
पादुकोपानहौ छत्रं गुरवे व्यजनं तथा ।।
शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा ।
ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्यो दद्याच्च दक्षिणाम् ।।
कलशाञ्जलसंपूर्णांस्तेभ्यो दद्याद्यवांस्तथा ।
एवं कृते माधवस्य उद्यापनविधौ शुभे ।।
फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्' ।

एतावदशक्ये तत्रैवोक्तम्–

'वैशाख्यां विधिवत्स्नात्वा भोजयेद्ब्राह्मणान् दश ।
कृशरं सर्वपापेभ्यो मुच्यते नात्र संशयः ।।' इति ।

वैशाखशुक्लतृतीया अक्षयतृतीयोच्यते । सा पूर्वाह्ण व्यापिनी ग्राह्या । दिनद्वयेऽपि तदव्याप्तौ परैव । तदुक्तं निर्णयामृते नारदीये–

'वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युता तथा ।।' इति ।
रोहिणीबुधयुक्तापि पूर्वविद्धा विवर्जिता ।
भक्त्या कृतापि मां धातः पुण्यं हन्ति पुरा कृतम् ।
गौरीविनायकोपेता रोहिणीबुधसंयुता ।।
विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा ।'

इयं युगादिरपि । सा चोक्ता रत्नमालायाम्–

'माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी ।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः ।।' इति ।

'वैशाखमासस्य च या तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी पञ्चदशी च माघे ।।' इति विष्णुपुराणे चकारेण

तमिस्रपक्षानुषङ्गः । अत्र श्राद्धमुक्तं मात्स्ये–

'कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानि द्विसाहस्रं पितृणां तृप्तिदं भवेत् ।।' इति ।

भारतेऽपि– 'या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
स्नात्वा हुत्वा च दत्त्वा च जप्त्वानन्तफलं लभेत् ।।' इति ।

श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या–

'पूर्वाह्णे तु सदा कार्याः शुक्ले मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ।।' इति वाराह्योक्तेः ।

'द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ।।' इति नारदीयवचनाच्च । दीपिकापि–

'अथो मन्वादि युगादिकर्मतिथयः पूर्वाह्णकाः स्युः सिते विज्ञेया
अपराह्णिकाश्च बहुले' इति ।

स्मृत्यर्थसारेपि– 'युगादिमन्वादिश्राद्धेषु शुक्ले पक्षे उदयव्यापिनी तिथिर्ग्राह्या । कृष्णपक्षेऽपराह्णव्यापिनीति ।'

अत्र विशेषो हेमाद्रौ भविष्ये–

'वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गङ्गातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ।।

तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ॥' इति ।

अत्र दानविशेषस्तत्रैव भविष्ये इमां प्रक्रम्य–

'उदकुम्भान् सकनकान् सान्नान् सर्वरसैः सह ।
यवगोधूमचणकान् सक्तुदध्योदनं तथा ॥
ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते ।'

देवीपुराणेऽपि--

'तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य तु ।
उदकुम्भप्रदानेन शिवलोके महीयते ॥'

मन्त्रस्तु– एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः ॥
गन्धोदकतिलैर्मिश्रं सान्नं कुम्भं फलान्वितम् ।
पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु ॥'

अत्र च पिण्डरहितं श्राद्धं कुर्यात् ।

'अयनद्वितये श्राद्धं विषुवद्द्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते ॥' इति पुलस्त्यवचनात् ।

अत्र रात्रिभोजने प्रायश्चित्तमृग्विधाने–

'रात्रौ भुक्ते वत्सरे तु मन्वादिषु युगादिषु ।
'अभिस्ववृष्टि' मन्त्रं च जपेद्दश न पातकम् ॥' इति ।

अपरार्के यमः–

'कृतोपवासाः सलिलं ये युगादिदिनेषु च ।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः ॥' इति ।

वैशाखे मलमासे सति तत्रैव युगादिः कार्या । तथा च ऋष्यशृङ्गः–

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादितः ॥' इति ।

एतद्दशहरादिकं वृषादिसंक्रमे इष्टम् । 'कन्याचन्द्रे वृषे रवौ' इत्यादिना सौरमासोक्तेरित्यर्थः । कालादर्शेऽपि–

‘अब्दोदकुम्भमन्वादिमहालययुगादिषु’ इति मलमासकर्तव्ये परिगणनाच्च। महालयशब्देन मघात्रयोदश्युच्यते इति माधवः। स्मृतिचन्द्रिकायां तु मासद्वये कर्तव्यमित्युक्तम्–

‘योगादिकं मासिकं च श्राद्धं चापरपक्षकम्।
मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च।।’ इति। अपरपक्षः कृष्णपक्षः। न तु महालयः। तस्य तत्र निषेधात्। मदनरत्नेऽपि मरीचिः–

‘प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम्।
मन्वादौ च युगादौ च तन्मासं उभयोरपि।।’ इति।

प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धं स एव व्याचख्यौ।
अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तमृग्विधाने–

‘न यस्य द्यावा’ मन्त्रं च शतवारं तदा जपेत्।
युगादयो यदा न्यूनाः कुरुते नैव चापि यः।।’ इति।

अत्र समुद्रस्नानं प्रशस्तम्। तदुक्तं सौरपुराणे–

‘युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे हि यत्फलम्।।
तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम्।।’ इति।

अयं निर्णयः सर्वयुगादिषु बोद्धव्यः। इति युगादिनिर्णयः।

अथ परशुरामजयन्ती निर्णयः।।

इयमेव तृतीया परशुरामजयन्ती। सा प्रदोषव्यापिनी ग्राह्या। तदुक्तं स्कान्दभविष्ययोः–

‘वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ।
निशायाः प्रथमे यामे रामाख्यः समये हरिः।।
स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते।
रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयम्।।’ इति।

दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा, अन्यथा पूर्वैव।
तदुक्तं भविष्ये–

'शुक्ला तृतीया वैशाखे शुद्धोपोष्या दिनद्वये ।
निशायाः पूर्वयामे चेदुत्तरान्यत्र पूर्विका ।।' इति ।

वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । तदुक्तं ब्राह्मे–

'वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ।।
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ।' इति ।

अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावेकदेशव्याप्तौ वा पूर्वा । युग्मवाक्यात् ।

वैशाखशुक्लद्वादश्यां योगविशेषो ज्योतिःशास्त्रे–

'पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे ।
पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः ।।
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ।।' इति । पञ्चाननःसिंहः । पाशाभिधानातिथिर्द्वादशी । करभो हस्तः ।

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती । सा प्रदोषव्यापिनी ग्राह्या । तदुक्तं नृसिंहपुराणे–

'वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे ।
मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनम् ।।
वर्षे वर्षे तु कर्तव्यं मम सन्तुष्टिकारणम् ।' इति ।

दिनद्वयेऽपि तद्व्याप्तावंशतः समव्याप्तौ च परा । विषमव्याप्तौ त्वधिकव्याप्तिमती । दिनद्वयेऽप्यव्याप्तौ परा । परदिने गौणकालव्याप्तेः सत्वात्, पूर्वदिने च तदभावात् । यत्तु– 'ततो मध्याह्नवेलायां नद्यादौ

विमले जले' इत्युपक्रम्य– 'परिधाय ततो वासो व्रतकर्म समारभेत्' इति तत्रैवोक्तं तत्सङ्कल्परूपव्रतोपक्रमविषयम् । न त्वेतावता मध्याह्नव्यापिनी ग्राह्येती भ्रमितव्यम् । पूर्वोक्तवचनविरोधात् ।

'वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः ।।' इति स्कान्दात् ।

'कूर्मसिंहौ बौद्धकल्की च सायम्' इति पूर्वोक्तपुराणसमुच्चयवचनाच्च । इयमेव योगविशेषेणातिप्रशस्ता । तदुक्तं तत्रैव--

'स्वातीनक्षत्रयोगे च शनिवारे तु मद्व्रतम् ।
सिद्धियोगस्य संयोगे वणिजे करणे तथा ।।
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ।
एभिर्योगैर्विनापि स्यान्मद्दिनं पापनाशनम् ।।
सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः ।।'

तथा– 'सिंहः स्वर्णमयो देयो मम सन्तोषकारकः ।'

तथा– 'विज्ञाय मद्दिनं यस्तु लङ्घयेत्पापकृन्नरः ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ।।'

इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । अथाऽत्र विशेषः । मध्याह्ने मृद्गोमयतिलामलकस्नानं कृत्वा–

'नृसिंह देवदेवेश तव जन्मदिने शुभे ।
उपवासं करिष्यामि सर्वभोगविवर्जितः ।।' इति सङ्कल्पं कृत्वाऽऽचार्यं वृत्वा सायङ्काले–

'हैमी तु तत्र तन्मूर्तिः स्थाप्या लक्ष्म्यास्तथैव च ।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ।।
यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः ।' इत्युक्तम् ।

नृसिंहमूर्तिं शक्त्या कृतं सुवर्णसिंहं च कलशोपरि संपूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः संपूज्य–

नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः ।।
इत्याचार्याय दत्त्वा--
मद्वंशे ये नरा जाता जनिष्यन्ति च वा परे ।
तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात् ।।
पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिभिः ।
तीव्रैश्च परिभूतस्य महादुःखगतस्य मे ।।
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ।।
क्षीराम्बुधिनिवासिस्त्वं चक्रपाणे जनार्दन ।
व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव ।। इति संक्षेपः ।

वैशाखपौर्णमास्यां विशेषः । अपरार्के जाबालिः--
'शृतान्नमुदकुम्भं च वैशाख्यां च विशेषतः ।
निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ।।
सुवर्णतिलयुक्तैस्तु ब्राह्मणान् सप्त पञ्च च ।
तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति ।।' इति वैशाखनिर्णयः ।

अथ ज्येष्ठमासः ।।

ज्येष्ठशुक्लतृतीयायां रम्भाव्रतमुक्तं भविष्ये --
'भद्रे कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ।।' इति । सा पूर्वविद्धा ग्राह्या ।

'बृहत्तपा तथा रम्भा सावित्री वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्तव्या सम्मुखीतिथिः[१] ।।' इति स्कान्दोक्तेः ।।

---

[१] पूर्वातिथिः

ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं ब्राह्मे--

'ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ।।
हरते दश पापानि तस्माद्दशहरा स्मृता ।।' इति ।

वाराहेऽपि- 'दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ।
अवतीर्णा ह्यतः स्वर्गात् हस्तर्क्षे च सरिद्वरा ।
हरते दशपापानि तस्माद्दशहरा स्मृता ।।' इति ।

स्कान्दे तु दशयोगा उक्ताः । यथा-

'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ ।।
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।' इति ।

अत्र बुधभौमयोः कल्पभेदेन व्यवस्था । इयं च यत्र योगबाहुल्यं सैव ग्राह्या । योगाधिक्ये फलाधिक्यम् । ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे 'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु' इति हेमाद्रौ ऋष्यश्रृङ्गोक्तेः । तथा स्कान्दे-

'यां कांचित् सरितं प्राप्य दद्यादर्घ्यं तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः ।।'

अत्र विशेषः काशीखण्डे--

'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ।।
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् ।।'

तथा- 'लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ।।'

तथा- 'निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसंख्यया ।।

तथा दीपैश्च ताम्बूलैः पूजयेच्छ्रद्धयान्वितः ।
स्नात्वा तु भक्त्या जाह्नव्यां दशकृत्वो विधानतः ।।
दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै जले ।
सक्तुपिण्डान् गुडपिण्डान् दद्याच्च दशसंख्यया ।।
ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ।।
संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा ।
अथ तत्राप्यशक्तश्चेल्लिखेत्पिष्टेन वै भुवि ।।
वक्ष्यमाणेन मन्त्रेण कुर्यात्पूजां विशेषतः ।
नारायणं महेशं च ब्रह्माणं भास्करं तथा ।।
भगीरथं च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् ।।
दशप्रस्थांस्तिलान् दद्याद्दशविप्रेभ्य एव च ।
दशप्रस्थान् यवान् दद्याद्दशसंख्यागवीस्तथा ।।'

प्रस्थः षोडशपलानि । पलं तु– 'मुष्टिमात्रं पलं स्मृतम्' इति महार्णवे उक्तम् ।

'मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ।।
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ।
गङ्गायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ।।
पुष्पाद्यैः पूजयेद्गङ्गां मन्त्रेणानेन भक्तितः ।
'ॐनमः शिवायै नारायण्यै दशहरायै गंगायै नमः' ।
इति मन्त्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशम् ।
जपेत्पञ्चसहस्राणि दशधर्मफलं लभेत् ।'

काशीखण्डे त्वन्यो मन्त्र उक्तः –

'नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एष वा ।।

स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमोऽनेनैव मनुना स्मृतम् ।।' इति ।

अत्र गङ्गास्तोत्रपाठमपि दशवारं कुर्यात् । तदुक्तं भविष्ये–

'तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ।।
सोऽपि तत्फलमाप्नोति गङ्गां सम्पूज्य यत्नतः ।
एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः ।।
उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते ।
सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते ।।' इति च । अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठानत्वाद्विशेषेण पूजा कार्या ।

तदुक्तं स्कान्दे सेतुमाहात्म्ये–

'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ।।
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् ।
रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् ।।' इति । इति दशहरा ।

ज्येष्ठशुक्लैकादशी निर्जला–

'ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा ।
निर्जलं समुपोष्यात्र जलकुम्भान् सशर्करान् ।।
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ ।'

ज्येष्ठपौर्णमास्यां सावित्रीव्रतम् । तदुक्तं स्कान्दे–

'ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे ।' इत्युपक्रम्य– 'व्रतं त्रिरात्रमुद्दिश्य दिवारात्रि स्थिरा भवेत्' इति । अन्तेऽप्युपसंहृतम् ।

'ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम् ।
चीर्णं पुरा महाभक्त्या कथितं ते मया नृप ।।' इति ।

दाक्षिणात्याश्चैतदेवाद्रियन्ते । एतच्चामावास्यायामप्युक्तं निर्णयामृते, भविष्ये–

'अमायां च तथा ज्येष्ठे वटमूले महासती ।
त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ।।'

मदनरत्ने त्विदं वाक्यं– 'पञ्चदश्यां तथा ज्येष्ठे' इति पठित्वा ज्येष्ठे पौर्णमास्यामुक्तम् । तथा–

'अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया ।
अयाचितं चतुर्दश्याममायां समुपोषणम् ।।' इति । तत्तु पाश्चात्या आद्रियन्ते । हेमाद्रिसमयोद्योतादिषु तु भाद्रपदपूर्णिमायामुक्तम् । तत्तु नेदानीं प्रचरति । गौडास्तु–

'मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत् ।
ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः ।।
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः ।।' इति पराशरोक्तेश्चतुर्दश्यां प्रदोषे व्रतम् । दिनद्वये तद्व्याप्तौ परैवेत्याहुः । तन्निर्मूलम् ।

अत्र पूर्णिमाऽमावास्ये पूर्वविद्धे ग्राह्ये–

'भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तमम् ।।' इति ब्रह्मवैवर्तात् ।

स्कान्देऽपि– 'भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ।
वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन ।।' इति ।

मदनरत्ने ब्रह्मवैवर्तेऽपि–

'प्रतिपत्पञ्चमी भूतसावित्री वटपूर्णिमा ।
नवमी दशमी चैव नोपाष्या परसंयुता ।।' इति ।

यदात्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या–

'पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः ।
नाड्योऽष्टादश भूतस्य स्युश्चेत्तच्च परेऽहनि ।।' इति माधवः ।

वस्तुतस्तु–

'भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।' इत्यस्य व्रतान्तरे सावकाशत्वाद्विशेषप्रवृत्तपूर्वविद्धाऽविधायकवचनेन तस्य बाधादष्टा-

दशनाडीवेधेऽपि पूर्वैवेत्ययं पन्थाः साधुः । अत्र पौर्णिमानुरोधेन यथा त्रिरात्रसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यम् । तस्याः प्रधानत्वात् । अयं निर्णयोऽमायामपि ज्ञेयः । पारणं तु पूर्णिमान्ते कार्यम् । अत्र स्त्रीव्रतेषु विशेषः परिभाषायामुक्ताः ।

अत्र विशेषो भविष्ये–

'गृहीत्वा बालुकां पात्रे प्रस्थमात्रं युधिष्ठिर ।
ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते ।।
सावित्रीप्रतिमां कुर्यात् सौवर्णीं वापि मृन्मयीम् ।
सार्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः ।।
रजन्या कण्ठसूत्रैश्च शुभैः कुङ्कुमकेशरैः ।' पूजयेदिति शेषः ।
रजनी हरिद्रा । कण्ठसूत्रं सौभाग्यतन्तुः ।
'सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमैः ।
रात्रौ जागरणं कृत्वा प्रभाते विमले ततः ।।
तामपि ब्रह्मणे दत्त्वा प्रणिपत्य क्षमापयेत् ।' इति ।

मन्त्रस्तु– 'सावित्रीयं मया दत्ता सहिरण्या महासती ।
ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यताम् ।।
व्रतेनानेन राजेन्द्र वैधव्यं नाप्नुयात्क्वचित् ।' इति ।

ज्येष्ठपौर्णमास्यां विशेषः, आदित्यपुराणे–

'ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ।।'

विष्णुरपि– 'ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानद्दानेन नरो नराधिपत्यमाप्नुयात् ।' इति । हेमाद्रौ ज्योतिषे–

'ऐन्द्रे गुरुःशशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता ।।'

इयं मन्वादिरपि । सा पौर्वाह्णिकी ग्राह्या । विशेषस्तु चैत्रे उक्तः ।

तथाऽपरार्के, वामनपुराणे–

‘उदकुम्भाम्बुदानं च तालवृन्तं सचन्दनम् ।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु ॥’ इति ज्येष्ठमासः ॥

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतो ज्येष्ठस्य निर्णयः ॥

अथाषाढमासः ॥

अथाषाढशुक्लद्वितीयायां रथोत्सवः । तदुक्तं स्कान्दे–

‘आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं वै भद्रया सह ॥
यात्रोत्सवप्रवृत्यर्थं प्रीणयेत द्विजान् बहून् ।’

तथा– ‘ऋक्षाभावे तिथौ कार्या यात्रा सा प्रीतये मम ।’

आषाढशुक्लदशमी पौर्णमासी च मन्वादिः । सा च पूर्वाह्णव्यापिनीति प्रागुक्तम् । आषाढशुक्लद्वादश्यां विष्णुशयनोत्सव उक्तो ब्राह्मे–

‘एकादश्यां तु शुक्लायामाषाढे भगवान् हरिः ।
भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥’ इति ।

यमः– ‘क्षीराब्धौ शेषपर्यङ्के आषाढ्यां संविशेद्धरिः ।
निद्रां त्यजति कार्तिक्यां तयोःसंपूजयेत्सदा ॥
ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति ।
हिंसात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः ॥
प्रस्वापे च प्रबोधे च पूजितो येन केशवः ।’

स्कान्दे– ‘आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवम् ॥’

अयं द्वादश्यामप्युक्तः–

‘आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ॥
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥
आभाकाद्येषु मासेषु मिथुने माधवस्य च ।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः ॥’ इति भविष्योक्तेः ।

'द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आभाकासितपक्षेषु शयनावर्तनादिकम् ।।' इति वाराहोक्तेश्च द्वादश्यामित्यत्रापि पारणाहोमात्रं विवक्षितम् ।

'पारणाहे पूर्वरात्रे घण्टादीन्वादयन्मुहुः ।' इति रामार्चनचन्द्रिकोक्तेः । इदं च मलमासे न कार्यम् ।

'ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् ।' इति कालादर्शे निषेधात् । यदपि–

'एकादश्यां तु गृह्णीयात्संक्रान्तौ कर्कटस्य वा ।
आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियाम् ।।' इति ब्रह्मवैवर्ते तदपि मलमासे सति द्रष्टव्यम् ।

'मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ।।' इति मोहचूलोत्तरोक्तेः । अत्रैव चातुर्मास्यव्रतारम्भ उक्तो भारते–

'आषाढे तु सिते पक्षे एकादश्यामुपोषितः ।
चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः ।।'

अस्य कर्तव्यत्वं तत्रैवोक्तम्–

'वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः ।
व्रतेन नोचेदाप्नोति किल्विषं वत्सरोद्भवम् ।।
असंभवे तुलार्केऽपि कर्तव्यं तत्प्रयत्नतः ।' इति । अस्यारम्भश्च शुक्रास्तादावपि कार्यः ।

'न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः ।
खण्डत्वं चिन्तयेदादौ चातुर्मास्यविधौ नरः ।।' इति वृद्धगार्ग्योक्तेः । इयं च द्वितीयाद्यारम्भविषयम् । प्रथमारम्भस्तु न भवत्येव । आशौचमध्येऽपि द्वितीयाद्यारम्भो भवति ।

'अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान् ।
व्रतमेतन्नरः कृत्वा सर्वपापैः प्रमुच्यते ।।' इति स्कान्दोक्तेः ।

'आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्' इति विष्णुवचनाच्च। इदं च शिवभक्तादिभिरपि कार्यम् ।

'शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके ।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ।।' इति ब्रह्मवैवर्तात् ।

व्रतग्रहणप्रकारस्तु भविष्ये–

'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः ।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ।।

सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ।।

एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः ।
प्रभाते चाग्रतो विष्णोः कृताञ्जलिपुटस्तथा ।।

चतुरो वार्षिकान्मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ।।

इदं व्रतं मया देव गृहीतं पुरतस्तव ।
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ।।
गृहीतेऽस्मिन्व्रते देव यद्यपूर्णे मृतो ह्यहम् ।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ।।' इति ।

चातुर्मास्ये नियमाः शाकादिव्रतं च भविष्ये–

'श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत्।।' इति ।

स्कान्देऽपि चातुर्मास्यकल्पे–

'चत्वार्येतानि नित्यानि चतुराश्रमवर्णिनाम् ।
प्रथमे मासि कर्तव्यं नित्यं शाकव्रतं नरैः ।।'
द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमम् ।
पयोव्रतं तृतीये तु चतुर्थेऽपि निशामय ।।'

द्विदलं बहुबीजं च वृन्ताकं च विवर्जयेत् ।
नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः ।।'
जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम् ।
कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद्बुधः ।।'

तथा– 'विशेषाद्वदरीं धात्रीं कूष्माण्डं तिन्तिणीं त्यजेत् ।
जीर्णधात्रीफलं ग्राह्यं कथञ्चित्कायशोधनम् ।।' इति ।

स्कान्दे– 'वार्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्दने ।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः ।।
अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनम् ।
पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत् ।।
अभक्षं वर्जयेद्दूरान्मसूरं सितसर्षपम् ।
राजमाषान् कुलत्थांश्च आशुधान्यं च सन्त्यजेत् ।
शाकं दधि पयो माषान् श्रावणादिषु सन्त्यजेत् ।'

अत्र त्यजेदिति वर्जनसंकल्परूपः पर्युदासो ज्ञेयः व्रतोपक्रमात् । अत्र केचित्– शक्यते अशितुमनेनेति शाकः । इति योगबलाद्व्यञ्जनमात्रस्य निषेधमाचक्षते । अन्ये तु शाकशब्दस्य पत्रादिदशविधशाके योगरूढत्वात् योगाच्च रूढेर्बलीयस्त्वात्सूपादीनामपि त्यागापत्तेश्च तत्प्रत्याचक्षते ।

तेन– 'मूलपत्रकरीराग्रफलकाण्डादिरूढकाः ।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम् ।।' इत्युक्तस्य शाकस्य निषेध इति । अधिरूढकाः अङ्कुराः । वस्तुतस्तु–

'तत्तत्कालोद्भवाः शाका वर्जनीया प्रयत्नतः ।
बहुबीजमबीजं च विकारि च विवर्जयेत् ।।'

इति भविष्यवचनात्तत्तत्कालोत्पन्नानां दशविधशाकानां निषेधः । अत्र तत्कालोद्भवजातीयत्वं विवक्षितम् । तेनातपादिशोषितानां वर्षान्तरोद्भवानामपि निषेधः । अत्र तत्कालोद्भवत्वमात्रं विवक्षितम्,

न तु तन्मात्रकालोद्भवत्वं, गौरवात् । तेनान्यकालोद्भवानां च बिम्बादीनां निषेधः । अत्र तत्तत्कालोद्भवा इति वीप्सावशात्स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः । बहुबीजमित्यनेकबीजमिति केचित् । इतरावयवापेक्षया बीजावयवा यत्र बहवस्तदित्यन्ये । अबीजं कदल्यादि । आचारप्रदीपे–

'वृन्ताकं च कलिङ्गं च बिल्वौदुम्बरभिःसटाः ।
उदरे यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥'

तथा देवलः– 'ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः॥'

आमिषाणि चोक्तानि पाद्मे–

'प्राण्यङ्गचूर्णं चर्माम्बु जम्बीरं बीजपूरकम् ।
अयज्ञशिष्टमाषादि यद्विष्णोरनिवेदितम् ॥
दग्धमन्नं मसूरं च मांसं चेत्यष्टधामिषम् ।
रुच्यं तत्तद्देशलभ्यं सुप्ते देवे विवर्जयेत् ॥'

पाद्मे– 'गोछागीमहिषीदुग्धादन्यद्दुग्धादि चामिषम् ।
धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा ॥
द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ।
ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम् ॥
आत्मार्थं पाचितं चान्नमामिषं तत्स्मृतं बुधैः ।
निष्पावान् राजमाषांश्च मसूरं सन्धितानि च ॥
वृन्ताकं च कलिङ्गं च सुप्ते देवे विवर्जयेत् ।' सन्धितानि लवणशाकादीनि । तत्रैव विष्णुधर्मे–

'चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक् ।'

हविष्याणि तु भविष्ये–

'हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः ।
कलायकङ्गुनीवारा वास्तुकं हिलमोचिका ॥

षष्टिका कालशाकं च मूलकं केमुकेतरत् ।
कन्दं सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ।।
पयोनुद्धृतसारं च पनसाम्रौ हरीतकी ।
पिप्पली जीरकं चैव नागरङ्गं च तिन्तिणी ।।
कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ।।' इति ।

सितास्विन्नम् अनूष्मपक्वम् । धान्यं च तण्डुलाः । केमुकं कन्दविशेषः । 'कलायस्तु सतीनकः' इत्यमरः । बटुरीति प्रसिद्धं धान्यम् । मदनरत्नेऽप्येवम् । अगस्त्यसंहितायां हैमन्ताद्युक्त्वा–

'नारिकेलफलं चैव कदली लवली तथा ।
आम्रमामलकं चैव पनसं च हरीतकी ।।
व्रतारम्भे प्रशस्तं च हविष्यं मन्वते बुधाः ।'

अन्यान्यपि व्रतान्युक्तानि भविष्ये–

'स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ।
गृह्णीयान्नियमानेतान् दन्तधावनपूर्वकान् ।।
तेषां फलानि वक्ष्यामि तत्कर्तृणां पृथक् पृथक् ।
मधुरस्वरो भवेद्राजा पुरुषो गुडवर्जनात् ।।
तैलस्य वर्जनाद्राजन् सुन्दराङ्गः प्रजायते ।
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।।
ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् ।।
शाकपत्राशनाद्भोगी अपक्वादोऽमलो भवेत् ।
भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् ।।
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोम्नां च गङ्गास्नानफलं लभेत् ।।

मौनव्रती भवेद्यस्तु तस्याऽऽज्ञाऽस्खलिता भवेत् ।
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ।।
प्रदक्षिणाशतं यस्तु नियमेन करोति वै ।
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ।।
अयाचितेन प्राप्नोति पुत्रान्धर्मानशेषतः ।
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि ।।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
गुडवर्जी नरो दद्यात्सघृतं ताम्रभाजनम् ।।
सहिरण्यं नरश्रेष्ठ लवणस्याप्ययं विधिः ।
सुप्ते देवे तु यो विष्णौ शिवस्याङ्गणमर्चयेत् ।।
पञ्चवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा ।
स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात् ।।'

अथैषां समाप्तौ कार्तिक्यां दानानि– एकभुक्तव्रते दम्पती संपूज्य धेनुर्देया । नक्ते वस्त्रयुगम् । एकान्तरोपवासे गौः । भूशयने शय्या । षष्ठकालभोजने गौः। व्रीहिगोधूमादित्यागे हैमव्रीह्यादि। कृच्छ्रे गोयुगम् । शाकाशने गौः। पयोव्रते च । मधुदधिघृतव्रतेषु वासो गौश्च । ब्रह्मचर्ये स्वर्णमूर्तिः । ताम्बूलव्रते वासोयुगम् । मौने घृतकुम्भो वस्त्रयुगं घण्टा च । देवाग्रे मालिकाकरणे धेनुर्हेमपद्मं च । दीपव्रते दीपिकां वासोयुगं च । भूमिभोजने पर्णभोजने च कांस्यपात्रं गौश्च । चतुष्पथदीपे गोग्रासे च गोवृषौ । प्रदक्षिणाशते वस्त्रम् । अनुक्तेषु स्वर्णं गौश्चेत्यादि हेमाद्रौ । तथा पाद्मे–

'शयनीबोधिनीमध्ये शमीदूर्वापमार्गकैः ।
भृङ्गराजेन देवांस्तु नार्चयीत कदाचन ।।'

हेमाद्रौ पाद्मे– 'आषाढादिचतुर्मासे अभ्यङ्गं वर्जयेन्नरः ।
समाप्तौ च पुनर्दद्यात्तिलतैलयुतं घटम् ।।

आषाढादिचतुर्मासं वर्जयेन्नखकर्तनम् ।
वृन्ताकं गृञ्जनं चैव मधुसर्पिर्घटान्वितम् ।।
कार्तिक्यां तु पुनर्हैमं ब्राह्मणाय निवेदयेत् ।'

स्कान्दे– 'एकान्तरं द्व्यन्तरं वा कुर्यान्मासोपवासकम् ।
अनोदनं फलाहारं नक्तव्रतमथापि वा ।।'

अत्रैव तप्तमुद्राधारणमुक्तं रामार्चनचन्द्रिकायां भविष्ये–

'शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च ।
शङ्खचक्रविधानेन वह्निपूतो भवेन्नरः ।।' इति

"अतप्ततनूर्न तदामो अश्नुते" इति ऋग्वेदात् । "स होवाच याज्ञवल्क्यस्तस्मात्पुमानात्महिताय हरिं भजेत् । सुश्लोकमौलेर्वर्मण्यग्निना संदधते" इति शतपथश्रुतेः । "प्रतद्विष्णो अब्जचक्रे सुतप्ते जन्माम्भोधीतर्तवे चर्षणीन्द्राः । मूले बाह्वोर्दधन्ये पुराणात्तु लिङ्गान्यङ्गे तप्तायुधान्यर्पयन्त" इति सामवेदात् ।

'अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् ।।' इति पद्मपुराणाच्चेति ।

तत्प्रकारस्तु रामार्चनचन्द्रिकातो ज्ञेयः । पृथ्वीचन्द्रोदयस्तु–

'यस्तु संतप्तशङ्खारिलिङ्गचिह्नतनुर्नरः ।
स सर्वयातनाभागो चण्डालो जन्मकोटिषु ।।
द्विजं सुतप्तशङ्खारिलिङ्गाङ्किततनुं नरः ।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ।।' इति बृहन्नारदीयोक्तेः ।
'शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ।।
शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ।।
यथा श्मशानजं काष्ठमनर्हः सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ।।'

तथा– 'शिवकेशवयोरङ्काञ्छूलचक्रादिकान् द्विजः ।
न धारयेत मतिमान् वैदिके वर्त्मनि स्थितः ।।' इति विष्णवाश्वलायनादिवचनात् । ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनां चासत्वात् चक्रादिधारणं शूद्रविषयमित्यूचुः । अत्र शिष्टाचार एव प्रमाणम् ।

आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं भविष्ये–

'आषाढपौर्णमास्यां तु सन्ध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहम् ।।
स्नानं करिष्ये नियतो ब्रह्मचर्ये स्थितः सदा ।
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ।।' इति ।

अस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या । अत्रैव शिवशयनोत्सव उक्तो वामनपुराणे–

'पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्ष्मणा ।।' इयं प्रदोषव्यापिनी ।

अत्रैव व्यासपूजोक्ता । तत्र त्रिमुहूर्ता चेत् परैव ।

'त्रिमुहूर्ताधिकं ग्राह्यं पर्व क्षौरप्रणामयोः' इति वचनात् ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गत आषाढनिर्णयः ।।

कर्कसक्रान्तिः ।।

कर्कसंक्रान्तौ पूर्वं त्रिंशद्दण्डाः पुण्यकालः । सूर्योदयोत्तरं संक्रमे तु परत एव पुण्यकालः । रात्रौ तु निशीथात्प्राक् परतश्च संक्रमे अपरार्कहेमाद्र्यनन्तभट्टादिमते पूर्वोत्तरदिनयोः पञ्चनाड्यः पुण्यकालः –

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ।।
दिनान्ते पञ्चनाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ।।' इति स्कान्दोक्तेः ।

‘पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रान्तिपरम् । वक्ष्यमाणवचोविरोधात्’ इत्युक्तं मदनरत्ने । तेनायमर्थः–रात्रौ पूर्वभागे मकरे उदये पञ्चनाड्यः पुण्याः । रात्रावपरभागे कर्कसंक्रमे दिनान्ते पञ्चनाड्यः पुण्याः । विषुवतोस्तु पूर्वदिने पञ्च, अपरदिने च पञ्चेति वाक्यान्तरानुरोधात् । तेन हेमाद्रिमाधवयोः सर्ववचनानां चाविरोधः । माधवमते तु–

‘अर्द्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ।।’ इति वृद्धगार्ग्योक्तेः ।।
‘मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः ।।’ इति भविष्योक्तेश्च पूर्वदिने एव पुण्यम् । दाक्षिणात्यास्त्वेतदेवाद्रियन्ते । अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् । अत्र दानोपवासादि पूर्वमुक्तम् । तथा कर्के केशादिकर्तनं निषिद्धम्–

‘कुंभे कर्कटके चापि कन्यायां कार्मुके रवौ ।
रोमखण्डं गृहस्थस्य पितृन् प्राशयते ध्रुवम् ।।’
इति सुमन्तुवचनादित्युक्तम् ।

अथ नदीनां रजोदोषः । अत्रिः –

‘सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि कर्माणि तासु कुर्वीत मानवः ।।’ इदं च क्षुद्रनदीषु ।
‘सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ।।’ इति व्याघ्रोक्तेः ।

मात्स्ये त्वगस्त्योदयावधित्वमुक्तम्–

‘यावन्नोदेति भगवान् दक्षिणाशाविभूषणः ।
तावद्रजो महानद्यः करतोयाः प्रकीर्तिताः ।।’

करतोयाः अल्पतोयाः । तथा कात्यायनः–

‘याः शोषमुपगच्छन्ति ग्रीष्मे कुसरितो भुवि ।
तासु प्रावृषि न स्नायादपूर्णे दशवासरे ।।’ इदं चापदि ।

स्मृतिसङ्ग्रहे–

'धनुः सहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः ।।'

महानदीषु तु भविष्ये उक्तम्–

'आदौ तु कर्कटे देवि महानद्यो रजस्वलाः ।
त्रिदिनं च चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा ।।'

महानद्यश्च ब्राह्मे–

'गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ।।'

भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च विहस्ता च विन्ध्यस्योत्तरतः स्थिताः ।।
द्वादशैता महानद्यो देवर्षिक्षेत्रसम्भवाः ।'

मदनरत्ने पुराणान्तरे–

'महानद्यो देविका च कावेरी वंजरा तथा ।
रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप ।।'

कात्यायनः– 'कर्कटादौ रजो दुष्टा गोमती वासरत्रयम् ।
चन्द्रभागा सती सिन्धुः सरयूर्नर्मदा तथा ।।'

इदं गङ्गाद्यतिरिक्तविषयम् ।

'गङ्गा च यमुना चैव प्लक्षजा च सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः ।।
शोणसिन्धुहिरण्याख्याः कोकलोहितघर्घराः ।
शतद्रूश्च नदाः सप्त पावनाः परिकीर्तिताः ।।' इति देवलोक्तेः ।
'प्रथमं कर्कटे देवि त्र्यहं गङ्गा रजस्वला ।'

इत्यादिवचनं तु जाह्नवीभिन्नगोदावर्यादिगङ्गान्तरपरमिति मदनरत्ने । अन्ये त्वन्तर्गतरजोविषयम्–

‘गङ्गा धर्मद्रवा पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामला ।।’

इति निगमोक्तेः । तीरवासिनां तु रजोदोषो नास्ति । ‘न तु तत्तीरवासिनाम्’ इति निगमोक्तेः ।

रजोदुष्टमपि जलं गङ्गाजलयोगे पावनम्–

‘गङ्गाम्भसा समायोगाद्दुष्टमप्यम्बु पावनम् ।’ इति मात्स्योक्तेः । नूतनकूपादौ तु योगियाज्ञवल्क्यः–

‘अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं चैव दशरात्रेण शुद्ध्यति ।।’

क्वचित्त्वदोषमाह व्याघ्रपादः–

‘अभावे कूपवापीनामनपायिपयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति ।।’

वसिष्ठोऽपि– ‘उपाकर्मणि चोत्सर्गे व्रतस्नाने तथैव च ।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ।।’ इत्यलं विस्तरेण ।

श्रावणशुक्लतृतीया मधुश्रवाख्या गुर्जरेषु प्रसिद्धा । सा परयुता ग्राह्येति दिवोदासः । श्रावणशुक्लचतुर्थी पूर्वयुता । ‘मातृविद्धो गणेश्वरः’ इति वचनात् ।

श्रावणशुक्लपंचमी नागपूजादौ परैवेति सामान्यनिर्णय उक्तः । चमत्कारचिन्तामणौ–

‘पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ।।’ इति ।
‘श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ।।’ इति मदनरत्नेऽभिधानाच्च । तेन परैवेति । अत्र विशेषो भविष्ये–

‘श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप ।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ।।

पूजयेद्विधिवद्वीर दधिदूर्वाङ्कुरैः फलैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ।।
ये तस्यां पूजयन्तीह नागान् भक्तिपुरःसराः ।
न तेषां सर्पतो वीर भयं भवति कुत्रचित् ।।' इति ।

श्रावणशुक्लद्वादश्यां दधिव्रतमुक्तम् । अत्रैव विष्णोः पवित्रारोपणमुक्तम् । विष्णुरहस्ये–

'श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ।।
द्वादश्यां श्रावणे वापि पञ्चम्यामथवा द्विजाः ।
अनुकूलेषु कर्तव्यं पञ्चदश्यामथापि वा ।।' इति ।

शिवे तु तत्रैव कालोत्तरे–

'आषाढान्ते चतुर्दश्यां नभस्यनभसोस्तथा ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम् ।।' इति ।

अन्यदेवतानां तु वक्ष्यते । अधिवासनं दीपिकायाम्–

'गोदोहान्तरिते काले पूर्वेद्युर्वाधिवासनम् ।।' इति ।

गौणकालो रामार्चनचन्द्रिकायाम्–

'पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि ।
कार्तिक्यवधि शुक्रास्ते कर्तव्यमिति नारदः ।।
हैमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ।
कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः ।।
कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ।
तत्रोत्तमपवित्रं तु षष्ठ्या सह शतैस्त्रिभिः ।।
सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं ततसमाचरेत् ।।
साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ।
उत्तमं तु शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् ।।

कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद्ग्रन्थिशोभनम् ।
षट्त्रिंशच्च चतुस्त्रिंशद्द्वादशेति च केचन ।।
चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः ।'

हेमाद्रौ विष्णुरहस्ये त्वन्यथोक्तम्–

'अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशदेव वा ।
शप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसम् ।।
अधमं नाभिमात्रं स्यादुरुमात्रं द्वितीयकम् ।
प्रलम्बतो जानुमात्रं प्रतिमायां निगद्यते ।।'

शिवपवित्रं तु तत्रैव शैवागमे–

'एकाशीत्यथवा सूत्रैस्त्रिशता वाष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरालकम् ।।
द्वादशाङ्गुलमानानि व्यासादष्टाङ्गुलानि वा ।
लिङ्गविस्तारमानानि चतुरङ्गुलिकानि वा ।।' इति ।

अधिकारिणोऽपि तत्रैव विष्णुरहस्ये–

'ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्रीशूद्र एव वा ।
स्वधर्मावस्थिताः सर्वे भक्त्या कुर्युः पवित्रकम् ।।
अतो देवेति मंत्रेण द्विजो विष्णौ निवेदयेत् ।
शूद्रस्य मूलमन्त्रेण येन वा पूजयेद्धरिम् ।।'

एतच्च नित्यम् ।

'न करोति विधानेन पवित्रारोपणं तु यः ।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम ।।
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरेः ।।' इति तत्रैवोक्तेः ।

देवताविषये तिथयोऽपि तत्रैव

'धनदश्च रमा गौरी गणेशः सोमराड् गुहः ।।
भास्करश्चण्डिकाऽम्बा च वासुकिश्च तथर्षयः ।।

चक्रपाणिर्ह्यनङ्गश्च शिवो ब्रह्मा तथैव च ।
प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः ।।
यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणे च वै ।'

तथा हेमाद्रौ कालोत्तरे–

'चतुर्दश्यामथाष्टम्यां सर्वसाधारणं तु तत् ।' इति ।

तत्प्रकारस्तु रामार्चनचन्द्रिकायाम् –

'ततस्तानि पवित्राणि वैणवे पटले शुभे ।
संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ।।
अरत्निसंमितां वेणीं कुर्यात् षट्त्रिंशता कुशैः ।
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।।
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम् ।
न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि ।।
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
उपवासेन देव त्वां तोषयामि जगत्पते ।।
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ।।
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते ।'

इति देवं संप्रार्थ्य कुम्भं संस्थाप्य तत्र वंशपात्रे–

ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भो ।
विष्णुलोकात्पवित्राद्य आगच्छेह नमोऽस्तु ते ।।

अनेन मूलेन चावाह्योत्तममध्यमकनिष्ठेषु विष्णुब्रह्मरुद्रान्, सत्त्वरजस्तमांसि, वेदत्रयं, वनमालायां प्रकृतिं चावाह्य त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान्, ग्रन्थिषु क्रियां, पौरुषीं, वीरां, विजयां, ईशाम्, अपराजिताम्, मनोन्मनीं, जयां, भद्रां, मुक्तिं चावाह्य संपूज्य–

ॐ संवत्सरकृतार्चायाः संपूर्णफलदोऽपि यत् ।
पवित्रारोपणायैतत् कुरु कन्धर ते नमः ।।

विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ।। इति देवकरे मङ्गलसूत्रं बध्वा देवं संपूज्य निमन्त्रयेत्–

आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ।।
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ कुरु ते नमः ।।
निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ।।

ततः पुष्पाञ्जलिं दत्त्वा रात्रौ जागरणं कुर्यादित्यधिवासनम् । प्रातर्नित्यपूजां कृत्वा गन्धदूर्वाक्षतयुतं पवित्रमादाय–

ॐ देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ।।
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादात्सुरेश्वर ।।

मूलसंपुटितेनानेन दत्त्वाङ्गदेवताभ्यो नाम्ना समर्प्य महानैवेद्यं दत्त्वा नीराज्य 'मणिविद्रुममालाभि' रित्यादिभिर्दमनारोपणोक्तमन्त्रैः प्रार्थयित्वा गुरवे ब्राह्मणेभ्यश्च दत्त्वा स्वयं धारयेत् । तथा–

'मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।
देवे तं सूत्रसन्दर्भं देशकालविवक्षया ।।'

हेमाद्रौ तु–

'मूलमन्त्रेण जुहुयाद्वह्नौ सघृतपायसम् ।
पवित्रे ध्रियमाणे वै न त्याज्यं देवतान्तिकम् ।।
विसर्जयीत मन्त्रेण अनेनैव पवित्रकम् ।
सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मम ।।
व्रजेदानीं पवित्र त्वं विष्णुलोके विसर्जितः ।
उत्तार्य ब्राह्मणे दद्यात्तोये वापि विसर्जयेत् ।।' इत्युक्तम् ।

अकरणे तु तत्रैव–

'पवित्रारोपणं काले न करोति कथञ्चन ।
तदाऽयुतं जपेन्मत्रं शतं वापि समाहितः ।।' इत्युक्तम् । इति पवित्रारोपणम् ।

अथोपाकर्म ।।

तत्र बह्वृचानां प्रयोगपारिजाते शौनकः–

'अथातः श्रावणे मासे श्रवणर्क्षयुते दिने ।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते ।।
दिवसे विदधीतैतदुपाकर्म यथोदितम् ।
अध्यायोपाकृतिं कुर्यात्तत्रौपासनवह्निना ।।' इति । अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः । अत्र हस्तयुता पञ्चम्युक्ता ।

कारिकापि–

'तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते' इति ।

केवलपञ्चम्यां हस्तयुतेऽन्यस्मिन्दिने इति तु हेमाद्रिः । उपासनं वह्निनेति तु– 'कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते' इति ।। कारिकोक्तलौकिकाग्निना विकल्पते । तत्र 'अप्यध्याप्यैरन्वारब्ध' इति सूत्रात् सशिष्यत्वे तदधिकारिकस्याचार्याग्नौ 'नान्यस्याग्नावन्यो जुहुया' दिति निषेधाल्लौकिक एव । तदभावे तु स्मार्त इति निष्कर्षः । यद्यपि दीपिकायां 'वेदोपाकृतिरोषधिप्रजनने पक्षे सिते श्रावणे' इति शुक्लपक्षोऽपि सर्वेषां मुख्यकालत्वेनोक्तः । वक्ष्यमाणगार्ग्यवचनेन छन्दोगान् प्रति विहितस्य तस्याविरोधिनः सर्वान् प्रति प्रवृत्तिश्च । तथापि श्रावणमाससम्बन्धस्यसूत्रोक्तत्वात्कृष्णपक्षेऽपि कार्यमिति वृद्धाः । तथा च सूत्रम्– 'अथातोध्यायोपाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेन वा' अत्र श्रवणो मुख्योऽन्ये गौणाः । तस्याहर्द्वययोगे हेमाद्रौ व्यासः–

'धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत् ।
तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितम् ।।

श्रवणेन तु यत्कर्म ह्युत्तराषाढसंयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ।।' इति ।

गार्ग्योऽपि– 'उदयव्यापिनीत्वे च विष्णवर्क्षे घटिकाद्वयम् ।
तत्कर्म सफलं ज्ञेयं तस्य पुण्यं त्वनन्तकम् ।।' इति ।

पूर्वेद्युरुत्तराषाढयोगे पूर्वेद्युः श्रवणाभावे घटिकाद्वयन्यूने वा पञ्चम्यादौ कार्यम् । श्रवणयुतदिने संक्रान्त्यादौ च–

'उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः ।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु ।।' इति ।

हेमाद्रौ निषेधात्पंचम्यादयो ग्राह्याः । मदनरत्नेऽपि–

'यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणे शुक्लपञ्चम्यां श्रावणस्य तु ।।'

स्मृतिमहार्णवे– 'सङ्क्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यत ।।' इति ।

तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ–

'अर्द्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं यदा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ।।' इति ।

मदनरत्ने गार्ग्योऽपि–

'यद्यर्द्धरात्रादर्वाक्तु ग्रहः संक्रम एव वा ।
नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा ।।'

माधवीयेऽप्येवम् । यत्तु–

'प्रतिपन्मिश्रितेनैव नोत्तराषाढसंयुते ।
श्रवणे श्रावणं कुर्युर्ग्रहसंक्रान्तिवर्जिते ।।'

इति प्रतिपन्मिश्रनिषेधकं वचनं तन्निर्मूलम् । अत्र च–

'वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।
उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके ।।' इति वचनं देशान्तरविषयम् ।

'नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ।।'

इति वृद्धबृहस्पतिवचनादिति प्रयोगपारिजातेनोक्तम् । पराशरमाधवीयेऽप्येवम् । सामगानां सिंहस्थरवावुक्तेस्तद्विषयकमिदं पुरोडाशचतुर्धाकरणवदुपसंह्रियते । तेषामेव देशव्यवस्था न तु बह्वृचादिपरम् । तेषां सूत्रे चान्द्रश्रावणोक्तेः । सौरे पञ्चम्ययोगात् । इति वयं पश्यामः । यत्तु कालादर्शे–

'अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्को भवेद्यदि ।।
सहस्तशुक्लपञ्चम्यां वा तद्ग्रहणसंक्रमे ।
असिंहार्के प्रौष्ठपद्यां श्रावणेन व्यवस्थया ।।' इति ।

तन्मूलालेखनाच्चिन्त्यम् ।

श्रावणे सस्यानुद्गमादौ तु बह्वृचपरिशिष्टे–

'अवृष्ट्यौषधयस्तस्मिन्मासे तु न भवन्ति चेत् ।
तदा भाद्रपदे मासि श्रावणे न तदिष्यते ।।' इति ।

तत्राप्यनुद्गमे तु– 'कुर्यादेव तद्वार्षिकमित्याचक्षते ।' इति सूत्रात् । वर्षर्तौ भवं वार्षिकम् । एतच्च शुक्रास्तादावपि कार्यम् ।

'उपाकर्मोत्सर्जनं च पवित्रं दमनार्पणम्' इति दमनारोपे लिखितवचनात् ।

'नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ।।'

इति प्रयोगपारिजातसङ्ग्रहोक्तेः । पर्वणि ग्रहणे सति पूर्वं त्रिरात्रादिवेधाभावं वक्तुमिदम् । तेन पर्वणि ग्रहणेऽपि चतुर्दश्यां श्रवणे कार्यमिति हेमाद्रिः । प्रथमारम्भस्तु न भवति –

'गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा ।
तथाधिमाससंसर्पमलमासादिषु द्विज ।।

प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ।।' इति तत्रैव कश्यपोक्तेः । एतच्चाधिमासे न कार्यम् ।

'उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम् ।।' इति पराशरोक्तेः ।
'उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ।।' इति कात्यायनोक्तेश्च । 'उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादितः ।' इति ऋष्यशृङ्गवचनं तत्सामगविषयम् । तेषां सिंहार्के एवोक्तेः ।

एतच्चापराह्णे कार्यम्–

'उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव तु ।' इति ।
'अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके ।
पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ।।' इति च हेमाद्रौ गोभिलोक्तेः । वस्तुतस्तु– "भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु" इति प्रचेतसो वचनात्पूर्ववाक्यं सामगविषयम् । तेषामपराह्णे एवोक्तेरित्यनुपदं वक्ष्यते । दीपिकापि– 'अस्य तु विधेः पूर्वाह्णकाल एव स्मृतः ।' इति । याजुषास्तु पर्वणि कुर्युः । तच्चापस्तम्बैरौदयिकं ग्राह्यम् । अन्यैस्तु पूर्वम्–

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।
बह्वृचाः श्रावणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ।।' इति गार्ग्योक्तेः ।
'संप्राप्तवान् श्रुतीर्ब्रह्मा पर्वण्यौदयिके पुनः ।
अतो भूतदिने तस्मिन्नोपाकरणमिष्यते ।।' इति कालिकापुराणाच्च । अत्र शिङ्गाभट्टीये विशेष उक्तः –

'श्रवणः श्रावणं पर्व सङ्गवस्पृग्यदा भवेत् ।
तदैवौदयिकं कार्यं नान्यदौदयिकं भवेत् ।।'

पराशरमाधवीयेऽपि गार्ग्यः –

'श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि ।

तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत् ।' इति ।
कर्मकालमाह कालादर्शे निगमः –

'श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ।।'

अत्र पौर्णमासीति श्रवणहस्तयोरुपलक्षणम् । तेन तावपि संगवस्पृशौ ।

'उदये संगवस्पर्शे श्रुतौ पर्वणि चार्कभे ।
कुर्युर्नभस्युपाकर्म ऋग्यजुः सामगाः क्रमात् ।।' इति पृथ्वीचन्द्रः । तत्त्वं तु एतच्छुद्धाधिकपरम् । कात्यायनादीनां तु दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा । पूर्वैवेति हेमाद्रिः । यदपि–

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ।।' इति ब्रह्मवैर्तम् । तद्ब्रह्मपवित्रश्रवणाकर्मादिदैवकर्मविषयमिति हेमाद्रिः । अत एव वचनात्कुलधर्मव्रतादावपि पूर्वैव । मदनरत्नेऽप्येवम् । मदनपारिजाते–

'पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्म' इत्युक्तम् ।
मदनरत्ने तु–

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।' इति बह्वृचपरिशिष्टाद्बह्वृचान्प्रति कर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदं अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात् प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थम् । अवयुत्यानुवादो वा, न तु विधायकम् । येन विशेषविधिना उपसंहारः स्यात् । अनुवादत्वात् लक्षणा न दोषः । अन्यथा त्वौदयिकपर्वविशिष्टोपाकर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टे वा औदयिकपर्वविधौ वाक्यभेदापत्तेः । तस्मात्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तम् । तन्न । न तावत्परिशिष्टबह्वृचान् प्रत्येव विधिः । 'धनिष्ठा प्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।' इत्यादि तदुदाहृते एव परि-

शिष्टे वेदान्तरधर्मविधीनां दर्शनात् । नाप्यानुवादोऽयं कालिकापुराणाद्बह्वृचादीनामपि तदापत्तेः । कुर्युरित्यस्य विधित्वेन तस्यैवार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च । न च तैत्तिरीयकाणां गृह्ये तद्विधिरस्ति । येनानुवादः स्यात् । तैत्तिरीयकमात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन हविरार्तिवत् । ‘अष्टवर्षंब्राह्मणमुपनयीत ।’ इति वच्चागत्या विशिष्टस्योद्देश्यत्वात् । अन्यथोत्तरार्द्धे बह्वृचपदस्याप्यविवक्षापत्या श्रवणस्य सर्वसाधारण्यापत्तेः । तस्माद्धेमाद्रिमतमेव युक्तमिति दिक् । इदं च ‘शिष्यानध्यापयत आवसथ्येग्नौ । अनध्यापयतो नाधिकार’ इति कर्कः । श्रावण्यामपि ग्रहणादिदुष्टायां कातीयभिन्नैः प्रौष्ठपद्यां कार्यम् । तैस्तु श्रावणपञ्चम्याम् –

‘संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः ॥’ इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः । यत्तु बौधायनः–
‘श्रावण्यां पौर्णमास्यामाषाढ्यां चोपाकृत्य’ इत्यूचे तत्प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं तच्छाखीयविषयम् । सामगास्तु श्रावणे हस्ते कुर्युः ।

‘बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः ।’ इति निर्णयामृते गोभिलोक्तेः । सोऽप्युत्तरः ।

‘धनिष्ठा प्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥’ इति परिशिष्टोक्तेः ।
‘सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्ले ऽविवरे बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥’
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्लिकम् ।’ इति । पुष्यर्क्षे पूर्वाह्ले उत्सर्गः । अपराह्लिकमुपाकर्मेत्यन्वयः ।

प्रयोगपारिजाते गोभिलः –

‘उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते ।

धारणाध्ययनाङ्गत्वाद् गृहीणां ब्रह्मचारिणाम् ॥
उत्सर्जनं च वेदानामुपाकरणकर्म च ।
अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥'

अत्रैव प्रसङ्गादुत्सर्जनमुच्यते । तच्च पौषमासे रोहिण्यां कृष्णाष्टम्यां वा कार्यम् ।

'पौषमासस्य रोहिण्यामष्टकायामथापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥' इति याज्ञवल्क्योक्तेः । श्रावण्यां प्रौष्ठपद्यां चोपाकृतौ क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि च कार्यम् । 'अर्धपञ्चमान्मासानधीत्योर्ध्वमुत्सृजेत् । पञ्चार्धषष्ठान्वा' इति तदाषाढ्युपाकर्मविषयम् । बौधायनास्तु पौष्यां माघ्यां वा कुर्युः । 'पौष्यां माघ्यां चोत्सृजे' दिति तत्सूत्रात् । तैत्तिरीयैस्तु तैष्यां कार्यम् । 'तैष्यां पौर्णमास्यां रोहिण्यां वा विरमे' दिति तत्सूत्रात् । बह्वृचैस्तु माघ्यां कार्यम् ।

'अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ।' इति कारिकोक्तेः । कातीयास्तु भाद्रपदे कुर्युः ।

'उत्सर्गश्चेत्तदा तिष्ये तैष्यां प्रौष्ठपदेऽपि वा ।' इति कात्यायनोक्तेः । सामगास्तु सिंहार्के पुष्ये कुर्युः । तथा च 'सिंहे रवौ' त्विति गार्ग्यवचनं पूर्वमुक्तम् । सर्वैरुपाकर्मदिने वा कार्यम् ।

'पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवा ॥'

इति हेमाद्रौ खादिरगृह्योक्तेः । यदा सिंहस्थे सूर्ये सति तन्मध्यस्थहस्तनक्षत्रात् प्राक् पुष्यः कर्कस्थो भवति तदा तस्मिन्पुष्ये उत्सर्गं कृत्वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः ।

'मासे प्रौष्ठपदे हस्तात् पुष्यः पूर्वो भवेद्यदा ।
तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विजः ॥' इति तत्रैव परिशिष्टोक्तेः । अत्र द्वावपि मासौ सौरौ ज्ञेयौ । तेषां सौरस्यैवोक्तेः ।

अत्र विशेषमाह कार्ष्णाजिनिः–

‘उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च ।
ऋषीन् दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः ।।’ इति ।

अत्र नदीनां रजोदोषो नास्ति ।

‘उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते ।’ इति गार्ग्योक्तेः ।

अत्रैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये तत्प्रागुक्तम् । इदं प्रतिपद्युतायां न कार्यम् ।

‘नन्दाया दर्शने रक्षा बलिदानं दशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते ।।’ इति मदनरत्ने ब्रह्मवैवर्तात् ।

‘शान्तिदः सर्वविघ्नानां रक्षाबन्धविधिः स्मृतः ।’ इति भविष्यवचनात् । इदं भद्रायां न कार्यम्–

‘भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनि ।।’ इति संग्रहोक्तेः ।
तत्सत्त्वे तु रात्रावपि तदन्ते कुर्यादिति निर्णयामृते ।

मन्त्रस्तु–

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामपि बध्नामि रक्षे मा चल मा चल ।।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः ।
कर्तव्यो रक्षिताचारो द्विजान् संपूज्य शक्तितः ।। इति ।

अत्रैव हयग्रीवोत्पत्तिः । तदुक्तं कल्पतरौ–

‘श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः ।
जगाद सामवेदं तु सर्वकल्मषनाशनम् ।।
स्नात्वा संपूजयेत्तं तु शङ्खचक्रगदाधरम् ।’

अत्राश्वलायनेन श्रवणाकर्मोक्तम्– 'श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति'। तत्रास्तमययोगिनी ग्राह्या। 'अस्तमिते स्थालीपाकं श्रपयित्वेति' सूत्रात्। श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयासु अशून्यशयनव्रतम्। तत्र चन्द्रोदयव्यापिनी दिनद्वये सत्त्वे परेति निर्णयामृते। इति श्रावणमासः ॥

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतः श्रावणनिर्णयः ॥

अथ भाद्रपदमासः ॥

सिंहे पराः षोडशघटिकाः पुण्यकालः। अन्यत्पूर्ववत्। अत्र गोप्रसवे अद्भुतसागरे नारदः–

'भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन संपद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः ।
व्याहृतिभिश्चायं होमः ।
सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥' इति ।

तथा– 'सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ॥
तदानिष्टं भवेत्किञ्चित्तच्छान्त्यै शान्तिकं चरेत् ।
अस्य वामेति सूक्तेन तद्विष्णोरिति मन्त्रतः ।
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ॥
श्रीसूक्तेन ततः स्नायाच्छान्तिसूक्तेन वा पुनः ।
मध्यरात्रे निशीथे वा यदा गौः क्रन्दते सदा ॥

ग्रामे वा स्वगृहे वापि शान्तिकं पूर्ववद्दिशेत् ।'

एवं श्रावणे वडवा प्रसवो निषिद्धः ।

तदुक्तमथर्ववेदिनां गार्ग्यपरिशिष्टे—

'माघे बुधे च महिषी श्रावणे वडवा दिवा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ।।' इति । अत्र तदुक्ता ऽमृताख्या शान्तिः कार्या ।

भाद्रकृष्णतृतीया कज्जलीसंज्ञा। सा परा ग्राह्येति दिवोदासीये उक्तम्। भाद्रकृष्णचतुर्थी बहुलाऽऽख्या मध्यदेशे प्रसिद्धा । सा सायाह्नव्यापिनी ग्राह्या । दिनद्वये सत्त्वे पूर्वा ग्राह्या ।

'गौर्याश्चतुर्थी वटधेनुपूजा दुर्गार्च्चनं दुर्भरहोलिके च ।
वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नन्ति नृपं सराष्ट्रम्।।'

इति दिवोदासीये वचनात् । अत्र वत्सपूजायाः पृथगुपादानाद्धेनुपूजा-शब्देन बहुलाख्या गृह्यत इति स एव व्याचख्यौ। मदनरत्नेऽप्येवम्। अत्र गोपूजा यवान्नाशनं च तत्रैवोक्तम् । भाद्रकृष्णषष्ठी हलषष्ठी । सा सप्तमीयुतेति दिवोदासः । भाद्रकृष्णसप्तम्यां शीतलाव्रतं तत्र पूर्वा ग्राह्येति हेमाद्रौ ।

अथ जन्माष्टमी ।

सा च कृष्णादिमासेन भाद्रपदकृष्णाष्टमी ।

'तथा भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ।।' इति कल्पतरौ ब्राह्मोक्तेः । अत्रेदं माधवमतम् । अष्टमी द्वेधा जन्माष्टमी जयन्ती चेति । तत्राद्या केवलाष्टमी ।

'ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञ व्याघ्रा व्यालाश्च कानने ।।' इति स्कान्दात् ।

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ।।' इति पुराणान्तरात् ।

‘श्रावणे बहुलेपक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु भवति क्रूरराक्षसः ।।’ इति भविष्योक्तेश्च केवलाष्टम्या एवोपोष्यत्वावगतेः । सैव रोहिणीयुक्ता जयन्ती ।

‘कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ।
जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ।।’ इति वह्निपुराणात् ।

‘अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता ।
भवेत्प्रौष्ठपदे मासि जयन्ती नाम सा स्मृता ।।’ इति विष्णुरहस्यादिवचनाच्च । ज्योतिरादिवत्संज्ञया कर्मभेदः रोहिणीयोगश्चाहोरात्रं मुख्यः । निशीथमात्रे मध्यमः । दिवसादावधमः ।

‘अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि ।
मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ।।’ इति वसिष्ठसंहितोक्तेः ।

‘अर्धरात्रे तु योगोऽयं तारापत्युदये सति ।
नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत् ।।’ इति विष्णुधर्मोक्तेः ।

‘वासरे वा निशायां वा यत्र स्वल्पापि रोहिणी ।
विशेषेण नभो मासे सैवोपोष्या मनीषिभिः ।।’ इति पुराणान्तराच्च । तत्र जन्माष्टमीव्रतं नित्यम् । पूर्वोक्तवचनेषु अकरणे निन्दाश्रुतेः ।

‘वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाप्राज्ञ व्याली भवति कानने ।।’ इति स्कान्दे वीप्साश्रुतेश्च । मदनरत्ने स्कान्दे त्वत्र फलमप्युक्तम्–

‘जन्माष्टमीव्रतं ये वै प्रकुर्वन्ति नरोत्तमाः ।
कारयन्त्यथवा लोकान् लक्ष्मीस्तेषां सदा स्थिरा ।।
सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमी व्रते ।’ इति ।

जयन्तीव्रतं तु नित्यं काम्यं च–

‘महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽनघ ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुङ्गव ।।

ददाति वाञ्छितानर्थान् ये चान्येऽप्यतिदुर्लभाः।' इति स्कान्दादौ फलश्रुतेः ।

'शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभते कुन्ति जयन्तीविमुखो नरः ।।
न करोति यदा विष्णोर्जयन्तीसंभवं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ।।' इत्यकरणे निन्दाश्रुतेश्च । यदा च पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयन्त्यामन्तर्भूता ज्ञेया । न तु जन्माष्टमीव्रतं पृथक्कार्यम् । तदुक्तं माधवेनैव–

'यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः ।।' इति ।

हेमाद्रिस्तु– 'रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्ध्वं कलया वा यदा भवेत् ।।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ।'

इत्यग्निपुराणादर्धरात्र एव रोहिणीयोगस्य प्राशस्त्यात् । 'मुहूर्तमपि लभ्येत' इत्यादीना चार्धरात्रयोगेऽप्युपपत्तेर्न जयन्तीव्रतं भिन्नम् । तत्त्वं तु हेमाद्रिमतेऽपि जयन्तीव्रतं भिन्नमेव। 'उदये चाष्टमी' इत्यस्य जयन्तीपरत्वेनोक्तेः। किञ्च–

'रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत्।
तस्यामभ्यर्चनं सौरेर्हन्ति पापं त्रिजन्मजम् ।।' इति विष्णुधर्मोक्तेः।
'समयोगे तु रोहिण्यां निशीथे राजसत्तम ।
समजायत गोविन्दो बालरूपी चतुर्भुजः ।।

तस्मात्तं पूजयेत्तत्र यथावित्तानुसारतः ।' इति वह्निपुराणाच्चार्धरात्रस्य कर्मकालत्वमवसीयते । अतः 'कर्मणो यस्य यः कालः' इत्यादिवचनात् पूर्वत्रैव प्राप्तेः परदिने सतोऽपि रोहिणीयोगस्य न

प्रयोजकत्वम् । अन्यथा बुधवारादेरपि तत्त्वापत्तेः । किंच जयन्तीशब्दो रात्रिविशेषवचनः ।

'अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी ।
मुहूर्तो विजयोनाम यत्र जातो जनार्दनः ।।' इति ब्रह्माण्डपुराणात् । तेन तद्योगिरोहिण्यां गौणत्वान्न व्रतभेदः । यत्तु–

'वासरे वा निशायां वा' इति तत्कैमुतिकन्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिनेऽर्धरात्र योगाभावे वा प्राशस्त्यार्थम् । यद्यपि–

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ।।'

इत्यनेन रोहिणीयोगाभावेऽर्धरात्रव्याप्तेर्ग्राह्यतोक्ता । तथापि यस्मिन्वर्षे जयन्तीयोगो नास्ति तत्र जयन्तीव्रतलोपे प्राप्तेऽष्टमीमात्रेऽपि जयन्तीव्रतं कार्यमित्येवंपरमिदमिति तदाशयः । अत एवोक्तं 'जयन्ती नाम शर्वरीति' । यच्च स्कान्दे–

'उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवते बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।।
अपि वर्षशतेनापि लभ्यते वाथवा न वा ।' इति । यच्च पाद्मे–

'प्रेतयोनिगतानां तु प्रेतत्वं नाशितं बुधैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ।।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ।।'

इति तद्दानादिविषयम् । अत्र निशीथवेध एव ग्राह्यः । पूर्वोक्तवचनेषु तस्यैव मुख्यकालत्वोक्तेः ।

'अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधो यदि ।
दृश्यते घटिका या सा पूर्वविद्धा प्रकीर्तिता ।।' इति माधवीये पुराणान्तरात् ।

'अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ।।' इति भविष्योक्तेः ।
'अष्टमी रोहिणीयुक्ता निश्यर्धे दृश्यते यदि ।
मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम् ।।' इति वसिष्ठसंहितोक्तेश्च । तत्राष्टमी द्विधा रोहिणीरहिता तद्युता च । आद्यापि चतुर्धा पुर्वेद्युरेव निशीथयोगिनी, परेद्युरेवोभयेद्युरनुभयेद्युश्चेति । तत्राद्ययोरसन्देह एव कर्मकालव्याप्तेः ।

'जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ।।' इति भृगूक्तेश्च । अस्मात्केवलरोहिण्युपवासोऽपि सिद्धः । अन्त्ययोः परैव । प्रातः संकल्पकालव्याप्तेराधिक्यात् ।

'वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी' इति ब्रह्मवैवर्ताच्च । एवमंशतः समव्याप्तावपि । विषमव्याप्तौ त्वाधिक्येन निर्णयः । रोहिणीयुतापि चतुर्धा । पूर्वेद्युरेव निशीथे रोहिणीयुता परेद्युरेव उभयेद्युरनुभयेद्युश्च । अत्राप्याद्ययोरसन्देहः ।

'कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी ।।' इति पाद्मोक्तेः ।
'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।।' इति गारुडात् ।
'सप्तमीसहिताष्टम्यां निशीथे रोहिणी यदि ।
भविता साष्टमी पुण्या यावच्चन्द्रदिवाकरौ ।।' इति वह्निपुराणाच्च । द्वितीयेऽप्यसन्देह एव । तृतीयपक्षे परैव ।

'वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी ।
सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी ।।'

इति ब्रह्मवैवर्तात् । चतुर्थ्यपि त्रेधा । पूर्वेद्युर्निशीथेऽष्टमी परेऽह्नि रोहिणी परेऽऽह्न्यष्टमी पूर्वेऽह्नि रोहिणी उभयेद्युरुभयस्य निशीथाऽसंबन्धो वेति । आद्ये परेद्युर्जयन्तीयोगस्य सत्त्वात्परैवेति माधवः । तदुक्तं तेनैव—

'यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः ।।' इति ।
'पूर्वविद्धाष्टमी या तु उदये नवमीदिने ।
मुहूर्तमपि संयुक्ता संपूर्णा साष्टमी भवेत् ।।
कला काष्ठा मुहूर्तापि यदा कृष्णाष्टमी तिथिः ।
नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता न हि ।।' इति पाद्मोक्तेश्च । तत्त्वं तु अष्टम्याः कर्मकालव्याप्तेः ।

"दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ।
रात्रियुक्तां प्रकुर्वीत" इति पूर्वोक्तवाक्यैः रोहिणीयोगाभावे ग्राह्यत्वोक्तेर्वचनात् कर्मकालव्यापिनीं त्यक्त्वा पूर्वा परा वाल्पापि रोहिणीयुता ग्राह्या । युक्तं तु– उपवासद्वयं कार्यं द्वयोर्नित्यत्वादिति तु तत्त्वम् । अन्त्ययोः परैव ।

'सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ।
प्राजापत्यं द्वितीयेऽह्नि मुहूर्तार्धं भवेद्यदि ।।
तदाष्टयामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरा ।' इति स्कान्दात् ।
'मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत् ।
किं पुनर्नवमीयुक्ता कुलकोट्यस्तु मुक्तिदा ।।' इति पाद्माच्चेति दिक् ।

पारणं तु–

'तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणम् ।
तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पारणम् ।।' इति ब्रह्मवैवर्तात् ।
'तिथ्यर्क्षयोर्यदा छेदो नक्षत्रान्तमथापि वा ।
अर्धरात्रेऽथवा कुर्यात् पारणं त्वपरेऽहनि ।।' इति हेमाद्रिवचनाच्चार्धरात्रेऽप्युभयान्तेऽन्यतरान्तेवेति मुख्यः पक्षः ।

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।' इति ब्रह्मवैवर्तं त्वन्यविषयम् । दिने मुख्यकाललाभेऽन्यतरान्ते वा ज्ञेयम् । गौडास्तु–

'न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशाम् ।।' इति ब्रह्माण्डपुराणाद्रात्रौ सार्धप्रहरमध्ये कार्यम् ।

'महानिशा तु विज्ञेया मध्यमं मध्ययामयोः ।'
तथा– 'मध्यमप्रहरे रात्रेर्विज्ञेया तु महानिशा ।' इति स्मृत्यन्तरात् । कल्पतरौ मदनरत्ने चैवम् । कामधेनौ गर्गस्तु–

'महानिशा तु विज्ञेया मध्यमप्रहरद्वयम् ।' इत्याह ।

वृद्धशातातपस्तु–

'महानिशा द्वे घटिके रात्रौ मध्यमयामयोः ।' इत्याह । वेदपाठपरमित्यन्ये । महानिशायामन्यतरान्ते तृतीयदिने पारणं कार्यम् । अपरेहनीति पारणोत्तरदिनपरत्वात् । जयन्त्यामुभयापेक्षणादित्याहुः । तत्त्वं तु महानिशातोऽर्वागन्यतरान्तलाभे महानिशानिषेधः । महानिशायामेव लाभे तत्रैव पारणमिति । अशक्तौ तु वह्निपुराणे–

'भान्ते कुर्यात्तिथेर्वापि शस्तं भारत पारणम्' इति ।

विष्णुधर्मे च–

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।।
तिथ्यन्ते चोत्सवान्ते वा व्रती कुर्वीत पारणम् ।' इति कालादर्शोक्तेश्चेति संक्षेपः । अष्टम्यां विशेषो हेमाद्रौ–

'ततोऽष्टम्यां तिलैः स्नातो नद्यादौ विमले जले ।
सुदेशे शोभनं कुर्याद्देवक्याः सूतिका गृहम् ।।
तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता ।
काञ्चनी राजती ताम्री पैत्तली मृन्मयी तथा ।।
वार्क्षी मणिमयी चैव वर्णकैर्लिखिताथवा ।
सर्वलक्षणसंपूर्णा पर्यङ्के च पटावृते ।।
देवकीं तत्र चैकस्मिन् प्रदेशे सूतिका गृहे ।
प्रस्नुतां च प्रसूतां च स्थापयेन्मञ्चकोपरि ।।

मां तत्र बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
यशोदां तत्र चैकस्मिन्प्रदेशे सूतिका गृहे ।।
तद्वच्च कल्पयेत् पार्थ ! प्रसूतवरकन्यकाम् ।
कश्यपो वसुदेवोऽयमदितिश्चैव देवकी ।।
शेषो वै बलभद्रोऽयं यशोदा क्षितिरन्वभूत् ।
नन्दः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः ।।

मन्त्रेणानेन कौन्तेय देवकीं पूजयेन्नरः ।
गायद्भिः किन्नराद्यैःसततपरिवृता वेणुवीणानिनादैः
शृङ्गाराऽदर्शकुम्भप्रवरकृतकरैः किङ्करैः सेव्यमाना ।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते
सा देवी देवमाता जयति सुतनया देवकी कान्तरूपा ।।

पादौ संवाहयन्ती श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रिये इति ।।

अर्धरात्रे वसोर्धारां पातयेद् गुडसर्पिषा ।
नाडीवर्धापनं षष्ठी नामादेः करणं मम ।।

ततो मन्त्रेण वै दद्यात्पाद्यमर्घ्यं समाहितः ।
शङ्खतोयं समादाय सपुष्पकुशचन्दनम् ।।
जानुभ्यां धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ।
क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ।।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ।
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ।।

नमस्ते रोहिणीकान्त अर्घ्यं नः प्रतिगृह्यताम् ।
प्रभाते ब्राह्मणान् शक्त्या भोजयेद्भक्तिमान्नरः ।।
ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् ।

इदं प्रतिमासं कृष्णाष्टम्यामुक्तम्। मदनरत्ने वह्निपुराणे–

'प्रतिमासं च ते पूजामष्टम्यां यः करिष्यति।
मम चैवाखिलान् कामान् समं प्राप्स्यत्यसंशयम्॥
अनेन विधिना यस्तु प्रतिमासं नरेश्वर।
करोति वत्सरं पूर्णं यावदागमनं हरेः॥
दद्याच्छय्या ससंपूर्णां भोगी रत्नैरलङ्कृताम्।'

इति जन्माष्टमीव्रतम्।

भाद्रामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन–

'मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः।
अयातयामा दर्भास्ते विनियोज्याः पुनः पुनः॥'

नभाः– श्रावणाः। तेन दर्शान्तमासे जन्माष्टम्यनन्तरं दर्शो लभ्यते। मदनरत्ने तु–

'मासे नभस्येऽमावास्या तस्यां दर्भोच्चयो मतः।' इति मरीचिवाक्यमुक्तम्। नभस्यो भाद्रपदः। तेन महालयान्तर्गतदर्शो लभ्यते। गौणमुख्यचान्द्राभ्यामेक एव दर्श इत्यन्ये।

भाद्रशुक्लतृतीया हरितालिका व्रतम्। तत्र परा ग्राह्या–

'मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्॥' इति माधवोक्तेः।
'आद्या मधुस्त्रावणिका कज्जली हरितालिका।
चतुर्थीमिश्रिता स्त्रीभिर्दिवानक्तं विधीयते॥
तृतीया नभसः शुक्ला मधुश्रावणिका स्मृता।
भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका॥'

इति दिवोदासोदाहृतवचनाच्च।

भाद्रशुक्लचतुर्थी सिद्धिविनायकव्रतम्। तत्र मध्याह्नव्यापिनी ग्राह्या।

'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप।' इति हेमाद्रौ

भविष्ये तत्रैव पूजोक्तेः । मदनरत्नेऽप्येवम् । परदिन एवांशेन साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षेषु पूर्वा ग्राह्या ।

तथा च बृहस्पतिः—

'चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ।।' इति ।
'मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ।।' इति माधवीये

स्मृत्यन्तराच्च । इयं रविभौमयोरतिप्रशस्ता ।

'भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता ।
महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ।।' इति वाराहोक्तेः ।

अत्र चन्द्रदर्शननिषिद्धम् । तथा चापरार्के मार्कण्डेयः—

'सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ।।' इति । चतुर्थ्यां न

पश्येदित्यन्वयः प्रधानक्रियालाभात् । तेन चतुर्थ्यामुदितस्य पञ्चम्यां न निषेधः । पराशरोऽपि—

'कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा ।।'

तद्दोषशान्तये 'सिंहः प्रसेनमिति वै पठेदिति' । श्लोकस्तु विष्णुपुराणे—

'सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।
सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः ।।' इति

भाद्रशुक्लपञ्चमी ऋषिपञ्चमी । समत्वे हेमाद्रिमते परा । 'सिता परयुता स्यात्पञ्चमीति' दीपिकोक्तेः । माधवमते तु पूर्वा । 'सर्वत्र पञ्चमी पूर्वा' इत्युक्तेः ।

'पञ्चमी च प्रकर्तव्या षष्ठ्या युक्तात्र नारद ।
न हि षष्ठी नागविद्धा कर्तव्या सर्वदा बुधैः ।।' इति पञ्चम्याः

समन्वितत्ववचनं ऋषिपञ्चमीव्रतपरम् । ऋषिपञ्चमी षष्ठीयुतैवेति

दिवोदासः । युग्मवाक्यान्निर्णयस्तु युक्तः । अत्र ऋषीन् प्रतिमासु पूजयित्वा अकृष्टभूमिजशाकेन वर्तनम् । एवं सप्तवर्षाणि कृत्वा सप्तकुम्भेषु प्रतिमासु संपूज्य परेऽह्नि तन्मन्त्रेणाष्टोत्तरशतं तिलान् हुत्वा सप्त ब्राह्मणान्भोजयेदिति निर्णयामृते ।

भाद्रशुक्लषष्ठी सूर्यषष्ठी । सा सप्तमीयुतेति दिवोदासः–

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधफलाधिकम् ।।' इति वचनात् ।

कल्पतरौ भविष्ये–

'येयं भाद्रपदे मासि षष्ठी स्याद् भरतर्षभ ।
योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ।।
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।'

गाङ्गेयः– स्वामिकार्तिकेयः । भाद्रशुक्लाष्टमी दूर्वाष्टमी । सा पूर्वा ग्राह्या–

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनम् ।।' इति बृहद्यमोक्तेः ।
'शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत् ।
दूर्वाष्टमीति सा ज्ञेया नोत्तरा सा विधीयते ।।' इति पुराणसमुच्चयाच्च । यत्तु–

'मुहूर्ते रौहिणेऽष्टम्याः पूर्वा वा यदि वा परा ।
दूर्वाष्टमी तु सा कार्या ज्येष्ठा मूलं च वर्जयेत् ।।' इति । तत्रैव परा कार्येत्युक्तम् । तत्पूर्वदिने ज्येष्ठादियोगे द्रष्टव्यम् –

'दूर्वाष्टमी सदा त्याज्या ज्येष्ठा मूलर्क्षसंयुता ।
ऐन्द्रर्क्षे पूजिता दूर्वा हन्त्यपत्यानि नान्यथा ।।
भर्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेत् ।' इति तत्रैव तन्निषेधात् ।

इदमगस्त्योदये न कार्यम् –

'शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी ।
सिंहार्क एव कर्तव्या न कन्यार्के कदाचन ।।
सिंहस्थे सोत्तमा सूर्येऽनुदिते मुनिसत्तमे ।।' इति मदनरत्ने स्कान्दोक्तेः ।

'अगस्त्य उदिते तात पूजयेदमृतोद्भवाम् ।
वैधव्यं पुत्रशोकं च शतवर्षाणि पञ्च च ।।'

इति तत्रैव दोषोक्तेश्च । भाद्रशुक्लाष्टम्यामगस्त्योदये भाविनि सति पूर्वकृष्णाष्टम्यामेव कुर्यादिति हेमाद्रिः । दीपिकाप्येवम् । इदं च व्रतं स्त्रीणां नित्यम् –

'या न पूजयते दूर्वां होमादिह यथाविधि ।
त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ।।
तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैः ।'
इति पुराणसमुच्चयात् । यदा ज्येष्ठादिकं विनाऽष्टमी न लभ्यते तदा तत्रैवोक्तम्–

'कर्तव्या चैकभक्तेन ज्येष्ठा मूलं यदा भवेत् ।
दूर्वामभ्यर्चयेद्भक्त्या न बन्ध्यं दिवसं नयेत् ।।' इति ।

अत्र विधिर्मदनरत्नेऽप्येवम् । भविष्ये –
'शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तम ।
स्थाप्यं लिङ्गं ततो गन्धैः पुष्पैर्धूपैः समर्चयेत् ।।

दूर्वाक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने ।
दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धयान्वितः ।।'

मन्त्रस्तु– त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ।।

यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ।। इति ।

अत्रानग्निपक्वं भक्षयेत्–

'अनग्निपक्वमश्नीयादन्नं दधिफलं तथा ।
अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितम् ।।' इति भविष्योक्तेः ।

भाद्रपदेऽधिमासे सति स्कान्दे–

'अधिमासे तु संप्राप्ते नभस्य उदये मुने ।
अर्वाग्दूर्वाव्रतं कार्यं परतो नैव कुत्रचित् ।।'

अत्रैव ज्येष्ठापूजोक्ता स्कान्दे–

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ।।' इति ।

इदं ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या । दिनद्वययोगे परा । पूर्वेऽह्नि रात्रियोगे पूर्वैव ।

'नवम्या सह कार्या स्यादष्टमी नात्र संशयः ।
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ।।' इति तत्रैवोक्तेः ।

अस्यापवादः–

'यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यथ ।
तस्मिन् हविष्यं पूजा च न्यूना चेत्पूर्ववासरे ।।' इति । इदं केवलतिथौ नक्षत्रे चोक्तम् । तत्राद्यं केवलतिथौ कार्यम् । अन्त्यं केवलर्क्षे ।

तदुक्तं मात्स्ये–

'प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादैवतं व्रतम् ।
प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि ।।
तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षतः ।।' इति ।

अत एव भविष्ये नक्षत्रमात्रे उक्तम् –

'मासि भाद्रपदे पक्षे शुक्ले ज्येष्ठा यदा भवेत् ।
रात्रौ जागरणं कृत्वा एभिर्मन्त्रैश्च पूजयेत् ।।' इति ।

दाक्षिणास्तु ऋक्ष एव कुर्वन्ति । हेमाद्रौ स्कान्देऽपि–

'मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ।।' इति ।

तथा– 'मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ।।' इति ।

मन्त्रस्तु– एह्येहि त्वं महाभागे सुरासुरनमस्कृते ।
ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भव ।। इत्यावाह्य 'तामग्निवर्णाम्' इति सम्पूज्य–

ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ।
शर्वायै ते नमस्तुभ्यं शाङ्कर्यै ते नमो नमः ।।
ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठेऽत्यल्पवादिनि ।
एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वती ।। इत्यर्घः ।

भाद्रशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् । 'आभाकासितपक्षेषु' इति दिवोदासोदाहृतवचनात् ।

'उपोष्यैकादशीं मोहात्पारणं श्रावणे यदि ।
करोति हन्ति तत्पुण्यं द्वादश द्वादशीभवम् ।।' इति तत्रैव स्कान्दाच्च । अस्य तत्रैव प्रतिप्रसवः । मार्कण्डेयः –

'विशेषेण महीपाल श्रवणं वर्धते यदि ।
तिथिक्षये न भोक्तव्यं द्वादशीं लङ्घयेन्न हि ।।' इति ।

केचित्तु यदा त्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे त्रेधा विभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यम् । तदुक्तं विष्णुधर्मे–

'श्रुतेश्च मध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम्' इति । अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात् । सन्ध्यायां विष्णुं संपूज्य प्रार्थयेत् । मन्त्रस्तु तिथितत्त्वे उक्तः–

ॐ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव ।
पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ।। इति ।

अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गर्गेण–

'द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ।।'

इयमेव श्रवणद्वादशी । तत्रैकादश्यां श्रवणद्वादशी । श्रवणयोगे सैवोपोष्या–

'एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ।।' इति विष्णुधर्मोक्तेः ।

नारदीयेऽपि–

'संस्पृश्यैकादशीं राजन् द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ।।
द्वादशी श्रवणं स्पृष्ट्वा स्पृशेदेकादशीं यदि ।।' इति ।

'स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ।।' इति हेमाद्रौ मात्स्योक्तेश्च । दिनद्वये द्वादशीश्रवणयोगेऽपि पूर्वा । निर्णयामृते त्वस्य पूर्वार्द्धमन्यथा दर्शितम्–

'द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि ।' इति

तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेऽपि तद्युतद्वादशीयोगमात्रेण विष्णुशृङ्खलं भवति । निर्णयामृतमते तु श्रवणस्यैकादशीद्वादशीभ्यां योग एव विष्णुशृङ्खलं नान्यथेति । यदा निशीथानन्तरं सूर्योदयावधि वा द्विकलामात्रमपि श्रवणर्क्षं भवति तदा पूर्वैव । तदुक्तं तत्रैव नारदीये । इमां प्रकृत्य–

'तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप ।
द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः ।।' इति ।
'द्वादशी श्रवणं स्पृष्ट्वा कृत्स्ना पुण्यतमा तिथिः ।
न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ।।' इति मदनरत्ने मात्स्याच्च । बुधवारेऽतिप्रशस्ता –

'बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ।
अत्यन्तमहती सा स्याद्दत्तं भवति चाक्षयम् ।।' इति स्कान्दात् ।
यदपि स्मृत्यर्थसारे 'उदयव्यापिनी ग्राह्येत्युक्तम्' यच्च बृहन्नारदीये–

'उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते' इति ।

तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये श्रवणयोगः पूर्वेऽह्नि च तद्भिन्ने काले योगस्तत्परा । दिनद्वये तूदययोगे पूर्वैव वा । बहुकर्मकालव्याप्तेरित्युक्तं मदनरत्ने । यदा त्वेकादश्येव श्रवणयुता न द्वादशी तदापि पूर्वैव ।

'यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ।।'

इति मदनरत्ने नारदीयोक्तेः । यदा परैव ऋक्षयुता तदा परा । तदा शक्तेनोपवासद्वयं कार्यम्–

'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः ।।' इति भविष्योक्तेः ।
यत्तु विष्णुधर्मे–

'पारणान्तं व्रतं ज्ञेयं व्रतान्ते विप्रभोजनम् ।
असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतान्तरम् ।।' इति ।
तदेतद्भिन्नविषयम् । अत्र गौडाः –

'शृणु राजन् परं काम्यं श्रवणद्वादशीव्रतम् ।'

इति स्थूलशीर्षवचनात्काम्यमेवेदम् । तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यन्ते ।

'द्वादश्यामुपवासेन शुद्धात्मा नृप सर्वशः ।
चक्रवर्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ।।' इति गौडनिबन्धे मार्कण्डेयोक्तेश्च । दाक्षिणास्तु–

'एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात् ।
व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयम् ।।'

इति वराहवामनपुराणोक्तेः श्रवणद्वादशीव्रतमेवेत्याहुः। भुक्त्वेति फलाद्याहारपरं न त्वन्नादि। 'अन्नाश्रितानि पापानि' इति निषेधात्।

'उपवासद्वयं कर्तुं न शक्नोति नरो यदि।

प्रथमेऽह्नि फलाहारी निराहारी परेऽहनि।।' इति भविष्योक्तेश्च। अशक्तौ तु गृहीतैकादशीव्रतो यस्तं प्रत्युक्तो मात्स्ये–

'द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि।

उपोश्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम्।।' इति।

पूजयेन्नतूपवसेदित्यर्थः। अगृहीतैकादशीव्रतश्चेदेकादश्यां भुक्त्वा द्वादश्यां समुपोषयेत्–

'एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत्।

पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्।।' इति नारदीयोक्तेः। पारणं तूभयान्तेऽन्यतरान्ते वा कुर्यात्।

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम्' इति स्कान्दात्।

'तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्।

पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयम्।' इति नारदीयादिति हेमाद्रिः। यद्यप्यत्र नक्षत्रमात्रान्तेऽपि पारणं प्रतिभाति तथापि तिथिमात्रान्ते ज्ञेयम्। तदृक्षान्ते तिथिमध्येऽपि।

'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः।

ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीम्।।'

इति विष्णुधर्मे श्रवणान्तमात्रे पारणनिषेधात्। रोहिण्यां तु– 'भान्ते कुर्यात्तिथेर्वापि' इति वह्निपुराणात्तदन्तेऽप्यस्तु। न त्वत्रैवमस्तीति। 'न ऋक्षान्तोऽनुकल्प' इति मदनरत्ने। अत्र विधिर्मदनरत्ने विष्णुधर्मे–

'तस्मिन्दिने तथा स्नानं यत्र क्वचन सङ्गमे।'

तथा– 'दध्योदनयुतं तस्यां जलपूर्णघटं द्विजे।

वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च।।

न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति ।'

मन्त्रस्तु भविष्ये, घटे जनार्दनपूजां विधाय–

नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक ।
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥
प्रीयतां देवदेवेशो मम संशयनाशनः । इति ।

वामनावतारनिमित्तोपवासस्तु भविष्ये–

'द्वादश्यास्ते विधिः प्रोक्तः श्रवणेन युधिष्ठिर ।
सर्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥
एकादशी यदा चेत्स्याच्छ्रवणेन समन्विता ।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥' इत्युपक्रम्य–
'अथ काले बहुतिथे गते सा गुर्विणी भवेत् ।
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम् ॥' इत्याद्युक्त्वा,
'एतत्सर्वं समभवदेकादश्यां युधिष्ठिर ।
तेनेष्टा देवदेवस्य सर्वथा विजया तिथिः ॥
एषा व्युष्टिः समाख्याता एकादश्यां मया तव ।
पूर्वमेव समाख्याता द्वादशी श्रवणान्विता ॥' इत्युपसंहारादेकादश्यामेव । व्युष्टिः फलम् ।

भागवते अष्टमस्कन्धे द्वादश्यां वामनोत्पत्तिरुक्ता–

'श्रोणा श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।
ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ॥
द्वादश्यां सविता तिष्ठन् मध्यन्दिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥'

श्रोणायां चन्द्रे, अभिजिच्छ्रवणप्रथमोंऽशः । अत्र कल्पभेदाद्व्यवस्था ।

तद्विधिश्च हेमाद्रावग्निपुराणे–

'नदीनां सङ्गमे स्नायादर्चयेदत्र वामनम् ।
सौवर्णं वस्त्रसंयुक्तं द्वादशाङ्गुलमुच्छ्रितम् ॥'

ततो विधिवत्संपूज्य–

हिरण्मयेन पात्रेण दद्यादर्घ्यं प्रयत्नतः ।
नमस्ते पद्मनाभाय नमस्ते जलशायिने ।।
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ।
नमः कमलकिञ्जल्कपीतनिर्मलवाससे ।।
महाहरिवपुस्कन्धधृतस्कन्धाय चक्रिणे ।
नमः शार्ङ्गसीरबाणपाणये वामनाय च ।।
यज्ञभुक्फलदात्रे च वामनाय नमो नमः ।
देवेश्वराय देवाय देवसंभूतिकारिणे ।।
प्रभवे सर्वदेवानां वामनाय नमो नमः ।
एवं संपूजयित्वा तं द्वादश्यामुदये रवेः ।।
शृङ्गारसहितं तं तु ब्राह्मणाय निवेदयेत् ।
वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते ।।
वामनं सर्वतोभद्रं द्विजाय प्रतिपादये ।। इति ।

अनन्तभट्टोप्याह– 'श्रवणद्वादश्यां वामननामा विष्णुः पूज्यते । श्रवणैकादश्यां वामनावतार' इति । श्रवणयुतशुद्धैकादश्यलाभे तु दशमीविद्धापि श्रवणयुता कार्या । 'अह्नो मध्ये वामनो रामरामौ' इति पूर्वोक्तवचनात् भागवताच्च ।

अत्रैव दुग्धव्रतं संकल्पयेत् । तदुक्तम्– 'दुग्धमाश्वयुजे मासि' इति । अत्रेदं चिन्त्यते । दुग्धव्रते पायसादिवर्ज्यं न वेति । नेति केचित् । नहि प्रकृतिवर्जने विकारवर्जनम् । दधिघृतादीनामपि वर्जनापत्तेः । तस्माद्दध्यादिवत् पायसादि भक्ष्यमिति । अत्र ब्रूमः– यत्र विकारे प्रकृतिरसोपलम्भस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः । अस्ति च मांसविकारे मांसप्रत्यभिज्ञा । मांसत्वानपायात् । यत्तु औष्ट्रदध्यादेरनिषेधापत्तिरिति । तत्र 'औष्ट्र' मिति विकारतद्धितेन निषेधात् । तथा च विज्ञानेश्वरः–

'औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ।'

इत्यत्र औष्ट्रमिति विकारतद्धिताच्छकृन्मूत्रादीनामपि निषेध इत्याह । नन्वेवं 'सन्धिन्यनिर्दशाऽवत्सागोपयः परिवर्जयेत्' इति सन्धिन्यादिक्षीरनिषेधेऽपि दध्यादिग्रहणं स्यात् । सत्यं प्राप्तम् । वचनेन परं निषेधः । तदाहापरार्के शङ्खः—

'क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः ॥' इति ।

व्रतम्— गोमूत्रयावकम् । तस्मात्पायसे दुग्धरसोपलम्भाद्वर्जनम् । अत एव आमिक्षायां दधिसत्त्वेऽपि माधुर्योपलम्भात्पयोरूपत्वमुक्तं मीमांसकैः । तदुक्तम्—

'पय एव घनीभूतमामिक्षेत्यभिधीयते ।'

दध्यादिषु तु तदभावादवर्जनमिति । इति दुग्धव्रतम् ।

अथ भाद्रशुक्लचतुर्दश्यामनन्तव्रतम् । तच्च त्रिमुहूर्तोदयव्यापिन्यां कार्यम् ।

'उदये त्रिमुहूर्तापि ग्राह्यानन्तव्रते तिथिः ।'

इति माधवोक्तेः । 'मध्याह्ने भोजनवेलायाम्' इति कथाश्रवणात्पूजाव्रतेषु मध्याह्नव्यापिनी तिथिरिति माधवीये वचनान्मध्याह्नव्यापिनी ग्राह्येति दिवोदासः । निर्णयामृते तु घटिकामात्राप्यौदयिकीत्युक्तम् ।

'तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेत् ॥' इति भविष्योक्तेः ।

'मुहूर्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी ।
संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ॥' इति स्कान्दाच्च ।

मुहूर्तमिति त्रिमुहूर्तप्रशंसापरम् ।

'उदये त्रिमुहूर्तापि ग्राह्यानन्तव्रते तिथिः' इति माधवोक्तेः ।

तत्त्वं तु उदयव्यापिन्यां तस्यां विष्णुं पूजयेदिति प्रतिपक्षविधिना

मध्याह्ने इतीतिहासरूपार्थवादस्य बाधात्त्रिमुहूर्तोदयव्यापिनी ग्राह्येति ।
अत्र चतुर्दशग्रन्थियुतदोरकबन्धनम्–

'संसारगह्वरगुहासु सुखं विहर्तुंवाञ्छन्ति ये कुरुकुलोद्भवशुद्धसत्त्वाः ।
संपूज्य च त्रिभुवनेशमनन्तदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ।

तस्यैव फलसंबन्धात्–

अथ व्रतविधिः ।

मासपक्षाद्युल्लिख्य पापनिर्मुक्त्युत्तमसिद्धिपुत्रपौत्रेप्सितभोगधनधान्यपरमगतिप्राप्तये चतुर्दशवर्षावध्यनन्तव्रतं करिष्ये । इति सङ्कल्प्य सर्वतोभद्रमण्डलं विधाय तत्र मण्डलदेवता आवाह्य तदुपर्येकं कलशं संस्थाप्य तत्र फणसप्तकमण्डितं दर्भमयं नागं संस्थाप्य तदग्रे चतुर्दशग्रन्थियुतं दोरकमभ्यर्च्यानन्तं पूजयिष्ये । इति संकल्प्य षोडशोपचारैः कलशोपरि पूजयेदित्याद्यप्रयोगे । द्वितीयादौ तु गृहीतानन्तव्रते पूजनं दोरकबन्धनं च करिष्ये, इति संकल्पयेत् ।

अथानन्तपूजा–

'मण्डलं सर्वतोभद्रं कृत्वा कुम्भं तु विन्यसेत् ।
तत्र चाष्टदले पद्मे पूजयेद्विष्णुमव्ययम् ॥
कृत्वा दर्भमयं देवं फणासप्तकमण्डितम् ।
तस्याग्रतो दृढं सूत्रं कुङ्कुमाक्तं सुशोभनम् ॥
चतुर्दशग्रन्थियुतमुपस्थाप्य प्रपूजयेत् ।
ततस्तन्मूलमन्त्रेण नमस्कृत्य चतुर्भुजम् ॥
नवाम्रपल्लवाभासं पिङ्गभ्रूश्मश्रुलोचनम् ।
पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ॥
प्रसन्नवदनं विष्णुं विश्वरूपं विचिन्तयेत् ।

ध्यानम्– आगच्छानन्त देवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां गृहाण सुरसत्तम ॥

सहस्रशीर्षेत्यावाहनम् । ततो ग्रन्थिदेवता–
‘विष्णुरग्निस्तथादित्यः सहस्राक्षः पितामहः ।
इन्द्रः पिनाकी विघ्नेशः स्कन्दः सोमस्तथैव च ।।
वरुणः पवनः पृथ्वी वसवो ग्रन्थिदेवताः ।

आसनम्– नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देवदेवेश प्रीत्यर्थ प्रतिगृह्यताम् ।। पुरुष एव० ।

पाद्यम्– पात्रेभ्यः सर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।। एतावानस्य० ।

अर्घ्यम्– अनन्तानन्त देवेश अनन्तफलदायक ।
अनन्तानन्तरूपोसि गृहाणार्घ्यं नमोऽस्तु ते ।। त्रिपादूर्ध्वं० ।।

आचमनम्– कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।। ततोविराट्० ।।

पञ्चामृतस्नानम्– पञ्चामृतेन स्नपनं करिष्ये सर्वसिद्धिदम् ।
कार्यं मे सिद्धिमायातु पूजिते त्वयि धातरि ।।
पयो दधि घृतं गव्यं माक्षिकं शर्करा तथा ।
पञ्चामृतेन स्नपनं गृहाण जगतः पते ।

स्नानम्– गङ्गा च यमुना चैव नर्मदा च सरस्वती ।
तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतम् ।।
तोयमेतत्सुखस्पर्शं स्नानीयं प्रतिगृह्यताम् । तस्माद्यज्ञात्स० ।

वस्त्रम्– पीताम्बरयुगं देव सर्वकामार्थसिद्धये ।
मया निवेदितं भक्त्या गृहाण सुरसत्तम ।। तस्माद्यज्ञात्सर्वहुतऋचः०।

यज्ञोपवीतम्– दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम । तस्मादश्वा० ।।

चन्दनम्– कस्तूरीकुङ्कुमोपेतं कर्पूरेण च संयुतम् ।
गन्धं दास्यामि देवेश अनन्ताय नमो नमः ।। तं यज्ञम्० ।

अक्षताः– अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभनाः ।
वासुदेव जगन्नाथ प्रीत्या मे स्वीकुरु प्रभो ।।

पुष्पम्– माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पुष्पाणि पूजार्थं स्वीकुरु प्रभो । तं यज्ञम्० ।

अङ्गपूजा– अनन्तायनमः, पादौ पूजयामि० । संकर्षणाय नमः, गुल्फौ पू० । कालात्मने नमः, जानुनी पू० । विश्वरूपाय नमः, जङ्घे पू० । विश्वनेत्राय नमः, कटिं पूजयामि । मधुसूदनाय नमः, मेढ्रं पू० । पद्मनाभाय नमः, नाभिं पू० । परमात्मने नमः, हृदयं पू० । श्रीकण्ठाय नमः, कण्ठं पू० । सर्वास्त्रधारिणे नमः, बाहू पू० । हरये नमः, मुखं पू० । वाचस्पतये नमः, जिह्वां पू० । दामोदराय नमः, दन्तान् पू० । केशवाय नमः, ललाटं पू० । कमलासनाय नमः, शिरः पू० । सर्वात्मने नमः, सर्वाङ्गं पू० ।

धूपः– वनस्पतिरसो दिव्यो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।। यत्पुरुषम्० ।

दीपः– आज्यं सद्वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।। ब्राह्मणांस्य० ।

नैवेद्यम्– अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
नानाभक्ष्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ।।
नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ।। चन्द्रमा मनसः ०।

फलम्– इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।। नाभ्याआसीत्० ।

ताम्बूलम्– पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।। यत्पुरुषेण० ।

दक्षिणा– हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।। सप्तास्यासन्० ।

नीराजनम्– पञ्चवर्तिसमायुक्तं सर्वमङ्गलदायकम् ।
नीराजनं निरीक्षस्व अनन्ताय नमो नमः ।।

पुष्पाञ्जलिः– मालतीमल्लिकापुष्पैर्नागचम्पकसंयुतैः ।
पुष्पाञ्जलिं गृहाणेमं पादाम्बुजयुगार्पितम् ।।

प्रार्थना– अनन्तकामान् मे देहि सर्वकामफलप्रद ।
अनन्ताय नमस्तुभ्यं पुत्रं पौत्रं प्रवर्द्धय ।।

अनन्त सर्वकामानामधिपः सर्वकामदः ।
व्रतेनानेन सुप्रीतो भवत्विह सदा मम ।।
नमस्ते देवदेवेश नमस्ते धरणीधर ।
नमस्ते कमलाकान्त नमस्ते ह्यमरप्रिय ।।
नमस्ते सर्वभूतेश वासुदेव नमोऽस्तु ते । यज्ञेन० ।

दोरकबन्धनमन्त्रः– अनन्ताय नमस्तुभ्यं सहस्रशिरसे नमः ।
नमोऽस्तु पद्मनाभाय नागाधिपतये नमः ।।

संसारगह्वरगुहासु सुखं विहर्तुं वाञ्छन्ति ये कुरुकुलोद्भव शुद्धसत्त्वाः ।
संपूज्य च त्रिभुवनेशमनन्तदेवं बध्नन्ति दक्षिणकरे वरदोरकं ते ।।
अनन्तसंसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव ।
अनन्तरूपे विनियोजयस्व अनन्तसूत्राय नमो नमस्ते ।।

धृते नमस्कारः–
अनन्तगुणरत्नाय विश्वरूपधराय च ।
अनन्तमाहात्म्यदेवाय अनन्ताय नमो नमः ।।

जीर्णं दोरकं पूर्ववत्संपूज्य विसर्जयेत् । तत्र मन्त्रः–
न्यूनातिरिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि ।
क्षम्याणि चैतानि मम क्षमस्व प्रयाहि तुष्टः पुनरागमाय ।।

अथ पक्कान्नादिदानप्रार्थना–

दाता च विष्णुर्भगवाननन्तः प्रतिग्रहीता च स एव विष्णुः ।
तस्मात्त्वया सर्वमिदं ततं च प्रसीद देवेश वरान् ददस्व ।।

प्रतिगृह्ण द्विजश्रेष्ठ अनन्तफलदायक ।
त्वत्प्रसादादहं विप्र मुच्येऽहं कर्मबन्धनात् ।।
पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितम् ।
द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे ।।

अथ वायनदान मंत्रः–

अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च ।
अनन्तस्तारको भूम्यामनन्ताय नमो नमः ।

इति अनन्तपूजाविधिः ।

अथागस्त्यर्घ्यः । तत्कालो भविष्ये–

'कन्यायामागते सूर्ये अर्वाग्वै सप्तमे दिने ।
कन्यायां समनुप्राप्ते ह्यर्घ्यकालो निवर्तते ।।'

तेन उदयोत्तरं सप्तदिनमध्ये इत्यर्थः । यत्पाद्मे–

'आसप्तरात्रादुदयाद्यमस्य दातव्यमेतत्सकलं नरेण ।
यावत्समाः सप्तदशाथवा स्युरथोर्ध्वमप्यत्र वदन्ति केचित् ।।'

यमस्यागस्त्यस्य । उदयकालश्च दिवोदासीये उक्तः–

'उदेति याम्यां हरिसंक्रमाद्रवेरेकाधिके विंशतिमे ह्यगस्त्यः ।
ससप्तमेऽस्तं वृषसंक्रमाच्च प्रयाति गर्गादिभिरप्यभाणि ।।'

अत्र विधिर्विष्णुरहस्ये–

'काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः ।
प्रदोषे विन्यसेत्तां तु पूर्णकुम्भे स्वलङ्कृताम् ।।
कुम्भस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः ।
दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरम् ।।'

पूजा च वक्ष्यमाणार्ध्यमन्त्रेण कार्या–
प्रभाते तां समादाय यायात्पुण्यं जलाशयम् ।
निशावसाने तां पश्यन् जलान्ते प्रतिमां मुनेः ।।
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ।

मात्स्ये तु–'अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदण्डम् ।'
पूर्वं काशमयीत्वमशक्तौ–
'चतुर्भुजं कुम्भमुखे निधाय धान्यानि सप्ताङ्कुरसंयुतानि ।
सकाशपुष्पाक्षतशुक्तियुक्तं मन्त्रेण दद्याद्द्विजपुङ्गवाय ।।
धेनुं बहुक्षीरवतीं च दद्यात्सवस्त्रघण्टाभरणां द्विजाय ।'

भविष्ये– 'विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः ।
सौवर्णरूप्यपात्रेण ताम्रवंशमयेन वा ।।
मूर्ध्नि स्थितेन नम्रेण जानुभ्यां धरणीं गतः ।'

विष्णुरहस्ये–'अगस्त्य खनमानेति पठन्मत्रमिमं मुने ।
अर्घ्यं दद्यादगस्त्याय शूद्रे मन्त्रविधिस्त्वयम् ।।
काशपुष्पप्रतीकाश वह्निमारुतसम्भव ! ।
मित्रावरुणयोः पुत्रः कुम्भयोने ! नमोऽस्तु ते ।।
विन्ध्यवृद्धिक्षयकर मेघतोयविषापह ! ।
रत्नवल्लभ ! देवेश ! लङ्कावास ! नमोऽस्तु ते ।।
वातापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान् योऽसौ तस्मै नमो नमः ।।
येनोदितेन पापानि विलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ।।
अगस्त्य खनमानेति विप्रोऽर्घ्यं विनिवेदयेत् ।
राजपुत्रि ! महाभागे ! ऋषिपत्नि ! वरानने ! ।।

लोपामुद्रे ! नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।
दत्त्वैवमर्घ्यं कौरव्य ! प्रणिपत्य विसर्जयेत् ।।
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये ।।
ऐहिकामुष्मिकीं दत्त्वा कार्यसिद्धिं व्रजस्व मे ।
विसर्जयित्वाऽगस्त्यं तं विप्राय प्रतिपादयेत् ।
अगस्त्यो मे मनस्थोऽस्तु अगस्त्योऽस्मिन्घटे स्थितः ।।
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ।

दानमंत्रः– अगस्त्यः सप्तजन्माघं नाशयत्वावयोरयम् ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ।।

प्रतिग्रहमंत्रः, विष्णुरहस्ये–

‘त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम् ।
होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम् ।।’
होमश्चार्घ्यमंत्रेणाऽऽज्येन ।

भविष्ये–

‘दत्त्वार्घ्यं सप्तवर्षाणि क्रमेणानेन पाण्डव ।
ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः ।।
वैश्यश्च धान्यनिष्पन्नः शूद्रश्च धनवान् भवेत् ।
यावदायुश्च यः कुर्यात् स परं ब्रह्म गच्छति ।।’ इत्यगस्त्यार्घ्यः ।

नान्दीमुखश्राद्धम् ।

भाद्रपौर्णमास्यां प्रपितामहात्पराँस्त्रीनुद्दिश्य श्राद्धं कार्यम् ।

तदुक्तं हेमाद्रौ ब्राह्ममार्कण्डेययोः–

‘नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा ।।’ इति ।

नान्दीमुखत्वं चोक्तं ब्राह्मे–

‘पिता पितामहश्चैव तथैव प्रपितामहाः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ।।

तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः ।
ते तु नान्दीमुखा नान्दीसमृद्धिरिति कथ्यते ।।

एतच्च प्रत्यब्दमित्युक्तेः पक्षश्राद्धपक्षे सकृन्महालयपक्षे चावश्यकमिति प्रयोगपारिजाते । अत्र मातामहा अपि कार्याः ।

'पितरो यत्र पूज्यन्ते तत्र मातामहा अपीति' धौम्योक्तेः ।

पितृशब्दस्य च जनकपरत्वेन बहुवचनविरोधेन पितृभावापन्नपरत्वात् । वार्षिके तु वचनान्निवृत्तिः । न च जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धे तदापत्तिः, इष्टापत्तेः । अत एव स उक्तश्राद्धेषु मातृमातामहयोर्दद्यादिति मदनरत्नकालादर्शौ । केचित्तु अजहल्लक्षणया पित्रादयो यत्र तत्र मातामहास्तेनात्र नेत्याहुः । न चात्र नाम्ना नान्दीश्राद्धधर्मातिदेशः । वैष्णवादिशब्दवद्देवतापरस्य कर्मनामत्वाभावात् । नापि नान्दीमुखत्वं पितृविशेषणं पारिभाषिकत्वादिति दिक् । तथापि निर्णयदीपे गार्ग्यः–

'पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयित्वा प्रौष्ठपदीं यथादर्शस्तथैव सा ।।' इति ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतो भाद्रस्य निर्णयः ।।

अथाश्विनमासः ।।

कन्यासंक्रमे पराः षोडशघटिकाः पुण्याः । शेषं प्राग्वत् ।
अथ महालयः । तत्र पृथ्वीचन्द्रोदये वृद्धमनुः–

'आषाढीमवधीकृत्य पञ्चमं पक्षमाश्रिताः ।
काङ्क्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहं जलम् ।।

कन्यायोगे पुण्यतमत्वमाह शाटचायनिः–

'कन्यास्थाऽर्कान्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते ।' इति ।

अत्र विशेषमाह वृद्धमनुः—

'मध्ये वा यदि वाप्यन्ते यत्र कन्यां व्रजेद्रविः ।
स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति ।।'

तथा ब्रह्माण्डमार्कण्डेययोः—

'कन्यां गते सवितरि दिनानि दश पञ्च च ।
पार्वणेनेह विधिना श्राद्धं तत्र विधीयते ।।'

तथा तत्रैव षोडशदिनान्युक्तानि—

'कन्यां गते सवितरि यान्यहानि तु षोडश ।
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत् ।।'

अत्र हेमाद्रिः षोडशत्वं त्रेधा व्याचख्यौ । तिथिवृद्ध्या पक्षस्य षोडशदिनत्वे श्राद्धवृद्ध्यर्थमेकः पक्षः । भाद्रपूर्णिमया सहेति द्वितीयः । आश्विनशुक्लप्रतिपदा सहेति तृतीयः । अन्त्य एव तु युक्तः ।

'अहः षोडशकं यत्तु शुक्लप्रतिपदा सह ।
चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता ।।' इति देवलोक्तेः ।

अत्र पञ्च पक्षाः । तदुक्तं हेमाद्रौ ब्राह्मे—

'आश्वयुक् कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने ।
त्रिभागहीनपक्षं वा त्रिभागं त्वर्धमेव वा ।।'

दिने दिने इति पक्षपर्य्यन्तत्वमुक्तम् । त्रिभागहीनमिति पञ्चम्यादिपक्षः । 'भौजङ्गीं तिथिमारभ्य यावच्चन्द्रार्कसङ्गमम् ।।' इति बाल्यात् । अर्द्धमित्यष्टम्यादिपक्षः । त्रिभागमिति दशम्यादिः । त्रिभागहीनमिति चतुर्दशीसहितप्रतिपदादिचतुष्टयवर्जनाभिप्रायेणेति कल्पतरुः । अत्र दिनपदं तिथिपरं वीप्सया तत्पक्षीयतिथित्वे श्राद्धव्याप्यतावच्छेदकम् । तेन पञ्चदशतिथिव्यापि श्राद्धं सिद्ध्यति । तेन चतुर्दशीनिषेधोऽन्यकृष्णपक्षपर इति गौडाः । तन्न । 'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये' इत्यादि विरोधात् । यच्च कश्चित् पूरणप्रत्ययलोपेन तृतीयभागहीनं

षष्ठ्यादि । पक्षतृतीयभागमेकादश्यादि । तदर्धं त्रयोदश्यादि । उत्तरोत्तरलघुकालोक्तेरिति । तन्न । गौतमादिवचनेन मूलकल्पनालाघवात् । पक्षमित्यनन्वयापत्तेश्च । 'पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वं ततोऽष्टमी' इति विष्णुधर्मोक्तेः । षष्ठ्याद्येकादश्यादिपक्षावपि ज्ञेयाविति तत्त्वम् ।

कालादर्शेऽपि–

'पक्षाद्यादि च दर्शान्तं पञ्चम्यादि दिगादि च ।
अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम् ॥'

पक्षादिः प्रतिपत् । दिक् दशमी । दर्शान्तमिति सर्वत्र । गौतमोऽपि– 'अथापरपक्षे श्राद्धं पितृभ्यो दद्यात् । पञ्चम्यादिदर्शान्तमष्टम्यादि दशम्यादि सर्वस्मिश्चेति' । तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखण्डे–

'आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ॥
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवम् ।' इति ।

अत्र शक्ताशक्तपरा व्यवस्थेति प्राञ्चः । तन्न । तद्वाचकपदाभावात् न त्रयोदश्यादिपक्ष एव नित्यः । तत्रैव निन्दाश्रुतेः । ब्राह्मे–'एवकारेण तस्यैव पञ्चमपक्षयोगव्यवच्छेदोक्तेः' इति गौडाः । तन्न । एकस्मिन्नपीति विरोधात् । तेन फलभूमार्थिनाऽन्यानि कार्याणीति तत्त्वम् । तत्र चतुर्दशीश्राद्धाभावे पञ्चम्यादिदशम्यादिपक्षौ तत्सत्त्वे षष्ठ्याद्येकादश्यादिकौ । एवं चतुर्दश्याद्यभावे द्वादश्यादिः । तत्सत्त्वे त्रयोदश्यादिरिति व्यवस्था । विधवायास्तु विशेषः स्मृतिसङ्ग्रहे–

'चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि ।
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च ॥
ततो मातामहानां च स्नानदानमुपक्रमेत् ।'

तथा– 'श्वश्रूणां च विशेषेण मातामह्यास्तथैव च ।'

अशक्तौ तु स्मृतिरत्नावल्याम्–

'स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च ।
विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता ।।'

विधवा स्वयं सङ्कल्पं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते। सकृन्महालये च वर्ज्यतिथ्याद्युक्तं पारिजातादिषु । वसिष्ठः–

'नन्दायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ।।'

जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि । वृद्धगार्ग्यः–

'प्राजापत्ये च पौष्णे च पित्रर्क्षे भार्गवे तथा ।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति ।।'

प्राजापत्यं रोहिणी । पौष्णं रेवती । पित्र्यं मघा । अन्यान्यपि प्रतिपदादीनि तत्रैव ज्ञेयानि । एतच्च सकृन्महालयविषयम् ।

'सकृन्महालये काम्ये पुनः श्राद्धे खिलेषु च ।
अतीतविषये चैव सर्वमेतद्विवर्जयेत् ।।' इति नारदोक्तेः ।

अस्यापवादो हेमाद्रौ–

'अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ।
तथा तिथिं च नक्षत्रं वारं च न विचारयेत् ।।'

पितृमृताहे निषिद्धदिनेऽपि सकृन्महालयः कार्य इत्युक्तम्–

'आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृतेऽहनि पितुर्यो वै श्राद्धं दास्यति मानवः ।।
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवम् ।।' इति ।
'या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते ।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ।।
तिथिच्छेदो न कर्तव्यो विनाऽऽशौचं यदृच्छया ।
पिण्डं श्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत् ।।

अशक्तः पक्षमध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथाविधि ।।' इति स्मृतिवचनात् । तथा पक्षश्राद्धकरणेऽपि नन्दादिषु न निषेध इत्याह कार्ष्णाजिनिः ---

'नभस्यस्याऽपरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादिवर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ।।' इति ।

पूर्वोक्तनन्दादिनिषेधस्तु सकृन्महालये मृताहातिक्रमे पौर्णमास्यादिमृतश्राद्धे च ज्ञेयः । यत्तु स्मृत्यर्थसारे---

'विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ।।' इति ।

तस्यापवादो दिवोदासीये बृहस्पतिः-

'तीर्थे संवत्सरे प्रेते पितृयागे महालये ।
पिण्डदानं प्रकुर्वीत युगादिभरणीमघे ।।
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ।।' इति ।

सन्यासिनां तु द्वादश्यां कार्यम्---

'यतीनां च व्रतस्थानां वैष्णवानां विशेषतः ।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ।।' इति संग्रहोक्तेः ।

अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः -

'हंसे कन्यासु वर्षास्थे शाकेनापि गृहे वसन् ।
पंचम्योरन्तरे दद्यादुभयोरपि पक्षयोः ।।'

आश्विनकृष्णशुक्लपंचम्योर्मध्ये इत्यर्थः । तत्राप्यसंभवे भविष्ये-

'येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये ।।' तत्राप्यसंभवे-

'यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः ।
शून्यं प्रेतपुरं तावद्वृश्चिकं यावदागतः ।।

वृश्चिके समतिक्रान्ते पितरो दैवतैः सह ।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम् ।।'

यत्तु जातूकर्ण्यः—

'आकाङ्क्षन्तिस्म पितरः पञ्चमं पक्षमाश्रिताः ।
तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ।।' इति । तत्फलातिशयहानिपरम् । 'कन्यां गच्छतु वा न वेति' तुर्यपादे वा पाठः । तेन कन्यायोगे प्राशस्त्यमात्रम् । इदं च श्राद्धमन्नेनैव कार्यम् । नाऽऽमान्नादिना ।

'मृताहं च सपिण्डं च गयाश्राद्धं महालयम् ।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ।।' इति गालवोक्तेः ।

अथात्र देवताः—

तातात्म्बात्रितयं सपत्नजननी मातामहादित्रयं
सस्त्रि स्त्रीतनयादि तातजननीस्वभ्रातरः सस्त्रियः ।
तातात्म्बात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे ।।

अस्यार्थः— तातत्रयी, पितृत्रयी, अम्बात्रयी च । स्मृत्यर्थसारेऽपि महालये मातृश्राद्धं पृथक्कार्यम् । सस्त्रीति मातामहानां सपत्नीकत्वेऽपि विभवे सति मातामहीनां पृथक्कार्यम्—

महालये गयाश्राद्धे श्राद्धे चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे प्रौष्ठे मघासु च ।।' इति निगमोक्तेः ।

हेमाद्रिमते त्वत्र नवदैवत्यमेव--

'महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च
नवदैवत्यमत्रेष्टं शेषं षट्पौरुषं विदुः ।।' इति विष्णुधर्मोक्तेः ।

तातभ्राता—पितृव्यः, जननीभ्राता—मातुलः, सस्त्रियः— पितृव्यस्त्री, मातुलानी, भ्रातृजाया । पितृष्वसृमातृष्वसृभगिन्योऽपत्यभर्तृयुक्ताः ।

तेन सापत्या सधवा इति प्रयोगो ज्ञेयः। जायापिता श्वशुरः, श्वश्रूरप्यत्रोपलक्ष्या । अत्र पार्वणैकोद्दिष्टव्यवस्थोक्ता हेमाद्रौ–

'उपाध्यायगुरुश्वश्रूपित्राचार्यश्च मातुलः ।
श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः ।।

भगिनीस्वामिदुहितृजामातृभगिनीसुताः ।
पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा ।।

सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये ।
एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः ।।' इति ।

इतरेषां पित्रादीनां पार्वणमर्थसिद्धम् । अत्र क्रमान्यत्वेऽप्याचाराद् व्यवस्था । अशक्तौ तु पृथ्वीचन्द्रोदये चतुर्विंशतिमते–

'एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् ।
दश द्वादश वा पिण्डान् दद्यादकरणं न तु ।।'

एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः–

'एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ।।' इति ।

महालये सन्यस्तपितृकादिना जीवत्पितृकेनापि कार्यम् ।

'वृद्धौ तीर्थे च सन्यस्ते ताते च पतिते सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः।।' इति कात्यायनोक्तेः।

यत्तु कौण्डिन्यः–

'दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकम् ।
न जीवत्पितृकः कुर्यात् तिलैस्तर्पणमेव च ।।' इति ।

तत्सन्यस्तपित्राद्यतिरिक्तविषयं काम्यश्राद्धपरं वा । एतच्च जीवत्पितृकेण पिण्डरहितं कार्यम्--

'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव च ।।' इति दक्षेण तस्य

पिण्डनिषेधात् । अन्वष्टकामातृवार्षिकादौ तु वचनाद्भवतीति । तथा छागलेयः–

'पिण्डो यत्र निवर्तेत मघादिषु कथंचन ।
साङ्कल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः ।।'

साङ्कल्पस्वरूपं च श्राद्धपद्धतावुक्तम् । अत्र श्राद्धाङ्गतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तरं सकृन्महालये तु परेऽह्नि कार्यम् । तदुक्तं नारदीये–

'पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ।
सकृन्महालये चैव परेऽहनि तिलोदकम् ।।'

गर्गोऽपि– 'पक्षश्राद्धे हिरण्ये च अनुव्रज्यतिलोदकम् ।।' इति ।

तथा प्रयोगपारिजाते गर्गः–

'कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ।
पितृणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम् ।।

सकृन्महालये श्वः स्यादष्टकास्वन्त एव हि ।' इदं निषिद्धदिनेऽपि कार्यम् । 'तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा ।' इति स्मृत्यर्थसारोक्तेः ।

'तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ।।' इति स्मृतेश्च ।

एतच्च श्राद्धं मलमासे न कार्यम् । तदाह भृगुः–

'वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ।।' इति ।

हेमाद्रौ नागरखण्डेऽपि–

'नभो वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ।।' इदं च नित्यं काम्यंच ।

'पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामाँश्च पुष्कलान् ।।' इति जाबाल्युक्तेः ।

'वृश्चिके समतिक्रान्ते पितरो दैवतैः सह ।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम् ।।'इति कार्ष्णाजिनिवचनाच्च । तदतिक्रमे प्रायश्चित्तमुक्तमृग्विधाने–

'दुरो अश्वस्य मन्त्रं च दशवारं द्विमासयोः ।
महालयं यदा न्यूनं तदा सम्पूर्णमेति तत् ।।' इति ।

द्विमासयोः कल्यातुलयोर्महालयश्राद्धं यदा हीनमित्यर्थः ।

मन्त्रः– "दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यमस्य वसुन इनस्पतिः । शिक्षा नरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि" ।।

अत्र भरण्यां श्राद्धमतिप्रशस्तम् । तदुक्तं मात्स्ये–

'भरणी पितृपक्षे तु महती परिकीर्तिता ।
अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ।।'

बृहस्पतिः– 'नभस्यापरपक्षस्य द्वितीया यदि याम्यभे ।
तृतीया चाग्निताराभिः सहिता प्रीतिदा पितुः ।।'

एतत्पक्षे षष्ठीयोगविशेषेण कपिलासंज्ञा । तदुक्तं वाराहे–

'नभस्य कृष्णपक्षे तु रोहिणीपातभूसुतैः ।
युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ।।
व्रतोपवासनियमैर्भास्करं तत्र पूजयेत् ।
कपिलां च द्विजाग्र्याय दत्त्वा क्रतुफलं भवेत् ।।'

पुराणसमुच्चये– 'भाद्रे मास्यसिते पक्षे भानौ चैव करे स्थिते ।
गते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ।।'

अत्र दर्शान्तत्वेन महालयो भाद्रकृष्णपक्षो ज्ञेयः । हस्तार्कस्तु फलातिशयार्थः ।

'संयोगे तु चतुर्णां वै निर्दिष्टा परमेष्ठिना' इति तत्रैवोक्तेः ।

अत्र विशेषः स्कान्दे–

'देवदारुं तथोशीरं कुङ्कुमैला मनःशिलाम् ।
पत्रकं पद्मकं यष्टी मधुगव्येन पेषयेत् ।।
क्षीरेणालोडच कल्केन स्नानं कुर्यात्समन्त्रकम् ।
आपस्त्वमसि देवेश ज्योतिषांपतिरेव च ।।
पापं नाशय मे देव ! वाङमनः कायकर्मजम् ।
पञ्चगव्यकृतस्नानः पञ्चभङ्गैस्तु मार्जयेत् ।।'

पञ्चभङ्गैः पञ्चपल्लवैः । तथा–

'अल्पवित्तोऽपि यः कश्चित्सोऽपि कुर्यादमुं विधिम् ।'

प्रभासखण्डे– 'स्थापयेदव्रणं कुम्भं चन्दनोदकपूरितम् ।
रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम् ।।
रथो रौक्मपलस्यैव एकचक्रः सुचित्रितः ।
सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् ।।'

ततः सूर्यं कपिलां च षोडशोपचारैः संपूज्य दद्यात् ।

'दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः ।
कपिलासहितो देवो मम मुक्तिं प्रयच्छतु ।।
यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी ।
प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ।।' इति ।

इयमेव चन्द्रषष्ठी । सा चन्द्रोदयव्यापिनी ग्राह्या । उभयत्र तथात्वे पूर्वा । तदुक्तं भविष्ये–

'तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे ।
चन्द्रषष्ठीव्रतं कुर्यात्पूर्ववेधः प्रशस्यते ।।
चन्द्रोदये यदा षष्ठी पूर्वाह्णे चापरेऽहनि ।
चन्द्रषष्ठ्यसिते पक्षे सैवोपास्या प्रयत्नतः ।।' इति ।

अष्टम्यामाश्वलायनेन मघावर्षसंज्ञं श्राद्धमुक्तम् । एतेन–'माघ्यावर्षं प्रौष्ठपद्या अपरपक्षे' इति । इदं सप्तम्यादिषु त्रिष्वहःसु कार्यम् । इति ।

ब्राह्मे– 'आषाढ्याः पञ्चमे पक्षे गया माघ्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गया तु पैतृके स्मृता ।।'

आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतम् । तत्र पुराणसमुच्चये–
'श्रियोऽर्चनं भाद्रपदे सिताष्टमीं प्रारभ्य कन्यामगते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्धगतो युवत्या ।।' इति ।

तत्रैव– 'कन्यागतेऽर्के प्रारभ्य कर्तव्यं न श्रियोऽर्चनम् ।
हस्तप्रान्तदलस्थेऽर्के तद्व्रतं न समापयेत् ।।
पूजनीया गृहस्थानामष्टमी प्रावृषि श्रियः ।
दोषैश्चातुर्भिः सन्त्यक्ता सर्वसम्पत्करी तिथिः ।।'

तथा– 'पुत्रसौभाग्यराज्यायुर्नाशिनी सा प्रकीर्तिता ।
तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ ।।
विशेषेण परित्याज्या दूषिता नवमी यदि ।' इति दोषचतुष्टयं तत्रैवोक्तम् ।

'त्रिदिने चावमे चैवमष्टमीं नोपवासयेत् ।
पुत्रहा नवमीविद्धा स्वघ्नी हस्तार्धगे रवौ ।।' इति ।

त्रिदिनावमलक्षणं च रत्नमालायाम् –
'यत्रैकः स्पृशति तिथिद्वयावसानं वारश्चेदवमदिनं तदुक्तमार्यैः ।
यःस्पर्शाद्भवति तिथिस्त्रयस्य चाह्नां त्रिद्युस्पृक्कथितमिदं द्वयं च नेष्टम्।।'

एते सर्वे निषेधाः प्रथमारम्भविषयाः । मध्ये तु सतिसम्भवे ज्ञेयाः । व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये त्यागायोगात् । इयं चन्द्रोदयव्यापिनी ग्राह्या, तत्रैव पूजाद्युक्तेः । परदिने चन्द्रोदयादूर्ध्वं त्रिमुहूर्तव्यापित्वे परैव कार्या । अन्यथा पूर्वैव ।

'पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रिमुहूर्तापि सा पूज्या परतश्चोर्ध्वगामिनि' इति । संग्रहोक्तेः ।
इति महालक्ष्मीव्रतनिर्णयः ।

अथ नवम्यामन्वष्टकाश्राद्धम् । तत्र कत्यायनः–

'अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् ।
पित्रादि मातृमध्यं च ततो मातामहान्तकम् ।।'

ब्रह्माण्डे– 'पितृणां प्रथमं दद्यान्मातृणां तदनन्तरम् ।
ततो मातामहानां च आन्वष्टक्ये क्रमः स्मृतः ।।

छागलेयः– 'केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः ।
अन्वष्टकासु मध्यस्था नान्त्या कार्यास्तु मातरः ।।'

दीपिकायां तु मातृश्राद्धमादौ कार्यमित्युक्तम् । 'मातृयजनं त्वन्वष्टकासु आदितः' इति । हेमाद्रौ ब्राह्मेऽपि–

'अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यते' इति । अत्र शाखाभेदेन व्यवस्थेति पृथ्वीचन्द्रोदयः । जीवत्पितृकविषयमिति निर्णयदीपः । इदं च जीवत्पितृकेणापि कार्यम् । तदुक्तं मैत्रायणीयपरिशिष्टे–

'आन्वष्टक्ये गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति ।।' इति ।

यद्यपि जीवत्पितृकस्य पञ्चाप्यन्वष्टका अवश्यं कर्तव्यास्तथापि अशक्तस्येयमावश्यकी ।

'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति' इति हेमाद्रौ पाद्मोक्तेः ।

'सर्वासामेव मातृणां श्राद्धं कन्यागते रवौ ।
नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा यतः ।।'

इति सूतेनावश्यकत्वोक्तेश्च । इदं जीवत्पितृकेणापि सपिण्डकं कार्यम् ।

हेमाद्रौ विष्णुधर्मोत्तरे– 'अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च' इत्युपक्रम्य– 'पिण्डनिर्वपणं कार्यं तस्यामपि नृसत्तम' । इति वचनं श्राद्धविधिनापि पिण्डदाने प्राप्ते पुनस्तत्कीर्तनं यस्य जीवत्पितृत्वगर्भिणीपतित्वादिना पिण्डदानं निषिद्धं तस्य तत्प्राप्त्यर्थमिति ।

अत्रसुवासिनीभोजनमुक्तं मार्कण्डेयपुराणे–

'मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनम् ।
सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् ।।

भर्तुरग्रे मृता नारी सह दाहेन वा मृता ।
तस्याः स्थाने नियुञ्जीत विप्रैः सह सुवासिनीम् ।।'

तत्रैव मदालसावाक्यम्–

'स्त्रीश्राद्धे पुत्रदेयाः स्युरलङ्काराश्च योषिते ।
मञ्जीरमेखलादानं कर्णिकाकङ्कणादयः ।।'

अत्राशक्तावनुकल्पमाहाश्वलायनः– 'अनडुहे यवसमाहरेदग्निना वाकक्षमुपोषेदेषा मेऽन्वष्टकेति नत्वेवाऽनष्टकःस्यादिति ।'

हेमाद्रौ पितामहः–

'अमावास्याव्यतीपातपौर्णमास्यकाष्टसु च ।
विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ।।'

अकरणे च प्रायश्चित्तमुक्तमृग्विधाने–

'एभिर्द्युभिर्जपेन्मन्त्रं शतवारं तु तद्दिनम् ।
आन्वष्टक्यं यदा शून्यं संपूर्णं याति सर्वथा ।।' इति ।

एतत्पक्षे द्वादश्यां विशेषो वायवीये–

'सन्यासिनोऽप्याब्दिकादौ पुत्रः कुर्याद्यथाविधि ।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं तु तत् ।।' इति ।

अथ त्रयोदशीश्राद्धम् । तत्र चन्द्रिका–

'त्रयोदशी भाद्रपदी कृष्णा मुख्या पितृप्रिया ।
तृप्यन्ति पितरस्तस्यां स्वयं पञ्चशतं समाः ।।
मघायुतायां तस्यां तु जलाद्यैरपि तोषिताः ।
तृप्यन्ति पितरस्तद्वद्वर्षाणामयुतायुतम् ।।'

शङ्खः– 'प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च ।।

प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा ।
नृणां श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः ।।'

एतन्नित्यमपि विष्णुधर्मे–

'प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी ।' इत्युक्त्वा–

'एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ।।' इत्युक्तेः ।

एतच्चाविभक्तैरपि पृथक्कार्यम् । तथा च हेमाद्रौ–

'विभक्ता वाविभक्ता वा कुर्युः श्राद्धं पृथक्सुताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्दिने ।।' इति ।

वायवीये– 'हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैवस्वती नाम सा छाया कुञ्जरस्य तु ।।'

अत्र च– 'अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ।।' इति विष्णुमनुवचने केवलत्रयोदशीश्रुतेर्मघागुण इति कल्पतरुः । शूलपाणिस्तु–केवलवाक्यानामर्थवादत्वाद्विधौ च मघायोगश्रुतेर्विधिलाघवाद्विशिष्टमेव निमित्तमित्याह । वस्तुतस्तु–

'मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं वर्षासु च मघासु च ।।' इति वसिष्ठवचने केवलमघाश्रुतेर्विनिगमकाभावादुभयं भिन्नं निमित्तम् । पूर्वोक्तवचनाच्च । योगाधिक्ये फलाधिक्यम् । अत एव याज्ञवल्क्यः–

'तथा वर्षात्रयोदश्यां मघासु च विशेषतः ।' इति ।

त्रयोदशी श्राद्धं नित्यम् । अन्यत्काम्यम् । एतत्पिण्डरहितं कार्यम्–

'मघायुक्तत्रयोदश्यां पिण्डनिर्वपणं द्विजः ।
ससन्तानो नैव कुर्यान्नित्यं ते कवयो विदुः ।।' इति बृहत्पराशरोक्तेः । इदं मलमासेऽपि कार्यम्–

'मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे ।।' इति काठकगृह्योक्तेः ।

यानि तु अङ्गिराः-

'त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितम् ।।'

वामनपुराणे- 'त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान्गृही ।' इत्यादीनि वचनानि तानि पुत्रवद्विषयाणि भिन्नत्रयोदशीविषयाणि वा काम्यश्राद्धविषयाणि वा सपिण्डकश्राद्धविषयाणि वा इति ।

'असन्तानस्तु यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ।
सन्तानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ।।' इति हेमाद्रौ नागरखण्डोक्तेः ।

अथ चतुर्दशी । प्रचेताः -

'वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषाग्निभिः ।
नखिदंष्ट्रिविपन्नानां तेषां शस्ता चतुर्दशी ।।'

ब्राह्मे- 'युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सताम् ।।'

नागरखण्डे- 'अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ।।'

मरीचिः- 'विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता ।।'

शस्त्रहतस्य चतुर्दश्यामिति श्राद्धपरिशिष्टे च । एतच्च- 'दैवयुक्तमेकोद्दिष्टं कार्य' मित्युक्तं प्रयोगपारिजाते-

'प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः ।
दैवयुक्तं तु तच्छ्राद्धं पितृणामक्षयं भवेत् ।।
तच्छ्राद्धं दैवहीनं चेत्पुत्रदारधनक्षयः ।
एकोद्दिष्टं दैवयुक्तमित्येवं मनुरब्रवीत् ।।'

भविष्येऽपि– 'समत्वमागतस्यापि पितुः शस्त्रहतस्य च ।
चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये ।।
चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते ।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः ।।' इति ।

हारीतः – 'विश्वेदेवांश्च तत्रापि पूजयित्वादितोऽमरान् ।
ये वै शस्त्रहतास्तेषां श्राद्धं कुर्यादतन्द्रितः ।।'

अस्त्रशस्त्रहतस्यैव चतुर्दश्यामिति नियमो न तु चतुर्दश्यामेव शस्त्रहतस्येति ।

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये' इति कालादर्शात् । वार्षिकादीनामकरणापत्तेश्च । पितामहोऽपि शस्त्रहतश्चेदेकोद्दिष्टद्वयं कार्यम् । तदुक्तं स्मृत्यन्तरे– 'एकस्मिन्द्वयोर्वैकोद्दिष्टमिति' । त्रिषु शस्त्रहतेषु पार्वणमेव कार्यम् ।

'पित्रादयस्त्रयो यस्य शस्त्रैर्घातास्त्वनुक्रमात् ।
स भूते पार्वणं कुर्यादाब्दिकानि पृथक् पृथक् ।।' इति बृहत्पराशरोक्तेः ।

'एकस्मिन्वा द्वयोर्वापि विद्युच्छस्त्रेण वा हते ।
एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेत् ।।' इति स्मृत्यन्तराच्च ।

इति चतुर्दशीश्राद्धनिर्णयः ।

अमायां विशेषमाहापरार्के यमः–
'हंसे करस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ।।
वनस्पतिगते सोमे या छाया प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ।।'

भारते– 'अजेन सर्वलोहेन वर्षासु नियतव्रतः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ।।' श्राद्धं दद्यादिति शेषः । आश्विनशुक्लप्रतिपदि दौहित्रेण मातामहश्राद्धं कार्यम् ।

'जातमात्रोऽपि दौहित्रो विद्यमानेऽपि मातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ।।' इति स्मृतेः । इयं च सङ्गवव्यापिनी ग्राह्या ।

'प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम् ।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सदा ।।
जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले ।
प्रातः सङ्गवयोर्मध्ये आर्यस्य प्रतिपद्भवेत् ।।' इति वचनात् ।

इदं च जीवत्पितृकेण पिण्डरहितं कार्यम्–

'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्यात् गुर्विणीपतिरेव च ।।'

इति दक्षेण पिण्डनिषेधात् । आन्वष्टक्यवद्विशेषवचनाभावाच्च ।

इति महालयनिर्णयः ।

आश्विनशुक्लप्रतिपदि नवरात्रारम्भः । तन्निर्णयो देवीपुराणे–

'शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम् ।
आश्विनस्य सिते पक्षे प्रतिपत्सुशुभे दिने ।।
शुद्धे तिथौ प्रकर्तव्यं प्रतिपच्चोर्ध्वगामिनी ।
आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा ।।
अपराह्णे च कर्तव्यं शुद्धसन्ततिकाङ्क्षिभिः ।'

इदं चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयम् । तथा च डामरतन्त्रे देवीवचः –

'अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम ।
मुहूर्तमात्रा कर्तव्या द्वितीया द्विगुणान्विता ।।
आद्या षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनं तत्र त्वरिष्टं जायते ध्रुवम् ।।'

देवीपुराणे– 'पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ।।

देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते ।
नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम् ॥' इति ।

स्कान्देऽपि– 'प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवेत् ।
भाद्रपञ्चदशी कृष्णा तया युक्ता न शस्यते ॥
विरुद्धफलदा सा हि पुत्रदारभयावहा' ॥ इति ।

तथा– 'वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव ।
द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा ॥'

तथा देवीपुराणे–

'यो मां पूजयते नित्यां द्वितीयादिगुणान्विताम् ।
प्रतिपच्छारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥
यदि कुर्यादमायुक्तप्रतिपत्स्थापनं मम ।
तस्य शापायुतं दत्त्वा भस्मशेषं करोम्यहम् ॥
आग्रहात्कुरुते यस्तु कलशस्थापनं मम ।
तस्य संपद्विनाशः स्याज्ज्येष्ठपुत्रो विनश्यति ॥
अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने ।
धनार्थिभिर्विशेषेण देशहानिश्च जायते ॥
न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने ।
उदये द्विमुहूर्तापि ग्राह्या सोदयदायिनी ॥' इति ।

देवीपुराणे–

'या चाश्वयुजि मासे स्यात्प्रतिपद्भद्रयान्विता ।
शुद्धा ममार्चनं तस्यां शतयज्ञफलप्रदम् ॥

रुद्रयामले–

'आमायुक्ता सदा चैव प्रतिपन्निन्दिता मता ।
तत्र चेत्स्थापनं कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत्सद्द्वितीया तु कुम्भारोपणकर्मणि ।' इति ।

तिथितत्त्वे देवीपुराणे–

प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।'
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ।।'

तत्रैव 'शरत्काले महापूजा क्रियते या च वार्षिकी ।
सा कार्योदयगामिन्यां न तत्र तिथियुग्मता ।।'

यदा तु पूर्वदिने संपूर्णा शुद्धा च भूत्वा परदिने वर्द्धते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव । यानि च द्वितीयायोगनिषेधकानि वचनानि केचित्पठन्ति तान्यपि शुद्धाधिकनिषेधपराणि । परदिने प्रतिपदोऽत्यन्तासत्त्वे तु दर्शयुतापि पूर्वैव ग्राह्या । तदाह लल्लः– 'तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनम् ।।' इति । अत्र देवीपूजैव प्रधानम् । उपवासादित्वङ्गम् ।

'अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ।
पूजयित्वाश्विने मासि विशोको जायते नरः।।' इति भविष्यान्नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकमिति देवीपुराणम् ।

'शरत्काले महापूजा क्रियते या च वार्षिकी ।' इति मार्कण्डेयपुराणाच्च । एकाहपक्षोऽपि कालिकापुराणे –

'यस्त्वेकस्यामथाष्टम्यां नवम्यामथ साधकः ।
पूजयेद्वरदां देवीं महाविभवविस्तरैः ।।' इति ।

देवीपुराणे–

'महानवम्यां पूजेयं सर्वकामप्रदायिका ।
सर्वेषु चैव वर्णेषु तव भक्त्या प्रकीर्तितता ।।
कृत्वाप्नोति यशोराज्यपुत्रायुर्धनसंपदः ।।' सा च काम्या नित्या च ।
'एवमन्यैरपि तथा कार्यं देव्याः प्रपूजनम् ।
विभूतिमतुलां लब्धुं चतुवर्गप्रदायकम् ।।' इति ।
'यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ।।
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै ।।' इति कालिकापुराणे फलनिन्दाश्रुतेः ।

'वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनम्' । इति देवीपुराणाच्च । अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये–

'एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ।।
पूजनीया जनैर्देवीं स्थाने स्थाने पुरे पुरे ।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ।।
स्नातैः प्रमुदितैः हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ।।' इति ।

यत्तु भविष्ये– 'एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिः ।' इति । तत्तामसपूजापरम् । 'विना मन्त्रैस्तामसी स्यात्किरातानां तु सम्मता' इति तत्रैवोक्तेः । देवीपुराणेऽपि–

'कन्यासंस्थे रवौ शक्र ! शुक्लामारभ्य नन्दिकाम् ।।
अयाची ह्यथवैकाशी नक्ताशी वाथवाम्बवदः ।
भूमौ शयीत चामन्त्र्य कुमारीर्भोजयेन्मुदा ।।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ।
बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ।।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ।' इति ।

नन्दिकां प्रतिपदम् । तच्च पूजनं रात्रौ कार्यम् ।

'आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् ।।'

इति देवीपुराणात् । सङ्ग्रहेऽपि–

'आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् ।।
रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ।
रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् ।।
सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणम् ।'

ननु– 'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः ।।
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम् ।'

इत्यादिवचनान्नक्तमेव प्रधानमिति चेन्न । 'नवरात्रोपवासतः' इत्यादेरनुपपत्तेः। तेन पाक्षिकनक्तानुवादोऽयम् । ननु रात्रेः कर्मकालत्वे तद्व्यापिनी पूर्वैव प्रतिपत्प्राप्नुयात् । मैवम् । न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् । प्रतिपदि च वैधृत्यादियोगनिषेधो देवीपुराणे–

'त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपच्चण्डिकार्चने ।
तयोरन्ते विधातव्यं कलशारोपणं गुह् ।।' इति । चित्रावैधृतियुतापि द्वितीया तु चेत्सैव ग्राह्येत्युक्तं देवीपुराणे–

'भद्रान्विता चेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि संगता सती ।
सैवाऽपराह्ले विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुः ।।' इति ।

यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं कात्यायनेन–

'प्रतिपद्याश्विने मासि भवेद्वैधृतिचित्रयोः ।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् ।।' इति ।

भविष्येऽपि– 'चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप ! ।
त्याज्या ह्यंशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजनम् ।।' इति ।

रुद्रयामलेऽपि–

'वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् ।
तस्मान्न स्थापयेत्कुम्भं चित्रायां वैधृतौ तथा ।।
संपूर्णा प्रतिपद्देव ! चित्रायुक्ता यदा भवेत् ।
वैधृत्या वापि युक्ता स्यात्तदा मध्यन्दिने रवौ ।।
अभिजित्तु मुहूर्ते यत्तत्र स्थापनमिष्यते ।।' इति ।

इदं कलशस्थापनं रात्रौ न कार्यम् –

'न रात्रौ स्थापनं कार्यं नवकुम्भाभिषेचनम्' इति मात्स्योक्तेः ।

'भास्करोदयमारभ्य यावत्तु दशनाडिकाः ।
प्रातः काल इति प्रोक्तः स्थापनारोपणादिषु ।।' इति विष्णुधर्मोक्तेश्च । रुद्रयामले–

'स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत् ।
शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम् ।।
यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान् ।
तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकम् ।।
सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वा ।।' इति ।

अथ पूजाविधिः । सा च 'जयन्ती' मन्त्रेण नवाक्षरेण वा कार्या । तदुक्तं देवीपुराणे–

'कुर्याद्देव्यास्तु मन्त्रेण पूजां क्षीरघृतादिभिः ।' इत्युक्त्वा–
जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ।
अनेनैव तु मन्त्रेण जपहोमौ तु कारयेत् ।। इति ।

'ॐ दुर्गे दुर्गे रक्षिणि स्वाहा' इति नवाक्षरः । तत्र प्रतिपदि प्रातरभ्यङ्गं कृत्वा देशकालौ संकीर्त्य ममेह जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्थापनं दुर्गापूजा कुमारीपूजादि करिष्ये । इति संकल्प्य--'महीद्यौरिति' भूमिं स्पृष्ट्वा, 'ओषधयः समिति' यवान्निक्षिप्य कुम्भं संस्थाप्य, 'इमं मे गङ्गे' इति जलेनापूर्य, 'गन्ध द्वारामिति' गंधम्, 'या ओषधीरिति' सर्वोषधीः, 'काण्डात्काण्डादिति' दूर्वा, 'अश्वत्थेव' इति पञ्चपल्लवान्, 'स्योनापृथिवी' रिति सप्तमृदः, 'याःफलिनी' रिति फलम्, 'परिवाजपति' रिति पञ्चरत्नानि हिरण्यं च क्षिप्त्वा 'युवाः सुवासाः' इति वस्त्रेणावेष्टय, 'पूर्णादर्वीति' पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत् । तद्यथा– पूर्वोक्तमन्त्रमुक्त्वा ।

आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ।
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ।
इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥
दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥

इत्यावाह्य पूर्वोक्तमन्त्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कूष्माण्डादिबलिं क्षत्रियादिश्छागादिबलिं निवेदयेत् ।

ततः कुमारीपूजा । तदुक्तं स्कान्दे–

'एकैकां पूजयेत्कन्यामेकवृद्धया तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तु वा ॥'

तथा– 'नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु ।
एकवृद्धया लभेत्क्षेममेकैकेन श्रियं लभेत् ॥
एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥

तेन द्विवर्षमारभ्य दशवर्षपर्यन्ता एव पूज्याः । तासां च क्रमेण– कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या ।

मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥ इति ।
'एवमभ्यर्चनं कुर्यात् कुमारीणां प्रयत्नतः ।
कंचुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ।'

तथा– 'ग्रन्थिस्फुटितशीर्णाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरां काणां कुरूपां तनुरोमशाम् ॥

संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ।'
तथा– 'ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ।।
दारुणे चान्त्यजातीनां पूजयेद्विधिना नरः ।' इति ।

अत्र वेदपारायणमप्युक्तं रुद्रयामले–

'एवं चतुर्वेदविदो विप्रान्सर्वान् प्रसादयेत् ।
तेषां च वरणं कार्यं वेदपारायणाय वै ।।' इति ।

तथा– 'एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ।।

तिथितत्त्वे, वाराहीतन्त्रे–

'प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ।।
आधारे स्थापयित्वा तु पुस्तकं प्रजयेत्सुधीः ।
हस्तसंस्थापनादेव यस्माद्वै विफलं भवेत् ।।
स्वयं च लिखितं यच्च शूद्रेण लिखितं भवेत् ।
अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ।।
ऋषिच्छन्दादिकं यस्य पठेत्स्तोत्रं विचक्षणः ।
स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत् ।।
सर्वत्र पाठो विज्ञेयस्त्वन्यथा विफलं भवेत् ।'

एवं नवमीपर्यन्तं प्रत्यहं कुर्यात् । तत्र विशेषो देवीपुराणे–

'यदाद्ये दिवसे कुर्याच्चण्डिकापूजनादिकम् ।
द्विगुणं तद्द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ।।
नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।।' इति ।

एतेन नवरात्रे पूजैव प्रधानमुपवासादित्वङ्गमिति गम्यते । तिथिह्रासे तु तिथिद्वयनिमित्तं पूजादि महालयश्राद्धवदेकदिने आवृत्या कार्यम् । वृद्धौ तद्वदेवावृत्तिः । ततो नवरात्रोपवासादिसङ्कल्पं कुर्यात् ।

सङ्कल्पविशेषो दुर्गोत्सवे । स्वस्याशक्तावन्येन वा पूजादि कारयेत्–

'स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा' इति देवीपुराणात् ।

इदं च देवीपूजनं शुक्रास्तादावपि कार्यम् । तदुक्तं धर्मप्रदीपे–

'नष्टे शुक्रेऽथवा जीवे सिंहस्थे च बृहस्पतौ ।
कार्या चैव स्वदेव्यर्चा प्रत्यब्दं कुलधर्मतः ।।' इति ।

अत्राश्वपूजनमुक्तं देवीपुराणे–

'आश्वयुक् शुक्लप्रतिपत् स्वातीयोगे शुभे दिने ।
पूर्वमुच्चैःश्रवा नाम प्रथमं श्रियमावहेत् ।।
तस्मात्साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयास्तु तुरगा नवमीं यावदेव हि ।।
शान्तिः स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचा सिद्धार्थकास्तथा ।।
पञ्चवर्णेन सूत्रेण ग्रन्थि तेषां तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शाक्तैर्मन्त्रैः सवैष्णवैः ।।
वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ।'

कल्पतरौ–

'ज्येष्ठायोगे पुरा तत्र गजा चाष्टौ महाबलाः ।
पृथिवीमवहन्पूर्वं सशैलवनकाननाम् ।।'
कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्ताँस्तत्र पूजयेत् ।।
शक्रादृक्षात्समारभ्य नवम्यन्तं च पूर्ववत् ।'
अश्ववद्धोमादीत्यर्थः ।

अथ प्रतिपदादिषु विशेषो भविष्ये–

'केशसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने ।
पक्वं तैलं द्वितीयायां केशसंयमहेतवे ।।' पट्टदोरमिति गौडः पाठः ।

दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा ।
मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमण्डनम् ।।
पञ्चम्यामङ्गरागं च शक्त्याऽलङ्करणानि च ।
षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ।
उपोषणमथाष्टम्यामात्मशक्त्या च पूजनम् ।।
नवम्यामुग्रचण्डायाः पूजां कुर्याद्बलिं तथा ।
संपूज्य प्रेषणं कुर्याद्दशम्यां शारदोत्सवैः ।।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत्पालयेद्देवी तं पुत्रं धनकीर्तिभिः ।।'

लैङ्गे– 'कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽपि च ।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ।।

शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोचनम् ।
प्रातरेव तु पञ्चम्यां स्नापयेत्सुशुभैर्जलैः ।।

षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।
सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।।

पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ।
विसर्जनं दशम्यां तु क्रीडाकौतुकमङ्गलैः ।।'

अथाशौचे विशेषः–

'आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ।
शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः ।।

सूतके वर्तमाने च तत्रोत्पन्ने सदा बुधैः ।
देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः ।।

सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते ।।'

विष्णुरहस्येऽपि–

'पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितम् ।।' इति । तिथितत्त्वेऽप्युक्तम् । 'आश्विनकृष्णनवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि वैकं कर्म' । अतश्च मध्ये आशौचपातेऽपि न दोषः । 'सङ्कल्पो व्रतसत्रयोः' इति विष्णूक्तेः । आरब्धं स्वयमेव कार्यम् । अनारब्धं त्वन्येन कारयेदिति दिवोदासः । रजस्वला त्वन्येन कारयेत् । सूतकादिवद्विशेषवचनाभावात् । स्त्रीणां च नवरात्रे ताम्बूलादिचर्वणं भवति । तदुक्तम् गारुडे–

'गन्धालङ्कारताम्बूलपुष्पमालानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ।।' इति ।

एतत्सभर्तृकोपवासविषयम् ।

आश्विनशुक्लपञ्चम्यां ललिताव्रतम् । तत्र यद्यपि कथायां कालविशेषो नोक्तस्तथापि–

'रात्रौ जागरणं कुर्याद्गीतवादित्रनिःस्वनैः।' इति रात्रौ जागरोक्तेः । शक्तिपूजाया रात्रौ प्राशस्त्याच्च । रात्रिव्यापिनी ग्राह्येति केचित् । वस्तुतस्तु वचनं विना रात्रिपूजायां मानाभावात् । जागरस्य चाङ्गत्वात् युग्मवाक्याच्च ।

'भुक्त्वा जागरणे नक्ते चन्द्राद्यर्घव्रते तथा ।
ताराव्रतेषु सर्वेषु रात्रियोगो विशिष्यते ।।

इति कालहेमाद्रौ वचनाच्च पूर्वविद्धा ग्राह्या । रात्रिशब्दः पूर्वविद्धावचन इति हेमाद्रिः ।

आश्विनशुक्लपक्षे मूलनक्षत्रे सरस्वतीस्थापनं देवीपुराणे–

'मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम् ।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत् ।।' इति ।

रुद्रयामलेऽपि–

'मूलऋक्षे सुराधीश ! पूजनीया सरस्वती ।
पूजयेत्प्रत्यहं देव ! यावद्वैष्णवमृक्षकम् ।।
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देव ! विद्याकामो द्विजोत्तमः ।।'

मूलस्याद्यपादे आवाहनमिति शिष्टाः । श्रवणाद्यपादे च विसर्जयेत् ।

'आदिभागो निशायां तु श्रवणस्य यदा भवेत् ।
संप्रेषणं तदा देव्या दशम्यां च महोत्सवः ।।' इति ब्रह्माण्डपुराणात् ।

अथ षष्ठी । देवीपुराणे–

'ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ।।
पूर्वाषाढयुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम् ।।
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् ।'

कालिकापुराणे– 'बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत् ।।
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ।।
प्रभूतबलिदानं तु नवम्यां विधिवच्चरेत् ।
विसर्जनं दशम्यां तु कुर्याद्वै शारदोत्सवैः ।।
धूलीकर्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ।।'

अत्र सर्वं तिथिनक्षत्रयोगादरो मुख्यः कल्पः । तदभावे तु तिथिरेव ग्राह्या ।

'तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ।। इति देवलोक्तेः ।

अत्र च पत्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यभावे पूर्वदिनेऽधिवासनं कार्यम् । सायंकालेऽत्यन्तासत्वे त्वधिवासनलोपः ।

'षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।' इति पूर्ववचनादिति कल्पतरुः । सायं श्रुतिः फलातिशयमात्रार्था न तु कर्मलोप इत्याचार्यचूडामणिः ।

अत्र क्रमः । बिल्वसमीपं गत्वा देवीं बिल्वं च संपूज्य प्रार्थयेत् । तत्र मन्त्रः –

रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः ।
श्रीशैलशिखरे जात ! श्रीफल ! श्रीनिकेतन ! ॥
नेतव्योऽसि मयाऽऽगच्छ पूज्यो दुर्गास्वरूपतः । इति ।

एवमधिवास्य परदिने निमन्त्रितबिल्वशाखापत्रीप्रवेशपूजां कुर्यात् । तदुक्तं लैङ्गे– 'मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् ।
युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा ॥
तथैव प्रतिमां देव्याः स्नात्वाऽभ्युक्ष्य प्रवेशयेत् ।'

अत्र चोपवासपूजादावौदयिकी सप्तमी ग्राह्या । न तु युग्मवाक्यात्पूर्वा ।

'युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥' इति वचनात् ।
'भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः ॥' इति नन्दिकेश्वरपुराणाच्च । तत्रापि घटिकातो न्यूनत्वे परा न कार्या ।

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।' इति देवलोक्तेः ।

पत्रिकास्तु–

'रंभा कच्ची हरिद्रा च जयन्ती बिल्वदाडिमौ ।
अशोको मानवृक्षश्च धान्यादि नवपत्रिकाः ॥' इति ।

अस्यामेव सप्तम्यां देवीत्रिरात्रमाह धौम्यः –

'आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥

त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् ।'

देवीपुराणे– 'आश्विने चाथ माघे वा चैत्रे वा श्रावणेऽपि वा ।
कृष्णाष्टम्यादि कर्तव्यं व्रतं शुक्लादिकं हरे ! ।
यावच्छुक्लाष्टमीं शक्र ! उपोष्य तु विधानतः ।।
दानं होमो जपः पूजा कन्याभोज्यास्तथाऽन्वहम् ।
महाभैरवरूपेण अस्थिमालाधराश्च ये ।।
पूजनीया विशेषेण वस्त्रैर्ग्रामपुरादिषु ।।' इति मासचतुष्टयेऽभिधाय–
'अथवा नवरात्रं च सप्त पञ्च त्रिकं दिवा ।
एकभक्तेन नक्तेनाऽयाचितोपोषितैः क्रमात् ।।
पूजयीताऽऽश्विने शक्र ! यावच्छुक्लाष्टमी भवेत् ।
सर्वकार्याणि सिध्यन्ति शक्र ! नास्त्यत्र संशयः ।।'
दिवेत्येकरात्रमुक्तम् ।
'नवरात्रव्रते शक्र ! त्रिरात्रं चैकरात्रकम् ।
व्रतं चरति यो भक्तस्तस्मै दास्यामि वाञ्छितम् ।।' इति ।

अत्र विशेषो भविष्ये–
'सप्तम्यां नव गेहानि दारुजानि नवानि च ।
एकं वा वित्तभावेन कारयेत्सुसमाहितः ।।
दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनम् ।
तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभाम् ।।
तस्यां सिंहासनं क्षौमकम्बलाजिनसंयुतम् ।
तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम् ।।
भुजैश्चतुर्भी रुचिरैर्दशभिर्वा विभूषिताम् ।
तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम् ।।
अनेककुसुमाकीर्णां कपर्देन सुशोभिताम् ।
नितम्बबिम्बसन्नद्धकिङ्किणीक्वाणनादिनीम् ।।

शूलचक्रदण्डशक्तिवज्रचापासिधारिणीम् ।
घण्टाक्षमालाकरकपानपात्रलसत्कराम् ।।
तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतम् ।
निःसृतार्धतनुं कण्ठनाले चर्मासिधारिणम् ।।
देवीधृतकरग्रीवं शूलेनोरसि ताडितम् ।
नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्रुतम् ।।
वमद्रुधिरवक्त्रेण धुन्वतोर्ध्वसटान् रुषा ।
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा ।।' इति ।
'तत्र देवी प्रकर्तव्या हैमी वा राजती तथा ।
मृद्वार्क्षी लक्षणोपेता खड्गशूले प्रपूजयेत् ।।' वार्क्षी दारुमयी ।

देवीमूर्तिस्थापने विशेषो देवीपुराणे–

'याम्याऽऽस्या शुभदा दुर्गा पूर्वाऽऽस्या जयवर्धिनी ।
पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्यदिङ्मुखी ।।'

प्रतिमाभावे विशेषस्तत्रैव–

'हेमराजतमृद्धातुशैलचित्राऽर्पितापि वा ।
खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा ।।
यद्यद्यस्यायुधं प्रोक्तं तस्मिंस्तां प्रतिपूजयेत् ।
देवी भक्त्याऽर्चिता पुंसां राज्यायुः सुखसौख्यदा ।।'

कालिकापुराणे–

'लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।।
चित्रे च विशिखे खड्गे जलस्थां वापि पूजयेत् ।
बिल्वपत्रैर्यजेद्देवीं तथा जातीप्रसूनकैः ।।
नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः ।
भगलिङ्गाभिधानैश्च भगलिङ्गप्रमीतकैः ।।

भगलिङ्गक्रियाभिश्च प्रीणयेद्वरचण्डिकाम् ।
परैर्नाक्षिप्यते यस्तु यः परान्नाक्षिपत्यपि ।।
तस्य क्रुद्धा भगवति शापं दद्यात्सुदारुणम् ।।'

चित्रमृन्मय्यादौ स्नानाद्यसम्भवे तत्रैवोक्तम्–

'अन्तिकस्थापिते खड्गे स्नापयेद्दर्पणेऽथवा' इति ।

अथ सप्तमीपूजाविधिः ।

प्रतिपद्युक्तविधिना फलसंकीर्तनान्ते नवपत्रिकामृन्मयदुर्गापूजाबलिदानानि करिष्ये । इति सङ्कल्प्य पूर्वनिमन्त्रितबिल्वसमीपं गत्वा । संपूज्य– 'आगच्छ सर्वकल्याणी'ति मन्त्रं पठित्वा–

बिल्ववृक्ष ! महाभाग ! सदा त्वं शङ्करप्रियः ।
गृहीत्वा तव शाखां च देवीपूजां करोम्यहम् ।।
शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ! ।
गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः ।।
उत्तिष्ठ पत्रिके देवी सर्वकल्याणहेतवे ।
पूजां गृहाण सकलमस्माकं वरदा भव ।।
मेरुमन्दरकैलाशहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष ! त्वमम्बिकायाः सदा प्रियः ।।

इति संप्रार्थ्य– 'ॐ छिन्धि छिन्धि फट् फट् ॐ हुँ फट् स्वाहा' । इति छित्वा संपूज्य– 'ॐ चामुण्डे ! चल चल' इति वाद्यघोषेण देवीं तां च गृहे प्रवेश्य–

आरोपितासि दुर्गे त्वं मृन्मय्यां श्रीफलेऽपि च ।
स्थिरा नितान्तं भूत्वा च गृहे त्वं कामदा भव ।। इति स्थिरीकृत्य रम्भादिपत्रिकाः पञ्चगव्येन पञ्चामृतेन च स्नापयित्वा वस्त्रेणावेष्ट्य स्थापयेत् । ततः पूर्ववत्सङ्कल्पं कृत्वा अक्षतानादाय देवीमावाहयेत् । तत्र मन्त्रः–

आवाहयाम्यहं देवि ! मृन्मय्यां श्रीफले तथा ।
कैलासशिखराद्देवि ! विन्ध्याद्रेर्हिमपर्वतात् ।।

आगत्य बिल्वशाखायां चण्डिके ! कुरु सन्निधिम् ।
स्थापितासि मया दुर्गे पूजये त्वां प्रसीद मे ।।
आयुरारोग्यमैश्वर्यं देहि देवि ! नमोऽस्तु ते ।
दुर्गे दुर्गस्वरूपासि सुरतेजोमयेऽर्चिते ।।
सदानन्दकरे ! देवि ! प्रसीद मम सिद्धये ।
एह्येहि भगवत्यम्ब ! शत्रुक्षयजयप्रदे ! ।।
भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ।
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः ।।
पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ।
दुर्गे ! देवि ! इहागच्छ सान्निध्यमिह कल्पय ।।
यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह ।
इति मूलमन्त्रेण पाद्यादिगन्धोपचारैः संपूज्य-
पल्लवे संस्थिते देवि पूजये त्वां जयप्रदे ।
अमृतोद्भवं श्रीवृक्षं शङ्करस्य सदा प्रियम् ।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि । इति बिल्वपत्रम् ।
ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदाप्रियम् ।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ।। इति द्रोणपुष्पं निवेद्य धूपादि दक्षिणान्तां पूजां मूलेन कृत्वा प्रार्थयेत्-

महिषघ्नि ! महामाये ! चामुण्डे ! मुण्डमालिनि ! ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ।।
कुङ्कुमेन समालब्धे चन्दनेन विलेपिते ।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः ।।
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान्कामाँश्च देहि मे ।

'सर्वमङ्गलमाङ्गल्ये' इति च संप्रार्थ्य पत्रिकाः पूजयेत् । कदल्यां ब्रह्माणीं, दाडिमे रक्तदन्तिकां, धान्ये लक्ष्मीं, हरिद्रायां दुर्गां,

मानके चामुण्डां, कच्चौ कालिकां, बिल्वे शिवां, अशोके शोकरहितां, जयन्त्यां कार्तिकीम् आवाह्य संपूज्य दुर्गायै बलिं दद्यात् । अस्त्रशस्त्रादिपूजा वक्ष्यते । ततः स्तुतिं पठेत् । तदुक्तं शिवरहस्ये—

दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवाम् ।।
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।।
सर्वदेवमयीं देवीं सर्वरोगभयापहाम् ।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम् ।।
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थानविलासिनीम् ।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम् ।।
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ।।
य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह ।।

अथ महाष्टमी । सा च परयुता—

'शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ।।' इति ब्रह्मवैवर्तात् ।

स्मृतिसङ्ग्रहे— 'शरन्महाष्टमी पूज्या नवमी संयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ।।
जंभेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।' जम्भेन—असुरेण ।
इन्द्रेण निहतो जम्भो यस्माद्दानवपुङ्गवः ।
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी ।।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः ।
सप्तमीशल्यसंयुक्तां मोहादज्ञानतोऽपि वा ।।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ।

सप्तमीकलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ।'

तथा– 'पुत्रान् हन्ति पशून् हन्ति हन्ति राष्ट्रं सराजकम् ।
हन्ति जातानजातांश्च सप्तमीसहिताष्टमी ।।'

तेन नात्र त्रिमुहूर्तवेधाः । तदा घटिकामात्राप्यौदयिकी ग्राह्या ।

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।'

इति देवलोक्तेः । इयं भौमेऽतिप्रशस्ता–

'अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ।।' इति वचनात् ।

इयमेव मूलयुक्ता चेन्महानवमी संज्ञा–

'आश्वयुक् शुक्लपक्षे याऽष्टमी मूलेन संयुता ।
सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ।।' इति स्कान्दात् ।

मूलयुक्ता तु सप्तमीयुता त्याज्यैवेत्युक्तं दुर्गोत्सवे–

'मूलेनापि हि संयुक्ता सदा त्याज्याऽष्टमी बुधैः ।
लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता ।।' इति ।

देवीपुराणे– 'सप्तमी वेधसंयुक्ता यैः कृता तु महाष्टमी ।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ।।'

यत्तु– 'सप्तम्यामुदिते सूर्ये परतो याऽष्टमी भवेत् ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ।।' इति विश्वरूपनिबन्धवचनं तदाश्विनकृष्णाष्टमीविषयम् ।

'कन्यायां कृष्णपक्षे तु पूजयित्वाऽष्टमीदिने ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः ।।' इति देवीपुराणे ।

तत्रापि पूजोक्तेरिति हेमाद्रौ । यानि तु–

'भद्रायां भद्रकाल्याश्च मध्ये स्यादर्चनक्रिया ।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः ।।' इति ।

यच्च ब्राह्मे— 'आश्विनस्य सिताष्टम्यामर्द्धरात्रे तु पार्वती ।
भद्रकाली समुत्पन्ना पूर्वाषाढासमायुता ।।' इति ।

तथा— 'तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ।।'

यच्च— 'महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेन तु विशेषतः ।।' इति ।

तानि परदिनेऽष्टम्यभावविषयाणीति । यत्तु तत्रैव परदिनेऽष्टमीसत्वेऽपि पूर्वविधायकं वचनम्—

'यदाष्टमीं तु संप्राप्य ह्यस्तं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ।।
दुर्भिक्षं तत्र जानीयान्नवम्यां यत्र पूज्यते ।' इति । तत्परदिने दशम्यां नवम्यभावविषयम् ।

'यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्यासहितां नृप ! ।।' इति स्मृतिसङ्ग्रहोक्तेः ।

'उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप ! ।
पूर्वाष्टमीं तदा कुर्यादन्यथा त्वशुभं भवेत् ।।' इति दुर्गोत्सवोक्तेश्चेति । इदं वचनद्वयं च ।

'अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहम् ।।' इति देवीपुराणे तद्विष्टिकरणमध्ये पूजाविधानार्थम् ।

'विष्टि त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात्तेनाहमवमानिता ।।' इति तत्रैवोक्तेः ।

कालिकापुराणे—

'सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ।।' इति ।

अष्टम्युपवासश्च पुत्रवता न कार्यः–
'उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत् ।।' इति तत्रैवोक्तेः ।
ब्राह्मे– 'अत्यर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।
उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः ।।
पशुभिः पानकैर्हृद्यै रात्रौ जागरणेन च ।
दुर्गागृहे च शस्त्राणि पूजितव्यानि पण्डितैः ।।
वाद्यभाण्डानि चिह्नानि कवचान्यायुधानि च ।'
भविष्ये–
'आश्वयुक् शुक्लपक्षस्य अष्टमी मूलसंयुता
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ।।
कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ।।
नवम्यां पूजिता देवी ददात्यभिमतं फलम् ।
सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी ।।
तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनी ।। सदेत्युक्तेर्नित्यतापि ।
तस्यां ये ह्युपयुज्यन्ते प्राणिनो महिषादयः ।
सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते ।।
यावन्न चालयेद्गात्रं पशुस्तावन्न हन्यते ।
न तथा बलिदानेन पुष्पधूपविलेपनैः ।।
यथा सन्तुष्यते मेषैर्महिषैर्विन्ध्यवासिनी ।
एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।।
एकभक्तेन नक्तेन स्वशक्त्याऽयाचितेन च ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।।
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ।।

स्त्रीभिश्च कुरुशार्दूल ! तद्विधानमिदं शृणु ।
जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।।
लौहाभिसारिकं कर्म कारयेद्यावदष्टमी ।' इति ।

लौहाभिसारिकं विधानं तत्रैवोक्तम् –

'प्रागुदक्प्रवणे देशे पताकाभिरलङ्कृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं परम् ।। शोडशहस्तप्रमाणमित्यर्थः।
आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया ।।
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्यत्राधिवासयेत् ।।
ततस्तु ब्राह्मणः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद्घृतम् ।।
शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ।
हुतशेषं तुरङ्गाणां राजानमुपहारयेत् ।।
लौहाभिसारिकं कर्म तेनैतदृषिभिः स्मृतम् ।
धृतपल्ययनानश्वान् गजाँश्च समलङ्कृतान् ।।
भ्रामयेन्नगरे नित्यं वन्दिघोषपुरः सरम् ।
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ।।
पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ।
तस्याभिसरणाद्राज्ञो विजयः समुदाहृतः ।।
पूजामन्त्रान् प्रवक्ष्यामि पुराणोक्तानहं तव ।
यैः पूजिताः प्रयच्छन्ति कीर्त्तिमायुर्यशोबलम् ।।'

अथ मन्त्रा विष्णुधर्मोक्ताः–

छत्रस्य– यथाम्बुदश्छादयति शिवायेमां वसुन्धराम् ।
तथा छादय राजानं विजयारोग्यवृद्धये ।।

चामरस्य– शशाङ्ककरसंकाश ! क्षीरडिण्डिरपाण्डुर ! ।
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ! ।।
अश्वस्य– गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ।।
प्रभावाच्च हुताशस्य वर्धय त्वं तुरङ्गमान् ।
तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ।।
रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ।
स्मर त्वं राजपुत्रं त्वं कौस्तुभं च मणिं स्मर ।
यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ।
भ्रूणहानृतवादी च क्षत्रियश्च पराङ्मुखः ।।
सूर्याचन्द्रमसौ वायुर्यावत्पश्यन्ति दुष्कृतम् ।
व्रजाश्व ! तां गतिं क्षिप्रं तच्च पापं भवेत्तव ।।
निष्कृतो यदि वा छिन्नो युद्धाऽध्वनि तुरङ्गम ।
रिपून् विजित्य समरे सह भर्त्रा सुखीभव ।। इति ।
ध्वजस्य– शक्रकेतो ! महावीर्य! श्यामवर्णार्चयाम्यहम् ।
पत्रिराज ! नमस्तेऽस्तु तथा नारायणध्वज ! ।।
काश्यपेयारुणभ्रातर्नागारे ! विष्णुवाहन! ।
अप्रमेय! दुराधर्ष ! रणे देवारिसूदन ! ।।
गरुत्मान्मारुतगतिस्त्वयि सन्निहितो यतः ।
सारवन्त्यायुधान्यत्र रक्ष त्वं च रिपून् दह ।।
पताकायाः– हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः ।
नागकिन्नरगन्धर्वयक्षभूतगणग्रहाः ।।

प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह ।
शक्रः सेनापतिः स्कन्दो वरुणश्चाऽऽश्रितस्त्वयि ।।
प्रदहन्तु रिपून् सर्वान् राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिरायुधानि समन्ततः ।।

पतन्तूपरि शत्रूणां हतानि तव तेजसा ।
हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा ।।
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ।
शोभितासि तथैवाद्य शोभय त्वं च नः स्मर ।।
नीलान् श्वेतानिमान् दृष्ट्वा नश्यन्त्वाशु नृपारयः ।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ।।
पूतना रेवती नाम्ना कालरात्रिश्च या स्मृता ।
दहन्त्वाशु रिपून् सर्वान् पताके ! त्वं मयाऽर्चिता ।
गजस्य– कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ।।
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
मद्रो भद्रो मृगश्चैव गजः सङ्कीर्ण एव च ।।
वने वने प्रसूतास्ते यूथानि सुमहान्ति च ।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ।।

भर्तारं रक्ष नागेन्द्र स्वामिवत्प्रतिपाल्यताम् ।
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ।।
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवोऽनिलात् ।
स्थैर्यं मेरोर्जयं रुद्राद्यशो देवात्पुरन्दरात् ।।
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ।
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ।। इति ।
खड्गमन्त्रः– असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ।।
एतानि तव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ।।
रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः ।
पिता पितामहो देवस्त्वं च पालय सर्वदा ।।

नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ।।
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ।।
छुरिकायाः– सर्वायुधानां प्रथमं निर्मितासि पिनाकिना ।
शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ।।
चण्डिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणी ।
तया विस्तारिता चासि देवानां प्रतिपादिता ।।

सर्वसत्त्वाङ्गभूतानि सर्वाशुभनिबर्हिणी ।
छुरिके रक्ष मां नित्यं शान्ति यच्छ नमोऽस्तु ते ।।
कट्टारकपूजा– रक्षाङ्गानि गजान् रक्ष रक्ष वाजिधनानि च ।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ।।
धनुःपूजा– सर्वायुध महामात्र! सर्वदेवारिसूदन ! ।
चाप ! मां समरे रक्ष साकं शरवरैरिह ।।

धृतं कृष्णेन रक्षार्थं संहाराय हरेण च ।
त्रयीमूर्तिगतं देव ! धनुरस्त्रं नमाम्यहम् ।।
कुन्तपूजा– प्राश पातय शत्रूँस्त्वमनया नाकमायया ।
गृहाण जीवितं तेषां मम सैन्यं च रक्षताम् ।।
वर्मपूजा– शर्मप्रदस्त्वं समरे वर्म सैन्ये यशोद्यमे ।
रक्ष मां रक्षणीयोऽहं तापनेय ! नमोऽस्तु ते ।।
प्रोत्सारणाय दुष्टानां साधूनां रक्षणाय च ।

कनकदण्डमन्त्रः–

ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ।।
यशो देहि सुखं देहि जयदो भव भूपतेः ।
ताडयस्व रिपून्सर्वान् हेमदण्ड नमोऽस्तु ते ।।

दुन्दुभिमन्त्रः– दुन्दुभे त्वं सपत्नानां घोरो हृदयकम्पनः ।
भव भूमिपसैन्यानां तथा विजयवर्द्धनः ।।
यथा जीमूतघोषेण प्रहृष्यन्ति च बर्हिणः ।
तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ।।
यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ।
तथात्र तव शब्देन त्रस्यन्त्वस्मद्द्विषो रणे ।।
शङ्खमन्त्रः– पुण्यस्त्वं पुण्यशङ्खानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतः शान्तिप्रदो भव ।।
सिंहासनमन्त्रः– विजयो जयदो जेता रिपुघाती शुभङ्करः ।
दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशनः ।।
एते वै सन्निधौ यस्मात्तव सिंहा महाबलाः ।
तेन सिंहासनेति त्वं वेदैर्मन्त्रैश्च गीयसे ।।
त्वयि स्थितः शिवः शान्तस्त्वयि शक्रः सुरेश्वरः ।
नमस्ते सर्वतोभद्र ! भद्रदो भव भूपतेः ।
त्रैलोक्यजयसर्वस्व ! सिंहासन ! नमोऽस्तु ते । इति ।
तथैव कर्मचिह्नानि यानि पूज्यानि शिल्पिभिः ।।
लोहाभिसारिकं कर्म कृत्वैवं मन्त्रपूर्वकम् ।
नियमं च तथाष्टम्यां पूवाह्ले स्नानमाचरेत् ।।
कुङ्कुमचन्दनचंपकचतुःसमैः शैलपिष्टैश्च ।
चर्चितगात्रां देवीं कुसुमैरभ्यर्चयेद्बहुभिः ।।
कुमुदैः सपद्मपुष्पैः सधूपदीपैः सनैवेद्यैः ।
मांसैर्बल्युपहारैर्मङ्गलशब्दैः समुच्छलितैः ।।
विहितच्छत्रैर्यानैः स्यन्दनशितशस्त्रधारिजनलोकैः ।
तुष्टैः पश्वस्त्रादि तु निवेद्यते सर्वमेव भगवत्यै ।।
दुर्गा सा पूजनीया च तद्दिने द्रोणपुष्पकैः ।
ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये ।।

इच्छेत विजयं राज्यं सुभिक्षं चात्मनो नृपः ।
पुनः पुनः प्रणम्यार्यां संस्मरन् हृदये शिवाम् ।।
सर्वं कृत्वेति कौरव्य ! अष्टम्यां जागरं निशि ।
नटनर्तकगीतैश्च कारयेच्च महोत्सवम् ।।
एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये ।
घातयेन्महिषान्मेषानग्रतो नतकन्धरान् ।।
शतमर्धशतं वापि तदर्धं वा यथेच्छया ।
सुरासवभृतैः कुम्भैस्तर्पयेत्परमेश्वरीम् ।।
कापालिकेभ्यस्तद्देयं दासी दासजने तथा ।
ततोऽपराह्णसमये नवम्यां वै रथे स्थिताम् ।।
भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा सशब्दवान् ।
कश्चिच्चोपोषितो वीरो विधृतोऽन्येन खड्गवान् ।।
भूतेभ्यस्तु बलिं दद्यान्मन्त्रेणानेन सामिषम् ।
सरक्तं सजलं चान्नं गन्धपुष्पाक्षतैर्युतम् ।।
त्रींस्त्रीन्वारान्समूलेन दिग्विदिक्षु बलिं किरेत् ।
मन्त्रश्च– बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा ।।
मरुतश्चाश्विनौ रुद्राः सुवर्णाः पन्नगा ग्रहाः ।
असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।।
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ।
जंभकाः सिद्धगन्धर्वा माला विद्याधरा नगाः ।।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ।
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ।
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ।।
इति महाष्टमीपूजाविधिः ।

अथ महानवमी ।

महानवमी तु पूर्वयुता ग्राह्या--

'श्रावणी दुर्गनवमी पूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ।।' इति पाद्मोक्तेः ।

भविष्येऽपि– 'आश्वयुक्शुक्लपक्षे तु अष्टमी मूलसंयुता ।
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ।।'इति । मूलमुपलक्षणम् ।

'दुर्गापूजासु नवमी मूलाद्यृक्षसमन्विता ।
महती कीर्तिता तस्यां दुर्गां महिषमर्दिनीम् ।।' इति लैङ्गात् ।

अत्र पूजयेदित्यग्रे शेषः । यानि तु–

'सा कार्योदयगामिन्यां' 'तिथावुदयगामिन्या' मित्यादि प्रागुक्तानि तानि नवमीभिन्नतिथिपराणि । नवम्यां विशेषोक्तेः । वेधश्च मुहूर्तत्रयेणैव ज्ञेयः । यद्यपि हेमाद्रिमते मुहूर्तद्वयात्मापि वेधोऽस्ति तथाप्युदय एव । सायं तु त्रिमुहूर्त एव ।

'सायं तूत्तरया तद्वन्न्यूनया तु न विध्यते' इति माधवोक्तेः । तेन त्रिमुहूर्तयोगे पूर्वा नवमी । पूर्वोक्तवचनात् ।

'न कुर्यान्नवमीं तात दशम्यां तु कदाचन ।' इति स्कान्दे परानिषेधाच्च । त्रिमुहूर्तगाभावे च निषिद्धापि परैव कार्येति । यत्तु– 'नवम्यां च जपं होमं समाप्य श्रवणेऽपि च' इति संग्रहोक्तेः ।

'व्रतं च जागरश्चैव नवम्यां विधिवद्बलिः' इति देवीपुराणाच्च नवम्यां होमबल्यादि विहितम् । तत्र–

'आश्वयुक् शुक्लनवमी मुहुर्तं वा कला यदि ।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ।।' इति सौरपुराणात् ।

'सूर्योदये परं रिक्ता पूर्णा स्यादपरा यदि ।
बलिदानं प्रकर्तव्यं तत्र देशः शुभावहः ।।
बलिदाने कृतेऽष्टम्यां पुत्रभङ्गो भवेन्नृप ! ।' इति मदनरत्ने देवीपुराणाच्च बल्यादौ परा कार्या । उपवासादौ तु पूर्वेति मदनरत्ने उक्तम् ।

यत्तु–

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद्ध्रुवम्' ।

इति कालिकापुराणं तत्सन्धिपूजापरम् ।

'अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते' इति तत्रैवोक्तेः ।

कामरूपनिबन्धे–

'अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ।।' अष्टमीप्रान्ते भवत्येव ।

'आश्विने पूजयित्वा तु अर्धरात्रेऽष्टमीषु च ।
घातयन्ति पशून्भक्तया ते भवन्ति महाबलाः ।।'

तथा– 'कन्यासंस्थे रवावीषे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्धे तु महाविभवविस्तरैः ।।'

तथा– 'पशुघातश्च कर्तव्यो गवयाजवधस्तथा ।' इति देवीपुराणात् ।

भविष्ये– 'तस्मादियं महापुण्या नवमी पापनाशिनी ।
उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः ।।'

यानि तु– 'नन्दायां ज्वलयेद्वह्निं पूर्णायां पशुघातनम् ।
भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यति ।।' इति ।

'नवम्यामपराह्णे तु बलिदानं प्रशस्यते ।
दशमीं वर्जयेत्तत्र नात्र कार्या विचारणा ।।' इति ।

'नन्दाया दर्शने रक्षा बलिदानं दशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते ।।' इति ब्रह्मवैवर्तनारदादिवचनानि तानि शुद्धाधिकनिषेधपराणीति मदनरत्ने ।

तथा कालिका पुराणे–

'नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि ।
जपं होमं च विधिवत्कुर्यात्तत्र विभूतये ।।'

केचित्तु– 'पूर्वाषाढायुताष्टम्यां पूजा होमाद्युपोषणम् ।' इति पूर्वोक्तदेवीपुराणादष्टम्यां होममाहुः । अन्ये तु द्विविधवाक्यवशादष्टम्यामारभ्य

नवम्यां समापयन्ति । गौडग्रन्थेष्वपि नवम्यां होम उक्तः । होमे च विशेष उक्तो डामरतन्त्रे–

'पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम् ।
होमयेद्विविधद्भक्तया दशांशेन नृपोत्तम ।।
रुद्राध्याये यथा होमं मन्त्रेणैकेन साधयेत् ।
तथा स्तोत्रजपे होमं श्लोकेनैकेन साधयेत् ।।'

रुद्रयामलेऽपि– 'प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा ।
किंशुकैः सर्षपैः पूगैर्लाजादूर्वाङ्कुरैरपि ।
यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा ।
रक्तचन्दनखण्डैश्च गुग्गुलैश्च मनोहरैः ।।
प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात् ।
नवाक्षरेण वा हुत्वा नमो देव्या इतीति वा ।।'
'ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे' इति नवाक्षरः ।

रहस्ये तु– 'प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ।' इत्युक्तम् ।

अथ बलिदानम्–

तत्राश्वमेषछागमहिषमांसानामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोऽवसेयः । बलिप्रकारस्तु देवीपुराणे–

'कन्यासंस्थे रवौ शक्र ! शुक्लाष्टम्यां प्रपूज्य तु ।
द्रोणपुष्पैश्च बिल्वाम्रजातीपुन्नागचंपकैः ।।
पञ्चाब्दं लक्षणोपेतं गन्धपुष्पसमन्वितम् ।
विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् ।।'

'ॐकालि कालि यज्ञेश्वरि लोहदण्डायै नमः' इति मन्त्रः । तदुत्पन्नरुधिरमांसं गृहीत्वा पूतनादिषु । आदिशब्दाच्चरकीविदारीपापराक्षस्यः । 'नैर्ऋतेभ्यः प्रदातव्यं महाकौशिकमन्त्रितम्' । मन्त्रस्तु वक्ष्यते ।

तथा– 'तस्याग्रतो नृपः स्नायात्कृत्वा शत्रुं तु पैष्टिकम् ।
खड्गेन घातयित्वा तु दद्यात्स्कन्दविशाखयोः ।।'

ब्राह्मणेन च कुष्माण्डादिभिर्बलिदानं कार्यम् । तदुक्तं कालिकापुराणे–

'कूष्माण्डमिक्षुदण्डं च मांसं सारसमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः स्मृताः ।।'

रुद्रयामलेऽपि– 'छागाभावे तु कूष्माण्डं श्रीफलं वा मनोहरम् ।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना ।।'

तथा– 'ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि ।
श्रीफलं वा सुराधीश छेदं नैव तु कारयेत् ।।' छेदे विकल्पः ।
'माषान्नेन बलिर्देयो ब्राह्मणेन विजानता ।'

कालिकापुराणे–

'उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ।
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ।।

पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ।।

चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु ते ।।

यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ।।

ऐँ ह्रीँ श्रीमिति मन्त्रेण तं बलिं मत्स्वरूपिणम् ।
चिन्तयित्वा न्यसेत्पुष्पं मूर्ध्नि तस्य तु भैरव ।।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ।
ह्रीँ ह्रीँ खड्गेति मन्त्रेण ध्यात्वा खड्गं च पूजयेत् ।।
पूजयित्वा ततः खड्गं ॐहूँफडिति मन्त्रकैः ।
गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमम् ।।
ॐ ह्रीं ऐं ह्रीं कौशिकीति रुधिरेणाप्यायतामिति ।
बलिदाने तु दुर्गायाः सर्वत्रायं विधिः स्मृतः ।।' इति ।

अथ पशुघातविधिः–

तत्रादौ महिषबलिदानम् । स्वयमुत्तराभिमुखः पूर्वाभिमुखं बलिं निरीक्ष्य आदौ महिषस्नानम् । ॐअद्येत्यादि ममैतज्जन्मनि सर्वशत्रुक्षयपूर्वकहर्षविजयकामः कुशजलेन महिषमहं प्रोक्षयिष्ये ।

प्राणिनामुपकारार्थं पशुश्रेष्ठो मयाधुना ।
प्रोक्षितो भवति प्रीत्यै तमेवार्थं च भावय ।।

अथ पशूनामङ्गन्यासः–

शिरसि– रुधिरवदनायै नमः । चक्षुषोः– चन्द्रादित्याभ्यां नमः । मुखे– सरस्वत्यै नमः । पृष्ठे– महाभैरवाय नमः । उदरे– महोदर्य्यै नमः । जङ्घयोः--भैरव्यै नमः । ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वाङ्गाय नमः ।

ततो महिषपूजा– ॐअद्येत्यादि ममैतज्जन्मनि सर्वशत्रुक्षयपूर्वकहर्षविजयकाम एभिरुपचारैर्महिषपूजामहं करिष्ये । इति संकल्प्य पूजां कुर्यात् । ततो गन्धपुष्पाक्षतयुक्तमर्घपात्रमादाय– एतानि पाद्यादीनि महिषाय नमः । गन्धपुष्पाक्षतान् धूपं दीपं नैवेद्यं पृष्ठे वस्त्रं सिन्दूरं बिल्वपत्रमालां दत्त्वा ततः कृताञ्जलिः पठेत्–

ॐपशो त्वं बलिरूपेण ममभाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ।
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमो नमः ।
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः । इति पठित्वा महिषं स्पृष्ट्वा पठेत्–

भानुस्त्वं फेनिलं रक्तं पशोः कण्ठविनिर्गतम् ।
रक्तं पिब महादेवि बलिं गृह्ण नमोऽस्तु ते ।।

ततो महिषमस्तके यवाक्षतान् दत्त्वा ततः सुरयाऽभिषिञ्चेत् ।

ततः प्रार्थना– ॐ मनस्त आप्यायताम्० । अग्निः पशुरासीत्० ।

महिष ! त्वं महावीर ! धर्मराजस्य वाहनम् ।
क्लेशं च रोगनाशं च दुष्कृतं मम खण्डय ।।
महिष ! त्वं महाकाय ! सर्वाभीष्टप्रदायक ! ।
कुमतिं मम पापं च सर्वशत्रूँश्च नाशय ।। इति प्रार्थयित्वा,

'ऐं ह्रीं श्रीं' इति मन्त्रेण सर्वरूपिणो बलेर्मूर्ध्नि पुष्पाञ्जलित्रयेण पूजयेत् । ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि । तन्नः पशुः प्रचोदयात् । धेनुमुद्रया अमृतीकृत्य उत्सृजेत् ।

ततः खड्गपूजा– ॐ अद्यममैतज्जन्मनि सर्वशत्रुक्षयपूर्वकहर्षविजयकामः पञ्चोपचारैः खड्गपूजामहं करिष्ये । खड्गमग्रे स्थापयित्वा ध्यायेत् । ॐ ह्रीँ ह्रीँ खड्गेति ध्यात्वा रिक्ताञ्जलिः पठेत्–

ॐ रसना त्वं चण्डिकायाः सुरलोकप्रदायकः ।
एतत्पाद्यं च खड्गाय रुद्ररूपाय ते नमः ।।

ॐ ह्रीं काली वज्रेश्वरी लोहदण्डायै नमः । एवं पाद्यादिना संपूज्य खड्गं धृत्वा पठेत्–

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ।।
पुरा देवासुरे युद्धे निर्मितोऽसि जयप्रदः ।
खड्गरूप महादेव ! जयं देहि नमोऽस्तु ते ।।

ततः खड्गोत्थापनमन्त्रः–

ॐ कालि ! कालि ! महाकालि ! कालिके ! कालरात्रिके ! ।
माहेश्वरि ! बलिं गृह्ण चण्डिकायै नमो नमः ।।

अथ पाशपूजा– पाशं पाद्यादिभिः पूजयित्वा विधृत्य पठेत्–

पाश ! त्वं वरुणाज्जातः सदा वरुणदैवतः ।
अतस्त्वां पूजयामीह मम शान्ति प्रयच्छ वै ।।

अथ स्तम्भपूजा– स्तम्भं पाद्यादिभिः पूजयित्वा विधृत्य पठेत्–

यथाऽचलो गिरिर्मेरुर्हिमवांश्च यथाऽचलः ।
यथाऽचलास्त्वेते भूमौ तथा त्वमचलो भव ॥

कुशयवजलान्यादाय– अद्येत्यादिदेशकालौ स्मृत्वा मम दुर्गादर्शनाभिनन्दनस्पर्शनाभिपूजनस्नपनतर्पणजनितपुण्यसमफलप्राप्तिकामनया अमुं महिषं यमदैवतं भगवत्यै त्रिपुरसुन्दर्य्यै ॐ ह्लींह्लींह्लौंह्लः हुंफट् घातयिष्ये । ततः मांससहितं रुधिरं गृहीत्वा– ॐ ऐं ह्लीं श्रीं कौशिकी मुण्डेनाप्यायताम् । एवं रक्तसैन्धवकदलीफलकर्पूरघृतकस्तूरीसुगन्धपुष्पसहितं रुधिरं गृहीत्वा– ॐ ऐं ह्लीं श्रीं कौशिकी रुधिरेणाप्यायताम् । ॐ अद्य स्वकुलशतनरकादुद्धरणपूर्वकब्रह्मलोकमहितत्वकामनया एतानि पशुरुधिरमांसानि भगवत्यै दुर्गादेव्यै तुभ्यमहं संप्रददे ।

घोरदंष्ट्रे ! विशालाक्षि ! मद्यमांसबलिप्रिये ! ।
मस्तकं गृह्ण देवि ! त्वं वरं देहि यथेप्सितम् ॥
इति रुधिरदानम् ।

अथ छागोत्सर्गः– बलिं स्नापयित्वा लोहितमाल्येन वेष्टयित्वा प्रोक्षयेत् ।

ॐ स्वयम्भूर्वासुदेवश्च शङ्करश्च महोदयः ।
सदाराश्च सपुत्राश्च सगणाश्च सशक्तयः ॥
प्रोक्षन्तु त्वां पशुश्रेष्ठमेते विश्वासहेतवः ।

ॐ अग्निः पशुरासीत् । वाचं ते शुन्धामि । मनस्त आप्यायताम् । इति मन्त्रैः संप्रोक्ष्य छागं पाद्यादिभिः पूजयित्वा मूलमन्त्रेण पुष्पाञ्जलित्रयं दत्त्वा–

उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ।
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥

छाग ! त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥

चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले ! तुभ्यं नमो नमः ।।
यज्ञार्थे पशवः सृष्टा स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ।।

ॐ ह्रीं श्रीं इति मन्त्रेण बलेर्मूर्धनि पुष्पं दत्त्वा कुशतिलयवजलान्यादाय– ॐ ततसदद्येत्यादि देशकालादि स्मृतवा मम सदारापत्यस्य सकलापत्तिशान्तिनानाविधकल्याणोत्पत्तिदीर्घायुरारोग्यबलपुष्टिराजसंमानप्राप्तिपञ्चविंशतिवर्षावच्छिन्नदुर्गाप्रीतिकामनया ॐ ह्रीं दुर्गायै एष वह्निदैवतश्छागबलिर्दुर्गायै नमः। ततः पशोः कर्णे जपेत्– हिलि हिलि वज्ररूपधरायै हैं हैं इमं पशुं प्रदर्शय मुक्तिं नियोजय नमः स्वाहा ।

ततः खड्गं ध्यातवा पूजयेत्–

कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम् ।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ।।
रक्ताम्बरधरं देवं पाशहस्तं कुटुम्बिनम् ।
पिबमानं च रुधिरं भुञ्जानं द्रव्यसंहतिम् ।। इति ध्यातवा।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ।

ॐ ह्रीं खड्गेति मन्त्रेण खड्गं पाद्यादिभिः पूजयेत् । ॐ काली वज्रेश्वरी लोहदण्डायै नमः ।

संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण खड्गमन्त्राभिमन्त्रयेत् ।।

ॐ ह्रीं ह्रीं कालि ! कालि ! विकटदंष्ट्रे ! स्फुं स्फुं फेत्कारिणि खादय खादय छेदय छेदय सर्वदुष्टान् मारय मारय अमुकं खड्गेन छिन्धि छिन्धि किलि किलि किचि किचि पिब पिब रुधिरं स्फों स्फों किलि किलि कालिकायै नमः। ततः पुष्पाञ्जलिं दद्यात् ।

असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते ।।

पूजयित्वा ततः खड्गं आं हुं फडिति मन्त्रकैः ।
गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमम् ।।

अथ कूष्माण्डबलिदानम् । कूष्माण्डं पाद्यादिभिः पूजयित्वा-- अद्येत्यादि कूष्माण्डाय महामहिषफलरूपाय महाद्भुतदानवाय श्रीदुर्गा त्रिपुरसुन्दरी महाष्टमीनवमीसंयुक्ताय महाकाली शाकम्भरीप्रियाय मम सकलशत्रुदुष्टजनान् भक्षय भक्षय प्रसादं कुरु कुरु मम राष्ट्रं वर्धय वर्धय अनेन कूष्माण्डबलिना महिषमर्दिनी प्रीयताम् । अद्येत्यादि सशैलवनकाननभूदानजन्यफलसमफलप्राप्तिकाम इदं कूष्माण्डं भगवत्यै दुर्गादेव्यै मया दत्तम् ।

ततो बलीनां रुधिरं तोयं सैन्धवसत्फलैः ।
मधुभिर्गन्धपुष्पैश्च अधिवास्य विधानतः ।

छागरुधिरदानम्– अद्य शतवर्षावच्छिन्नदुर्गाप्रीतिकामनया इदं छागरुधिरं भगवत्यै दुर्गादेव्यै मया दत्तम् । ऐं ह्रीं कौशिकी रुधिरेणाप्यायताम् ।

स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्वा बलिं पूर्णं फलं प्राप्नोति साधकः ।।

ततः शोणितं चतुर्धा विभज्य आग्नेये– विदारिकायै नमः । नैर्ऋत्ये– पापराक्षस्यै नमः । वायव्ये– पूतनायै नमः । ईशान्याम्– कालिकायै नमः । बहुछागघाते– एतच्छागसमसंख्यवर्षसहस्रावच्छिन्नदुर्गाप्रीतिकामनया एतान् मेषान् वरुणदैवतान् भगवत्यै दुर्गादेव्यै नमः ।

अथ बलेश्छिन्नशीर्षपातविचारः–

छिन्नं बलेश्च शीर्षं तु पतितं यत्र यत्र च ।
शुभं वा चाऽशुभं वापि पश्वादीनां च तच्छृणु ।।
श्रियं पुष्टि भयं लाभं पुत्रलाभं धनं तथा ।
क्रमाद्बलेर्दिशेद्भावं छिन्नशीर्षं च भैरव ! ।।

उत्तरादिक्क्रमादेव महिषस्यापि मस्तकः ।
पतितो वायुकाष्ठान्तं गदतः शृणु तत्पृथक् ।।
भोग्यं ह्यभिमतैश्वर्यं वित्तं रिपुजयो भयम् ।
राज्यलाभं श्रियं वापि क्रमात्तद्विद्धि भैरव ।।
पशूनां चैव सर्वेषां छागादीनां विशेषतः ।
एवं फलं क्रमाद्विद्याद्भूते जलभवाण्डजौ ।।
जलजानां पक्षिणां तु याम्यनैर्ऋत्ययोर्भयम् ।
अन्यत्र तु श्रियं दद्यात्पतितं पातितं शिरः ।।

ततः स्तूयात्– त्रिनेत्रे ! विकरालास्ये ! मुण्डमालाविभूषिते ! ।
सर्वासुरकृतान्ते ! त्वं खड्गखेटकधारिणि ! ।।
महिषघ्नि ! महामाये ! दैत्यदर्पनिषूदनि ! ।
छागलेन बलिं देवि ! गृहाण हरवल्लभे ! ।।
इमं छागबलिं देवि ! गृहीत्वा कालरात्रिके ! ।
प्रीता भव महाकालि ! रक्ष मां देवि ! चण्डिके ! ।।
दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोकप्रणेत्रीं च प्रणमामि सदा शिवाम् ।।
सर्वदेवमयीं देवीं सर्वलोकभयापहाम् ।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम् ।।
विन्ध्यस्थां विन्ध्यनिलयां विन्ध्यस्थाननिवासिनीम् ।
योगिनीं योगजननीं चण्डिकां प्रणमाम्यहम् ।।
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ।।
य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह ।
महिषघ्नि ! महामाये ! चामुण्डे ! मुण्डमालिनि ! ।
द्रव्यमारोग्यमैश्वर्यं देहि देवि ! नमोऽस्तु ते ।।

रूपं देहि यशो देहि भगं भगवति ! देहि मे ।
पुत्रान्देहि धनं देहि सर्वान् कामांश्च देहि मे ।।

कुङ्कुमेन समालब्धे ! चन्दनेन विलेपिते ! ।
बिल्वपत्रकृताऽऽपीडे ! दुर्गेऽहं शरणं गतः ।।

सर्वमङ्गलमाङ्गल्ये ! शिवे ! सर्वार्थसाधिके ! ।
शरण्ये ! त्र्यम्बके ! गौरि ! नारायणि ! नमोऽस्तु ते ।।

इति स्तवं कृत्वा प्रणामं कुर्यात् । ततः पुष्पाञ्जलिं दद्यात् ।

इति दुर्गोत्सवोक्तो बलिदानविधिः ।।

अथात्र प्रसङ्गाच्छतचण्डीविधानमुच्यते । रुद्रयामले –

'शतचण्डीविधानं च प्रोच्यमानं शृणुष्व तत् ।
सर्वोपद्रवनाशार्थे शतचण्डीं समारभेत् ।।

षोडशस्तम्भसंयुक्तं मण्डपं पल्लवोज्ज्वलम् ।
वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः ।।

पक्वेष्टकचितां रम्यामुच्छ्राये हस्तसंमिताम् ।
पञ्चवर्णरजोभिश्च कुर्यान्मण्डलकं शुभम् ।।

पञ्चवर्णवितानं च किङ्किणीजालमण्डितम् ।
आचार्येण समं विप्रान् वरयेद्दश सुव्रतान् ।।

ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना हरे ! ।
वारुण्यां च प्रकर्तव्यं कुण्डं लक्षणलक्षितम् ।।
मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ।
तदर्धेन तदर्धेन तदर्धेन महामते ।।
अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि ।
पट्टवस्त्रयुगच्छन्नां वेदीमध्ये निधापयेत् ।।
देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः ।
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ।।

चण्डीं सप्तशतीं मध्ये संपुटोऽयमुदाहृतः ।
एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् ।।
रूपाणि क्रमशस्तद्वत्पूजनादिकमाचरेत् ।
पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः ।।
गुडूचीं पायसं दूर्वां तिलान् शुक्लयवानपि ।
चण्डीपाठस्य होमस्तु प्रतिश्लोकं दशांशतः ।।
होमं कुर्याद्ग्रहादिभ्यः समिदाज्यचरून् क्रमात् ।
हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो दक्षिणाः क्रमात् ।।
कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरे ।
अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः ।।
एवं कृतेऽमरेशान ! सर्वसिद्धिः प्रजायते ।।' इति ।

अथ सहस्रचण्डी । सा च तत्रैवोक्ता–

'सहस्रचण्डीं विधिवच्छृणु विष्णो ! महामते ! ।
राज्यभ्रंशे महोत्पाते जननाशे महाभये ।।
गजमारेऽश्वमारे च परचक्रभये तथा ।
इत्यादि विविधे दुःखे क्षयरोगादिजे भये ।।
सहस्रचण्डिकापाठं कुर्याद्वा कारयेत्तथा ।
जापकास्तु शतं प्रोक्ता विंशद्धस्तश्च मण्डपः ।।
भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत् ।
गुरवे द्विगुणं देयं शय्यादानं तथैव च ।।
सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम् ।
पञ्चनिष्कमिता मूर्तिः कर्तव्या वार्धमानतः ।।
अष्टादशभुजा देवी सर्वायुधविभूषिता ।
अवारितान्नं दातव्यं सहस्रं प्रत्यहं विभो ।।
शतं वा नियताहारः पयः पानेन वर्तयेत् ।
एवं यश्चण्डिकापाठं सहस्रं तु समाचरेत् ।।

तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणा' ।। इति ।

वाराहीतन्त्रे– 'सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।।
कुर्याद्यत्नाच्छतावृत्तिं ततः संपद्यते शुभम् ।
श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा ।।
मनसा चिन्तितं देवि ! सिद्ध्येदष्टोत्तराच्छतात् ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ।।
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
चण्ड्याः शतावृत्तिपाठात् सर्वाः सिध्यन्ति सिद्धयः ।।'

इति शतचण्डीसहस्रचण्डीविधिः ।

अथ नवरात्रपारणानिर्णयः । सा च दशम्यां कार्या–

'आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ।।
त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् ।' इति धौम्यवचनात् ।

'नवमी तिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।' इति प्रागुक्तवचनेन नवमीपर्यन्तं प्रधानभूतपूजाद्युक्तेरुपवासादेश्चाङ्गत्वेन तत्पर्यन्तत्वात् । अत्र पारणाहे सूतिकादिप्राप्तौ तत्रैव पारणां कुर्यात् ।

'काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ।।' इति माधवीये कौर्मोक्तेः।

'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ।।' इति विष्णुवचनाच्चाशौचमध्येऽपि तत्कर्तव्यतावगतेः । पारणान्तत्वाद्व्रतस्य ।

प्रारम्भस्तु तेनैवोक्तः–

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ।।

रुद्रयामलेऽपि– 'सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः' ।। इति ।

तदन्ते सूतकान्ते। एवं स्त्रीभिरपि रजोदर्शनमध्ये कर्तव्यमेव पारणम् ।।

'संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् ।' इति माधवीये ऋष्यशृङ्गवचनात् । द्वादशीव्रतमित्युपलक्षणम् ।

'प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ।।' इति ।

तत्रैव सत्यव्रतवचनात् आशौचमध्येऽपि सर्वाः पारणा भवन्ति प्रागुक्तकौर्मवचनादिति सिद्धम् । अयं चोपवासपारणानिर्णयः सर्वव्रतेषु बोद्धव्यः ।

दशम्यां देवीं विसर्जयेत्। तदुक्तं देवीपुराणे–

'ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
संप्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः ।।
रूपं देहि यशो देहि भगं भगवति ! देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ।।
महिषघ्नि ! महामाये ! चामुण्डे ! मुण्डमालिनि ! ।
आयुरारोग्यमैश्वर्यं देहि देवि ! नमोऽस्तु ते ।।
इति संप्रार्थ्य देवीं तु तत उत्थापयेद्बुधः ।
उत्तिष्ठ चण्डि ! देवेशि ! शुभां पूजां प्रगृह्य च ।।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि ! चण्डिके ।।
व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह ।

उत्थाप्य जलं नीत्वा–

दुर्गे देवि ! जगन्मातः ! स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय वै ।।
इमां पूजां मया देवि ! यथा शक्त्योपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ।।' इति जले प्रवाहयेत्।

इयमेव विजयादशमी । सा च द्वितीयदिने श्रवणयोगाभावे पूर्वा ग्राह्या । तदुक्तं स्कान्दे–

'दशम्यां तु नरैः सम्यक् पूजनीयाऽपराजिता ।
ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ।।
या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ।।
नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्धिनी ।।'

तथा– 'आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः ।
एकादश्यां न कुर्वीत पूजनं चापराजिताम् ।।'

यदा तु पूर्वदिने श्रवणयोगाभावः परदिने चाल्पापि तद्योगिनी तदा परैव । तथा च कश्यपः–

'उदये दशमी किञ्चित्संपूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ।।
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उलङ्घ्येयुः सीमानं तद्दिनर्क्षे ततो नराः' इति ।।

काले अपराह्णे । परदिने अपराह्णे श्रवणाभावे तु सर्वपक्षेषु पूर्वैव ।

नारदः– 'ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः ।।
ईषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् ।
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ।।
सूर्योदये यदा राजन् दृश्यते दशमी तिथिः ।
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ।

अत्रायं निर्गलितोऽर्थः । अपराह्णे मुख्यः कालः । तत्रैव पूजाद्युक्तेः । प्रदोषो गौणः । तत्र दिनद्वये अपराह्णव्यापित्वे पूर्वा प्रदोषव्याप्तेराधिक्यात् । दिनद्वये प्रदोषव्यापित्वे परा । अपराह्णव्याप्तेराधिक्यात् ।

श्रवणस्तु रोहिणीवदप्रयोजकः। दिनद्वयेऽपराह्णस्पर्शे तु पूर्वा। तत्रापि परदिनेऽ पराह्णे श्रवणसत्त्वे परैवेति दिक्।

अत्र विशेषो भविष्ये–

'शमीयुक्तं जगन्नाथं भक्तानामभयङ्करम्।
अर्चयित्वा शमीयुक्तमर्चयेच्च ततः पुनः॥'

शमीमन्त्रस्तु गोपथब्राह्मणे–

'अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शुभां शमीम्॥'

तथा भविष्ये– 'शमी शमयते पापं शमी लोहितकण्टकी।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥
करिष्यमाणयात्राया यथाकालं सुखं मया।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते॥' इति।

तथा– 'गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम्।
गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति॥
ततो भूषणवस्त्रादि धारयेत्स्वजनैःसह॥' इति।

अत्र बलिनीराजनं, तत्र मन्त्रः –

'चतुरङ्गबलं मह्यं निररित्वं व्रजत्विह।
सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरि!॥' इति।

ज्योतिषे– 'कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्।
शोभनं खञ्जनं पश्येज्जलगोष्ठस्य सन्निधौ॥'

आश्विनपूर्णमासी परा ग्राह्या–

'सावित्रीव्रतमन्तरेण भवतोऽमापौर्णमास्यौ परे' इति दीपिकोक्तेः।

अत्र विशेषस्तिथितत्त्वे लैङ्गे–

'आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि।
कौमुदी सा समाख्याता कार्या लोकैर्विभूतये॥

कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सद्वेष अक्षैर्जागरणं चरेत् ।।'

तथा– 'निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ।।'

अथ कोजागरव्रतपूजा– अत्रैवाऽऽश्वयुजीकर्मोक्तमाश्वलायनेन । 'आश्वयुज्यामाश्वयुजीकर्म' इति । तच्छेषपर्वणि कार्यम् । विकृतित्वात् । तत्र पूर्वाह्लव्यापिनी ग्राह्या देवकर्मत्वात् । आग्रयणं तु पर्वणि कार्यम् ।

'शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते' इति शौनकोक्तेः ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गत आश्विननिर्णयः ।।
इति रत्नावल्यामाश्विननिर्णयरत्नम् ।

अथ कार्तिकः ।।

तत्र कार्तिकस्नानं विष्णुस्मृतौ–

'तुलामकरमेषेषु प्रातः स्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।।' इति सौरमास उक्तः ।

प्राच्याश्चैतदेवाद्रियन्ते । दाक्षिणात्यास्तु–

'आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ।।' इति पाद्मोक्तेः ।

भार्गवार्चने च–

'प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः ।
प्रातः स्नानं प्रकुर्वीत यावत्कार्तिकभास्करः ।।' इति विष्णुरहस्योक्तेः । हेमाद्रौ चादित्यपुराणे–

'पूर्ण आश्वयुजे मासि पौर्णमास्यां समाहितः ।' इत्युक्त्वा–
'मासं समग्रं परया च भक्त्या समाप्यते कार्तिकपौर्णमास्याम्'

इत्यन्तेऽभिधानाच्चाश्विनशुक्लैकादश्यां पौर्णमास्यां वाऽऽरभ्य कार्तिकशुक्लद्वादश्यां पौर्णमास्यां वा समापयेदित्याहुः ।

विष्णुः– 'कार्तिके सकलं मासं नित्यस्नायी जितेन्द्रियः ।
जपन् हविष्यभुक् शान्तः सर्वपापैः प्रमुच्यते ।।'

अत्र देशविशेषः पाद्मे कार्तिकं प्रक्रम्य–

'कुरुक्षेत्रे कोटिगुणो गङ्गायामपि तत्समः ।
ततोऽधिकः पुष्करे स्याद् द्वारवत्यां च भार्गव ।।
पुण्याः पुर्यश्च सप्तैव मुनयो मथुराधिकाः ।
दुर्लभः कार्तिको विप्रा मथुरायां नृणामिह ।
यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रतीच्छति ।।' इति ।

इदं च स्नानं काशीस्थपञ्चनदेऽतिप्रशस्तम्–

'शतं समाः तपस्तप्त्वा कृते यत्प्राप्यते फलम् ।
तत्कार्तिके पञ्चनदे सकृत्स्नानेन लभ्यते ।।
कार्तिके बिन्दुतीर्थे यो ब्रह्मचर्यपरायणः ।
स्नास्यत्यनुदिते भानौ भानुजात्तस्य भीः कुतः ।।' इत्यादि

काशीखण्डोक्तेः । भानुजो यमः । स्नानमन्त्रश्च तत्रैव–

'कार्तिकेऽहं करिष्यामि प्रातः स्नानं जनार्दन ! ।
प्रीत्यर्थं तव देवेश ! दामोदर ! मया सह ! ।।
इमं मन्त्रं समुच्चार्य मौनी स्नायाद्व्रती नरः ।।' इति ।

अर्घ्यमंत्रोऽपि तत्रैव–

'व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ।
गृहाणार्घ्यं मयादत्तं दनुजेन्द्र निषूदन ! ।।
नित्यनैमित्तिके कृष्ण ! कार्तिके पापनाशने ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ।।

इमौ मन्त्रौ समुच्चार्य योऽर्घ्यं मह्यं प्रयच्छति ।
सुवर्णरत्नपुष्पाम्बुपूर्णशङ्खेन पुण्यवान् ।।
सुवर्णपूर्णा पृथिवी तेन दत्ता न संशयः ।।' इति ।
एवं संपूर्णस्नानाशक्तौ त्र्यहं स्नायात्–
'वाराणस्यां पञ्चनदे त्र्यहं स्नातास्तु कार्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजोऽतिनिर्मलाः ।।' इति काशीखण्डोक्तेः ।
तथा– 'कार्तिके मासि मे यात्रा यैः कृता भक्तितत्परैः ।
बिन्दुतीर्थकृतस्नानैस्तेषां मुक्तिर्न दूरतः ।।'
नृसिंहपुराणे– 'अगस्तिकुसुमैर्देवं योऽर्चयेच्च जनार्दनन् ।
दर्शनात्तस्य देवर्षे नरकं नाश्नुते नरः ।।
विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्तिके योऽर्चयेद्भक्त्या वाजपेयफलं लभेत् ।।'
स्कान्दे कार्तिकमाहात्म्ये–
'मालतीमालया विष्णुः केतक्या चैव पूजितः ।
समाः सहस्रं सुप्रीतो भवेत्ते मधुसूदनः ।।'
पाद्मे– 'कार्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः ।
जन्मकोटिषु विप्रेन्द्र ! न तेषां कमला गृहे ।।
कार्तिके केशवे पूजा येषां नाम्ना सुतैः कृता ।
ते निर्भर्त्स्य रवेः पुत्रं वसन्ति त्रिदिवे सदा ।।
तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् ।
पत्रे पत्रे मुनिश्रेष्ठ ! मौक्तिकं लभते फलम् ।।
तथा कार्तिकमाहात्म्ये–
'धात्रीच्छाये तु यःकुर्यात्पिण्डदानं महामुने !।
मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ।।
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः ।
धात्रीफलकृताऽऽहारो नरो नारायणो भवेत् ।।

धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम् ।
पुष्पे पुष्पेऽश्वमेधस्य फलं प्राप्नोति मानवः ।।'

तथा स्कान्दे– 'कार्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते ।
वने दामोदरं विष्णुं चित्रान्नैस्तोषयेद्विभुम् ।।
मूलेन पायसेनाऽथ होमं कुर्याद्विचक्षणः ।
ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुञ्जीत बन्धुभिः ।।' इति ।

तथा कार्तिके द्विदलव्रतं प्रागुक्तम् "कार्तिके द्विदलं त्यजेत्" इति ।

पाद्मे कार्तिकमाहात्म्ये–

'राजिकां मादकं चैव नैवाद्यात्कार्तिके व्रती ।
द्विदलं तिलतैलं च तथान्यन्मतिदूषितम् ।।'

स्कान्देऽपि– 'कार्तिके वर्जयेत्तद्वद् द्विदलं बहुबीजकम् ।
माषमुद्गमसूराश्च चणकाश्च कुलत्थकाः ।।
निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ।
नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् ।।'

तथा नारदीये– 'कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु ।
कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्तसंधितम् ।।'

कांस्यं तत्पात्रभोजनम् । शुक्तं पर्युषितम् । सन्धितम् लवणशाकः । तत्रैव–

'कार्तिके विष्णुमूर्त्यग्रे दीपदानाद्दिवं व्रजेत् ।
कार्तिके तु कृता दीक्षा नृणां जन्मविमोचनी ।।'

तथा– 'कार्तिके कृच्छ्रसेवी यः प्राजापत्यपरोऽथवा ।
एकान्तरोपवासी वा त्रिरात्रोपोषितोऽथवा ।।
षड्वा द्वादश पक्षं वा मासं वा वरवर्णिनि ।
एकभक्तेन नक्तेन तथैवाऽयाचितेन च ।।
उपवासेन भैक्ष्येण व्रजेत परमं पदम् ।'

अन्येऽपि नियमाः प्रागुक्ताः । ग्राह्यमुक्तं स्कान्दे–

'व्रीहयो यवगोधूमाःप्रियङ्गुतिलशालयः ।
एते हि सात्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः ।।'

काशीखण्डे– 'ऊर्जे यवान्नमश्नीयाद्देवान्नमथवा पुनः ।
वृन्ताकं सूरणं चैव शूकशिम्बीश्च वर्जयेत् ।'

पाद्मे– 'नोर्जो वन्ध्यो विधातव्यो व्रतिना केनचित् क्वचित्' ।

तथा नारदीये– 'अव्रतेन क्षयेद्यस्तु मासं दामोदरप्रियम् ।
तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा ।।'

अथ कार्तिके आकाशदीपः, पुष्करपुराणे–

'तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ।।
महतीं श्रियमाप्नोति रूपसौभाग्यसंपदम् ।।' इति ।

तद्विधिश्चादित्यपुराणे–

'दिवाकरेऽस्ताचलमौलिभूते गृहाददूरे पुरुषप्रमाणम् ।
यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि ।।
कृत्वा चतस्रोऽष्टदलाकृतीस्तु याभिर्भवेदष्टदिशानुसारी ।
तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयो दलगास्तथाष्टौ ।।
निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराज्ञे ।
प्रजापतिभ्यस्त्वथ सत्पितृभ्यः प्रेतेभ्य एवाथ तमस्थितेभ्यः ।।' इति ।

अपरार्केऽत्वन्यो मन्त्र उक्तः । यथा–

'दामोदराय नभसि तुलायां दोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ।।' इति ।

कार्तिककृष्णचतुर्थीकरकचतुर्थी । सा चन्द्रोदयव्यापिनी ग्राह्या । दिनद्वये तत्त्वे पूर्वा । तत्रैव पूजाद्युक्तेः ।

कार्तिककृष्णद्वादशी गोवत्ससंज्ञा । सा प्रदोषव्यापिनी ग्राह्या । दिनद्वये तत्त्वे पूर्वा । युग्मवाक्यात् ।

'वत्सपूजा वटश्चैव कर्तव्या प्रथमेऽहनि' इति निर्णयामृतेऽभिधानाच्च । अत्र विशेषो भविष्ये–

'सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम् ।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत् ।।
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः ।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव ! ।।
क्षीरोदार्णवसंभूते ! सुरासुरनमस्कृते ! ।
सर्वदेवमये ! ग्रासं मया दत्तमिमं ग्रस ।।
ततः सर्वमये देवि ! सर्वदेवैरलङ्कृते ! ।
मातर्ममाभिलषितं सफलं कुरुनन्दिनि ! ।।' इति प्रार्थयेत् ।

तथा– 'तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर ! ।
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ।।'

ज्योतिर्निबन्धे नारदः –

'आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु ।
तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः ।।
नीराजयेयुर्देवांश्च विप्रान् गाश्च तुरङ्गमान् ।
ज्येष्ठान् श्रेष्ठान् जघन्यांश्च मातृरूपाश्च योषितः ।।' इति ।

स्कान्दे– 'कार्तिकस्याऽसिते पक्षे त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ।।'

मन्त्रस्तु– 'मृत्युना पाशदण्डाभ्यां कालेन श्यामया सह ।
त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ।।' इति ।

कार्तिककृष्णचतुर्दश्यां प्रभाते चन्द्रोदयेऽभ्यङ्गं कुर्यात् ।

तदुक्तं भविष्योत्तरे–

'कार्तिके कृष्णपक्षे च चतुर्दश्यां विधूदये ।
अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः ।।

स्मृतिदर्पणेऽपि–

'चतुर्दशी याश्वयुजस्य कृष्णा स्वात्यर्क्षयुक्ता च भवेत्प्रभाते ।
स्नानं समभ्यज्य नरैस्तु कार्यं सुगन्धितैलेन विभूतिकामैः ।।' इति ।

ब्राह्मे– 'आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये ।
तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा ।।' इति ।

आश्वयुगित्यमावास्यान्तं मासमभिप्रेत्येत्युक्तम् ।

तथा– 'तैले लक्ष्मी जले गङ्गा दीपावल्याश्चतुर्दशीम् ।' प्राप्येति शेषः ।
'प्रातः स्नानं तु यः कुर्याद्यमलोकं न पश्यति' इति ।

दिनद्वयेऽपि चन्द्रोदये चतुर्दशीसत्त्वे तदभावेऽप्यरुणोदये संपूर्णे खण्डे वा दिनद्वये चतुर्दशीसाम्ये च पूर्वदिनेऽभ्यङ्गं कुर्यात् ।

'पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे ।
पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः ।।' इति वचनात् पूर्वदिने परदिन एव वा सत्त्वे सैव ग्राह्या । दिनद्वयेऽप्यसत्त्वेऽप्यरुणोदयव्यापिनी ग्राह्या । 'पक्षे प्रत्यूषसमये' इत्युक्तेः । वक्ष्यमाणवचनाच्च । तदभावे तु चतुर्दशीह्रासं पूर्वेद्युः प्रवेश्य पूर्वेऽह्नि त्रयोदशीमध्य एवाभ्यङ्गं कुर्यादिति दिवोदासः । केचिदत्र वचनमपि साधकत्वेन वदन्ति ।

'तिथ्यादौ तु भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ।।' इति तन्मन्दम् । न हीदं वचनं पूर्वदिनस्याऽपूर्वं ग्राह्यत्वं विधत्ते । नक्तैकभक्तजन्माष्टम्यादौ दिनद्वये कर्मकालव्याप्त्यभावे सर्वत्र पूर्वदिनस्य ग्राह्यत्वप्रसङ्गात् । किन्तु यत्रैकभक्तादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यान्तरेण न्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तम् । तत्र मुख्यकाले तत्तिथेरभावेऽपि तत्रैवानुष्ठानबोधकमिदम् । न चात्र तदस्तीति यत्किञ्चिदेतत् । तेन चतुर्थयामगामिनी ग्राह्या । अत एव सर्वज्ञनारायणः –

'तथा कृष्णचतुर्दश्यामाश्विनेऽर्कोदयात्पुरा ।
यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते ।।' इति ।

'मृगाङ्कोदयवेलायां त्रयोदश्यां यदा भवेत् ।
दर्शे वा मङ्गलस्नानं दुःखशोकभयप्रदम् ॥' इति । कालादर्शे त्रयोदश्यां निषेधाच्च । तेनायमर्थः— यथाऽग्निहोत्रे यावज्जीवं सायंप्रातःकालेषु व्याप्यकालस्य गुरुत्वं तथात्र चतुर्दशी चतुर्थयामारुणोदयचन्द्रोदयानामुत्तरोत्तरस्य व्याप्यत्वाद्गुरुत्वमिति । यदपि—

'त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी ।
रात्रिशेषे त्वमावास्या तदाऽभ्यङ्गे त्रयोदशी ॥' इति वचनं तद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेन निर्मूलम् । समूलत्वेऽपि न चतुर्दश्याः सूर्योदयासंबन्धित्वरूपः क्षयोऽत्र विवक्षितः । सूर्योदयात् प्राक् समाप्तौ चन्द्रोदयकालसत्त्वे च त्वयैवाङ्गीकारात् । किन्त्वभ्यङ्गकालात्प्राक् समाप्तिरूपोऽत्र ह्रासः क्षयशब्देन विवक्षितः । स चारुणोदयाच्चतुर्थयामाद्वा प्राक् यदा ह्रासस्तत्परमिदम् । अत एव सर्वज्ञनारायणेन चतुर्थयाममात्रे स्नानमुक्तम् । तथा चोदाहृतम्— 'तथा कृष्णचतुर्दश्याम्' इति । ज्योतिर्निबन्धे नारदोऽपि—

'इषासितचतुर्दश्यामिन्दुक्षयतिथावपि ।
ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत् ॥
कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयम् ।
ये तु त्रयोदशीमध्ये स्नानमाहुस्तेषामाशयं न विद्म इत्यलं भूयसा ।

यदपि— 'अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्मो नश्यत्येव न संशयः ॥' इति दिवोदासीये भविष्यवचनम् । तन्मुख्यकालेऽरुणोदये चतुर्दश्यभावेऽपि तत्रैव स्नातव्यमित्येवं परमिति सर्वसिद्धम् । चतुर्घटिकात्मकोऽरुणोदय इति ।

तथा मदनरत्ने पाद्मे—
'अपामार्गमथो तुम्बी प्रपुन्नाटमथापरम् ।
भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥' प्रपुन्नाटश्चक्रमर्दः ।

मन्त्रस्तु– सीतालोष्टसमायुक्त ! सकण्टकदलान्वित ! ।
हर पापमपामार्ग ! भ्राम्यमाणः पुनः पुनः ।। इति ।

अस्यामेव प्रदोषे दीपान् दद्यादिति स्कान्दे–
'ततः प्रदोषसमये दीपान् दद्यान्मनोरमान् ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ।।' इति ।

ब्राह्मे– 'अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्तिके नरः ।।'

लैङ्गे– 'माषपत्रस्य शाकेन भुक्त्वा तत्र दिवा नरः ।
नारकायां चतुर्दश्यां सर्वपापैः प्रमुच्यते ।।'

अत्र यमतर्पणमुक्तं वृद्धमनुना–
'दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणम् ।'

ब्राह्मे– 'अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ।।

यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ।।

औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।।' इति ।

तथा– 'यज्ञोपवीतिना कार्यं प्राचीनावीतिनाऽथवा ।।' इति ।

इदं जीवत्पितृकेणापि कार्यम् –
'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।' इति पाद्मोक्तेः ।
इति नरकचतुर्दशी ।

कार्तिकेऽमावास्यायां प्रातरभ्यङ्गं कुर्यात् । तदुक्तं कालादर्शे–
'प्रत्यूष आश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः ।
भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये ।।'
अस्या व्याख्याने आदिशब्दात्पञ्चत्वगुदकस्नानादेरुपसंग्रहः

तदुक्तं पुष्करपुराणे–

'स्वातीस्थिते रवाविन्दुर्यदि स्वातिगतो भवेत् ।
पञ्चत्वगुदकस्नायी कृताभ्यङ्गविधिर्नरः ।।
नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते ।।'

आश्वयुग् दर्श इति दर्शशब्दः प्रत्यूषे स्वातियुक्ततिथिपरः ।

तदुक्तं ब्राह्मे– 'ऊर्जे शुक्लद्वितीयायां तिथिषु स्वातिऋक्षगे ।
मानवी मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते ।।'

तत्रैव– 'इषे भूते च दर्शे च कार्तिकप्रथमे दिने ।
यदा स्वाती तदाभ्यङ्गस्नानं कुर्याद्दिनोदये ।।'

कश्यपसंहितायां तु दीपावलीदर्शं प्रक्रम्य–

'इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये ।
तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये ।।' इति ।

स्वातीयोगं विनाप्यभ्यङ्ग उक्तः ।

मात्स्ये– 'दीपैर्नीराजनादत्र सैषा दीपावली स्मृता ।'

अत्र विशेषो हेमाद्रौ भविष्ये–

'दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ।
प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात् ।।
दीपवृक्षाश्च दातव्या शक्त्या देवगृहेषु च ।'

तत्रैवाभ्यङ्गमभिधाय–

'एवं प्रभातसमये त्वमावास्यां नराधिप ! ।
कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः ।।
दीपान् दत्त्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि ।
स्वलङ्कृतेन भोक्तव्यं सितवस्त्रोपशोभिना ।।'

अयं प्रदोषव्यापी ग्राह्यः ।

'तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ।।' इति ज्योतिषोक्तेः ।

दिनद्वये सत्त्वे परः–

'दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि ।
तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका ।।' इति तिथितत्त्वे ज्योतिर्वचनात् । दिवोदासीये तु प्रदोषस्य कर्मकालत्वात् ।

'अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान् ।
अतः स्वलङ्कृता दीप्ता दीपैर्जाग्रज्जनोत्सवाः ।।
सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः ।'

इति ब्राह्मोक्तेश्च प्रदोषार्धरात्रव्यापिनी मुख्या । एकैकव्याप्तौ परैव । प्रदोषस्य मुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्च । यस्तु–

'अपराह्णे प्रकर्तव्यं श्राद्धं पितृपरायणैः ।
प्रदोषसमये राजन् कर्तव्या दीपमालिका ।।' इति क्रमः संपूर्णतिथावेव प्राप्तेरनुवादो न विधिः । तत्तत्कर्मकालव्याप्तेर्बलवत्वात्सम्पूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्चेत्युक्तम् ।

अत्रैव दर्शे पररात्रेऽलक्ष्मीनिःसारणमुक्तं मदनरत्ने भविष्ये–

'एवं गते निशीथे तु जने निद्रार्धलोचने ।
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ।।
निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् ।'

कार्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तो निर्णयामृते । अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ–

'कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ।
पूजां कुर्यान्नृपः साक्षाद्भूमौ मण्डलके शुभे ।।
बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।
गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत् ।।
लोकश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः ।
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ।।'

मन्त्रस्तु पाद्मे– 'बलिराज ! नमस्तुभ्यं दैत्यदानववन्दित !।
इन्द्रशत्रो ! ऽमराराते ! विष्णुसान्निध्यदो भव ।।' इति ।
तथा– 'बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन ! ।
यानि तान्यक्षयाण्याहुर्मयैव संप्रदर्शितम् ।।' इति । तदेतत्पूर्वविद्धप्रतिपदि कर्तव्यम् ।

'पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम्' । इति हेमाद्रौ ब्राह्मोक्तेः । माधवोऽपि–

'बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत्' इति ।

निर्णयामृतेऽपि–

'या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ! ।
पूजनात्त्रीणि वर्धन्ते प्रजा गावो महीपतिः ।।' इति ।

तथा– 'भद्रायां गोकुलक्रीडा स देशो वै विनश्यति ।'
भद्रायां द्वितीयायाम् ।

तथा– 'प्रतिपद्यग्निकरणं द्वितीयायां तु गोऽर्चनम् ।
क्षेत्रच्छेदं करिष्येते वित्तनाशं कुलक्षयम् ।।' इति ।

तथा– 'प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ।
परविद्धेषु यः कुर्यात् पुत्रदारधनक्षयः ।।' इति देवलवचनाच्च ।

एते च विधिप्रतिषेधाः पूर्वदिने प्रतिपदः सायाह्नव्यापित्वे द्वितीयदिने चन्द्रदर्शनसंभवे च ज्ञेयाः ।

'गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून्हन्ति सुरभिः पूजकांस्तथा ।।' इति पुराणसमुच्चयात् । दिनद्वये सायाह्नव्यापित्वे तु परैव ग्राह्या ।

'वर्धमानतिथौ नन्दा यदा सार्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते ।।' इति ।

तथा– 'त्रियामगा दर्शतिथिर्भवेच्चेत्सार्द्धत्रियामा प्रतिपद्विवृद्धौ ।
दीपोत्सवे ते मुनिभिः प्रदिष्टे अतोऽन्यथा पूर्वयुते विधेये ।।'

इति पुराणसमुच्चयादिति निर्णयामृतकारः। सार्द्धत्रियामिकेत्यनेन चन्द्रदर्शनाभाव उक्तः। द्वितीयायाः पञ्चधाविभक्तदिनचतुर्थांशरूपापराह्णव्याप्तावेव चन्द्रदर्शनसंभवात्। वयं त्वेतद्वचनद्वयं पूर्वविद्धासम्भवे वेदितव्यमिति ब्रूमः। दिनद्वये प्रतिपदः सायाह्नव्याप्त्यभावे तु पूर्वैव। रात्रौ बलिपूजाविधानेन 'कर्मकालव्यापित्वात्। परदिने चन्द्रोदये तन्निषेधादिति दिक्।

मदनरत्ने तु पूर्वविद्धायां गोक्रीडा। नीराजनमङ्गलमालिके तूत्तरत्र कार्ये—

'कार्तिके शुक्लपक्षे तु विधानद्वितयं भवेत्।
नारीनीराजनं प्रातः सायं मङ्गलमालिका॥
यदा च प्रतिपत्स्वल्पा नारीनीराजने भवेत्।
द्वितीयायां तदा कुर्यात्सायं मङ्गलमालिकाम्॥' इति ब्राह्मोक्तेः।

'लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयम्।
तस्यां नीराजनं कार्यं सायं मङ्गलमालिका॥' इति भविष्योक्तेः।

'प्रातर्वा यदि लभ्येत प्रतिपद्घटिका शुभा।
द्वितीयायां तदा कुर्यात्सायं मङ्गलमालिका॥
कार्तिके शुक्लपक्षादौ त्वमावास्या घटीद्वयम्।
देशभङ्गभयान्नैव कुर्यान्मङ्गलमालिकाम्॥' इति देवीपुराणाच्चेत्युक्तम्। अत्र विशेषो हेमाद्रौ ब्राह्मे बलिप्रतिपदं प्रक्रम्य—

'तस्माद् द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः॥
पराजयो विरुद्धश्च लाभनाशकरो भवेत्।
दयिताभिश्च सहितैर्नेया सा च भवेन्निशा॥' इति।

अत्र गोवर्धनपूजादि मार्गपालीबन्धनादि चोक्तं हेमाद्रौ स्कान्दे—

'प्रातर्गोवर्धनं पूज्य द्यूतं चापि समाचरेत्।
भूषणीयास्तथा गावः पूज्याश्च वाहदोहनाः॥'

गोवर्धनश्च गोमयेन कार्यश्चित्रेण वा। पूजामन्त्रस्तु–

'गोवर्धन धराधार गोकुलत्राणकारण ।
बहुबाहुकृतच्छाय गवां कोटिप्रदो भव ।।'

गोमन्त्रस्तु–

'लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ।।'

मार्गपालीबन्धनं तत्रैव स्कान्दे–

'ततोऽपराह्णसमये पूर्वस्यां दिशि भारत ! ।
मार्गपालीं प्रबध्नीयात्तुङ्गे स्तम्भेऽथ पादपे
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्मुने ! ।
दर्शयित्वा गजानश्वान्सायमस्यास्तले नयेत् ।।

कृते होमे द्विजेन्द्रैश्च बध्नीयान्मार्गपालिकाम् ।
नमस्कारं ततः कुर्यान्मन्त्रेणानेन सुव्रत ।।

मार्गपालि ! नमस्तेऽस्तु सर्वलोकसुखप्रदे ! ।
विधेयैः पुत्रदाराद्यैः पुनरेहि वृतस्य मे ।।

नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदम् ।
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।।
मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः सुखावहाः ।'

तत्रैवादित्यपुराणे–

'कुशकाशमयीं कुर्याद्वष्टिकां सुदृढां नवाम् ।
तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः ।
गृहीत्वाऽऽकर्षयेयुस्तां यथासारं मुहुर्मुहुः ।
जयेऽत्र हीनजातीनां जयो राज्ञस्तु वत्सरम् ।।' इति ।

वष्टिका – सूक्ष्मारज्जुः ।

अथ यमद्वितीया ।

यमद्वितीया तु प्रतिपद्युता ग्राह्येत्युक्तं निर्णयामृते । यमद्वितीया मध्याह्नव्यापिनी पूर्वविद्धा चेति हेमाद्रिः । अत्र विशेषो स्कान्दे–

'ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति ।।' इति ।
ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः ।
वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वाञ्छितम् ।।'

तथा–

'कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ।।
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ।
अस्यां निजगृहे विप्र ! न भोक्तव्यं ततो नरैः ।।
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।।
स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः ।
सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः ।।
प्रतिपन्ना मातृभगिन्य इति हेमाद्रिः ।
पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर ! ।
मातुलस्य सुताहस्ताद्द्वितीयायां तथा नृप ।।
पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात् ।
भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परम् ।।
सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्धनम् ।

यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः प्रतिजगत्स्वसृसौहृदेन ।

तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥'

गौडास्तु– 'यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥'

मन्त्रः – एह्येहि मार्तण्डज ! पाशहस्त ! यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥
भ्रातस्तवानुजाताहं भुङ्क्ष्व भोज्यमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
ज्येष्ठा अग्रजातेति स्मार्ताः । इत्यन्नदानमित्यप्याहुः ।

ब्रह्माण्डपुराणेऽपि–

'या तु भोजयते नारी भ्रातरं युग्मके तिथौ ।
अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् ॥
भ्रातुरायुःक्षयो राजन् न भवेत्तत्र कर्हिचित् ।' इति ।

कार्तिकशुक्लनवमी युगादिः । सा पौर्वाह्णिकी ग्राह्या । शुक्लपक्षस्थत्वात् । अत्रैव विष्णुत्रिरात्रमुक्तं पाद्मे–

'कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः ।
हरिं विधाय सौवर्णं तुलस्या सहितं विभुम् ॥
पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम् ।
एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ॥' इति ।

कार्तिकशुक्लैदश्यां भीष्मपञ्चकव्रतमुक्तं नारदीये–

'अतो नरैः प्रकर्तव्यं यत्नेन भीष्मपञ्चकम् ।
कार्तिकस्यामले पक्षे स्नात्वा सम्यग्यतव्रतः ।
एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम् ॥' इति ।

तद्विधिस्तु– गोमयेन स्नात्वा मौनी पञ्चामृतैः पञ्चगव्यैर्विष्णुं संस्नाप्य पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा– 'ॐ नमो विष्णवे' इति

षडक्षरेण घृताक्तान् यवान् व्रीहीन्वाऽष्टोत्तरशतं हुत्वा भूमौ स्वपेत् । एवं पञ्चदिनं कुर्यात् । विशेषस्त्वाद्येऽह्नि कमलैः हरेः पादौ संपूज्य त्रिर्गोमयं प्राश्यम् । द्वितीये बिल्वपत्रैर्जानुनी संपूज्य गोमूत्रम् । त्रयोदश्यां भृङ्गराजेन नाभिं संपूज्य क्षीरम् । चतुर्दश्यां करवीरैः स्कन्धं संपूज्य दधि । पौर्णमास्यां होमान्ते लौहीं पापप्रतिमां खड्गचक्रहस्तां कृष्णवस्त्रेण वेष्टितां प्रस्थतिलोपरिस्थां कृत्वा धर्मराजनामभिः करवीरैः संपूज्य–

यदन्यजन्मनि कृतमिह जन्मनि वा पुनः ।
तत्सर्वं प्रशमं यातु मत्पापं तव पूजनात् ।।

इति पुष्पाञ्जलिं क्षिप्त्वा कृष्णप्रतिमां च संपूज्य विप्राय दत्त्वा विप्रान् संभोज्य दक्षिणां दत्त्वा पञ्चगव्यं प्राश्य पौर्णमास्यां नक्तं भुञ्जीतेति लघुनारदीये । पञ्चगव्यं प्राश्यं षडक्षरेणेति हेमाद्रिः । हेमाद्रौ भविष्ये तु– शाकैर्मुन्यन्नैर्वा पञ्चाहवर्तनमुक्तम् । अन्तेऽप्युक्तम्– “यद्भीष्मपञ्चकमिति प्रथितं पृथिव्यामेकादशीप्रभृतिपंचदशीनिरुद्धम् । उत्पन्न भोजनपरस्य नरस्य तस्मिन्निष्टं फलं दिशति पाण्डव ! शार्ङ्गधन्वा ।।” इति । तथा पाद्मे–

‘पञ्चाहं पञ्चगव्याशी भीष्मायार्घ्यं च पञ्चसु ।
अहःस्वपि तथा दद्यान्मन्त्रेणानेन सुव्रत ।।

सत्यव्रताय शुचये गाङ्गेयाय महात्मने ।
भीष्मायैतं ददाम्यर्घ्यमाजन्मब्रह्मचारिणे ।।

वैयाघ्रपद्यगोत्रायेति च ।
(वैयाघ्रपद्यगोत्राय साङ्कृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ।।
अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ।) इति च ।
‘सव्येनानेन मन्त्रेण तर्पणं सार्ववर्णिकम् ।’ इति ।

कार्तिकशुक्लद्वादश्यां नक्षत्रयोगरहितायां पारणं कार्यम् । तदुक्तम्–

'आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
सङ्गमे नहि भोक्तव्यं द्वादश द्वादशीर्हरेत् ।।' इति ।

यदा तु रेवतीयोगसहिता द्वादशी सर्वथा लभ्यते तदा रेवत्याश्चतुर्थपादं वर्जयेत् । वचनं तु प्रागुक्तम् । लघुनारदीये–

'कार्तिके शुक्लपक्षस्य कृत्वा चैकादशीं नरः ।
प्रातर्दत्त्वा शुभान् कुम्भान् प्रयाति हरिमन्दिरम् ।।'

वाराहे– 'एकादशी सोमयुता कार्तिके मासि भामिनि ! ।
उत्तराषाढसंयोगे अनन्ता सा प्रकीर्तिता ।।'
तस्यां यत्क्रियते भद्रे ! सर्वमानन्त्यमश्नुते ।'

अस्यामेव रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे–

'एकादश्यां च शुक्लायां कार्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः।।' इति ।

भविष्ये– 'कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत ! ।
मन्त्रेणानेन राजेन्द्र ! देवमुत्थापयेद्द्विजः ।।'

रामार्चनचन्द्रिकादौ तु द्वादश्यामुक्तम्–

'पारणाहे पूर्वरात्रे घण्टादीन् वादयन् मुहुः ।' इति ।

अत्र देशाचारतो व्यवस्था ।

'तत्रैव देवदेवस्य स्नानं तु पूर्ववद्भवेत् ।
महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः ।।'

मन्त्रास्तु वाराहपुराणे उक्ताः–

'ॐ ब्रह्मेन्द्ररुद्राग्निकुवेरसूर्यसोमादिभिर्वन्दित ! वन्दनीय ! ।
बुद्ध्यस्व देवेश ! जगन्निवास ! मन्त्रप्रभावेण सुखेन देव ! ।।
इयं तु द्वादशी देव ! प्रबोधार्थं विनिर्मिता ।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना ।

उत्तिष्ठोत्तिष्ठ गोविन्द ! त्यज निद्रां जगत्पते ! ।
त्वयि सुप्ते जगन्नाथ ! जगत्सुप्तं भवेदिदम् ।।
उत्थितं चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव! ।
गता मेघा वियच्चैव निर्मलं निर्मला दिशः ।।
शारदानि च पुष्पाणि गृहाण मम केशव ।
इदं विष्णुरिति प्रोक्तो मन्त्र उत्थापने हरेः ।।' इति ।

एवं देवमुत्थाप्य तदग्रे चातुर्मास्यव्रतसमाप्तिं कुर्यात् । तदुक्तं भारते–

'चतुर्द्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः ।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ।।'

लघुनारदीये– 'चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता ।' मन्त्रश्च सनत्कुमारेणोक्तः–

'इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ! ।।' इति

अथ वाराहोक्तो बोधिनीविधिः– एकादश्यां रात्रौ कुम्भे घृतपात्रोपरि हैमं माषमितं मत्स्यं पञ्चामृतेन संस्नाप्य कुकुङमवस्त्रयुग्मपद्माद्यैः संपूज्य मत्स्यादिदशावतारान्संपूज्य जागरं कृत्वा प्रातर्देवमाचार्यं च वस्त्राद्यैः संपूज्य–

जगदादिर्जगद्रूपोजगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ।। इति दक्षिणां दत्वा ब्राह्मणान्भोजयेदिति । तथा च ब्राह्मे–

'महातूर्यरवै रात्रौ भ्रामयेत्स्यन्दने स्थितम् ।
उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ।।
चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतम् ।
कथयित्वा द्विजेभ्यस्तद्द्याद्भक्त्या सदक्षिणम् ।

यस्य भक्ष्यस्य नियमः कृतस्तद्द्रव्यं दद्यादित्यर्थः । इदं शुक्रास्तादावपि कार्यम् । आशौचे तु पूजामन्येन कारयेत् ।

कार्तिके द्वादशी पौर्णमासी च मन्वादिः। सा पौर्वाह्णिकी ग्राह्या। शुक्लपक्षस्थत्वात्।

कार्तिकशुक्लचतुर्दशी वैकुण्ठसंज्ञा। सा निशीथ व्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी ग्राह्या। तदुक्तं भविष्ये–

'कार्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप!।
सोपवासस्तु संपूज्य हरिं रात्रौ जितेन्द्रियः॥' इति।

अस्यामेव विश्वेश्वरप्रतिष्ठादिनत्वात्तत्प्रीत्यर्थं यदोपवासादि क्रियते तदाऽरुणोदयव्यापिनी ग्राह्या। तदुक्तं सनत्कुमारसंहितायाम्–

'वर्षे च हेमलम्बाख्ये मासे श्रीमति कार्तिके।
शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति॥
महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके।
स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत्॥'
तत्पूर्वदिने चोपवासः कार्यः।
'ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम्।
दण्डपाणेर्महाधाम्नि वनेऽस्मिन्कृतपारणा॥' इति तत्रैवोक्तेः।

शिवरहस्येऽपि पूजाजागरणाद्युक्तम्–

'ततोऽरुणोदये जाते स्नात्वा स्नात्वा च भस्मना।
सन्ध्यां समाप्य विश्वेशं मामभ्यर्च्य यथाविधि॥
मद्भक्तान् भोजयामासुर्ऋषयो बुभुजुस्ततः॥' इति।

अत्र कार्तिकव्रतोद्यापनमुक्तं पाद्मे कार्तिकमाहात्म्ये–

'अथोर्जव्रतिनः सम्यगुद्यापनविधिं शृणु।
ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥
तुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां शुभाम्।
तुलसीमूलदेशे च सर्वतोभद्रमेव च॥
तस्योपरिष्टात्कमलं पञ्चरत्नसमन्वितम्।
पूजयेत्तत्रदेवेशं सौवर्णं गुर्वनुज्ञया॥

रात्रौ जागरणं कुर्याद् गीतवाद्यादिमङ्गलैः ।
ततस्तु पौर्णमास्यां वै सपत्नीकान् द्विजोत्तमान् ।।
त्रिंशन्मितानथैकं वा स्वशक्त्या वा निमन्त्रयेत् ।
अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसम् ।।
ततो गां कपिलां दद्यात्पूजयेद् विधिवद्गुरुम् ।।' इति ।

कार्तिकी पौर्णमासी परा ग्राह्या । "अमा पौर्णमास्यौ परे" इति दीपिकोक्तेः । अत्र विशेषो हेमाद्रौ ब्राह्मे–

'पुण्या महाकार्तिकी स्याज्जीवेन्द्वोः कृत्तिकासु च ।'

तथा– 'आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ।।
यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित् ।
तिथिः सापि महापुण्या मुनिभिः परिकीर्तिता ।।
प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्तिकी प्रोक्ता देवानामपि दुर्लभा ।।' इति ।

पाद्मे– 'विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः ।
संयोगः पद्मको नाम पुष्करेष्वतिदुर्लभः ।।
पद्मकं पुष्करे प्राप्य कपिलां यः प्रयच्छति ।
स हित्वा सर्वपापानि वैष्णवं लभते पदम् ।।'

यमः– 'कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ।
माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः ।।'

अस्यामेव सायङ्काले मत्स्यावतारो जात इत्युक्तं पाद्मे कार्तिकमाहात्म्ये–

'वरान्दत्त्वा यतो विष्णुर्मत्स्यरूप्यभवत्ततः ।
तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतम् ।।' इति ।

अत्र त्रिपुरोत्सव उक्तो भार्गवार्चनदीपिकायाम् ।

'पौर्णमास्यां तु सन्ध्यायां कर्तव्यस्त्रैपुरोत्सवः ।
दद्यादनेन मन्त्रेण प्रदीपांश्च सुरालये ।।

कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः ।
दृष्ट्वा प्रदीपं न च जन्मभागिनो भवन्ति नित्यं श्वपचा हि विप्राः ।।'

अत्र वृषोत्सर्गोऽतिप्रशस्तः । तदुक्तं मात्स्ये–

'कार्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ।
शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतम् ।।' इति ।

अत्र कार्तिकेयदर्शनमुक्तं काशीखण्डे–

'कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम् ।
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ।।' इति ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतः कार्तिकनिर्णयः ।।

अथ मार्गशीर्षः ।।

वृश्चिके पूर्वाः षोडशघटिकाः पुण्याः । शेषं प्राग्वत् । मार्गकृष्णाष्टमी कालाष्टमी । सा च रात्रिव्यापिनी ग्राह्या ।

'मार्गशीर्षसिताष्टम्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यते ।।' इति काशीखण्डात् रात्रिव्रतत्वावगतेः । "रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखीतिथिः" । इति ब्रह्मवैवर्ताच्च । दिनद्वयेंऽशतो रात्रिव्याप्तावुत्तरैव । भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित् । तन्न । शिवरहस्ये मध्याह्ने भैरवोत्पत्तेः श्रवणात् । तथा च तत्रैव "नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ" इत्युपक्रम्य ब्रह्मणा रुद्रेऽवज्ञाते उक्तम्–

'तदोग्ररूपादनघादुन्मत्तः कालभैरवः ।
आविरासीत्ततो लोकान् भीषयन्नखिलानपि ।।'

अत्रोपवास एव प्राधान्यमित्युक्तं तत्रैव–

'उपोषणस्याङ्गभूतमर्घ्यदानमिह स्मृतम् ।
तथा जागरणं रात्रौ पूजा यामचतुष्टये ।।'

सन्ध्यायामपि पूजैवोक्ता । तेन मध्याह्नव्यापिनी युक्ता । दिनद्वयेऽशतः संपूर्णायां वा तद्व्याप्तौ पूर्वैव । पूर्वोक्तवचनात् । पारणा तु प्रातरेव ।

'यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा' इति वचनात् ।

अत्र च कालभैरवपूजोक्ता त्रिस्थलीसेतौ–

'कृत्वा च विविधां पूजां महासंभारविस्तरैः ।
नरो मार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ।।'

तथा– 'तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः ।
विलोक्य कालराजानं निरयादुद्धरेत्पितृन् ।।' इति ।

इयं च कार्तिकानन्तरा गौणचान्द्राभिप्रायेण ।

मार्गशीर्षशुक्लपञ्चम्यां नागपूजोक्ता हेमाद्रौ स्कान्दे–

'शुक्ला मार्गशिरे पुण्या श्रावणे या च पञ्चमी ।
स्नानदानैर्बहुफला नागलोकप्रदायिनी ।।' इति ।

इयं नागपूजा षष्ठीयुतैव ग्राह्या–

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ।।' इति मदनरत्ने वचनात् ।

मार्गशीर्षे शुक्लषष्ठी चम्पाषष्ठीति महाराष्ट्रेषु प्रसिद्धम् । सा चोत्तरायुता ग्राह्या । 'षण्मुन्योरिति' युग्मवाक्यात् । 'पूर्वाह्णे दैविकं कुर्यात्' इति वचनादस्य च देवकर्मत्वात् । इयमेव योगविशेषेण चम्पेत्युच्यते । तदुक्तं ब्रह्माण्डपुराणे मल्लारिमाहात्म्ये–

'मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता ।।
विशाखाभौमयोगेन सा चम्पेतीह विश्रुता ।।' इति मदनरत्ने पाठः ।

'मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः ।
शततारागते चन्द्रे लिङ्गं स्याद् दृष्टिगोचरम् ।।' इति ।

इयं योगवशेन पूर्वा वा परा ग्राह्या । 'चम्पाषष्ठीयुतेती' दिवोदासः । इयमेव स्कन्दषष्ठी । सा पूर्वयुता–

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ।।' इति भृगूक्तेः ।

परेऽह्नि रात्रावाद्ययाममध्ये पारणासंभवे इदम् । अन्यथोत्तरैवेति दिवोदासः । अब्दपर्यन्तं षष्ठीषु–

'सेनाविदारक ! स्कन्द ! महासेन ! महाबल ! ।
रुद्रोमाग्निज ! षड्वक्त्र ! गंगागर्भ ! नमोऽस्तु ते ।।

इति राजतं स्कन्दं संपूज्य विप्राय दद्यादिति दिवोदासः ।

मार्गशीर्षशुक्लचतुर्दश्यां पिशाचमोचनतीर्थे श्राद्धं त्रिस्थलीसेतौ भट्टैरुक्तम् । तस्य प्राप्तपिशाचस्वपित्राद्युद्देश्यकत्वेन पार्वणत्वादपराह्णव्यापिनी ग्राह्या । अज्ञातनामपिशाचाद्युद्देश्यकत्वे त्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनीति । कुलधर्मव्रतादौ तूत्तरैव ।

मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः । तदुक्तं स्कान्दे सह्याद्रिखण्डे–

'मार्गशीर्षे तथा मासि दशमेऽह्नि सुनिर्मले ।
मृगशीर्षयुते पौर्णमास्यां ज्ञस्य च वासरे ।।
जनयामास देदीप्यमानं पुत्रं सती शुभम् ।
तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाऽकरोत्स्वयम् ।।
दत्तवान् स्वस्य पुत्रत्वाद्दत्तात्रेय इतीश्वरः '। इति ।

इयं प्रदोषव्यापिनीति वृद्धाः ।

मार्गपौर्णिमानन्तराष्टमी अष्टका । एवं पौषादि मासत्रयेऽपि । हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां चेत्याश्वलायनोक्तेः । एकस्यामष्टम्यां चैका कार्येति हरदत्तः । क्वचित्पञ्चम्युक्ता । 'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यसी' ति पाद्मवचनात् । तत्पूर्वसप्तमीषु पूर्वेद्युः तत्परनवमीषु अन्वष्टका च श्राद्धमुक्तं कालादर्शे–

‘मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने ।
कृष्णपक्षेषु पूर्वेद्युरान्वष्टक्यं तथाष्टका ।।’ इति ।

यत्तु विष्णुः– ‘अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टका’ इति । यच्चकौर्मे– ‘अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु’ इति । तच्चतुर्थ्यामनावश्यकत्वार्थम् । ‘या चाप्यन्या चतुर्थी स्यात्तां च कुर्यात्प्रयत्नतः ।’ इति वायुब्रह्माण्डपुराणात् । ‘श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ।’ इति विष्णूक्तेरिति शूलपाणिः । शाखाभेदाद् व्यवस्थेति तत्त्वम् । वायुब्रह्माण्डयोः —

‘आद्याऽपूपैः सदा कार्या मांसैरन्या सदा भवेत् ।
शाकैः कार्या तृतीया स्यादेवं द्रव्यगतो विधिः ।।’

पौषादिक्रमः । अन्वष्टका तु प्रागेव निर्णीता । तत्राष्टम्यपराह्णव्यापिनी ग्राह्या ।

‘अथाच्छादनपर्यन्तं श्राद्धं पार्वणवद्भवेत् ।’ इत्याश्वलायनकारिकोक्तेरपराह्णकालत्वाच्च पार्वणस्य । पूर्वेद्युरन्वष्टकाश्राद्धयोस्तु अष्टम्यनुरोधेन निर्णयः । अत एव सूत्रम्– ‘पूर्वेद्युः पितृभ्यो दद्यात् अपरेद्युरान्वष्टक्यम् ।’ इति । अत्र कामकालौ विश्वेदेवौ । ‘इष्टिश्राद्धे तु क्रतूदक्षावष्टम्यां कामकालौ इति’ सायणीये शङ्खोक्तेः । अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तमृग्विधाने–

‘एभिर्द्युभिर्जपेन्मन्त्रं शतवारं तु दर्द्दिने ।
आन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथा ।।’ इति ।

अशक्तौ त्वाश्वलायनः–

‘अथ श्वोभूतेऽष्टकाः पशुना स्थालीपाकेन चाप्यनडुहो यवसमाहरेदग्निना वा कक्षमुपोषेदेषामेऽष्टकेति नत्वेवानष्टकः स्यादिति ।’ मार्गशीर्षादिषु मलमासे सति तत्राष्टका न कार्या ।

तथा काठकगृह्येऽपि–

'महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।।' इति ।

मार्गादिरविवारेषु काम्यं व्रतमुक्तं हेमाद्रौ । तत्र भक्ष्याण्युक्तानि संग्रहे—

'पत्रत्रित्वं तुलस्यास्त्रिपलमथ घृतं मार्गशीर्षादिभक्ष्यं
मुष्टीनां त्रिस्तिलानां त्रिपलदधि तथा दुग्धकं गोमयं च ।
त्रित्वं तोयाञ्जलीनां त्रिमरिचकमथो त्रिःपलाः सक्तवः स्यु-
र्गोमूत्रं शर्करा सद्भिरिति विधिना भानुवारे क्रमेण ।।'

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतो मार्गस्य निर्णयः ।।

अथ पौषमासः ।

धनुः संक्रमणे पराः षोडशघटिकाः पुण्याः । अन्यत्प्राग्वत् । अत्रोत्सर्जननिर्णयो वक्तव्यो ऽप्युपाकर्मप्रसङ्गात्प्रागेवोक्तः । कल्पतरौ भविष्ये—

'पौषे मासि यदा देवि ! शुक्लाष्टम्यां बुधो भवेत् ।
तस्यां स्नानं जपो होमस्तर्पणं विप्रभोजनम् ।।
मत्प्रीतये कृतं देवि ! शतसाहस्रिकं भवेत् ।'

अत्रैव रोहिण्यार्द्रायोगे पुण्यतमत्वं तत्रैव ज्ञेयम् ।

पौषशुक्लैकादशी मन्वादिः । सा चोक्ता प्राक् । पौषपौर्णिमानन्तराः सप्तम्यष्टमीनवम्योऽष्टकाद्याः प्रागुक्ताः ।

पौषामावास्यायामर्धोदयाख्यो योगविशेषः । तदुक्तं मदनरत्ने महाभारते—

'अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः ।
अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ।।'

इति पौषमाघयोर्मध्यवर्तिनी पौषपौर्णमास्युत्तरामावास्येत्यर्थ इति भट्टाः । पौषस्य च माघस्य चेत्यर्थ उक्तो मदनरत्ने । तन्न । हेमाद्रिविरोधात् । तत्र हि माघ एवोक्तः । तथा——

'दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन ।' इति ।

हेमाद्रौ मदनरत्ने, कान्दे--

'माघामायां व्यतीपाते आदित्ये विष्णुदैवते ।
अर्धोदयं तदित्याहुः सहस्रार्कग्रहैः समम् ॥'

तत्रैव--

'माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने ।
वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभे ॥' व्रतं कुर्यादित्यग्रेऽन्वयः ।

तत्रैव--

'ब्रह्मविष्णुमहेशानां सौवर्णीः पलसंख्यया ।
प्रतिमास्तु प्रकर्तव्यास्तदर्धेन द्विजोत्तम ! ॥
साग्रं शतत्रयं शम्भोर्द्रोणानां[1] तिलपर्वतः ।
कर्तव्यौ पर्वतौ विष्णुब्रह्मणोः पूर्वसंख्यया ॥
शय्यात्रयं ततः कुर्यादुपस्करसमन्वितम् ।'

तिलैर्होमं कृत्वा प्रतिमां दद्यादित्युक्तं स्कान्दे--

'अर्धोदये तु संप्राप्ते सर्वं गङ्गासमं जलम् ।
शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः ॥
यत्किञ्चिद्दीयते दानं तद्दानं मेरुसन्निभम् ।' इति ।

अत्र दानविशेषो निर्णयामृते स्कान्दे--

'चतुः षष्टिपलं मुख्यममत्रं तत्र कारयेत् ।
चत्वारिंशत्पलं वाऽथ पञ्चविंशतिरेव च ॥' अमत्रं पात्रम् । तच्च कांस्यमयमित्युक्तम् । तत्रैव--

'एवं सुघटितं कार्यं कांस्यभाजनमुत्तमम् ।' इति ।

तथा--'निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ।
पद्मस्य कर्णिकायां तु कर्षमात्रसुवर्णकम् ॥
तदभावे तदर्धं वा तदर्धं वापि कारयेत् ।
भूमौ तु तण्डुलैः शुद्धैः कृत्वाष्टदलमुत्तमम् ॥

---

[1] 'शम्भुशब्दोऽत्र ब्रह्मापर' इति निर्णयसिन्धुकारः ।

अमत्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकम् ।
तेषां पूजा ततः कार्या श्वेतमाल्यैस्तु शोभनैः ।।
वस्त्रादिभिरलङ्कृत्य ब्राह्मणाय निवेदयेत् ।'

मन्त्रस्तु--

सुवर्णपायसाऽमत्रं यस्मादेतत्त्रयीमयम् ।
आपत्तेस्तारकं यस्मात्तद् गृहाण द्विजोत्तम ! ।।
समुद्रमेखलां पृथ्वीं सम्यग् दातुश्च यत्फलम् ।
तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तमम् ।।' इति ।
श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
रत्नावली कृता तत्र गतः पौषविनिर्णयः ।।

अथ माघमासः ।।

अथ माघस्नानम् । तत्र विष्णुः--

'तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् ।
हविष्यं ब्रह्मचर्यं च माघस्नाने महाफलम् ।।' इति सौरमास उक्तः ।
'एकादश्यां शुक्लपक्षे पौषमासे समारभेत् ।
द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनम् ।।' इति ।

पाद्मेऽपि--

'पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ।।
त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विद्याधरोत्तम ।।' इति ।
त्रिकालस्नानं माघोपवासविषयम् । निराहार इत्युक्तेः ।

अत्राधिकारिणो भविष्ये--

'ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
बालवृद्धयुवानश्च नरनारीनपुंसकाः ।।
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम् ।'

पाद्मे--

'सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप ! ।'

ब्राह्मे--

'उष्णोदकेन वा स्नानमशक्ये सति कुर्वते ।
दृढेषु सर्वगात्रेषु उष्णोदं न विशिष्यते ।।'

स्कान्दे--

'पौष्यां तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ।।
पितृणां देवतानां च मूलकं नैव दापयेत् ।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।।
अन्यथा याति नरकं क्षत्रविट्शूद्र एव च ।
वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ।।'

यदा तु माघो मलमासो वा भवति तदा काम्यानां तत्र समाप्तिनिषेधान्मासद्वये स्नानं तत्र नियमाश्च कर्तव्याः । मासोपवासचान्द्रायणादि तु मलमास एव समापयेत् । तदुक्तं दीपिकायाम्- 'नियतत्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समापयेन्मलिने मासोपवासव्रतमिति' ।

स्नानारम्भे च मन्त्रो विष्णुनोक्तः---

'तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकम् ।
माघमासमिमं पूर्णं स्नास्येऽहं देव ! माधव ! ।।
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि ।' इति ।

प्रत्यहं मन्त्रश्च पाद्मे---

'दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातः स्नानं करोम्यद्य माघे पापविनाशनम् ।।
मकरस्थे रवौ माघे गोविन्दाच्युत ! माधव ! ।
स्नानेनानेन मे देव यथोक्तफलदो भव ।।
इमं मन्त्रं समुच्चार्य स्नायान्मौनसमन्वितः ।' इति ।

प्रत्यहं सूर्याघ्र्यं च पाद्मे--

'सवित्रे प्रसवित्रे च परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ।।' इति ।

स्नानकालश्च सूर्योदयः --

'मकरस्थे रवौ यो हि न स्नात्यभ्युदिते रवौ' इति ।
'माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ ।।' इति पाद्मवचनात् ।
'संप्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्गच्छति भास्करे ।।
पुनीमः सर्वपापानि त्रिविधानि न संशयः ।।' इति नारदीयोक्तेः ।
'यो माघमास्युषसि सूर्यकराभितप्ते
स्नानं समाचरति चारुनदीप्रवाहे ।
उद्धृत्य सप्तपुरुषान् पितृमातृवंश्यान्
स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ।।' इति भविष्योत्तरवचनाच्च ।

ब्राह्मे त्वरुणोदय उक्तः --

'अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ।
माधवाङ्घ्रियुगं ध्यायन् यः स्नाति सुरपूजितः ।।' इति ।

तथा-'अरुणोदयमारभ्य प्रातःकालावधि प्रभो ! ।
माघस्नानवतां पुण्यं क्रमात्तत्रावधारणा ।।
उत्तमं तु सनक्षत्रं लुप्ततारं तु मध्यमम् ।
सवितर्युदिते भूयः ततो हीनं प्रकीर्तितम् ।।' इति च ।

तेनात्र शक्त्यपेक्षया व्यवस्था । इदं च स्नानं प्रयागेऽतिप्रशस्तम्-

'काश्याः शतगुणं प्रोक्तं गङ्गायमुनसङ्गमे ।
सहस्रगुणिता सापि भवेत्पश्चिमवाहिनी ।।
पश्चिमाभिमुखी गङ्गा कालिन्द्या सह सङ्गता ।
हन्ति कल्पकृतं पापं सा माघे नृप ! दुर्लभा ।।' इत्यादि

पाद्मादिवचोभ्यः । ब्राह्मे--

'यत्र कुत्रापि वा माघे प्रयागस्मरणान्वितः ।
करोति मज्जनं तीर्थे स लभेद्गाङ्गमज्जनम् ।।'

तथा समुद्रेऽप्यतिप्रशस्तम् । तदुक्तं प्रभासखण्डे--

'माघे मासि च यः स्नायान्नैरन्तर्येण भावतः ।
पौण्डरीकफलं तस्य दिवसे दिवसे भवेत् ।।'

माघस्नानं नित्यकाम्यम् । मासपर्यन्तस्नानाऽसंभवे तु त्र्यहमेकाहं वा स्नायात् ।

'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम्' इति लिङ्गात् ।
'अस्मिन् योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ।
प्रयागे माघमासे तु त्र्यहं स्नानस्य यत्फलम् ।।
नाश्वमेधसहस्रेण तत्फलं लभते भुवि ।।' इत्यादि पाद्मादिवचनात् । अत्र मकरसंक्रमो रथसप्तमी माघीति त्र्यहमित्येके । माघशुक्लदशम्यादीत्यन्ये । मकराद्यत्र्यह इत्यपरे । माघस्याद्यत्र्यह इति केचित् । त्रयोदश्यादीति बहवः ।

'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम् ।' इति पाद्मोक्तेः ।
एतस्यार्थवादत्वाद्यत्किञ्चिद्दिनत्रयमिति भट्टाः ।

तत्त्वं तु– 'संदिग्धेषु वाक्यशेषादिति न्यायात्त्रयोदश्याद्येवेति ।'
प्रयागं विनापि पाद्मे--

'अस्मिन्योगे त्वशक्तोऽपि स्नायादपि दिनत्रयम् ।'

माघस्नाने नियमास्तु नारदीये--

'न वह्निं सेवयेत्स्नातो ह्यस्नातोऽपि वरानने ! ।
होमार्थे सेवयेद्वह्निं शीतार्थे न कदाचन ।।

अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः ।।
अनभ्यङ्गी वरारोहे ! सर्वं मासं नयेद्व्रती ।'

तथा–'अपावृतशरीरस्तु यः कष्टं स्नानमाचरेत् ।
पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः ।।'

तथा–'शङ्खचक्रधरं देवं माधवं नाम पूजयेत् ।
वह्निं हुत्वा विधानेन ततस्त्वेकाशनो भवेत् ।।
भूशय्या ब्रह्मचर्येण शक्तः स्नानं समाचरेत् ।
अशक्तो ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते ।।
तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् तिलदाता च षट्तिलाः पापनाशनाः ।।' इति ।

प्रयागासंभवे काश्यां दशाश्वमेधोत्तरस्थप्रयागतीर्थे स्नानमुक्तं काशीखण्डे––

'काश्युद्भवे प्रयागे ये तपसि स्नान्ति मानवाः ।
दशाश्वमेधजनितं फलं तेषां भवेद् ध्रुवम् ।।' इति ।

स्नानोत्तरं मदनपारिजाते विष्णुः ––

'काष्ठमामान्नमुत्सृज्य पूजयेत्पुरुषोत्तमम् ।
अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः ।।'

भविष्ये––

'तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ।
ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् ।।
एवं स्नानावसाने तु भोज्यं देयमवारितम् ।
भोजयेद्द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः ।।
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि च देयानि प्रच्छादनपटांस्तथा ।।
उपानहौ तथा गुप्तमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ।।'

पाद्मे--

'भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम् ।
अन्नं चैव तथा शक्त्या देयं माघे नराधिप ! ॥
सुवर्णरत्तिकामात्रं दद्याद्वेदविदे तथा ।'

माघान्ते तु विशेषो नारदीये--

'माघावसाने सुभगे षड्रसं भोजनं स्मृतम् ।
सूर्यो मे प्रीयतां देवो विष्णुर्मूर्तिर्निरञ्जनः ॥
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ।
त्रिंशत्तु मोदका देयाः शर्करास्तिलसंयुताः ॥' इति ।

अत्र– 'एकादशीविधानेन व्रतस्योद्यापनं तथा ।' इति पाद्मवचनात् पूर्वेऽह्नि उपवासपूजनादि कृत्वा ऽपरेऽह्नि तिलचर्वाज्यैरष्टोत्तरशतं होमं कृत्वा 'सवित्रे प्रसवित्रे चेति' पूर्वोक्तं मन्त्रमुक्त्वा--

दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेह माघस्नानमुषः पते ! ॥
इति समापयेत् । इति संक्षेपः ।

अथ मकरसंक्रान्तिः ॥

मकरसंक्रान्तौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्याः ।

'त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः ।' इति ब्रह्मवैवर्तात् । माधवमते तु विंशतिः ।

'त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परा ।' इति वृद्धवसिष्ठोक्तेः । यदा तु सूर्यास्तात्पूर्वं संक्रान्तिर्भवति तदोभयमते पूर्वमेव पुण्यकालः । रात्रौ तु प्रदोषे निशीथे वा मकरसंक्रमे माधवमते द्वितीयदिन एव पुण्यम् ।

'यद्यस्तमयवेलायां मकरं याति भास्करः ।
प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि ॥' इति वृद्धगार्ग्यवचनात् । अस्तमयः प्रदोषः । प्रदोषे पूर्वरात्रे ।

'कार्मुकं तु परित्यज्य झषं संक्रमते रविः ।
प्रदोषे वार्धरात्रे वा तदा भोगः परेऽहनि ॥'

इति भविष्योक्तेश्च । यत्तु हेमाद्रिणा आद्यो वाशब्दो यथाऽर्थे द्वितीयस्तथाऽर्थे यथा प्रदोषे पूर्वेद्युस्तथार्धरात्रे परेऽह्नि इत्युक्तम् । तेन परेऽह्नि पुण्यं वक्तुं प्रदोषे इति । दिनद्वये पुण्यनिरासार्थमर्धरात्रग्रहणम् । हेमाद्रिस्मृत्यर्थसारानन्तभट्टादिमते तु निशीथात्पूर्वं पश्चाच्च संक्रान्तौ पूर्वदिने परदिने वा पुण्यम् ।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमणं यदा ॥
दिनान्ते पञ्चनाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ॥' इति स्कान्दवचनात् ।

पूर्वापरविभागेनेति मकरकर्कटभिन्नविषयम् । पूर्वोक्तवचनविरोधादिति मदनरत्ने उक्तम् ।

'षडशीतिमुखेऽतीते अतीते चोत्तरायणे ।' इत्यादिविरोधाच्च तेन पूर्वैकवाक्यतयायमर्थः । रात्रौ पूर्वभागे मकरसंक्रमे परेऽहन्युदये पञ्चनाड्यः पुण्याः । रात्रावपरभागे कर्कटसंक्रमे पूर्वदिनान्ते पञ्चनाड्यःपुण्या इति । एवं सर्वेषामविरोधः । मकरे सामान्येन परदिने पुण्यत्वे पुण्यातिशयार्थमिदम् । यत्तु देवलयज्ञपार्श्वौ–

'आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः ।
रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवा ॥' इति ।

अत्र माधवः– अयने दिवा जाते तदर्धं पुण्यं । कर्के पूर्वं मकरे अन्त्यम् । एतन्मध्यदिनायनपरमिति । हेमाद्रिस्तु– 'रात्रौ विषुव-

त्यासन्नदिनार्धं पुण्यम् । अयने त्वासन्नदिनं पुण्यम् । दिने इति पाठे उभयत्र दिनार्धं पुण्यमित्याह ।' एतदेवोक्तं दीपिकायाम्–

'अथायनमधः पश्चान्निशीथाद्भवेद्यद्यासन्नमहस्तदर्धमथवा पुण्यमिति' । तत्त्वं तु– आसन्नसंक्रममित्यस्य विषुवत्येवान्वयः । अयने रात्रौ सति दिने पुण्यम् । कस्मिन्नित्यपेक्षायां कर्के पूर्वेऽह्नि मकरे परेऽह्नि इति वाक्यान्तरवशादर्धे उच्यमाने न कोऽपि विरोधः । यत्त्वनन्तभट्टः–

'अथ संक्रमणं भानोर्निशीथात्प्राग्यदा भवेत् ।।
अयनं विषुवं तत्र प्राग्दिनान्तिमनाडिकाः ।।
पञ्च पुण्यतमाः पश्चान्निशीथार्धाद्भवेत्तदा ।
आद्याः परदिनस्यापि तद्वदित्येष निर्णयः ।।' इति ।

अपरार्केऽप्येवम्–

'अस्तं गते यदा सूर्ये झषं याति दिवाकरः ।
प्रदोषे वाऽर्धरात्रे वा तदा पुण्यं दिनद्वयम् ।।'

इति बौधायनवचनाद्दिनद्वयं वा पुण्यकालः । 'तदा पुण्यं दिनान्तरम्' इति मदनरत्ने पाठः । गुर्जरप्राच्योदिच्यास्त्वदमेवाद्रियन्ते । अत्रापि पूर्ववद्व्याख्येयम् । तिथितत्त्वादिगौडग्रन्थास्तुप्रदोषार्धरात्रभिन्ने रात्रेः पूर्वभागे पूर्वदिने परभागे च परदिने पुण्यमन्यसंक्रान्तिवद्विशिष्य तयोर्निर्देशात् । प्रदोषश्च–

'प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते ।'

इति वत्सोक्त इत्याहुः । तन्न । 'अस्तं गते' इति त्रितयवैयर्थ्यापत्तेः । अतः प्रदोषपदेन तद्भिन्नैव रात्रिरुच्यते । अत एव 'यावन्नोदयते रविः' इति वृद्धगार्ग्यादिभिर्दक्षिणायने पूर्वरात्रौ संक्रमे पूर्वदिनमुक्तम् । वत्सोक्तिरप्यध्ययनादिपरा । इह तु त्रिमुहूर्त एव प्रदोषः ।

मकरे दानविशेषो हेमाद्रौ–

'धेनुं तिलमयीं राजन् ! दद्याद् यश्चोत्तरायणे ।
सर्वान्कामानवाप्नोति विन्दते परमं सुखम् ॥'

विष्णुधर्मेऽपि–

'उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम् ।
तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते ॥' इति ।

शिवरहस्येऽपि–

'तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं शुभैः ।
तिला देयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे ॥
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः ।'

कल्पतरौ कालिकापुराणे–

'होमं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे ।
तान् यो देवाय विप्रेभ्यो हाटकेन समं ददेत् ॥
उत्तरायणमासाद्य नरः कस्मातस शोचति ।'

तथा मकरे रात्रावपि श्राद्धादि भवतीत्युक्तं प्राक् ।

माघामायां योगविशेषोऽर्धोदयः प्रागेवोक्तः । माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन–

'अनर्काभ्युदिते काले माघकृष्णचतुर्दशीम् ।
स्नातः सन्तर्प्य तु यमं सर्वपापैः प्रमुच्यते ॥' इति ।

माघशुक्लचतुर्थी तिलचतुर्थी । सा प्रदोषव्यापिनी ग्राह्या ।

'माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ।
ये त्वां ढुण्ढे ऽर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥'
इति काशीखण्डात् ।

'माघशुक्लचतुर्थ्यां तु नक्तकाल उपोषितः ।
अर्चयित्वा तु यो विप्रो जागरं तत्र कारयेत् ॥' इति लैङ्गाच्च ।

इयमेव कुन्दचतुर्थी । सा प्रदोषव्यापिनी ग्राह्या ।

'माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।
संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नरः ।।' इति
कौर्मोक्तेः ।

माघशुक्लपञ्चमी श्रीपञ्चमी । तदुक्तं हेमाद्रौ वाराहे–

'माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः ।
पञ्चम्यां कुन्दकुसुमैः पूजां कुर्यात्समृद्धये ।।'

इयं माधवमते पूर्वा । हेमाद्रिमते परा । चैत्रशुक्ले श्रीपञ्चमीति दिवोदासः । अत्र कृत्यविधिः–

तत्रादौ यजमानः कृतनित्यक्रिय उपलिप्ते वितानाधिशोभिते गृहाङ्गणे दीपं प्रज्वाल्य मण्डपस्य ईशानदिग्भागे कलशमेकं स्थापयेत् । तत्प्रकारश्च 'भूरसीति' भूसंस्करणम् । 'धान्यमसीति' धान्यं संस्थाप्य 'आ जिघ्रकलशम्' इति अव्रणं कलशं स्थापयेत् । 'वरुणस्योत्तम्भनम्' इति निर्मलतीर्थजलादिना कलशं पूरयेत् । 'गन्धद्वाराम्' इति गन्धं क्षिपेत् । 'या ओषधीः पूर्वाजाता' इति मन्त्रेण (हरिद्राद्वयम्, कुष्ठ–मांसी–मुरा–शैलेय–चन्दन–वच–कर्चूर–मुस्ताख्याः) सर्वौषधीः प्रक्षिपेत् । 'ओषधयः समवदन्त, इति यवान् । 'काण्डात्काण्डात्' इति दूर्वा । 'अश्वत्थेव' इति मन्त्रेण (अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधाख्य) पञ्चपल्लवान् । 'स्योना पृथिवी' इति (गजस्थानाश्वस्थान-वल्मीक-संगम–ह्रद–गोष्ठ–राजरथ्यासमाहृताः) सप्तमृदः । 'याः फलिनीः' इति फलानि । 'परिवाजपतिः कविः' इति (सुवर्ण–रजत–मुक्ता–लाजावर्त–प्रबालसंज्ञानि) पञ्चरत्नानि । 'अभावे पंचरत्नानां हेम सर्वत्र योजयेत् ।' इति वचनात् । 'हिरण्यगर्भं' इति हिरण्यं वा ।

……

'युवा: सुवासा: परिवीत आगात्स उ श्रेयान्भवति जायमान: ।
तं धीरास: कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त: ॥'

इति वस्त्रयुग्मेन रक्तवस्त्रेण च वेष्टयेत् । (पूर्णादर्वि) इति धान्यपूर्णपात्रं कलशोपरि न्यसेत् । तदुपरि (तत्त्वायामीति) वरुणमावाह्य एतान्यासनपाद्यार्घ्याचमनीयस्नानयज्ञोपवीतचन्दनाक्षतपुष्पधूपदीपनैवेद्यादीनि वरुणाय नम: । इति पूजयित्वा वरुण: साङ्ग: सपरिवार: प्रीयतामिति प्रार्थयित्वा कलशमभिमन्त्रयेत् ।

सर्वे समुद्रा: सरितस्तीर्थानि जलदा नदा: ।
आयान्तु यजमानस्य दुरितक्षयकारका: ॥
कलशस्य मुखे विष्णु: कण्ठे रुद्र: समाश्रित: ।
मुले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणा: स्मृता: ॥
कुक्षौ तु सागरा: सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेद: सामवेदोऽप्यथर्वण: ॥
अङ्गैश्च सहिता: सर्वे कलशं तु समाश्रिता: ।

तत: कलशप्रार्थना–

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवा: सर्वे त्वयि स्थिता: ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणा: प्रतिष्ठिता: ॥
शिव: स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापति: ।
आदित्या वसवो रुद्रा विश्वेदेवा: सपितृका: ॥
त्वयि तिष्ठन्ति सर्वेऽपि यत: कामफलप्रदा: ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ।

इति कलशं प्रार्थयित्वा । तत:– अद्येत्यादि वसन्तपञ्चम्यां करिष्यमाणरतिकामपूजानिर्विघ्नपरिसमाप्त्यर्थं गणपत्यादिदेवता-

पूजनमहं करिष्ये। इति सङ्कल्प्य कलशस्कन्धप्रदेशे 'गणानान्त्वा' इति गणपतिम्। 'अम्बे अम्बिके' इति दुर्गाम्। 'वायोयेते' इति वायुम्। 'ऊर्ध्वा अस्य' इत्याकाशम्। 'अश्विनोर्भैषज्येन' इत्यश्विनीकुमारौ। एवं पञ्चलोकपालान् संपूज्य 'आकृष्णेन' इत्यादिनवग्रहमन्त्रैः सूर्यादिनवग्रहाँश्च पूजयित्वा कलशस्याग्रभागे श्वेतवस्त्रलिखिताष्टदले पीठिकोपरि क्रमेण इन्द्रादिदिक्पालान्स्वस्वमन्त्रैः पूजयेत्। तद्यन्त्रक्रमेण पूर्वाद्यष्टदलेषु कोणेषु 'त्रातारमिन्द्रम्' इति पूर्वे इन्द्रम्। 'अग्निन्दूतम्' इत्याग्नेये अग्निम्। 'यमायत्वा' इति दक्षिणे यमम्। 'असुन्वन्तमयजमानम्' इति नैर्ऋत्ये निर्ऋतिम्। 'तत्त्वायामि' इति पश्चिमे वरुणम्। 'सोमो धेनुम्' इत्युत्तरे कुवेरम्। 'वय ꣳ सोमेति' ईशान्यामीशानम्। एतान् पञ्चोपचारेण पूजयित्वा, ततोऽष्टदलमध्ये रतिकामौ पूजयेत्।

ॐ ह्रीँ रतिकामौ इहागच्छतम्, इह तिष्ठतम्। इति स्थापयित्वा—आसनम्, पाद्यम्, अर्ध्यम्, आचमनीयम्, स्नानम्, पञ्चामृतमन्त्रैः पञ्चामृतस्नानम्, शुद्धोदकस्नानम्, गङ्गाजलस्नानम्, नारिकेलफलम्, नानाविधसुगन्धितैलागरुकर्पूरश्रीखण्डपटवासपलाशपुष्परक्तकरवीरादीनि, वस्त्रम्, यज्ञोपवीतम्, पुनराचमनीयम्, चन्दनम्, अक्षताः, पुष्पाणि, धूपः, दीपः, नानाविधफलपक्वान्नादिनैवेद्यम्, पुनराचमनीयम्, ताम्बूलम्, पूगीफलम्, चामरादर्शादीनि— 'ॐ ह्रीँ रतिकामाभ्यां नमः'। दक्षिणाम्, पुष्पाञ्जलिम् 'ॐ ह्रीँ रतिकामाभ्यां नमः'। इति पूजयित्वा साष्टाङ्गं प्रणम्य तौ सानुनयं विसृज्य ब्राह्मणान् पूजयित्वा, एवं पूजां निर्वर्त्य ब्राह्मणमुखात् वसन्तादिरागं शृणुयात्। ततोऽन्यब्राह्मणाऽऽशीर्वादश्लोकादीन् श्रुत्वा रतिकामौ विसृज्य कलशोदकेनाम्रपल्लवेन ब्राह्मणेनाऽभिषिक्तो यजमानो भूयसीं दक्षिणां दद्यात्। तत्र वाक्यम्—अद्येत्यादि देशकालौ संकीर्त्य इन्द्रादिदिक्कालावरणसहितरतिकामपूजासाङ्गतासिद्ध्यर्थं दक्षिणां यद्द्रव्यं तद्दैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे। इति दक्षिणां दद्यात्॥ इति वसन्तपञ्चमी।

माघशुक्लसप्तमी रथसप्तमी। सा अरुणोदयव्यापिनी ग्राह्या–

'सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी।
अरुणोदयवेलायां तस्यां स्नानं महाफलम्॥' इति चन्द्रिकायां विष्णुवचनात्।

'अरुणोदयवेलायां शुक्ला माघस्य सप्तमी।
प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा॥' इति वचनाच्च।

यत्तु दिवोदासिये –

'अचलासप्तमी दुर्गा शिवरात्रिर्महाभरः।
द्वादशी वत्सपूजायां सुखदा प्राग्युता सदा॥'

इति षष्ठीयुतत्वमुक्तम्। तद्यथा– पूर्वेऽह्नि घटिकाद्वये षष्ठी सप्तमी च परेद्युः क्षयवसादरुणोदयात्पूर्वं समाप्यते तत्परं ज्ञेयम्। तत्र षष्ठ्यां सप्तमीक्षयं प्रवेश्यारुणोदये स्नानं कार्यम्। मदनरत्ने भविष्ये–

'माघे मासि सिते पक्षे सप्तमी कोटिभास्करा।
कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः।'

अत्र विधिर्हेमाद्रौ भविष्ये–

'कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलम्।
रात्र्यन्ते चालयेथास्त्वं दत्त्वा शिरसि दीपकम्॥'

तथा जलं प्रक्रम्य–

'न केन चाल्यते यावत्तावत्स्नानं समाचरेत्।
सौवर्णे राजते ताम्रे भक्त्याऽलाबुमये तथा॥

तैलेन वर्तिर्दातव्या महारजनरञ्जिता।
महारजनं कुसुम्भम्।
समाहितमना भूत्वा दत्त्वा शिरसि दीपकम्॥

भास्करं हृदये ध्यात्वा इमं मन्त्रमुदीरयेत् ।
नमस्ते रुद्ररूपाय रसानां पतये नमः ।।
वरुणाय नमस्तेऽस्तु हरिवास ! नमोऽस्तु ते ।
जले परिहरेद्दीपं ध्यात्वा सन्तर्प्य देवताः ।।
चन्दनेन लिखेत्पद्ममष्टपत्रं सकर्णिकम् ।
मध्ये शिवं सपत्नीकं प्रणवेन च संयुतम् ।।'

पूर्वादिदलेषु रविभानुविवस्वद्भास्करसवित्रर्कसहस्रकिरणसर्वात्मकान्संपूज्य गृहं गच्छेत् । स्नानमन्त्राश्च काशीखण्डे--

'यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ।
तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी ।।
एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् ।
मनोवाक्कायजं यच्च ज्ञाताज्ञाते च मे पुनः ।।
इति सप्तविधं पापं स्नानान्मे सप्तसप्तके ।
सप्तव्याधिसमायुक्तं हर माकरि ! सप्तमि ! ।।
एतन्मन्त्रत्रयं जप्त्वा स्नात्वा पादोदके नरः ।
केशवादित्यमालोक्य क्षणान्निष्कलुषो भवेत् ।।'

दिवोदासीये मदनरत्ने च-- इक्षुदण्डेन जलं चालयित्वा सप्तार्कपत्राणि वदरीपत्राणि च शिरसि निधाय पूर्वोक्तैर्मन्त्रैः स्नात्वा तिलपिष्टमयापूपैर्हैमं सूर्यं संपूज्य विप्राय दद्यात् ।

अर्घ्यमन्त्रो मदनरत्ने---

'सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ! ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ।।'

ततः-- 'जननी सर्वलोकानां सप्तमी सप्तसप्तिके ।
सप्तव्याहृतिके देवि नमस्ते सूर्यमण्डले ।।' इति प्रार्थयेत् ।

सौरागमे--

'अर्कपत्रैः सबदरैर्दूर्वाक्षतसचन्दनैः ।
अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ।।'

अत्र दानविशेषो मदनरत्ने, भविष्ये--

'ताम्रपात्रे यथाशक्त्या मृन्मये वाथ भक्तिमान् ।
स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा ।।

काञ्चनं तालकं कृत्वा अशक्तस्तिलपिष्टजम् ।
संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत् ।।

आदित्यस्य प्रसादेन प्रातः स्नानफलेन च ।
दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकम् ।।'

तालकं कर्णाभरणमिति तत्रैवोक्तम् । दीपपात्रमिति हेमाद्रौ ।

तत्रैव भविष्योत्तरे--

'एवं विधं रथवरं रथवाजियुक्तं
हैमं च हैमशतदीधितिना समेतम्
दद्याच्च माघसितसप्तमिवासरे यः ।
सोऽसङ्गचक्रपतिरेव महीं भुनक्ति ।।'

इयं मन्वादिरपि । इयं च शुक्लपक्षस्थत्वात्पौर्वाह्णिकी ग्राह्या । यदा माघो मलमासो भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात् ।

'मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च ।' इति स्मृतिचन्द्रिकोक्तेः ।

माघशुक्लाष्टमी भीष्माष्टमी । तदुक्तं हेमाद्रौ पाद्मे---

'माघमासि सिताष्टम्यां सतिलं भीष्मतर्पणम् ।
श्राद्धं च ये नराः कुर्युस्ते स्युः सन्ततिभागिनः ।।'

भारतेपि-- 'शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय योऽञ्जलिम् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ।।' इति धवलनिबन्धे स्मृतिः।

'अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकम् ।
अन्नं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः ॥'

सर्ववर्णोक्तेर्द्विजातय इति संबोधनम् । तर्पणमन्त्रस्तु तत्रैव---

'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥
वैयाघ्रपदगोत्राय साङ्कृत्यप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥
वसूनामवताराय शंतनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे ॥'

एतच्च जीवत्पितृकस्यापि भवति ।

'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।' इति पाद्मोक्तेः ।

एतच्चापसव्येन कार्यमिति दिवोदासीये ।

अत्र श्राद्धं काम्यं तर्पणं तु नित्यम् ।

'ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम ॥' इति मदरत्ने वचनात् ।

माघशुक्लद्वादशी भीष्मद्वादशी–

'त्वया कृतमिदं वीर तव नाम्ना भविष्यति ।
सा भीष्मद्वादशी ह्येषा सर्वपापहरा शुभा ॥' इति हेमाद्रौ पाद्मवचनात् । इयं पूर्वयुता युग्मवाक्यात् ।

माघी पूर्णिमा परेत्युक्तं प्राक् । तथा हेमाद्रौ पाद्मे–

'मघास्थयोश्च जीवेन्द्वोर्महामाघीति कथ्यते ।'

तत्रैव ज्योतिषे–

'मेषपृष्ठे यदा सौरिः सिंहे च गुरुचन्द्रमाः ।
भास्करः श्रवणर्क्षे च महामाघी च सा स्मृता ॥'

तथा भविष्ये–

'वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥'

तथा– 'तिलपात्राणि देयानि कञ्चुकाः कम्बलास्तथा' इति ।

माघपूर्णिमानन्तरफाल्गुनकृष्णाष्टम्यां विशेषः कल्पतरौ–

'फाल्गुनस्य च मासस्य कृष्णाष्टम्यां महीपते' इत्युपक्रम्य–

'जाता दाशरथेः पत्नी तस्मिन्नहनि जानकी ।
उपोषितो रघुपतिः समुद्रस्य तटे तदा ॥
रामपत्नी च संपूज्या सीता जनकनन्दिनी ।'

अथ शिवरात्रिः ।

फाल्गुनकृष्णचतुर्दशी शिवरात्रिः । सा च केषुचिद्वचनेषु प्रदोषव्यापिनी ग्राह्या । केषुचिन्निशीथव्यापिनीति । तत्राद्या माधवीये वायवीये–

'त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु ।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् ॥'

स्मृत्यन्तरेऽपि–

'प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥'

अत्र प्रदोषो रात्रिः । उत्तरार्धे तस्या हेतुत्वोक्तेः । कामिकेऽपि–

'आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ।
तद्रात्रिः शिवरात्रिः स्यात् सा भवेदुत्तमोत्तमा ॥' इति ।

द्वितीयापि नारदसंहितायाम्–

'अर्द्धरात्रियुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥'

स्मृत्यन्तरेऽपि– 'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति ।

ईशानसंहितायाम्–

'माघकृष्णचतुर्दश्यामादिदेवो महानिशि ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ।।
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ।
अर्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।।
तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ।।
नार्धरात्रादधश्वोर्ध्वयुक्ता यत्र चतुर्दशी ।
नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानितः ।।'

अर्धरात्रिश्च द्वितीययामान्त्यतृतीययामाद्यघटीद्वयरूप इति माधवः । वचनं तूक्तं प्राक् । एवं सति पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव ।

'त्रयोदशी यदा देवि ! दिनभुक्तिप्रमाणतः ।
जागरे शिवरात्रिः स्यान्निशिपूर्णा चतुर्दशी ।।' इति स्कान्दोक्तेः ।
दिनभुक्तिरस्तमयः ।

'जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।' इति स्कान्दाच्च । दिनद्वये निशीथव्याप्तौ तु हेमाद्रिमते पूर्वा ।

'अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ।।' इति पाद्मवचनात् । मदनरत्नेऽप्येवम् । गौडा अप्येवमाहुः । निर्णयामृते तु सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव । अर्धरात्रवाक्यानि कैमुतिकन्यायेन प्रदोषस्तावत्कानीत्युक्तम् । तन्न । अर्धरात्रस्य पूर्वं कर्मकालत्वोक्तेः ।

'व्याप्यार्धरात्रं यस्यां तु वर्तते या चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ।।

तदूर्ध्वाधोन्विता भूता सा कार्या व्रतिभिः सदा ।' इति ज्ञानसंहितोक्तेः । पूर्वेद्युर्निशीथस्य परेद्युः प्रदोषस्यैकैकव्याप्तौ पूर्वैव । जयायोगस्य प्राशस्त्यात् । तत्रोक्तं नागरखण्डे--

'माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
अनङ्गेन समायुक्ता कर्तव्या सा तदा तिथिः ॥' इति ।

पाद्मेऽपि– 'अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ॥' इति ।

स्कान्देऽपि– 'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति ।
'महतामपि पापानां दृष्टा वै निष्कृतिः पुरा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां शिवां तिथिम् ॥'

इति स्कान्दे दर्शयोगस्य निन्दितत्वाच्च । यदा चतुर्दशी पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता परेद्युश्च निशीथादर्वागेव समाप्ता तदा परेद्युरेकव्याप्तिसत्त्वात्परैव ।

'माघासिते भूतदिनं हि राजन्
उपैति योगं यदि पञ्चदश्याः ।
जयाप्रयुक्तां न तु जातु कुर्यात्
शिवस्य रात्रिं प्रियकृच्छिवस्य ॥' इति वचनात् ।

एवं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्त्वात् पूर्वैव । तेन दिनद्वये निशीथव्याप्तौ प्रदोषव्याप्त्या निर्णयः । दिनद्वये प्रदोषव्याप्तौ निशीथव्याप्त्या निर्णयः । एकैकव्याप्तौ तु निशीथेन निर्णय इति । इयं च रविसोमभौमवासरेषु शिवयोगे चातिप्रशस्ता ।

लैङ्गे– 'फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहिताः ।
कृत्तिवासेश्वरं लिङ्गं येऽर्चयन्ति शिवं शुभम् ॥
ते यान्ति परमं स्थानं सदाशिवमनामयम् ।' इति ।

अथामान्तमासेन माघकृष्णचतुर्दश्यां शिवरात्रिव्रतम् । तच्चार्धरात्रव्यापिन्यां कार्यम् । तदुक्तं नारदीयसंहितायाम्–

'अर्धरात्रियुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥'

ईशानसंहितायामपि–

'माघकृष्णचतुर्दश्यामादिदेवं महानिशि ।
शिवलिङ्गममुं तत्र कोटिसूर्यसमप्रभम् ।।
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ।' इति ।

माघकृष्णत्वं चात्रामान्तमासपरत्वेन । अत एव–

'चतुर्दश्यां तु कृष्णायां फाल्गुने शिवपूजनम् ।
तामुपोष्य प्रयत्नेन विषयान् परिवर्जयेत् ।।' इति सुमन्तुवचने पूर्णिमान्तमासोऽप्युक्तः ।

'महानिशार्धे घटिके रात्रेर्मध्यमयामयोः ।' इति देवलोक्तेर्निशीथरूपैव । एवञ्चार्धरात्रशब्दोऽपि तत्पर एव । दिनद्वये निशीथव्याप्तावव्याप्तौ वा परैव । प्रदोषव्याप्तिलाभात् ।

'निशाद्वये चतुर्दश्यां पूर्वा त्याज्या परा शुभा ।
आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी ।।
तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा ।' इति ।
'त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ।
जागरे शिवरात्रिः स्यान्निशिपूर्णा चतुर्दशी ।।
प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ।।
अहोरात्रव्रतं यच्च एक एव तिथौ गते ।
तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती ।।' इति कार्तिकशिवरहस्यस्मृत्यन्तरादिवचनाच्च पूर्वदिने निशीथे परदिने प्रदोषे तदा पूर्वैव ।

'अर्धरात्रात्पुरस्ताच्च जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ।।' इति पाद्मे जयायोगस्य विहितत्वात् ।

'महतामपि पापानां दृष्टा वै निष्कृतिः पुरा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम् ।।' इति स्कान्दे

दर्शयोगस्य निन्दितत्वाच्च । यत्तु– कालचक्रविवेचने दिनद्वये निशीथव्याप्तावेव पूर्वविधायकान्युत्तरविद्धानिषेधकानि वचनानि सावकाशानीत्युक्त्वा पूर्वैव ग्राह्या इत्युक्तम् । तत्र समञ्जसम्–

'निशाद्वये चतुर्दश्यां पूर्वा त्याज्या परा शुभा ।' इति माधवाद्युदाहृतकामिकवचनविरोधात् । न च पूर्वविधायकानामुत्तरविद्धानिषेधकानां विषयालाभ इति शङ्क्यम् । प्रदोषनिशीथयोर्विधेर्निशीथग्राह्यताया उपोद्बलकत्वेन विषयलाभस्यानुपदमेवोक्तत्वात् प्रदोषव्याप्तिलाभाच्च ।

'माघासिते भूतदिनं हि राज–
न्नुपैति योगं यदि पञ्चदश्याम् ।
जयाप्रयुक्तां न तु जातु कुर्यात्
शिवस्य रात्रिं प्रियकृच्छिवस्य ।।' इति हेमाद्रिमाधवाद्युदाहृतपुराणवचनादपि परैव । अस्मिँश्च व्रते उपवासजागरणपूजानां फलसंबन्धात्त्रयमपि प्रधानम् । तच्च नागरखण्डे–

'उपवासप्रभावेण बलादपि च जागरात् ।
शिवरात्रेस्तथा तस्यां लिङ्गस्यापि प्रपूजया ।।
अक्षय्याँल्लभते भोगाञ्शिवसायुज्यमाप्नुयात् ।' इति ।

इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च–

'परात्परतरं नास्ति शिवरात्रिव्रतात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ।।
जन्तुर्जन्मसहस्रेषु युज्यते नात्र संशयः ।' इति स्कान्दे । अकरणे प्रत्यवायश्रुतेर्नित्यम् ।

'शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीम् ।
मातुः पयोधररसं न पिबेत्स कदाचन ।।' इत्यादि तत्रैव च फलश्रुतेः काम्यमिति । विस्तरस्तु तातकृतसमयमयूखे द्रष्टव्यः ।

अथ पारणा

शिवरात्रिपारणे तु विरुद्धवाक्यानि दृश्यन्ते । स्कान्दे–

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥' ।
'जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिव्याप्ते च पारणम् ॥' इति ।

तिथिमध्येऽपि पारणं स्कान्दे उक्तम्–

'उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ॥
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
संस्नातानि भवन्तीह भूतायां पारणे कृते ॥
तिथीनामेव सर्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥' इति । वयं तु–

'तिथ्यन्ते पारणं भवेत्' इति कृष्णाष्टम्यादि विषयमेव । न तु शिवरात्रिविषयम् ।

पर्युदस्तशिवरात्र्याः सर्वप्रकारेषु तिथिमध्य एव पारणेति ज्ञेयम् । तदुपादानं तु पूर्वयुतत्वमात्रकथनार्थम् । तस्मात्– 'विना शिवचतुर्दशीम्' इति । इदं च व्रतं संयोगपृथक्त्वन्यायेन नित्यं काम्यं च । तथा च माधवीये स्कान्दे–

'परात्परतरं नास्ति शिवरात्रिव्रतात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ॥
जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ।'
इत्यकरणे प्रत्यवायश्रुतिः ।

'वर्षे वर्षे महादेवि नरो नारी पतिव्रता ।
शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत् ॥'
इति वीप्साश्रुतेः ।

'अर्णवो यदि वा शुष्येत् क्षीयते हिमवानपि ।

चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम् ।।' इति वचनाच्च नित्यता ।

'मम भक्तस्तु यो देवि शिवरात्रिमुपोषकः ।
गणत्वमक्षयं दिव्यमक्षयं शिवशासनम् ।।
सर्वान् भुक्त्वा महाभोगाँस्ततो मोक्षमवाप्नुयात् ।' इति स्कान्दात् ।
'द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तथा।' इति ।

तत्रैवेशानसंहितावचनात्काम्यता । तत्रैव-

'शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ।'

अत्र जागरोपवासपूजाः समुदिताः । व्रतं न तु प्रत्येकम् । समुदितानां फलसंबन्धात् । यत्तु-

'अथवा शिवरात्रिं च पूजा जागरणैर्नयेत् ।'

तथा- 'अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत् ।
सर्वान्कामानवाप्नोति शिवेन सह मोदते ।।
कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान् ।
जागरं कुरुते तत्र स रुद्रसमतां व्रजेत् ।।'

इत्यादि स्कान्दं तदनुकल्पत्वादशक्तपरम् । माघेतरप्रतिमासशिवरात्रिस्तु शिवरात्रिशब्दस्य माघकृष्णचतुर्दश्यामेव रूढत्वात् ।

'माघमासस्य शेषे या प्रथमा फाल्गुनस्य च ।
कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तिता ।।' इति हेमाद्रौ वचनाच्च । अस्याऽऽरम्भो हेमाद्रौ स्कान्दे-

'आदौ मार्गशिरे मासि दीपोत्सवदिनेऽपि वा ।
गृह्णीयान्माघमासे वा द्वादशैवमुपोषयेत् ।।'

तथा- 'दीपोत्सवे तथा माघे कृष्णा या तु चतुर्दशी ।
द्वादशस्वपि मासेषु प्रकुर्यादिह जागरम् ।।

एवं द्वादशवर्षेषु द्वादशैव तपोधनान् ।' वरयेदिति शेषः । चतुर्दश वा विप्रानाचार्यं च वृत्वा–

'कुम्भोपरि न्यसेद्देवमुमया सहितं शिवम् ।
सौवर्णेऽप्यथवा रौप्ये वृषभे संस्थितं शुभे ।।' इत्युक्तम् ।

हैमीं मूर्तिं संपूज्याऽचरं चरं वा लिङ्गं पञ्चामृतसहस्रशतपञ्चाशत्तदर्धान्यतरकुम्भैः संस्नाप्य संपूज्य जागरं कृत्वा परेद्युस्तिलान् सहस्रं शतं वा हुत्वा विप्रेभ्यो वस्त्राणि गाश्च द्वादश दत्त्वाऽऽचार्याय धेनुं शय्यां च दत्त्वा विप्रान् भोजयेदिति मदनरत्ने उक्तम् ।

पारणं चैतद्व्रते स्कान्दे तिथिमध्ये तदन्ते चोक्तम्–

'उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते यदि वा न वा ।।

ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
संस्नातानि भवन्तीह भूतायां पारणे कृते ।।

तिथीनामेव सर्वासामुपवासव्रतादिषु ।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ।।'

तथा–'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिस्तथैव च ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ।' इति ।

अनयोर्विरुद्धवचनयोर्व्यवस्थैवं माधवेनोक्ता–

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ।।'

इति वचनाद्यामत्रयमध्ये चतुर्दशीसमाप्तौ तिथ्यन्ते । तदुत्तरगामित्वे तु प्रातस्तिथिमध्ये एवेति । तातचरणास्तु–तिथिमध्यकालो मुख्यस्तदंशकालो गौण उत्तरभावित्वादित्याहुः । केचित्तु–शक्तस्तिथ्यन्ते, अशक्तस्तिथिमध्य एवेत्यूचुः । न च 'कृतैः सुकृतलक्षैश्चे' त्यादिस्तुतिरनर्थिकेति वाच्यम् ।

'आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः ।
अतः सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा ।।'

इत्यादिवदशक्तं प्रत्येव तिथिमध्यपारणायास्तावक्त्वेन सार्थकत्वादिति । परे तु– तिथ्यन्तपारणाविधानं न शिवरात्रिपरम् । किन्तु, यत्राष्टम्यादौ तिथ्यन्तपारणाप्राप्तिरस्ति तत्परमेव । शिवरात्रिग्रहणं तु पूर्वविद्धा विधानार्थमिति । वस्तुतस्तु–

'सा ह्यस्तमयपर्यन्तव्यापिनी चेत्परेऽहनि ।
दिवैव पारणं कुर्यात्पारणा नैव दोषभाक् ।।'

इति शिवरात्रिप्रकरणपठितकालादर्शादिलिखितवचनादेव तिथिसमाप्तौ तिथ्यन्तेऽन्यथा तन्मध्य एवेति निर्णयः ।

अथ व्रतविधिः । मासपक्षाद्युल्लिख्य मम पापक्षयार्थमक्षय्यभोगमोक्षप्राप्त्यर्थं शिवरात्रिव्रतं करिष्ये । इति संकल्प्य षोडशोपचारैः शिवपूजां कुर्यात् । तत्र पूजाप्रकारः–

आवाहनम्– आगच्छ देवदेवेश मर्त्यलोकहितेच्छया ।
पूजयामि विधानेन प्रसन्नः सुमुखो भव ।।

आसनम्– पादासनं कुरु प्राज्ञ निर्मलं स्वर्णनिर्मितम् ।
भूषितं विविधै रत्नैः कुरु त्वं पादुकासनम् ।।

पाद्यम्– गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।।

अर्घ्यम्– गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना ।
अर्घ्यं गृहाण देवेश भक्ति मे ह्यचलां कुरु ।।

स्नानम्– मन्दाकिन्याः समानीतं हेमाम्भोरुहवासितम् ।
स्नानाय ते मया भक्त्याऽऽनीतं स्वीक्रियतां विभो ।।

वस्त्रम्– वस्त्रं सूक्ष्मं दुकूलं च देवानामपि दुर्लभम् ।
गृहाण त्वमुमाकान्त प्रसन्नो भव सर्वदा ।।

यज्ञोपवीतम्– यज्ञोपवीतं सहजं ब्रह्मणा निर्मितं पुरा ।
आयुष्यं बलवर्चस्वमुपवीतं गृहाण मे ॥
गन्धः– श्रीखण्डं चन्दनं दिव्यं मलयाचलसंभवम् ।
विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥
बिल्वपत्रम्– त्रिदलं त्रिगुणाकारं त्रिपत्रं च त्रिरायुधम् ।
त्रिजन्मनि हरेत्पापं बिल्वपत्रं शिवार्पणम् ॥
पुष्पाणि– माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥
धूपः– वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
दीपः– आज्यं सद्वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥
नैवेद्यम्– नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥
ताम्बूलम्– पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
फलम्– इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
द्रव्यम्– हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥

पुष्पाञ्जलिः, नीराजनम् ।

प्रदक्षिणा– यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदेपदे ॥
ततः– श्रूयतां धर्मसर्वस्वं शिवरात्रौ शिवार्चनम् ।
व्रतं येन विधानेन स्वस्वपुण्येन कर्मणा ॥

कृत्वा स्नानं शुचिर्भूत्वा धौतवस्त्रसमन्वितः ।
स्थापयेद्देवदेवेशं मन्त्रैर्वेदसमुद्भवैः ।।
ततः पूजा प्रकर्तव्या पूर्वोक्तविधिना ततः ।
अर्घ्यमन्त्रः— नमो यज्ञजगन्नाथ नमस्त्रिभुवनेश्वर ।
पूजां गृहाण मद्दत्तां महेश प्रथमे पदे ।

इति मन्त्रेण बिल्वयुक्तां विशेषार्घ्यं दद्यात् । इति प्रथमप्रहरपूजा । द्वितीयप्रहरेऽपि षोडशोपचारैः पूजयेत् । अनेनैव विधिना—

पूर्वे नन्दिमहाकालौ शृङ्गिभृङ्गी च दक्षिणे ।
वृषस्कन्दौ पश्चिमे च देशकालौ तथोत्तरे ।।
गङ्गा च यमुना चैव पार्श्वे चैव व्यवस्थिते । इति संपूजयेत् ।

द्वितीयेऽर्घ्यः— नमोऽव्यक्ताय सूक्ष्माय नमस्ते त्रिपुरान्तक ।।
पूजां गृहाण देवेश यथाशक्त्योपपादिताम् ।

तृतीयेऽर्घ्यः— बद्धोऽहं विविधैः पाशैः संसारभयबन्धनैः ।
पतितं मोहजाले मां त्वं समुद्धर शङ्कर ।।

चतुर्थेऽर्घ्यः— नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ मया दत्तं गृहाणार्घ्यं प्रसीद मे ।

विशेषार्घ्यः— दुःखदारिद्रभावैश्च दग्धोऽहं पार्वतीपते ।
मां वै त्राहि महादेव गृहाणार्घ्यं नमोऽस्तु ते ।।
किं न जानासि देवेश तावद्भक्ति प्रयच्छ मे ।
स्वपादाग्रतले देव दास्यं देहि जगत्पते ।।

कुर्वन्ति ये वत्सरकां शिवस्य
पूजां सुभक्त्या तु यथाकथञ्चित् ।
सकृत्प्रयात्येव शिवस्य लोकं
व्याधोऽपि यातोऽद्य शिवप्रसादात् ।। इति पूजा ।

अथ कथा--

सूत उवाच- सकारणमशेषस्य जगतः सर्वदा शिवः ।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ।।
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पञ्चवक्त्रं दशभुजं त्रिनेत्रं शूलपाणिनम् ।।
पिनाकशोभितकरं खड्गखेटकधारिणम् ।
कपालखट्वाङ्गकरं शशाङ्ककृतशेखरम् ।।
कपालधारिणं भीमं वरदं चाभयप्रदम् ।
भस्माङ्गव्यालशोभाढचर्मास्थिमालाविभूषितम् ।।
नीलजीमूतसंकाशं सूर्यकोटिसमप्रभम् ।
क्रीडन्तं च शिवं तत्र गणैश्च परिवारितम् ।।
विसृज्य देवताः सर्वास्तिष्ठन्तं परमेश्वरम् ।
तं दृष्ट्वा देवदेवेशं प्रहस्योत्फुल्ललोचना ।।
पार्वती परिपप्रच्छ विनयावनता स्थिता ।
गौरी प्रोवाच भर्तारं विस्मयोत्फुल्ललोचना ।।

पार्वत्युवाच- कथयस्व प्रसादेन यद् गोप्यं व्रतमुत्तमम् ।
पुरा त्वयोक्ता देवेश व्रतानां निर्णयाः शुभाः ।।
तथैव दानधर्माश्च तीर्थधर्मास्त्वयोदिताः ।
नास्ति मे निश्चयो देव भ्रान्तोऽहं च पुनः पुनः ।।
तस्माद्वदस्व मे देव एकं निःसंशयं प्रभो ।

ईश्वर उवाच- शृणु देवि परं गुह्यं व्रतानामुत्तमं व्रतम् ।।
यन्न कस्यचिदाख्यातं रहस्यं मुक्तिदायकम् ।
येनैव कथ्यमानेन यमो विलयतां व्रजेत् ।।
तदहं कीर्तयिष्यामि शृणुष्वैकमनाः प्रिये ।
माघान्ते कृष्णपक्षे तु अविद्धा या चतुर्दशी ।।

शिवरात्रिस्तु ज्ञेया सा सर्वयज्ञोत्तमोत्तमा ।
दानैर्यज्ञैस्तपोभिश्च व्रतैश्च विविधैरपि ।।
न तीर्थैस्तु भवेत्पुण्यं यत्पुण्यं शिवरात्रितः ।
शिवरात्रिसमं नास्ति व्रतानामुत्तमं व्रतम् ।।
अज्ञानाज्ज्ञानतो वापि कृत्वा मोक्षमवाप्नुयात् ।
मृतास्ते निरयं त्यक्त्वा गतास्ते शिवसन्निधौ ।।
सर्वमङ्गलशीला च सर्वामङ्गलनाशिनी ।
भुक्तिमुक्तिप्रदा चैषा सत्यं सत्यं वरानने ।।

देव्युवाच– कथं यमपुरं मार्गं त्यक्त्वा दैवं व्रजेन्नरः ।
एतन्मे महदाश्चर्यं प्रत्यक्षं कुरु शङ्कर ।।

शङ्कर उवाच– शृणु देवि यथावृत्तं कथां पौराणिकीं शुभाम् ।
यमशासनहन्त्री च शिवशासनदायिकाम् ।।
कश्चिदासीत्पुरा देवि निषादस्तामसप्रियः ।
तन्वा पीनो धनुर्धारी श्यामाङ्गः कृष्णकञ्चुकः ।।
बद्धगोधाङगुलित्राणः सदैव मृगयारतः ।
एवं विधो निषादोऽसौ चतुर्दश्या दिने शुभे ।।
व्यवहारैश्च द्रव्यार्थं देवागारे प्ररुन्धितः ।
तेनापि देवता दृष्टा जनानां वचनं श्रुतम् ।।
उपवासव्रतानां च शिव ! शिव ! शिवेति च ।
दिनान्ते तैस्तदा मुक्तः प्रातर्द्रव्यं प्रदीयताम् ।।
ततोऽसौ धनुरादाय दक्षिणेन गतः स्वयम् ।
आगच्छतस वनोद्देशे जनहासं चकार सः ।।
शिव ! शिव ! किमेतद्वै कुर्वन्ति नगरे जनाः ।
वनेचरान्निरीक्षँस्तु चतुर्दिक्षु इतस्ततः ।।
पदं च पदमार्गं च आश्रमे शूकरान्मृगान् ।
इतश्चेतश्च धावन्स आमिषे लुब्धमानसः ।।

वनं सपर्वतं सर्वं भ्रमतस्तद्दिनं गतम् ।
संप्राप्तं तेन नो किञ्चिन्मृगशूकरतित्तिरिम् ।।

निराशो लुब्धको जातस्तदा ह्यस्तं गतो रविः ।
चिन्तयित्वा जलोपान्ते जागरं जीवघातनम् ।।

संविधास्याम्यहं रात्रौ निश्चितं मम जीवनम् ।
गतोऽसौ जलसामीप्यं तीरस्थो जालमध्यतः ।।

त्रोटनं कर्तुमारेभे आत्मनो गुप्तिकारणात् ।
जालमध्ये महालिङ्गमासीत्स्वायंभुवं शुभम् ।।

बिल्ववृक्षो महादिव्यो जालमध्ये च संस्थितः ।
गृहीत्वा तस्य पत्राणि मार्गशुद्ध्यर्थमक्षिपत् ।।

क्षिप्तानि दक्षिणे भागे गतानि लिङ्गमूर्धनि ।
न दिवा भोजनं तस्य आमिषे लुब्धमानसः ।।

ततश्चिन्तयमानस्य न निद्रा समजायत ।
बिल्वजालगतस्यास्य प्रथमः प्रहरो गतः ।।

ततो जलार्थमायाता हरिणी गर्भसंयुता ।
यौवनस्था सुरूपा च स्तनपीना सुशोभना ।।

निरीक्षन्ती दिशः सर्वा भृशमुत्फुल्ललोचना ।
लुब्धकेनापि सा दृष्टा बाणगोचरमागता ।।

बाणश्च सन्धितस्तेन एकदृष्टेन चेतसा ।
त्रोटयित्वाऽथ पत्राणि प्रक्षिप्तानि शिवोपरि ।।

शिवं देवं सदा ध्यायन् शीतेन परिपीडितः ।
एतस्मिन्नन्तरे दृष्टो हरिण्या लुब्धकस्तदा ।।

लुब्धकस्य स्वरूपेण कृतान्त इव तिष्ठति ।
दृष्ट्वा तु तस्य सन्धानं यमदंष्ट्रासमप्रभम् ।।

सा मृगी दिव्यया वाचा लुब्धकं वाक्यमब्रवीत् ।
स्थिरो भव महाव्याध सर्वजीवनिकृन्तन ! ।
किमर्थं मां हनिष्ये त्वं कथयस्व मम प्रभो ।।

लुब्धक उवाच– कुटुम्बं पीडितं मेऽद्य क्षुधया च मया सह ।
धनं मम गृहे नास्ति तेन त्वां हन्मि शोभने ।।

सूत उवाच– जातपूजाप्रभावेण जागरोपोषणेन च ।
चतुर्थांशेन पापानां विमुक्तो लुब्धकस्तदा ।।

लुब्धकस्तु ततो दृष्ट्वा मृगीं मानुषभाषिणीम् ।
आश्चर्यं परमं दृष्ट्वा किञ्चिद्धर्मसमन्वितः ।।

लुब्धक उवाच–मया हि पातिता जीवा उत्तमाधममध्यमाः ।
न श्रुता ईदृशी वाणी श्वापदानां कदाचन ।।

कस्मिन्देशे त्वमुत्पन्ना कस्मात्स्थानादिहागता ।
कथयस्व प्रयत्नेन परं कौतूहलं हि मे ।।

मृग्युवाच– शृणु त्वं लुब्धकश्रेष्ठ कथयामि तवाखिलम् ।
आसीत्पूर्वं महारम्या स्वर्गे शक्रस्य चाप्सराः ।।

अनन्तरूपलावण्या सौभाग्येन विगर्विता ।
सौभाग्यमदपुष्टाङ्गो दानवो बलगर्वितः ।।

मयैव स कृतो भर्ता हिरण्याक्षो महासुरः ।
तेन सार्धं मया भुक्तं चिरकालं यथेप्सितम् ।।
अन्यस्मिन्दिवसे व्याध क्रीडन्त्या मेऽसुरेण च ।
गतो बहुतिथः कालो महादेवस्य कोपकृत् ।।
प्रत्यहं प्रेक्षतो नृत्यं शंकरस्याग्रतस्तदा ।
यावद्गच्छाम्यहं तत्र तावन्मां शंकरोऽब्रवीत् ।।
क्व गता त्वं वरारोहे केन वा संगता शुभे ।
किं वा सौभाग्यगर्वेण नायाता मम मन्दिरम् ।।

सर्वं कथय शीघ्रं त्वं नो वा शापं ददामि ते ।
शापभीत्या मया तत्र इत्युक्तं शंकराग्रतः ।।

शृणु देव प्रवक्ष्यामि शापानुग्रहकारक ।
ममास्ति भर्ता विश्वेश दानवेशो महाबलः ।।

तेन सार्धं मया देव क्रीडितं निजमन्दिरे ।
तेनाहं नागता शीघ्रं सृष्टिसंहारकारक ।।

रुद्रस्तद्वचनं श्रुत्वा सकोपो वाक्यमब्रवीत् ।
मृगः कामातुरो नित्यं हिरण्याक्षो भविष्यति ।।

त्वं मृगी तस्य भार्या वै भविष्यसि न संशयः ।
त्यक्त्वा स्वर्गभवान्देवान्दानवं भोक्तुमिच्छसि ।।

द्वादशाब्दानि भो भद्रे भविता शाप एव ते ।
परस्परस्य शोकेन शापान्तोऽपि भविष्यति।।

अनुग्रहः कृतस्त्वेष शंकरेण कृतः स्वयम् ।
कदाचिद्धि व्याधवरस्तव सान्निध्यमाश्रितः ।।

वधार्थं तव संप्राप्तः पूर्वजन्म स्मरिष्यसि ।
अत ऊर्ध्वं तदा रुद्रं दृष्ट्वा मोक्षमवाप्स्यसि ।।

शंकरो न मया दृष्टो वसत्यास्मिन्महावने ।
ततो दुःखमनुप्राप्ता मांसमेदोविवर्जिता ।।

गर्भाक्रान्ता विशेषेण न वध्या चेति निश्चितम् ।
त्वत्कुटुम्बस्य ते नूनं भोजनं न भविष्यति ।
आयास्यति मृगी त्वन्या मार्गेणानेन लुब्धक ।।
पीना यौवनसंपन्ना बहुमांसा मदोद्धता ।
भोजनं सकुटुम्बस्य तव सद्यो भविष्यति ।।
अथवान्यो मृगो व्याध पानार्थं तु जलं ततः ।
आगमिष्यति प्रत्यूषे क्षुधार्तस्य न संशयः ।।

गर्भं त्यक्त्वा पुनः प्रातर्बालान्सन्दिश्य बन्धुषु ।
शपथैरागमिष्यामि सन्दिश्य च सखीजनम् ।।
तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः ।
क्षणमेकं तथा स्थित्वा व्याधो वचनमब्रवीत् ।।
नागमिष्यति चेदन्यो जीवस्त्वमपि गच्छसि ।
क्षुधया पीडितोऽहं वै कुटुम्बाश्च विशेषतः ।।
प्रातस्त्वया मम गृहमागन्तव्यं यथायथम् ।
शपथैश्च व्रज त्वं हि यथा मे प्रत्ययो भवेत् ।।
पृथिवीवायुरादित्यः सत्ये तिष्ठन्ति देवताः ।
तस्मात्सत्येन गन्तव्यं भवत्या स्वगृहं प्रति ।।
तस्य तद्वचनं श्रुत्वा गर्भार्ता सा मृगी तदा ।
चक्रे सत्यप्रतिज्ञां वै व्याधस्याग्रे पुनः पुनः ।।

मृग्युवाच– द्विजो भूत्वा तु यो व्याध वेदभ्रष्टोऽभिजायते ।
स्वाध्यायसन्ध्यारहितः सत्यशौचविवर्जितः ।
अविक्रयाणां विक्रेता अयाज्यानां च याजकः ।
तस्य पापेन लिप्स्यामि यद्यहं नागमे पुनः ।।
दुष्टबुद्धौ तु यत्पापं धूर्ते वा ग्रामकूटके ।
नास्तिके च विशीले च परदाररते तथा ।।
वेदविक्रयणे चैव शवसूतकभोजने ।
तेन पापेन लिप्स्यामि यद्यहं नागमे पुनः ।।
मृतशय्याप्रतिग्राहे मातापित्रोरपालके ।
तेन पापेन लिप्स्यामि यदि नायामि ते गृहे ।।
दानं दातुं प्रवृत्तस्य योऽन्तरायकरो नरः ।
तेन पापेन लिप्स्यामि यदि नायामि तेऽन्तिके ।।
देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत्तु यः ।
तेन पापेन लिप्स्यामि यदि नायामि तेऽन्तिके ।।

दीपं दीपेन यः कुर्यात् पादं पादेन धावयेत् ।
तेन पापेन लिप्स्यामि यदि नायामि ते गृहे ॥
भर्तारं स्वामिनं त्रस्तमात्मानं बालमेव च ।
गां विप्रं च गुरुं नारीं यो मारयति दुर्मतिः ।
तेन पापेन लिप्स्यामि यदि नायामि ते गृहे ॥
अवैष्णवे च यत्पापं यत्पापं दाम्भिके जने ।
अजितेन्द्रियधूर्ते च परदोषानुकीर्तने ॥
कृतघ्ने च कदर्ये च परदाररते तथा ।
सदाचारविहीने च परपीडाप्रदायके ॥
परपैशून्ययुक्ते च कन्याविक्रयकारके ।
परापवादसन्तुष्टे सर्वधर्मविवर्जिते ॥
वृषलीपतौ वार्धुषिके पित्रोरुत्तरदायके ।
हैतुके वकवृत्ते च कूटसाक्षिप्रदे तथा ।
एतेषां पातकं मह्यं यदि नायामि ते गृहे ॥
यत्पापं ब्रह्महत्यायां पितृमातृवधे तथा ।
तेन पापेन लिप्स्यामि यदि नायामि ते गृहे ॥

यत्पापं लुब्धकानां च यत्पापं गरदायिनाम् ।
तेन पापेन० ॥
द्विभार्यः पुरुषो यस्तु समदृष्ट्या न पश्यति ।
तेन पापेन० ॥
सकृद्दत्त्वा तु यः कन्यां द्वितीयाय प्रयच्छति ।
तेन पापेन० ॥
कथायां कथ्यमानायामन्तरं कुरुते नरः ।
तेन पापेन० ॥
पतिनिन्दापरो नित्यं वेदनिन्दापरो हि यः ।
तस्य पापेन० ॥

यस्य संग्रहणीभार्या ब्राह्मणी च विशेषतः ।
तेन पापेन० ।।
प्रेतश्राद्धे तु यो भुङ्क्ते पतिते बहुयाजके ।
असच्छास्त्रार्थनिरते पुराणार्थविवर्जिते ।।
मूर्खे पाखण्डनिरते क्रयविक्रयके द्विजे ।
एतेषां पातकं मह्यं यदि नायामि ते गृहे ।।
एकाकी मिष्टमश्नाति भार्यापुत्रविवर्जितः ।
आत्मजां गुणसंपन्नां समानसदृशे वरे ।।
न प्रयच्छति यः कन्यां नरो वै ज्ञानदुर्बलः ।
तस्य पापेन० ।।

मृगीवाक्यं ततः श्रुत्वा लुब्धको हृष्टमानसः ।
संहृत्य बाणसन्धानं मुमोच हरिणीं तदा ।।
तस्या मुक्तिप्रभावेण लिङ्गस्यापि प्रपूजनात् ।
तस्मिन्नेव क्षणे प्राप्तेऽपरा प्राप्ता मृगी तदा ।।
सन्त्रस्ता भयसंमग्ना पतिमन्विष्यती मुहुः ।
जालमध्ये स्थितेनाथ दृष्टा सा लुब्धकेन तु ।।
पुनर्वृक्षस्य पत्राणि त्रोटयित्वा करेण तु ।
क्षिप्तानि दक्षिणे भागे लिङ्गोपरि दिदृक्षया ।।
तस्या वधार्थं तेनाथ बाणो धनुषि सन्धितः ।
तिष्ठंस्तत्रैकचित्तेन कुटुम्बार्थं जिघांसया ।।
निरीक्ष्य लुब्धको यावत्तस्या बाणं विमुञ्चति ।
तावन्मृग्या स सन्दृष्टो दृष्ट्वा तं विह्वलाभवत् ।।
अद्यैव भगिनी मेऽपि लुब्धकेन विनाशिता ।
मम किं जीवितेनाथ तस्या दुःखेन पीडिता ।।
वरं मृत्युर्न शोको वै दृष्ट्वा व्याधं विशेषतः ।
एवं संचिन्त्य हरिणी लुब्धकं वाक्यमब्रवीत् ।।

धनुर्धरवर व्याध सर्वजीवनिकृन्तन ।
देहि मे वचनं चैकं पश्चात्त्वं मां निपातय ॥
आयाता हरिणी चैका मार्गेणानेन लुब्धक ।
समायाताथवा नैव सत्यं कथय सुव्रत ॥
तच्छ्रुत्वा लुब्धकस्तत्र विस्मितं क्षणमैक्षत ।
तस्यास्तु यादृशी वाणी अस्याश्चैवापि तादृशी ॥
सा चैषाद्य गता नूनं प्रतिज्ञापालनाय च ।
अथवान्या समायाता तया या कथिता पुरा ॥

लुब्धक उवाच– अहोरात्रं कृतं कष्टं कुटुम्बार्थे मया मृगि ।
अधुना त्वां हनिष्यामि देवानां स्मरणं कुरु ॥
व्याधोक्तवचनं श्रुत्वा हरिणी दुःखिता भृशम् ।
व्याधं प्राह रुदित्वा वै भो मां व्याध निपातय ॥
तेजो बलं तथा सर्वं निर्दग्धं विरहाग्निना ।
अहं प्राणान्प्रमोक्षामि भोजनं ते न जायते ॥
बलवाँश्च महातेजा मेदोमांससमन्वितः ।
अन्यश्च पीनो गौराङ्गो मृगो ह्यत्रागमिष्यति ॥
अहं च दुर्बला नूनं मेदोमांसविवर्जिता ।
केवलं पापभाक्त्वं हि मम प्राणविमोचकः ॥
मार्गेणानेन भो व्याध आगमिष्यति स स्फुटम् ।
तं हत्वा तव भो व्याध तृप्तिर्नूनं भविष्यति ॥
तयोक्तं लुब्धकः श्रुत्वा किंकरोमीति चिन्त्य च ।
मृगीं प्राह स युक्तार्थमेष मे निश्चयो हृदि ॥
संचिन्त्य लुब्धकः प्राह मृगीं शोकातुरां कृशाम् ।
सत्यं वद महाभागे प्रत्ययो मे यथा भवेत् ॥
तस्य तद्वचनं श्रुत्वा हरिणी दुःखकर्षिता ।
चक्रे सत्यप्रतिज्ञां तु व्याधस्याग्रे पुनः पुनः ॥

मृग्युवाच– क्षत्रियस्तु रणं श्रुत्वा संग्रामं यो न गच्छति ।
तस्य पापेन लिप्स्यामि यदि नायामि ते गृहे ।।
भेदयन्ति तडागानि वापीनां च गवामपि ।
मार्गं स्थानं च ये घ्नन्ति सर्वसत्त्वभयङ्कराः ।।
तेषां वै पातकं मह्यं यदि नायामि ते गृहे ।
एतच्छ्रुत्वा तु व्याधेन सापि मुक्ता मृगी तदा ।।
जलं पीत्वा तु बहुशो गता सद्यो यथागतम् ।
जालिमध्ये स्थितस्यास्य द्वितीयः प्रहरो गतः ।।
त्रुटित्वा बिल्वपत्राणि पुनर्देवे न्ययोजयत् ।
पीडितोऽतीव शीतेन क्षुधया गृहचिन्तया ।।
शिवः शिवेति जल्पन्वै न निद्रामुपलब्धवान् ।
कृतं सुरार्चनं तेन प्रहरे प्रहरे गते ।।
वीक्षंश्चैव दिशः सर्वाः सत्त्वमार्गान्निरीक्षयन् ।
लुब्धकेनाथ दृष्टोऽसौ हरिणः स्फुरितेक्षणः ।।
विलोकयन् दिशः सर्वा मार्गमाणो मृगीपदान् ।
सौभाग्यबलदर्पाढ्यो मदनोन्मत्तपीवरः ।।
तं दृष्ट्वा बाणमुद्यम्य आकर्णं तुष्टचेतसा ।
बाणं मुञ्चति यावद्वै तावद् दृष्टो मृगेण तु ।।
कालरूपं तु तं दृष्ट्वा मृगश्चिन्तितवान् भृशम् ।
निश्चयो भविता मृत्युर्गोचरोऽस्य गतो यतः ।।
भार्या प्राणसमा मेऽद्य व्याधेनेह निपातिता ।
तथा विरहितस्याद्य नूनं मृत्युर्भविष्यति ।।
हा हा कालकृतं पापं यद्भार्यादुःखमागतम् ।
भार्यया न समं सौख्यं गृहेऽपि च वनेऽपि च ।।
तया विना न धर्मोऽस्ति नार्थकामौ विशेषतः ।
वृक्षमूलेऽपि दयिता यत्र तिष्ठति तद्गृहम् ।।

प्रासादोऽपि तया हीनः कान्तारादतिरिच्यते ।
धर्मकामार्थकार्येषु भार्या पुंसः सहायिनी ।।

विदेशे च गतेनापि सैव विश्वासकारिणी ।
नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमं सुखम् ।।

नास्ति भार्यासमं लोके नरस्यार्तस्य भेषजम् ।
यस्य भार्या गृहे नास्ति सापि च प्रियवादिनी ।।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ।
एका प्राणसमा मेऽभूद्द्वितीया प्राणदा मम ।।
इत्येवं चिन्तयित्वा तु लुब्धकं वाक्यमब्रवीत् ।

मृग उवाच– शृणु व्याध नरश्रेष्ठ आमिषाहारभोजन ।
यत्ते पृच्छाम्यहं वीर तद्वचक्तं वद मे प्रभो ।।

आगतं हरिणीयुग्मं केन मार्गेण तद्गतम् ।
त्वया विनाशितं चाथ सत्यं कथय मेऽधुना ।।
तस्य तद्वचनं श्रुत्वा लुब्धको विस्मयं गतः ।
असावपि न सामान्यो देवता काप्यनुत्तमा ।।
उवाच लुब्धकः सद्यस्तस्याग्रे वाक्यमुत्तमम् ।
ते गतेऽनेन मार्गेण सत्यं कृत्वा ममाग्रतः ।।
ताभ्यां दत्तोऽसि भुक्त्यर्थे मम त्वमधुनानघ ।
संप्रति त्वां हनिष्यामि नैव मोक्ष्यामि कर्हिचित् ।।

मृग उवाच– ततसत्यं कीदृशं ताभ्यां वाक्यमुक्तं तवाग्रतः ।
येन ते प्रत्ययो जातो मुक्तं तद् हरिणीद्वयम् ।।
ते गते केन मार्गेण ये मुक्ते व्याध तेऽधुना ।

व्याध उवाच– ते गते ऽनेन मार्गेण स्वमाश्रमपदं प्रति ।।
व्याधेन कथितस्ताभ्यां शपथा ये कृतास्तथा ।
तच्छ्रुत्वा वचनं तस्य हरिणो हृष्टमानसः ।।

मृग उवाच– ताभ्यां व्याध यदुक्तं च तत्करोमि न चान्यथा ।
प्रभाते त्वद्गृहं नूनमागमिष्यामि निश्चितम् ।।
भार्या ऋतुमती मेऽद्य कामार्ताप्यधुना भृशम् ।
गत्वा गृहेऽथ भुक्त्वा तामापृच्छ्य च सुहृज्जनान् ।।
शपथैरागमिष्यामि गृहं ते नात्र संशयः ।
मद्देहः स्वगृहे नाद्य नेतुं शक्तः कथञ्चन ।।
तद्वृथा मरणं मे स्याद्यदि त्वं चाद्य घातये ।

लुब्धक उवाच– असत्यं भाषसे धूर्त प्रतारयसि मां वृथा ।
कृत्वा मृत्यूत्थितं तत्र तदागच्छति कोऽल्पधीः ।।
व्याधस्य वचनं श्रुत्वा हरिणो वाक्यमब्रवीत् ।
शपथैरागमिष्यामि यथा ते प्रत्ययो भवेत् ।।

व्याध उवाच– मृग त्वं शपथान् ब्रूहि विश्वासो मे भवेद्यथा ।
यथा हि प्रेषयामि त्वां स्वगृहं प्रति कामुक ।।

मृग उवाच– भर्तारं वञ्चयेद्या स्त्री स्वामिनं वञ्चते नरः ।
मित्रं च वञ्चयेद्यस्तु गुरुद्रोहं करोति यः ।।
भेदयेद्यस्तडागानि प्रासादं पातयेत्तथा ।
प्रवादशीलो यो विप्रः क्रयविक्रयकारकः ।।
सन्ध्यास्नानविहीनश्च वेदशास्त्रविवर्जितः ।
मद्यपाः स्त्रीषु ये रक्ताः परनिन्दारताश्च ये ।।
परस्त्रीसेवका विप्राः परपैशून्यसूचकाः ।
शूद्रान्नभोजिनो ये च भार्यापुत्रांस्त्यजन्ति ये ।।
वेदनिन्दापरा ये च वेदशास्त्रार्थनिन्दकाः ।
तेषां वै पातकं मह्यं यदि नायामि ते गृहम् ।।
भार्या संग्रहणी यस्य वृत्तशौचविवर्जितः ।
सर्वाशी सर्वविक्रेता द्विजानामपि निन्दकः ।।

त्रिषु वर्णेषु शुश्रूषां यः शूद्रो न करोति वै ।
विप्रवाक्यं परित्यज्य पाखण्डाभिरताः सदा ।।
ब्रह्मचर्यरताः शूद्रा ये च पाखण्डसंश्रिताः ।
तेषां वै पातकं मह्यं यदि नायामि ते गृहे ।।

तिलांस्तैलं घृतं क्षौद्रं लवणं सगुडं तथा ।
लोहं लाक्षादिकं सर्वं रङ्गान्नानाविधानपि ।।
विक्रय्यैतानि शूद्रेण तत्र दोषो न विद्यते ।
मद्यं मांसं विषं दुग्धं नीलीं च वृषभं तथा ।।

मीनं क्षीरं सर्वकूटं वृन्तातकफलानि च ।
मद्यादि विक्रयेद्यस्तु शूद्रोऽपि मदमोहितः ।।

आदित्यं विष्णुमीशानं गणाध्यक्षं तु पार्वतीम् ।
एताँस्त्यक्त्वा गृहे मूढो यो न पूजयते नरः ।।
तस्य पापेन लिप्स्यामि० ।

यो गां स्पृशति पादेन उदितेऽर्के प्रसुप्यति ।
एकाकी मिष्टमश्नाति तस्य पापस्य भाग्यहम् ।।

मातापित्रोरपोष्टा च क्रियामुद्दिश्य याचकः ।
कन्या शुल्कोपजीवी च देवब्राह्मणनिन्दकः ।।

गोग्रासं हन्तकारं च अतिथीनां च पूजनम् ।
ये न कुर्वन्ति गृहिणस्तेषां पापं भवेन्मम ।।

वृन्ताकानि पटोलानि कलिङ्गं तुम्बकानि च ।
मूलकं लशुनं कन्दं कुसुम्भं कनशाककम् ।।
एतानि भक्षयेद्यस्तु नरो वै ज्ञानदुर्बलः ।
तस्य न ज्ञायते शुद्धिश्चान्द्रायणशतैरपि ।।
एतेषां पातकं मह्यं यदि नायामि ते गृहे ।
यः पठेत्स्वरहीनं च लक्षणेन विवर्जितम् ।।

रथ्यासु संचरन् विप्रो वेदानुद्गीरयेत्तु यः ।
विप्रस्य पठतः क्वापि शृणोति यदि वाऽन्त्यजः ।।
वेदोपजीवको विप्रोऽतिलोभाच्छूद्रभोजनः ।
तस्य पापेन० ।।
सन्ध्याहीने व्रतभ्रष्टे विप्रे वेदविवर्जिते ।
तेन पापेन० ।।

शूद्रान्नेष्वेव ये सक्ताः शूद्रसंपर्कहर्षिताः ।
तेषां वै पातकं मह्यं यदि नायामि ते गृहे ।।
लेखकश्चित्रकर्ता च वैद्यो नक्षत्रसूचकः ।
कूटकर्त्ता द्विजो यश्च तस्य पापस्य भाग्यहम् ।।
कूटसाक्षी मृषावादी परद्रव्यस्य तस्करः ।
परदाराभिगामी च ये च विश्वासघातकाः ।।
द्रव्ये द्रव्यं विनिः क्षिप्य पानकूटसमाश्रिताः ।।
वेश्यारताः सदा ये च दानं दातुर्निवारकाः ।।
भर्तारमर्थहीनं च कुरूपं व्याधिपीडितम् ।
या न पूजयते नारी रूपयौवनगर्विता ।।
एकादशीं तथा माघे या सा शिवचतुर्दशीम् ।
पूर्वविद्धान्प्रकुर्वन्ति तेषां पापस्य भाग्यहम् ।।
अथ किं बहुनोक्तेन भो लुब्धक तवाग्रतः ।
यदि नायामि ते गेहं मम सत्यं भवेत्तव ।।
तेन वाक्येन सन्तुष्टो व्याधो वै वीतकल्मषः ।
संहृत्य धनुषो वाणं मृगो मुक्तो गृहं प्रति ।।
जलं पीत्वा तु हरिणः प्रविष्टो गहनं वनम् ।
गतो ऽसौ तेन मार्गेण गतं येन मृगीद्वयम् ।।
लुब्धकेन तदा तत्र जालिमध्ये स्थितेन हि ।
प्रत्यूषे बिल्वपत्राणि त्रोटयित्वा प्रतर्प्यं च ।।

शिवशिवेति जल्पन्वै आशु यातो निजाश्रयम् ।।
अथोदिते सूर्यबिम्बे अकामाज्जागरे कृते ।।
पापान्मुक्तोऽप्यसौ सद्यः शिवपूजाप्रसादतः ।
यावद्दिशो निरीक्षेत निराशो भोजनं प्रति ।।
तावच्छिशुवृता चान्या मृगी तत्र समागता ।
दृष्ट्वा मृगीं तदा व्याधो बाणं धनुषि योजयन् ।।
यावन्मुञ्चत्यसौ बाणं तावदुक्तं तया तदा ।
मा बाणं मुञ्च धर्मात्मन् धर्मं मा मुञ्च सुव्रत ।।
अहं न वध्या सर्वेषामिति शास्त्रे विनिश्चितः ।
राजभिर्मिथुनासक्तः सबालो व्याधिपीडितः ।।
न हन्तव्यो मृगो सत्यं मृगी च शिशुना वृता ।
अथवा धर्ममुत्सृज्य मां हनिष्यसि मानव ।।
बालकं स्वगृहे मुक्त्वा सखीनां च निवेद्य च ।
शपथैरागमिष्यामि व्याध शृणु वचो मम ।।
या स्वभर्तारमुत्सृज्य परपुंसि रता सदा ।
तस्याः पापेन लिप्स्यामि यदि नायामि ते गृहम् ।।
मद्यं मांसं विषं दुग्धं नीली कुम्भफलानि च ।
एतानि विक्रयेद्यस्तु नरो मोहसमन्वितः ।।
तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः ।
ततो व्याधेन सा मुक्ता गता वै निजमन्दिरम् ।।
व्याधोऽपि तत्सरस्त्यक्त्वा जगाम स्वगृहं प्रति ।
सर्वेषां वचनं ध्यायन् मृगाणां सत्यवादिनाम् ।।
एतेषां घातको नित्यमहं यास्यामि कां गतिम् ।
क्रमाद्गृहं समासाद्य बालकाः क्षुधया वृताः ।।
नान्नं मांसं गृहे तस्य भोजनं येन जायते ।
निरामिषं तु तं दृष्ट्वा निराशास्तेऽभवंस्तदा ।।

व्याधोऽपि च तदा तत्र तेषां वाक्यानि संस्मरन् ।
न भोजनं न निद्रां च लभते विस्मयान्वितः ।
आगमिष्यन्ति ते नूनं शपथेन नियन्त्रिताः ।
न तानहं वधिष्यामि सत्यव्रतमनुस्मरन् ।।
लुब्धकेन तदा मुक्तो हरिणः शपथैर्गतः ।
स्वमाश्रमं तु संप्राप्तो यत्र तद्धरिणीद्वयम् ।।
सद्यः प्रसूता सा चैका द्वितीया रतिलालसा ।
तृतीयापि समायाता बालकैर्बहुभिर्वृता ।।
सर्वाः समेता एकत्र मरणे कृतनिश्चयाः ।
परस्परं प्रजल्पन्तो लुब्धकस्य विचेष्टितम् ।।
आयातां हरिणीं भुक्त्वा रूपाढ्यां रतिलालसाम् ।
कृतकृत्योऽभवत्तज्ज्ञस्तेभ्यो वाक्यमथाब्रवीत् ।।
युष्माभिरिह संस्थेयं कर्त्तव्यं प्राणरक्षणम् ।
व्याघ्राद् द्वीपाल्लुब्धकेभ्यो बालकानि प्रयत्नतः ।।
अहंमत्यानुगो भार्यां यो न भोक्ष्यति सद्व्रतः ।
भ्रूणहा स तु विज्ञेयस्तस्य जन्म निरर्थकम् ।।
सन्तानात्स्वर्गमाप्नोति इह कीर्तिं च शाश्वतीम् ।
सन्ततिर्यत्नतः पाल्या स्वर्गसौख्यप्रदायिका ।।
अपुत्रस्य गतिर्नास्ति इह लोके परत्र च ।
येन केनाप्युपायेन पुत्रमुत्पादयेत्पुमान् ।।
मया च तत्र गन्तव्यं यत्र व्याधस्य मन्दिरम् ।
सत्यं तु पालनीयं स्यात्सत्ये धर्मः प्रतिष्ठितः ।।
एतच्छ्रुत्वा तु ता नार्यो वाक्यमूचुः सुदुःखिताः ।
वयमप्यागमिष्यामस्त्वया सार्धं मृगोत्तम ।।
तथा ते विप्रियं कान्त न स्मरामः कदाचन ।
पुष्पितेषु वनान्तेषु नदीनां सङ्गमेषु च ।।

कन्दरेषु च शैलानां युष्माभी रक्षिता वयम् ।
न कार्यमद्य चास्माकं क्रीडितेन त्वया विना ।।
नारीणां पतिहीनानां जीवितैः किं प्रयोजनम् ।
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ।
अपि द्रव्ययुता नारी बहुपुत्रसुहृद्वृता ।।
सा शोच्या बन्धुवर्गस्य पतिहीना कुलाङ्गना ।
गन्धमाल्यैः स्त्रियो नित्यं प्रीयन्ते भर्तुरग्रतः ।।
नातन्त्री वाद्यते वीणा नाचक्रो भ्रमते रथः ।
नापतिः सुखमाप्नोति नारीपुत्रशतैर्वृता ।।
नास्ति भर्ता समो धर्मो नास्ति भर्ता समः सुहृत् ।
नास्ति भर्ता समो नाथः स्त्रीणां भर्ता परा गतिः ।।
एवं विलप्य ताः सर्वा मरणे कृतनिश्चयाः ।
बालकैस्तैः समायुक्ता भर्तृशोकेन दुःखिताः ।।
मृगस्तासां वचः श्रुत्वा हृदि चिन्तापरोऽभवत् ।
गन्तव्यं किं न गन्तव्यं मया व्याधस्य मन्दिरम् ।।
एकतः सुकृतं रक्षन् कुटुम्बस्य क्षयो भवेत् ।
तदन्तिकं न चेद्यामि मम सत्यक्षयं व्रजेत् ।।
वरं पुत्रस्य मरणं भार्याया आत्मनस्तथा ।
सत्ये हते परे नित्यमाकल्पं रौरवं व्रजेत् ।।
तस्मात्सत्यं पालनीयं नरैः श्रेयोऽर्थिभिः सदा ।
एवं संचिन्त्य हरिणो धर्मान् हृदि मनोरमान् ।।
ताभिः सहैव शनकैः क्षणात्तस्याश्रमं ययौ ।
तस्मिन्सरसि संस्नात्वा कर्मन्यासं चकार सः ।।
तल्लिङ्गं प्रणिपत्याशु हृदि ध्यायन् सदाशिवम् ।
गानं पानं परित्यज्य मैथुनं भोगमेव च ।।

कामं क्रोधं तथा लोभं मायां मोक्षविनाशिनीम् ।
वन्दयित्वा तु तं देवं लुब्धकाभिमुखं ययौ ।।
तस्य भार्याश्च पुत्राश्च मरणे कृतनिश्चयाः ।
अनशनं व्रतं गृह्य पृष्ठलग्नाः समाययुः ।।
भार्यापुत्रैः परिवृतो मृगस्तं देशमागतः ।
क्षुधितैर्बालकैर्युक्तो लुब्धको यत्र तिष्ठति ।।
मृगस्तं देशमागत्य कुटुम्बेन समन्वितः ।
पालयन् सत्यवाक्यानि लुब्धकं वाक्यमब्रवीत् ।।
मृग उवाच । हन मां प्रथमं व्याध पश्चादेताः क्रमेण तु ।
बालकाश्च ततः पश्चाद्धन्यन्तां मा विलम्बय ।।
लुब्धकैस्तु मृगा भक्ष्या नास्ति दोषः कदाचन ।
वयं यास्यामः स्वर्लोकं सत्यपूता न संशयः ।।
तथा ते सकुटुम्बस्य प्राणयात्रा भविष्यति ।
एतच्छ्रुत्वा तु वचनं मृगेशपरिभाषितम् ।
आत्मानं निन्दयित्वा तु लुब्धको वाक्यमब्रवीत् ।
व्याध उवाच–अहो मृग महासत्त्व गच्छ गच्छ स्वमाश्रमम् ।।
आमिषेण न मे कार्यं यद्भाव्यं तद्भविष्यति ।
जीवानां घातने पापं बन्धने तर्जने तथा ।।
नैव पापं करिष्यामि कुटुम्बार्थे कदाचन ।
त्वं गुरुर्मम धर्माणामुपदेष्टा मृगोत्तम ।।
गच्छ गच्छ मृगश्रेष्ठ कुटुम्बेन समन्वितः ।
मया त्यक्तानि शस्त्राणि सत्यधर्मः समाश्रितः ।।
मृग उवाच– कर्मन्यासमहं कृत्वा त्वत्सकाशमिहागतः ।
हन्यतां हन्यतां शीघ्रं न ते पापं भविष्यति ।।
मया दत्ता पुरा वाचा तया बद्धो न याम्यहम् ।
एतच्छ्रुत्वा तु वचनं लुब्धको वाक्यमब्रवीत् ।।

लुब्धक उवाच–त्वं बन्धुस्त्वं गुरुस्त्राता त्वं च माता पिता सुहृत् ।
मया त्यक्तानि शस्त्राणि त्यक्तं मायादिकं बलम् ।।

कस्य भार्या सुताः कस्य कुटुम्बश्च महामृग ।
तैः स्वकर्म च भोक्तव्यं मृग गच्छ यथासुखम् ।।

इत्युक्त्वा स तदा तूर्णं बभन्ज सशरं धनुः ।
मृगं प्रदक्षिणीकृत्य नमस्कृत्य क्षमापयन् ।।

एतस्मिन्नन्तरे नेदुर्देवदुन्दुभयो दिवि ।
आकाशात्पुष्पवृष्टिश्च पपात सुमनोहरा ।।
तदा दूतः समायातो विमानं गृह्य शोभनम् ।

देवदूत उवाच–अहो व्याध महासत्त्व सर्वसत्त्वक्षयङ्कर ।
विमानमिदमारुह्य सदेहः स्वर्गमाविश ।।

शिवरात्रिप्रभावेण पातकं ते क्षयं गतम् ।
उपवासस्तु सन्जातो निशि जागरणं कृतम् ।।

यामे यामे कृता पूजा अज्ञानेन शिवस्य च ।
सर्वपापविनिर्मुक्तो गच्छ त्वं भद्रमन्दिरम् ।।

विमानं च समारुह्य सत्याच्चित्रपदं व्रज ।
मृगराज महासत्त्व भार्यापुत्रसमन्वितः ।।
भार्यात्रितयसंपन्नो नक्षत्रपदमाप्नुहि ।
तव नाम्ना तु तदृक्षं लोके ख्यातो भविष्यति ।।
एतच्छ्रुत्वा तु वचनं लुब्धकेन समन्वितः ।
विमानं तु तदारुह्य नक्षत्रपदमागतः ।।
हरिणीद्वयमेवैतत्पृष्ठतो मृगमेव च ।
तारा त्रितयसंयुक्तं मृगशीर्षं तदुच्यते ।।
बालकद्वितयं चाग्रे तृतीया पृष्ठतो मृगी ।
पृष्ठतस्तत्र संप्राप्ता मृगशीर्षस्य सन्निधौ ।।

मृगराड् दृश्यतेऽद्यापि ऋक्षं व्योमगमुत्तमम् ।
उपवासं करिष्यन्ति जागरेण समन्वितम् ।।
यथोक्तशास्त्रमार्गेण तेषां मोक्षो न संशयः ।
शिवरात्रिसमं नास्ति व्रतं पापक्षयापहम् ।।
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।
अश्वमेधसहस्राणि वाजपेयशतानि च ।।
प्रोक्तानि तत्फलं सर्वं नात्र कार्या विचारणा ।
इति श्री लिङ्गपुराणे उमामहेश्वरसंवादे शिवरात्रिव्रतकथा ।।

अथोद्यापनम् । हेमाद्रौ स्कान्दे–

स्कन्द उवाच–व्रतस्योद्यापनं कर्म कथं कार्यं च मानवैः ।
को विधिः कानि द्रव्याणि कथयस्व मम प्रभो ।।
ईश्वर उवाच–शृणु षण्मुख तत्त्वेन लोकानां हितकाम्यया ।
उद्यापनविधिं चैव कथयामि तवाग्रतः ।।
यदा सञ्जायते वित्तं भक्तिश्रद्धासमन्वितम् ।
स एव व्रतकालश्च यतोऽनित्यं हि जीवितम् ।।
चतुर्दश्यां च कर्त्तव्यं शिवरात्रिव्रतं शुभम् ।
एकभक्तं त्रयोदश्यां चतुर्दश्यामुपोषणम् ।।
संपाद्य सर्वसंभारान् मण्डपं तत्र कारयेत् ।
वस्त्रैः पुष्पैः समाच्छन्नं पट्टवस्त्रैश्च शोभितम् ।।
तन्मध्ये लेखयेद्दिव्यं लिङ्गतोभद्रमण्डलम् ।
अथवा सर्वतोभद्रं मण्डपान्तः प्रकल्पयेत् ।।
शोभोपशोभासंयुक्तं दीपैः सर्वत्र सोज्ज्वलम् ।
आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितं शुचिम् ।।
शिवरूपाश्च ते विप्राः पूज्याश्चन्दनपुष्पकैः ।
अनुज्ञातैश्च तैर्विप्रैः शिवपूजां समारभेत् ।।

रुद्रनाम्ना नमोऽन्तेन ब्राह्मणानपि पूजयेत् ।
अव्रणं सजलं कुम्भं तस्योपरि तु विन्यसेत् ।।
सौवर्णं राजतं ताम्रं मृन्मयं वापि कारयेत् ।
कुम्भोपरि न्यसेद्देवमुमया सहितं शिवम् ।।
सौवर्णेऽप्यथवा रौप्ये वृषभे संस्थितं शुभे ।
रत्नालङ्करणैर्हैमैरलङ्कृत्य प्रपूजयेत् ।।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ।
वस्त्रयुग्मेन संवेष्ट्य बिल्वपत्रैः प्रपूजयेत् ।।
उमामाहेश्वरीं मूर्तिं पूजयेद्वृषभस्थिताम् ।
सोमं शिवगणं चैव पूजयित्वा महेश्वरम् ।।
होमं कुर्यात्प्रयत्नेन रौद्रमन्त्रैर्यथाविधि ।
ब्राह्मणान्पूजयेद्भक्त्या भोजयेच्च चतुर्दश ।।
आचार्यं च सपत्नीकं वस्त्रालङ्कारभूषणैः ।
यज्ञोपवीतवस्त्रादि दद्यात्तेभ्यः पृथक् पृथक् ।।
गां सवत्सां सवसनां नानालङ्कारभूषिताम् ।
दद्यादाचार्यवर्याय शिवो मे प्रीयतामिति ।।
ततः सकुम्भां मूर्तिं च सवस्त्रां वृषभस्थिताम् ।
सर्वालङ्कारसहितां स्वाचार्याय निवेदयेत् ।।
व्रतमेतत्कृतं यन्मे पूर्णं वापूर्णमेव च ।
सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम ।।
इति संप्रार्थ्य तान्विप्रान् प्रणम्य च पुनः पुनः ।
अजैकपादभिस्तेभ्यो दद्यात्कुम्भान् पृथक् पृथक् ।।
पुराणैस्तोत्रपाठैश्च रात्रिशेषं नयेद्बुधः ।
ततः प्रभातसमये कृत्वा सन्ध्यादिकाः क्रियाः ।।
पुनः पूजां प्रकुर्वीत ततो होमं समारभेत् ।
तिलव्रीहियवैश्चैव पायसान्नेन भक्तितः ।।

त्र्यम्बकमिति मन्त्रेण नमस्ते शम्भवे इति ।
गौरीर्मिमेति मन्त्रेण शतमष्टोत्तरद्वयम् ।।
होमं कुर्याच्च मतिमान् बिल्वपत्रैश्च नामभिः ।
अजैकपादहिर्बुध्न्यो भवः शर्व उमापतिः ।।
रुद्रः पशुपतिः शम्भुर्वरदः शिव ईश्वरः ।
महादेवो हरो भीमो नामान्येवं चतुर्दश ।।
पूर्णाहुतिं ततो हुत्वा कर्मशेषं समापयेत् ।
एतैर्होमः प्रकर्त्तव्यः कुम्भदानेऽपि तान्स्मरेत् ।।
भोज्यं क्षमापयेद्देवमेभिर्नामपदैः पृथक् ।
प्रतिमां कुम्भसहितामाचार्याय निवेदयेत् ।।
शम्भो प्रसीद देवेश सर्वलोकेश्वर प्रभो ।
तव रूपप्रदानेन मम सन्तु मनोरथाः ।।
यज्ञोपवीतवस्त्राणि दद्यात्तेभ्यः पृथक् पृथक् ।
आचार्यं पूजयेद्भक्त्या वस्त्रालङ्कारभूषणैः ।।
चतुर्दश प्रदातव्या विप्रेभ्यो जलपूरिताः ।
कुम्भयज्ञोपवीतानि वस्त्राणि च पृथक् पृथक् ।।
पूर्णमेव च वस्त्राणि शय्यां सोपस्करां तथा ।
द्वादशैव तु गा दद्यात्परिधानादिकं तथा ।।
अथवा दक्षिणामेव प्रदद्याज्जुहुयात्तिलान् ।।
व्रतमेतत्कृतं यन्मे पूर्णं वापूर्णमेव वा ।
सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम ।।
इति संप्रार्थ्य तान्विप्रान् प्रणम्य च पुनः पुनः ।
ततश्च स्वजनैः सार्धं स्वयं भुञ्जीत च व्रती ।।
इति श्रीस्कान्दे शिवरात्र्युद्यापनम् ।।

माघामावास्या युगादिः। तदुक्तम्– 'माघमासस्य त्वमावास्येति'। तथान्योऽपि विष्णुपुराणे–

माघासिते पञ्चदशी कदाचि-
दुपैति योगं यदि वारुणेन ।
ऋक्षेण कालः स परः पितृणां
नह्यल्पपुण्यैः प्रतिलभ्यतेऽसौ ।। इति ।

वारुणं शतभिषा । भारते-

काले धनिष्ठा यदि नाम तस्मिन्
नयेत्तु भूपाल तदा पितृभ्यः ।
दत्तं तिलान्नं प्रददाति तृप्ति
वर्षायुतं तत्कुलजैर्मनुष्यैः ।। इति ।

फाल्गुनी पौर्णमासी होलिका । सा च सायाह्नव्यापिनी ग्राह्या । 'सायाह्ने होलिकां कुर्यात् पूर्वाह्णे क्रीडनं गवाम्' इति वचनादिति निर्णयामृते उक्तम् । ज्योतिर्निबन्धे तु-

'प्रतिपद्भूतभद्रासु यार्चिता होलिका दिवा ।
संवत्सरं च तद्राष्ट्रं पुरं दहति साद्भुतम् ।।

प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा ।
तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे ।।'

इति नारदवचनात् प्रदोषव्यापिनीत्युक्तम् ।

हेमाद्रौ मदनरत्ने भविष्ये च-

'अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ।
गोमनोयनोपलिप्ते च सचतुष्के गृहाङ्गणे ।।'

इत्यादि तत्रैव तद्विधानाच्च । तेनेयं पूर्वविद्धा-

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ।।'

इति बृहद्यमोक्तेश्च । दिनद्वये प्रदोषव्याप्तौ परैव । पूर्वदिने भद्रासत्त्वात्, । तत्र च होलिकानिषेधात् ।

तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये–

'भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै ।
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत् ।।'

तथा– 'भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ।।
दिनार्धात्परतोऽपि स्यात्फाल्गुनी पूर्णिमा यदि ।
रात्रौ भद्रावसाने तु दीप्यते होलिका तदा ।।' इति ।

यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च क्षयवशात्सायाह्नात्प्रागेव पूर्णिमा समाप्यते तदा पूर्व दिने संपूर्णरात्रौ भद्रासत्त्वात् । तत्र तावन्निषेधात्परेऽहनि प्रतिपद्येव कुर्यात् ।

'सार्धयामत्रयं वा स्यात् द्वितीयादिवसे यदा ।
प्रतिपद्वर्धमाना तु तदाऽसौ होलिका मता ।।'

इति भविष्यवचनादिति निर्णयामृतकारः । मदनरत्नेऽप्येवम् । यत्तु– 'वह्नौ वह्निं परित्यजेत्' इति भविष्ये । वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः । तदुक्तं भिन्नविषयमिति तत्रैवोक्तम् । अन्ये तु तस्यां भद्रामुखं त्यक्त्वेति ।

'प्रदोषव्यापिनी सा स्याद्यदा पूर्वदिने तदा ।
भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम् ।।'
इति नारदवचनात् ।
'निशामुखे प्रपूज्येत होलिका सर्वदा बुधैः ।
न दिवा पूजयेत् ढुण्ढां पूजिता दुःखदा भवेत् ।।'
इति दिवोदासीयवचनात् ।
'यामत्रयेण युक्ता चेत्प्रतिपत्तु भवेत्तिथिः ।
भद्रामुखं परित्यज्य कार्या होला मनीषिभिः ।।'

इति विद्याविनोदेऽभिधानाच्च । भद्रामुखं विहाय पूर्वदिन एव कार्येत्याहुः । भद्रामुखं तु– 'नाड्यस्तु पञ्चवदनं गलकेस्तथैका'

इति रत्नमालोक्तं ज्ञेयम् । शिष्टाचारोऽप्येवमेव । अत्र चेच्चन्द्रग्रहणं तदा ततोऽर्वाङ्निशि भद्रावर्जं पौर्णमास्यां होलिकादीपनम् । अथ परेऽह्नि ग्रस्तोदयस्तदा पूर्वदिने भद्रावर्जं रात्रिचतुर्थयामे विशिष्टपुच्छे वा होलिका कार्या । ग्रहोत्तरं प्रतिपत्सु वा पूर्वं च दिवा होलानिषेधादिति गौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्या । न च,

'सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत सृतमन्नं विवर्जयेत् ।।'

इति निषेधात् कथं सूतके होलेति वाच्यम्, तस्योत्तरार्धशेषत्वात् । पूजामन्त्रस्तु–

असृक्पा भयसंत्रस्तैः कृता त्वं होलि बालिशैः ।
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ।।' इति ।

यत्तु, हुताशनी मलमासे न भवति । इयं मन्वादिरपि । सा तु पौर्वाह्णिकी ग्राह्या । मलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक् । कृत्यचिन्तामणौ ब्राह्मे–

'नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयुतो भूत्वा गोविन्दस्य पुरं व्रजेत् ।। इति ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः । सा चौदयिकी ग्राह्या–

'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ'

इति भविष्योक्तेः । दिनद्वये तथात्वे पूर्वा ।

'वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ।।'

इति वृद्धवशिष्ठवचनात् । अत्र विशेषो हेमाद्रौ भविष्ये–

'चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने ।
यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ।।
न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप ।।' इति ।

तथा– 'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।
कृत्वा चावश्यकर्माणि सन्तर्प्य पितृदेवताः ।।
वन्दयेद्धोलिकाभूमिं सर्वदुःखोपशान्तये ।'

मन्त्रश्च– वन्दितासि सुरेन्द्रेण ब्रह्मणा शङ्करेण च ।
अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव ।। इति ।

अत्र चूतकुसुमप्राशनमुक्तं तत्रैव पुराणसमुच्चये–

'वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च ।
संप्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोऽथ समाः सुखी स्यात् ।।'

मन्त्रस्तु– चूतमग्र्यं वसन्तस्य माकन्द कुसुमं तव ।
सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये ।। इति ।

चैत्रामावास्या मन्वादिः । सा चापराह्णव्यापिनी ग्राह्या कृष्णपक्षस्थत्वात् । इति फाल्गुनमासनिर्णयः ।।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
रत्नावली कृता तत्र यातः फाल्गुननिर्णयः ।।

अथ सामान्यपूजा–

अथोक्तेषु व्रतेषु सामान्यपूजाप्रयोगः । तत्र शिवव्रतेषु पार्थिवशिवपूजायाः प्रायेणोक्तत्वात्तत्पूजाप्रकारः पूर्वमभिधीयते–

मृदाहरणसंघट्टप्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनं चैव विसर्जनमतः परम् ।।

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
पशुपतिः शिवश्चैव महादेव इति स्मृतः ।।

ॐ तत्सदित्यादि सर्वसङ्कल्पान्ते अमुकगोत्रोऽमुकदेवशर्माहममुककामनया पार्थिवशिवपूजनमहं करिष्ये । इति सङ्कल्प्य, दीपकलशगणेशपूजां विधाय आचम्य 'वं' इति मृत्तिकाप्रोक्षणम् । 'ह्रीं गँ ग्लौं

गणपतये ग्लौं गँ ह्रीं' इति मन्त्रेण गणेशनिर्माणम् । 'ॐ नमो हराय' इति मृद्ग्रहणम् । 'ॐ नमो महेश्वराय' इति लिङ्गनिर्माणम् । 'ॐ नमः शूलपाणये' इति लिङ्गोपरि पुष्पाक्षतादि दत्त्वा पीठे प्रतिष्ठापयेत् । 'ॐ हुँ क्षँ क्लीं कुमाराय नमः' इति कुमारमन्त्रेण कुमारमूर्तिं विरचयेत् । 'ॐ पिनाकिने नमः' इति धृत्वा आवाह्य प्राणप्रतिष्ठामन्त्रेण प्राणान् प्रतिष्ठाप्य 'शुद्धस्फटिक' मित्यादिना ध्यात्वा– 'ॐ नमः पशुपतये' इति स्नानम् । 'ॐ नमः शिवाय' इति गन्धपुष्पधूपदीपनैवेद्यानि दत्त्वा प्रागादिवामावर्तेन पूजयेत् ।

पूर्वे– ॐ शर्वाय क्षितिमूर्तये नमः । ईशाने– ॐ भवाय जलमूर्तये नमः । उत्तरे– रुद्राय तेजोमूर्तये नमः । वायव्ये– ॐ उग्राय वायुमूर्तये नमः । पश्चिमे– भीमायाऽऽकाशमूर्तये नमः । नैर्ऋत्ये– ॐ पशुपतये यजमानमूर्तये नमः । दक्षिणे– ॐ महादेवाय सोममूर्तये नमः । आग्नेये– ॐ ईशानाय सोममूर्तये नमः । तत इन्द्रादिपूजा, नमस्कारः, प्रदक्षिणा । 'ॐ नमो महादेवाय' इति विसर्जनम् । गणेशकुमारमन्त्राभ्यां तद्विसर्जनम् ।

इति रत्नावल्यां पार्थिवपूजारत्नम् ।

अथ विष्णोः सामान्यपूजाविधिः । ॐ तत्सदित्यादि अमुकव्रताङ्गत्वेनामुककामनया विष्णुपूजामहं करिष्ये ।

इति सङ्कल्प्य ।

अथावाहनम्–

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि ꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
आगच्छागच्छ देवेश तेजोराशे जगत्पते ।
क्रियमाणां मया पूजां गृहाण सुरसत्तम ॥

अथासनम्– ॐ पुरुषऽ एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् ।।

पाद्यम्– ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।
गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ।।

अर्घ्यम्– ॐ त्रिपादूर्द्ध्वंऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो व्विष्वङ्व्यक्रामत्साशनानशनेऽ अभि ।।
नमस्ते देवदेवेश नमस्ते धरणीधर ।
नमस्ते कमलाकान्त अर्घ्यं नः प्रतिगृह्यताम् ।।

आचमनीयम्– ॐ ततो व्विराडजायत व्विराजोऽ अधि पूरुषः ।
स जातो ऽ अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।
कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।

स्नानम्– ॐ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।।
गङ्गा च यमुना चैव नर्मदा च सरस्वती ।
तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतम् ।।
तोयमेतत्सुखस्पर्शं स्नानाय प्रतिगृह्यताम् ।

आचमनीयं पञ्चामृतस्नानम् ।

वस्त्रम्–ॐ तस्माद्यज्ञात्सर्वहुतऽ ऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।
सर्वभूषाधिके देव लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।
वस्त्रान्ते आचमनीयम् ।

यज्ञोपवीतम्– ॐ तस्मादश्वाऽ अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ।।

दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥

चन्दनम्— ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ॥
श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

पुष्पम्— ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

धूपः— ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या ꣳ शूद्रोऽ अजायत ॥
वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपः— ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम्— ॐ नाभ्याऽ आसीदन्तरिक्ष ꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ अकल्पयन् ॥
अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

फलम्— इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
नैवेद्यान्ते आचमनीयम् ।

ताम्बूलम्— ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्मऽ इध्मः शरद्धविः ॥

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरादिसमायुक्तं ताम्बूलं प्रतिगृह्यताम् ।।
दक्षिणा– ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वानाऽ अबन्धन् पुरुषं पशुम् ।।
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।
नीराजनम्– चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ।।
पुष्पाञ्जलिः– ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।
नमस्ते पुण्डरीकाक्ष नमस्ते ह्यमरप्रिय ।
नमस्ते कमलाकान्त वासुदेव नमोऽस्तु ते ।।
प्रदक्षिणा– यानि कानि च पापानि ब्रह्महत्या समानि च ।
तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ।।
नमस्कारः– नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामोऽस्तु प्रयत्नेन मया कृतः ।।
इति सामान्यपूजाविधिः

अथोपचाराः । पदार्थादर्शे–

'अष्टत्रिंशत्षोडश वा दश पञ्चोपचारकाः ।
तान्विभज्य प्रवक्ष्यामि के ते तैश्च कृतेन किम् ।।
अर्घ्यं च पाद्याचमने मधुपर्कमुपस्पृशम् ।
स्नानं नीराजनं वस्त्रमाचमं चोपवीतकम् ।।
पुनराचमभूषे च दर्पणालोकनं ततः ।
गन्धपुष्पे धूपदीपौ नैवेद्यं च ततः क्रमात् ।।
पानीयं तोयमाचामं हस्तवासस्ततः परम् ।
ताम्बूलमनुलेपं च पुष्पदानं पुनः पुनः ।।

गीतं वाद्यं तथा नृत्यं स्तुतिश्चैव प्रदक्षिणा ।
पुष्पाञ्जलिनमस्कारावष्टत्रिंशत्समीरिताः ।।
हस्तवासः करोद्वर्तनार्थः । इत्यष्टत्रिंशदुपचाराः ।
'आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकम् ।
मधुपर्कासनस्नानवसनाभरणानि च ।।
सुगन्धसुमनो धूपो दीपमन्नेन तर्पणम् ।
मालानुलेपने चैव नमस्कारविसर्जने ।।' इति षोडशोपचाराः ।
'अर्घ्यपाद्याचमान्येव मधुपर्काचमान्यपि ।
गन्धादयो निवेद्यान्ता उपचारा दश क्रमात् ।।' इति दशोपचाराः ।
'गन्धपुष्पे धूपदीपौ नैवेद्यं पञ्चमं स्मृतम् ।' इति पञ्चोपचाराः ।
पाद्याङ्गानि यथा– 'दूर्वा च विष्णुक्रान्ता च श्यामाकं पद्ममेव च ।
पाद्याङ्गानि च चत्वारि कथितानि समासतः ।।
कर्पूरमगरूपुष्पं द्रव्याण्याचमनीयके ।
सिद्धार्थमक्षतं चैव सदूर्वातिलमेव च ।।
पञ्चगन्धं फलं पुष्पमष्टाङ्गोऽर्घः प्रकीर्तितः ।
स्नाने वस्त्रे तथा भक्ष्ये दद्यादाचमनीयकम् ।।
रजनी सहदेवी च शिरीषं लक्ष्मणापि च ।
सहा भद्रा कुशाग्राणि उद्वर्तनमिहोच्यते ।।' इति ;

इति श्री गिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलिविराजमानश्रीमन्महाराजाधिराज श्री ५ गीर्वाणयुद्धविक्रमसाहदेवकृतायां सत्कर्मरत्नावल्यां तिथिनिर्णयनिबन्धरत्नं नाम पञ्चदशं प्रकरणम् ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र गतोऽयं तिथिनिर्णयः ।।

अथ शान्तिरत्नम् ॥

तत्रादौ दुष्टरजोदर्शनशान्तिः— रजोदर्शने चैत्रज्येष्ठाषाढभाद्रपदकार्तिकपौषप्रतिपत्षष्ठ्यष्टमीद्वादश्यमारिक्तापापवारभरण्यार्द्रापुष्याश्लेषापूर्वा (फाल्गुन) ज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदाव्याघातगण्डातिगण्डशूलवैधृतिव्यतीपातपरिघपूर्वार्धभद्रात्रिधाविभक्तदिनान्त्यभागरात्रिसन्ध्यापापलग्नसङ्क्रान्तिश्राद्धदिनरविचन्द्रोपरागाशौचजीर्णारुणनीलवस्त्रपितृपरगृहाण्यशुभानि । अत्र दोषबहुत्व एव शान्तिकं कुर्यात् । 'प्रभूतदोषे वैधव्यनिःसन्ततित्वापादके' इति केचिदर्थमाहुः । ग्रहणे तु रजोदर्शने दोषैकत्वेऽपि शान्तिः । 'ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते । व्याधिः पीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥' इति शौनकेन निरपेक्षस्य निमित्तत्वोक्तेः । तत्र शान्तिर्वक्ष्यते । कृतेऽपि शान्तिके शुद्धकालीनरजोदर्शनावधि सङ्गो न कार्यः । 'विवर्जयेदेव तदेकशय्यां यावद्रजोदर्शनमुत्तमेऽह्नि' इति वसिष्ठोक्तेः । शान्तिरुक्ता तेनैव––

"तद्दुष्टेऽह्नि नवोदकुम्भसलिलैः सन्मन्त्रितैरोषधैः
स्नानं पापनुदं सपञ्चकलशैः कार्यं समृद्धीजकैः ॥
ऐशानतो गोमयमण्डले च परिस्तृतेऽग्नौ जुहुयाच्च दूर्वाम् ।
युग्मां घृताक्तां च समित्प्रमाणां गायत्रिसंज्ञाष्टसहस्रसङ्ख्या ॥
शतप्रमाणामथवाघहन्त्री शुभाय वै व्याहृतिभिस्तिलैश्च ।
ततः सुरान् भूमिसुरान् पितॄंश्च सन्तर्पयेदन्नसुवर्णवस्त्रैः ॥"

प्रयोगपारिजाते शौनकः—

"सार्तवानां तु नारीणां शान्तिं वक्ष्यामि शौनक ।
पञ्चमेऽह्नि चतुर्थे वा ग्रह्यातिथ्यपुरःसरम् ॥

द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत् ।
कुम्भत्रयं न्यसेद्राशौ तन्तुवस्त्रादिवेष्टितम् ॥
सूक्तेनाथ नवर्चेन 'प्रसुव आप' इत्यथ ।
आचार्यप्रवरस्तद्वद्गायत्र्या च ततः क्रमात् ॥
मध्यकुम्भे न्यसेद्धान्यमौषधानि च हेम च ।
उदुम्बरः कुशा दूर्वा राजीवं चम्पबिल्वकाः ॥
विष्णुक्रान्ताथ तुलसी बर्हिषः शङ्खपुष्पिका ।
शतावर्यश्वगन्धा च निर्गुण्डी सर्षपद्वयम् ॥
अपामार्गः पलाशश्च पनसो जीवकस्तथा ।
प्रियङ्गवश्च गोधूमा व्रीहयोऽश्वत्थ एव च ॥
क्षीरं दधि च सर्पिश्च पद्मपत्रं तथोत्पलम् ।
कुरण्टकत्रयं गुञ्जा वचा भद्रकमुस्तकाः ॥
द्वात्रिंशदौषधानीह यथासम्भवमाहरेत् ।
मृत्तिकाश्चौषधादीनि तन्मन्त्रेण क्षिपेत्क्रमात् ॥
कुम्भोपरि न्यसेत्पात्रं कांस्यमृद्वेणुताम्रजम् ।
भुवनेश्वरीं न्यसेत्तत्र इन्द्राणीं च पुरन्दरम् ॥
जपेद्गायत्रीं मध्यमे श्रीसूक्तं च जपेत्ततः ।
स्पृशन् वै दक्षिणं कुम्भमृत्विगेको जपेदथ ॥
चत्वारि रुद्रसूक्तानि चतुर्मन्त्रोत्तराणि च ।
संस्पृशन्नुत्तरं कुम्भं श्रीरुद्रं रुद्रसङ्ख्यया ॥
'शन्न इन्द्राग्नि' सूक्तं च तत्रैव संस्पृशन् जपेत् ।
कुम्भस्य पश्चिमे देशे शान्तिहोमं समाचरेत् ॥
दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ।
तिसृभिश्चैव दूर्वाभिरेका वाऽप्याहुतिर्भवेत् ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयम् ॥

ततः स्विष्टकृतं हुत्वा 'समुद्रादूर्मि' सूक्ततः ।
सन्ततामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥
अथाभिषेकं कुर्वीत प्रतिकुम्भस्थितोदकैः ।
'आपो हिष्ठे' ति नवभिः सूक्तेन च ततः परम् ॥
'इन्द्रो अङ्गे' तृचेनैव पावमानैः क्रमेण तु ।
'उभयं शृणवच्च न' 'स्वतिदाविश' एकया ॥
'समुद्रज्येष्ठा' इत्यादि 'त्रायन्तां' च त्रिभिःक्रमात् ।
'इमा आप' स्तृचेनैव 'देवस्य त्वे' ति मन्त्रतः ॥
मन्त्रेणाथ 'तमीशाना' 'त्वमग्ने रुद्र' इत्यथ ।
'तमुष्टुही' ति मन्त्रेण 'भुवनस्य पितरं' यथा ॥
'या ते रुद्रे' ति मन्त्रेण 'शिवसङ्कल्प' मन्त्रतः ।
'इन्द्र त्वा वृषभं' पञ्चमन्त्रैश्चैवाभिषेचयेत् ॥
धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः ।
सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ॥
महाशान्ति प्रजप्याथ ब्राह्मणान्भोजयेत्ततः । " इति ।

अथ प्रयोगः–

देशकालौ स्मृत्वा मम पत्न्याः प्रथमरजोदर्शनेऽमुकदुष्टमासादिसूचितसकलारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शौनकोक्तां शान्ति करिष्ये । इति सङ्कल्प्य गणेशपूजनपुण्याहवाचननान्दीश्राद्धाचार्यऋत्विग्वरणानि कुर्यात् । ऋत्विजश्चाष्टौ षट् चत्वारो वा । तत आचार्यो गृहेशानदेशे तद्दक्षिणोत्तरयोश्च 'महीद्यौः[१]' इति भूमिं स्पृष्ट्वा 'ओषधयः[२]' इति द्रोणप्रमाणव्रीहीणां राशित्रयं कृत्वा तत्र कुम्भत्रयं 'आकलशेषु[३]' इति स्थापयेत् । सर्वत्र मन्त्रावृत्तिः ।

---

१. ॐ मही द्यौः पृथिवी च नऽ इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥
२. ॐ ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त ठं॰ राजन्पारयामसि ॥
३. ॐ आकलशेषु धावति पवित्रे परिषिच्यते । उक्थैर्यज्ञेषु वर्धते ॥

ततः 'प्रसुसुव आप' इति नवर्चेन सूक्तेन कलशेषूदकपूरणम् । (अस्य नवर्चस्य सूक्तस्य सिन्धुक्षिन्, नद्यो, जगती कलशेषूदकपूरणे विनियोगः । 'प्रसुव आप[1]' इत्यादि । 'याः प्रवतः[2]' इत्यस्य च सिन्धुः, नद्यः, शक्वरी, विनियोगः प्राग्वत्) । 'गन्धद्वाराम्[3]' इति त्रिष्वपि गन्धम् । 'याऽओषधीः[4]' इति सर्वौषधीः । ततो मध्यकुम्भे यवव्रीहितिलमाषकङ्गुश्यामाकमुद्गान् क्षिप्त्वा गायत्र्यौदुम्बरकुशदूर्वारक्तोत्पलचम्पकबिल्वविष्णुक्रान्तातुलसीबर्हिषशङ्खपुष्पीः शतावर्यश्वगन्धानिर्गुण्डीरक्तपीतसर्षपापामार्गपलाशपनसजीवकप्रियङ्गुगोधूमव्रीह्यश्वत्थदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरण्टकगुञ्जावचाभद्रमुस्तकाख्यानि–द्वात्रिंशदौषधानि सर्वाणि यथासम्भवं वा क्षिपेत् । ततस्त्रिषु 'काण्डात्काण्डात्[5]' इति दूर्वा । 'अश्वत्थेव[6]' इति पञ्चपल्लवान् । 'स्योना पृथिवी[7]' इति सप्त, पञ्चमृदः । 'याः फलिनीः[8]' इति फलानि ।

---

१. ॐ प्रसुवऽआपो महिमानमुत्तमं कारुर्वोचातिसदने विवस्वतः । प्रसप्तसप्त त्रेधा हि चक्रमुः प्रसृत्वरीणामतिसिन्धुरोजसा ।।प्रतेरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँऽअभ्यद्रवस्त्वम् । भूम्याऽअधि प्रवतायासिसानुनायदेषामग्रं जगतामिरज्यसि ।। दिविस्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्ति भानुना । अभ्रादिव प्रस्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो नरोरुवत् ।। अभित्वा सिन्धो शिशुमिन्न मातरोवाश्राऽअर्षन्ति पयसेव धेनवः । राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ।। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जिकीये शणुह्यासुषोमया ।। तृष्टा मया प्रथमं यातवे सजूः सुसर्त्वारसयाश्वेत्यात्या । त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ।। ऋजीत्येनीरुशती महि त्वा परिज्त्रयांसि भरते रजांसि । अदब्धा सिन्धुरपसामपस्तमाश्वानचित्रा वपुषीव दर्शता । स्वश्वासिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती । ऊर्णावती युवतिः सीलमावत्युताधिवस्ते सुभगा मधुवृधम् ।।सुखं रथं युयुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ । महान्ह्यस्य महिमापनस्यते-दब्धस्य स्वयशसो विरप्शिनः ।।

२. याः प्रवतो निवतऽउद्वतऽ उदन्वतीरनुयाश्च याः । ताऽअस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्योऽअशिमिदा भवन्तु ।। ३, ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।। ४. ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।। मनैनु वभ्रूणामह ठं० शतं धामानि सप्त च ।।५. ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च ।। ६. ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ।। ७, ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म संप्रथाः ।। ८, ॐ याः फलिनीर्या ऽ अफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ठं० हसः ।।

'स हि रत्नानि[1]' इति पञ्चरत्नानि । 'हिरण्यरूप[2]' इति हिरण्यं च क्षिपेत् । 'युवा सुवासा[3]' इति सूत्रेण वाससा वा कलशकण्ठान् वेष्टयित्वा गन्धाक्षतादिभिः कलशान् भूषयेत् । ततः कलशत्रयोपरि तेनैव क्रमेण सौवर्णं राजतं कांस्यमयं ताम्रमयं मृन्मयं च यवादिपूरितं पात्रत्रयं 'पूर्णादर्वि[4]' इति निधाय तदुपरि श्वेतवस्त्रत्रयं विन्यस्य तत्र चन्दनादिनाऽष्टदलानि कुर्यात् ।

तत्र मध्यमे– गायत्र्या विश्वामित्रऋषिर्भुवनेश्वरी देवता गायत्री छन्दः भुवनेश्वर्यावाहने विनियोगः। ॐ तत्सवितुः० । भुवनेश्वरीमावाहयामीति यथाशक्तिसुवर्णनिर्मितां भुवनेश्वरीप्रतिमामग्न्युत्तारणपूर्वकं स्थापयेत् ।

तद्दक्षिणकुम्भोपरि वस्त्रे–इन्द्राणीमासुरित्यस्य वृषाकपिर्ऋषिरिन्द्राणी देवता पङ्क्तिश्छन्द इन्द्राण्यावाहने विनियोगः । 'इन्द्राणीमासु[5]' इति 'इन्द्राणीमावाहयामि' इति तथैव सौवर्णीमिन्द्राणीप्रतिमां स्थापयेत् ।

उत्तरकलशोपरि–इन्द्र त्वा[6] इति विश्वामित्रऋषिरिन्द्रो देवता पङ्क्तिश्छन्द इन्द्रावाहने विनियोगः । 'इन्द्र त्वा[6]' इति 'इन्द्रमावाहयामि' इति तथैव सौवर्णीमिन्द्रप्रतिमां स्थापयेत् । तत उक्तमन्त्रैः पूजां कुर्यात् । ततो मध्यमकुम्भे आचार्योऽष्टसहस्रमष्टशतं वा गायत्रीं जप्त्वा श्रीसूक्तं जपेत्[7] ।

---

[1] स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्रमीमहे ॥

[2] ॐ हिरण्यरूपः स हिरण्यसन्दृगपांनपात्सेदु हिरण्यवर्णः । हिरण्ययात्परियोनेर्निषद्याहिरण्यदा ददत्यन्नमस्मै ॥

[3] ॐ युवाः सुवासाः परिवीत ऽ आगात्सऽ उ श्रेयान्भवति जायमानः । तं धीरासः कवयऽ उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥

[4] ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा ऽ इषमूर्ज ठं० शतक्रतो ॥

[5] ॐ इन्द्राणीमासु नारीषु सुभगामहमश्रवम् । न ह्यस्याऽ अपरं च न जरसा मरते पतिर्विश्वस्मादिन्द्र ऽ उत्तरः ॥

[6] ॐ इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वोऽ अन्धसः ॥

[7] श्रीसूक्त परिशिष्टमा छ ।

तत एक ऋत्विक् दक्षिणकुम्भे रुद्रसूक्तानि जपेत्[1]– ('कद्रुद्राय' इति नवर्चम् । 'इमा रुद्राय' इत्येकादशर्चम् । 'आते पितः' इति पञ्चदशर्चम् । 'इमा रुद्राय स्थिरधन्वन' इति चतस्रः । 'आवो राजानम्' इत्येका । 'तमुष्टुहि' इत्येका । 'भुवनस्य पितरम्' इत्येका । 'त्र्यम्बकम्' इत्येका ।)

अथान्य ऋत्विगुत्तरकुम्भे– एकादशावृत्तिभी रुद्रं जप्त्वा[2] 'शन्न इन्द्राग्नी[3]' इति सूक्तं पञ्चदशर्चं जपेत् ।

तत आचार्यः कुम्भपश्चिमेऽग्निं संस्थाप्य तदीशान्यां नवग्रहादींस्तत्तन्मन्त्रैरावाह्य षोडशोपचारैः संपूज्य तदीशान्यां प्राग्वत् कुम्भं संस्थाप्य तत्र वरुणमावाह्याग्निसमीपमेत्य ब्रह्मोपवेशनाद्याज्यभागान्तं कर्म कृत्वा नवग्रहेभ्यः प्रत्येकमष्टसङ्ख्याभिः समित्तिलाज्याहुतिभिरधिदेवताश्चतुः सङ्ख्याभिः सतिलाज्याहुतिभिः, भुवनेश्वरीमष्टसहस्राष्टशतान्यतरसङ्ख्याभिर्दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिरिति । इन्द्राणीमिन्द्रं चाष्टाविंशतिसङ्ख्याभिर्दूर्वातिलमिश्रगोधूमपायसाज्याहुतिभिः शेषेण स्विष्टकृतमित्यादि प्रायश्चित्तहोमान्तं कृत्वा दिक्पालनवग्रहभुवनेश्वरीन्द्राणीन्द्रक्षेत्रपालेभ्यो माषभक्तबलींस्तत्तन्मन्त्रैर्दत्त्वा 'समुद्रादूर्मिः[4]' इति तृचेन पूर्णाहुतिं हुत्वा प्रणीताविमोकादिकर्मशेषं समाप्य सर्वकलशोदकेन धृतनववस्त्रं यजमानं तादृशीं च भार्यां (ऋतुमतीं) सऋत्विगुदङ्मुख आचार्योऽभिषिञ्चेदेभिर्मन्त्रैः । ते च–

---

[1] यो सूक्तका सबै मन्त्र परिशिष्टमा छन् ।

[2] रुद्राध्यायका मन्त्रहरू परिशिष्टमा हेर्नुहोला ।

[3] यो सूक्त परिशिष्टमा छ ।

[4] ॐ समुद्रादुर्मिर्म्मधुमां २।। उदारꣳुपा ँ ्शुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ।। वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुः शृङ्गोवमीद्गौरऽ एतत् ।। चत्वारि शृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ २।। आविवेश ।।

('आपो हिष्ठा' इति नवभिः, 'य एक इद्विदयत' इत्येकया, 'त्रिभिष्ट्वं देव' इति सप्तर्चेन, 'उभयं शृणवच्चन' इत्येकया, 'स्वस्तिदाविश' इति च, 'त्र्यम्बकम्' इति, 'जातवेदस' इत्येकया, 'समुद्रज्येष्ठा' इति चतसृभिः, 'त्रायन्ताम्' इति तिसृभिः, 'इमाआपः' इति तिसृभिः, 'देवस्य त्वा' इति त्रिभिः, 'तमीशानं जगत' इत्येकया, 'त्वमग्ने रुद्र' इत्यापस्तम्बशाखागतेनैकेन, 'तमुष्टुहि' इति मन्त्रेण, 'भुवनस्य पितरम्' इति च, 'या ते रुद्र' इति, 'यज्जाग्रत' इति षण्मन्त्रैः, 'इन्द्र त्वा वृषभं वयम्' इति पञ्चमन्त्रैः') ततः 'सुरास्त्वामभिषिञ्चन्तु' इति नवभिः पौराणमन्त्रैरभिषिञ्चेत्[1] ।

ततो यजमानोऽग्नि संपूज्य आचार्यादींश्च गन्धपुष्पवस्त्रालङ्कारादिभिर्यथाशक्ति पूजयित्वाऽऽचार्याय धेनुम्, रुद्रजापिने सदक्षिणमनड्वाहम्, ब्रह्मर्त्विग्भ्यो यथाशक्ति भूयसीं दक्षिणां दद्यात् । ततो भुवनेश्वर्यादीनां ग्रहाणां चोत्तरपूजां कृत्वोत्तिष्ठन् 'यान्तु देवगणाः सर्वे' इति विसृज्याचार्याय प्रतिपाद्य अग्नि संपूज्य 'गच्छ गच्छ' इति विसर्जयेत् । ततो ब्राह्मणा महाशान्ति पठेयुः । तद्यथा–

('आनो भद्राः' इति दश, 'स्वस्तिनो मिमीताम्' इति पञ्च, 'शन्नऽ इन्द्राग्नी' इति पञ्चदश, 'त्यमूषु' इति तिस्रः, 'तच्छंयोः' इत्येका[2]) ततो यजमानो भुवनेश्वर्यादीनां ग्रहाणां च प्रीतये त्रींस्त्रीन् ब्राह्मणान् भोजयित्वा विप्राशिषो गृहीत्वा सुहृद्युक्तो भुञ्जीत । इति दुष्टरजोदर्शनशान्तिः ।।

अथ बौधायनोक्तऋतुशान्तिः ।।

"ऋतुशान्ति व्याख्यास्यामस्तिथिवारनक्षत्रलग्नदोषशान्त्यर्थं चतुर्थेऽह्नि पञ्चमेऽह्नि वा शान्तिस्नानं प्रकुर्वीत देवालये गृहे वा । प्रस्थाष्ट-

---

[1] १. यहां उल्लेख भएका सबै मन्त्र परिशिष्टमा छन् ।

[2] २. यी सबै मन्त्र परिशिष्टमा छन् ।

भिर्धान्यैस्तदर्धैस्तिलैश्चारत्निमात्रं चतुरस्रं कृत्वा मध्ये नलिनमुल्लिख्य कुशैर्दूर्वाभिः प्रच्छाद्य तस्मिँस्तन्तुवेष्टितं कुम्भं निधाय 'आपो वा इदं सर्वम्' इत्येतेनानुवाकेनाब्लिङ्गाभिश्च कुम्भमुदकैः पूरयित्वा कूर्चमन्तर्धाय पल्लवान् पञ्चत्वक्च निक्षिप्य कपित्थाश्वपालाशबिल्वोदुम्बरं च पञ्चरत्नं च निक्षिप्य नववस्त्रयुग्मेनाच्छाद्य नारिकेलफलैरपिधाय बिल्वैश्चूतपल्लवैश्चावकीर्य पुरुषं पुण्डरीकाक्षं ध्यात्वा गन्धपुष्पधूपदीपैः कुम्भमभ्यर्च्याथ श्रोत्रियाँश्च बहुश्रुतानष्ट चतुरो वा ब्राह्मणान् वरणपूर्वकमभ्यर्च्याचार्यं च तं कुम्भमन्वारभ्य वैष्णवीं गायत्रीं सहस्राष्टकं शताष्टकं वा वदतो गायत्रीं च वेदादिना 'आपो हिष्ठा मयो भुव' इति तिसृभिः, 'हिरण्यवर्णाः शुचयः पावकाः' इत्येतदनुवाकं, 'पवमानः सुवर्जनः' इत्येतदनुवाकं पुरुषसूक्तं वा 'प्राचीम्' इत्यनेनानुवाकेनाथालङ्कृतां पत्नीमुरुविष्टरे तृण आसीनां 'आपो हिष्ठा मयो भुव' इति तिसृभिः, 'हिरण्यवर्णाः शुचयः पावकाः' इति चतसृभिः, 'पवमानः सुवर्जनः' इत्येतेनानुवाकेन ऋत्विजः प्रत्येकमाशीर्वादपुरः सरं स्नापयेयुः । ततो नारीं पञ्चगव्यं प्राशयित्वा शुचौ देशे स्थण्डिलं कल्पयित्वा लौकिकाग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधिनाऽग्निमखान्तं कृत्वा विष्णुसूक्तेन शताष्टकसङ्ख्यया पलाशसमिधो हुत्वैवं ब्रह्मसूक्तेनान्नं रुद्रसूक्तेनाज्यं तेषामष्टादशकृत्वोथायुष्यहोमं घृतसूक्तेनाज्येन हुत्वा ततो नक्षत्रहोमं तत्तन्मन्त्रेण तस्य चतुर्दशकृत्वः पूर्ववत्समिदन्नाज्यैः 'त्र्यम्बकं यजामहे' इति तिलहोमं शताष्टकाहुतीरुपजुहुयात् स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानाद्दक्षिणां दद्यादाचार्याय विशेषतस्ततः पुण्याहवाचनं कृत्वा ततो नारी दोषात्प्रमुच्यत इत्याह भगवान्बौधायनः ।"

अथ कन्याया बालवैधव्यहेतुलक्षणग्रहयोगशान्तिः ॥

मार्कण्डेये—

'बालवैधव्ययोगे तु कुम्भं द्रुप्रतिमादिभिः
कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरे ।।

तत्र पुनर्भूदोषाभाव उक्तो विधानखण्डे–

'स्वर्णद्रुपिप्पलानां च प्रतिमां विष्णुरूपिणीम् ।
तया सह विवाहे तु पुनर्भूत्वं न जायते ।।'

सूर्यारुणसंवादे–

'विवाहात्पूर्वकाले च चन्द्रताराबलान्विते ।
विवाहोक्ते च मन्थन्या कुम्भेन सह चोद्वहेत् ।।
सूत्रेण वेष्टयेत्पश्चाद्दशतन्तुविधानतः ।
कुङ्कुमालङ्कृते देहं तयोरेकान्तमन्दिरे ।।
ततः कुम्भं च निःसार्य प्रभज्य सलिलाशये ।
ततोऽभिषेचनं कुर्यात्पञ्चपल्लववारिभिः ।।'

कुम्भप्रार्थना तत्रैव–

'वरुणाम्भःस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ।।
देहि विष्णुवरादेव कन्यां पालय दुःखतः ।
ततोऽलङ्कारवस्त्राढ्यां वराय प्रतिपादयेत् ।।'
इति कुम्भविवाहः ।।

मूर्तिदानं तत्रैवोक्तम्–

'ब्राह्मणं साधुमामन्त्र्य संपूज्य विविधार्हणैः ।
तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजाम् ।।
शुद्धवर्णसुवर्णेन वित्तशक्त्याथवा पुनः ।
निर्मितां रुचिरां शङ्खगदापद्माब्जसंयुताम् ।।
दधानां वाससी पीते कुमुदोत्पलमालिनीम् ।
सदक्षिणां च तां दद्यान्मन्त्रमेतन्मुदीरयन् ।।
यन्मया प्राचि जनुषि घ्नन्त्या पतिसमागमम् ।
विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया ।।

प्राप्य मानं महाघोरं यशः सौख्यधनापहम् ।
वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये ।।
बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम् ।
सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज ।।
अनघा साहमस्मीति त्रिवारं प्रजपेदिति ।
एवमस्त्वीति तस्योक्ति गृहीत्वा स्वगृहं विशेत् ।।
ततो वैवाहिकं कुर्याद्विधिं दाता मृगीदृशः ।' इति ।

अथार्कविवाहः ।।

मात्स्ये, कश्यपः—
'उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ।।
नश्यत्येव न सन्देहो गर्गस्य वचनं यथा ।'
सङ्ग्रहे—'चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ।
आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे ।।
शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम् ।'
ब्राह्मे—'ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतम् ।
परीक्ष्य यत्नतोऽर्कं तु स्थाण्डिलादि यथाविधि ।।
कृत्वार्कं पुरतस्तिष्ठन् प्रार्थयेत द्विजोत्तमान् ।
त्रिलोकवासिन् सप्ताश्व छाययासहितो रवे ।।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ।
तत्राध्यारोप्य देवेशं छाययासहितं रविम् ।।
वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मन्त्रेणैव पूजयेत् ।
तत्र मन्त्रः—'आकृष्णेन' इति ।
चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूजयेत् ।
विसृज्य होममग्निं च उद्वहेन्मानुषीं पराम् ।।'

व्यासः— 'सपुष्पफलशाखैकमकगुल्मं समानयेत् ।
अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ।।
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।
नान्दीश्राद्धे हिरण्येन अष्टवर्गान् प्रपूजयेत् ।।
पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः ।
यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणम् ।।
उष्णीषगन्धमाल्यादि वरायास्मै प्रदापयेत् ।
अर्कं प्रदक्षिणं कुर्वन् जपेन्मत्रमिमं बुधः ।।
मम प्रीतिकरी येयं मया सृष्टा पुरातनी ।
अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु ।।
पुनः प्रदक्षिणीकुर्यान्मन्त्रेणानेन मन्त्रवित् ।
नमस्ते मङ्गले देवि नमः सवितुरात्मजे ।।
त्राहि मां कृपया देवि पत्नी त्वं मे इहागता ।
अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च ।।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः ।
तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय ।।
ततश्च कन्यावरणं त्रिपूरुषं कुलमुच्चरेत् ।
आदित्यः सविताचार्यः पुत्री पौत्री च नप्त्रिका ।।
गोत्रं काश्यपमित्युक्तं लोके लौकिकमाचरेत् ।
मुहूर्तेऽर्कं निरीक्षेत स्वस्तिसूक्तमुदीरयेत् ।।
आशीर्भिः सहितः कुर्यादाचार्यप्रमुखैर्द्विजैः ।
अथाचार्यं समाहूय विधिना तन्मुखाच्च ताम् ।।
प्रतिगृह्य ततो होमं गृह्योक्तविधिनाचरेत् ।
अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ।।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय । इति दानमन्त्रः ।
अञ्जल्यक्षतकर्माणि कृत्वा कङ्कणपूर्वकम् ।।

यावत्पञ्चावृतं सूत्रं तावदर्कं प्रवेष्टयेत् ।
स्वशाखोक्तेन मन्त्रेण गायत्र्या वाथवा जपेत् ।।
पञ्चीकृत्य पुनः सूत्रं स्कन्धे बध्नाति मन्त्रतः ।
बृहत्सामेति मन्त्रेण सूत्ररक्षां प्रकल्पयेत् ।।
अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा ।
कुम्भांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये ।।
सवस्त्रं प्रतिकुम्भं च त्रिःसूत्रेणैव वेष्टयेत् ।
हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलम् ।।
प्रतिकुम्भं महाविष्णुं संपूज्य परमेश्वरम् ।
पाद्यार्घ्यादिनिवेद्यान्तं कुर्यान्नाम्नैव मन्त्रवित् ।।
पुनः प्रदक्षिणं कृत्वा मन्त्रमेतमुदीरयेत् ।
मया कृतमिदं कर्म स्थावरेषु जरायुणा ।।
अर्कापत्यानि मे देहि तत्सर्वं क्षन्तुमर्हसि ।
इत्युक्त्वा शान्तिसूक्तानि जप्त्वान्तं विसृजेत्पुनः ।।
गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः ।
इतरेभ्योऽपि विप्रेभ्यो दक्षिणां चापि शक्तितः ।।
तत्सर्वं गुरवे दद्यादन्ते पुण्याहवाचनम् ।'

शौनकः– 'तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य च ।
आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः ।।
अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् ।
नान्दीश्राद्धं प्रकुर्वीत स्थण्डिलं च प्रकल्पयेत् ।।
अर्कमभ्यर्च्य सौर्या च गन्धपुष्पाक्षतादिभिः ।

सौरी– आकृष्णेनेति ।

स्वयं चालङ्कृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः ।।
अर्कस्योत्तरदेशे तु समन्वारब्ध एतया ।

एतया– अर्ककन्यया ।

उल्लेखनादिकं कुर्यादाघारान्तमतः परम् ॥
आज्याहुतिं च जुहुयात्सङ्गोभिरनयैकया ।
यस्मै त्वा कामकामायेत्येतयर्चा ततः परम् ॥
व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत् ।
परिषेचनपर्यन्तमायाश्चेत्यादिकं क्रमात् ॥

देशकालौ सङ्कीर्त्य मम तृतीयमानुषीपरिणयस्य शुभतासिद्ध्यर्थमर्कविवाहं करिष्ये । इति सङ्कल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात् । ततो वरोऽर्कस्य पुरतस्तिष्ठन् सूर्यं प्रार्थयेत्––

त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे ।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥

ततोऽर्कवृक्षे छायासहितं सूर्यम् 'आकृष्णेन'[1] इति मन्त्रेण षोडशोपचारैः पूजयेत् । तत्र वस्त्रदानकाले वस्त्रेण तन्तुभिश्चार्कमावेष्टयेत् । अभिषेके 'आपो हिष्ठे' त्यादयो मन्त्राः[2] ।

तत आचार्यो वरं मधुपर्कयज्ञोपवीतवस्त्रभूषणोष्णीषगन्धमाल्यैः पूजयेत् । ततो वरोऽर्कं प्रदक्षिणीकुर्वन् ––

मम प्रीतिकरा येयं मया सृष्टा पुरातनी ।
अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु ॥ इति जपेत् ।

पुनः प्रदक्षिणीकुर्वन्––

नमस्ते मङ्गले देवि नमः सवितुरात्मजे ।
त्राहि मां कृपया देवि पत्नी त्वं म इहागता ॥

---

[1] ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

[2] ॐ आपो हि ष्ठा मयोभुवस्ता नऽ ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्माऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च ।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धन ।।
तृतीयोद्वाहजं दोषं मृत्युं चाशु विनाशय । इति जपेत् । ततः कन्यां प्रयच्छेत्याचार्यं प्रार्थयेत् । ततो दानाचार्यः–

ॐकाश्यपावत्सारनैध्रुवेति त्रिप्रवरान्वितकाश्यपगोत्रोत्पन्नाम् आदित्यस्य प्रपौत्रीम्, सवितुः पौत्रीम्, ममामुकशर्मणः पुत्रीम् (अर्कस्य पुत्रीम्) अमुकप्रवरान्विताममुकगोत्राय, अमुकप्रपौत्राय, अमुकपौत्राय, अमुकपुत्राय, अमुकनाम्ने वराय दास्ये । इति वाग्दानं कुर्यात् । ततो वरः सुमुहूर्तेऽर्ककन्यां निरीक्ष्य 'स्वस्ति नो मिमीताम्[1]' इति सूक्तं पठेत् ।

ततो दानाचार्यो– वाग्दानवद्गोत्राद्युच्चार्य इमामर्ककन्यां तुभ्यमहं संप्रददे । न ममेति वरहस्ते जलं दत्त्वा––

अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ।। इति पठेत् । तत आचार्यो वरस्य कङ्कणबन्धं सूत्रेण कृत्वाऽर्ककन्याप्रतिनिधित्वेनाक्षतारोपणं तदुक्तमन्त्रैः कुर्यात् । वरोऽप्यर्के तदुक्तमन्त्रैरक्षतारोपणं कुर्यात्[2] ।

---

[1] ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषाऽ असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ।। स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पति ठँ० सर्वगण ठँ० स्वस्तये स्वस्तयऽ आदित्यासो भवन्तु नः ।। विश्वेदेवा नोऽ अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवाऽ अभवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्व ठँ० हसः ।। स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति नऽ इन्द्रश्चाग्निश्च स्वस्ति नोऽ अदिते कृधि ।। स्वस्ति पन्थामनुचरेम सूर्याचिन्द्रमसाविव । पुनर्ददताघ्नताजानतासङ्गमेमहि । स्वस्त्ययनन्ताक्ष्यर्मरिष्टनेमिं महद्भूतं वायसन्देवतानाम् । असुरघ्नमिन्द्रसख ठँ० समत्सु बृहद्यशो नावमिवारुहेम ।। अ ठँ० होमुचमाङ्गिरसङ्गयञ्च । स्वस्त्यात्रेयं मनसा च ताक्ष्र्यम् । प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नोऽ अस्तु ।।

ॐ स्वस्ति नऽ इन्द्रोवृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्र्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।

[2] "ॐ यज्ञो मे कामः समृद्ध्यताम् । ॐ धर्मो मे कामः समृद्ध्यताम् । ॐ यशो मे कामः समृद्ध्यताम् ।" यिनै तीन मन्त्रले अर्कवृक्षमा अक्षताफुलहरू चढाउनुपर्छ ।

ततो वरो गायत्र्या ऽर्कं सूत्रेण पञ्चकृत्व आवेष्ट्य तेन सूत्रेण (तं सूत्रं निष्कास्य पञ्चगुणं कृत्वा) 'बृहत्साम[1]' इति मन्त्रेण (अर्कं) स्कन्धे बध्नीयात् ।

ततो वर आचार्यो वाऽर्कस्याष्टदिक्षु अष्टौ कलशान् संस्थाप्य कलशकण्ठान् वस्त्रेण सूत्रेण वाऽऽवेष्ट्य हरिद्रां (अष्टौ गन्धांश्च) निक्षिप्य सर्वत्र 'इदं विष्णुः[2]' इति मन्त्रेण विष्णुं संपूज्याऽर्कोत्तरेऽग्निं प्रतिष्ठाप्याऽन्वादध्यात् । (परिसमूहनादि आज्यभागान्तं कर्म कुर्यात्)।

अत्र प्रधानम्– 'बृहस्पतिम्, अग्निम्, वायुम्, सूर्यम्, प्रजापतिं वाऽऽज्येनेत्युक्त्वा, आज्यभागान्ते– 'संगोभिराङ्गिरस[3]' इति मन्त्रेण 'बृहस्पतये स्वाहा' इति बृहस्पतिं हुत्वा, 'यस्मै त्वा कामकामाय[4]' इति 'अग्नये स्वाहा' इति मन्त्रेणाग्निं जुहुयात् । ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा[5] कर्मशेषं समापयेत् । (प्रायश्चित्तहोमादि प्रणीताविमोकान्तं कर्म कुर्यात्)।

ततो वरः– 'मम प्रीतिकरा[6]' इति मन्त्रेणार्कं त्रिः प्रदक्षिणीकृत्य– "मया कृतमिदं कर्म स्थावरेषु जरायुणा । अर्कापत्यानि मे देहि तत्सर्वं क्षन्तुमर्हसि ।।" इति प्रार्थयेत् । ततः शान्तिसूक्तानि पठित्वा अर्कस्थं सूर्यं विसृज्य आचार्याय गोयुगं यथाशक्तिभूयसीं च दत्त्वा विष्णुप्रतिमामाचार्याय प्रतिपाद्य पुण्याहवाचनं कुर्यात् ।

---

१. ॐ वृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् । इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ।।

२. ॐ इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् । समूढमस्यपा ँ सुरे स्वाहा ।।

३. संगोभिराङ्गिरसो नक्षमाणो भगऽ इवेदर्यमणं निनाय । जनें मित्रोन दम्पतीऽ अनक्ति वृहस्पते वाजयाशूँरिवाजौ ।।

४. ॐ यस्मै त्वा कामकामाय वयं सम्राड् यजामहे । तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब ।।

५. व्यस्तव्याहृतिः – 'ॐ भूः स्वाहा । इदमग्नये । ॐ भुवः स्वाहा । इदं वायवे । 'ॐ स्वः स्वाहा । इदं सूर्याय ।'

समस्तव्याहृतिः – 'ॐ भूर्भुवः स्वः स्वाहा । इदं प्रजापतये ।'

६. यो मन्त्र ३४१ पृष्ठको भूलमा छ ।

ततः पञ्चमेऽह्नि पुनरर्के सूर्यं पूर्ववत्संपूज्य विसृज्य मानुषीं परिणयेत् । इत्यर्कविवाहरत्नम् ।।

अथ गोमुखप्रसवविधिः ।।

तत्रादौ बहुशान्त्यङ्गत्वाद्गोमुखप्रसवोऽभिधीयते । प्रयोगपारिजाते गर्गः–

"प्रणिपत्य रविं वक्ष्ये प्रायश्चित्तमनुस्मरन् ।
सर्वारिष्टविनाशाय यदुक्तं ज्योतिरर्णवे ।।
पित्ररिष्टे सुतारिष्टे मात्ररिष्टे तथैव च ।

पित्ररिष्टे–पित्ररिष्टसूचकनक्षत्राद्युत्पत्तौ । एवमग्रेऽपि ।

प्रायश्चित्तं तदा कुर्यात्तत्तद्दोषस्य शान्तये ।।
एषु ऋक्षेषु जातस्य कुर्याद्गोजननं तथा ।।"

अत्र प्रायश्चित्तं मूलादिशान्तिकं गोजननं च कुर्यादिति समुच्चयोऽभिधीयते । अन्यथा गोजननस्यानिष्टनिरासार्थत्वेन शान्त्या विकल्पः स्यात् । न चादृष्टार्थत्वात्समुच्चयः । एकप्रकरणाधीतत्वाभावात् । अन्यथा दिनक्षयादिनिरसनार्थकदलीदानादेरपि समुच्चयापत्तेः । तत्रापि शान्तिकान्तरात्पूर्वं पश्चाद्वा गोजननं कार्यम् ।

जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे शुभे दिने ।
कृत्वाभ्यङ्गादिकं सर्वं गृहालङ्कारपूर्वकम् ।।
गोमयेनोपलिप्याथ गृहस्येशानभागके ।
पङ्कजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः ।।
व्रीहींस्तत्र विनिक्षिप्य यथावित्तानुसारतः ।
नवशूर्पं च तन्मध्ये रक्तवस्त्रं प्रसारयेत् ।।
स्थापयित्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत् ।
प्राङ्मुखं तमवाक्पादं तिलगर्भगतं शिशुम् ।।
गोमुखं दर्शयित्वाथ पुनर्जातं तु गोमुखात् ।

शिशुमभि गोमुखं दर्शयित्वेत्यर्थः ।

विष्णुर्योनीति सूक्तेन गव्येन स्नापयेच्छिशुम् ।।

गव्येन– पञ्चगव्येन ।

गवामङ्गेषु मन्त्रेण गवामङ्गेषु संस्पृशेत् ।

गोवामाङ्गेषु संस्पृशेदिति वा पाठः ।

विष्णोः श्रेष्ठेति मन्त्रेण गोप्रसूतं तु बालकम् ।।
आचार्यस्तु समादाय पश्चान्मात्रे ददेत्तदा ।

ज्योतिर्निबन्धे तु––

'साचार्यस्तु समादाय पश्चान्मात्रे ददेत्पिता ।' इति पाठः ।

माता जघन्यभागस्था शिशुमानीय तन्मुखात् ।।

तन्मुखात्– गोमुखात् ।

ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत् ।
वस्त्रं संस्थाप्य च ततः पुत्रस्य मुखमीक्षयेत् ।।

संस्थाप्य– निष्काश्य ।

गोमूत्रं गोमयं क्षीरं दधिसर्पिश्च संयुतम् ।
आपोहिष्ठादिभिर्मन्त्रैरभिषिञ्चेत्ततः शिशुम् ।।
मूर्धिन चाघ्राय तं पुत्रं तन्मन्त्रेण तदा पिता ।
अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ।

तन्मन्त्रेण– अङ्गादङ्गादित्यनेन ।

मूर्धनि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः ।
पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः ।।

अत्र स्वशाखोक्तमार्गेण पुण्याहवाचनं कुर्यादिति केचित्, पुण्याहशब्दमात्रं वाचयेदित्यपरे ।

दरिद्रायाथ विप्राय तां गामभ्यर्च्य दापयेत् ।
गोवस्त्रस्वर्णधान्यानि दद्यादर्कादितः क्रमात् ।।

यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तदा पिता ।
ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः ।।

होमम्– होमसम्बन्ध्युल्लेखनादि होमस्य वक्ष्यमाणत्वात् ।

उल्लेखनादिकं कृत्वा आज्यभागान्तमाचरेत् ।
होमस्यैशानदिग्भागे धान्योपरि शुभं घटम् ।।

होमस्य– होमदेशस्य ।

पञ्चगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत् ।
क्षीरद्रुमकषायाँश्च पञ्चरत्नानि निक्षिपेत् ।।

कषायः– निर्यासः ।

वस्त्रयुग्मेन संच्छाद्य गन्धादिभिरथार्चयेत् ।
विष्णुं वरुणमभ्यर्च्य प्रतिमां च विधानतः ।

प्रतिमाम्– रूपम् ।

यत इन्द्रादिभिर्मन्त्रैः कुम्भं स्पृश्याभिमन्त्रयेत् ।।

यत इन्द्रेति षडृचस्य सूक्तस्य ग्रहणम् । आश्वलायनेन– 'यत इन्द्रभयामहे' इति सूक्तशेषमिति भयनिरसनार्थत्वेन षडृचस्योक्तत्वात् ।

दधिमध्वाज्ययुक्तेन होमं कुर्यात्प्रयत्नतः ।

युक्तेनेति भावे क्तः । दधिमध्वाज्यानां योगेनेत्यर्थः ।

आपोहिष्ठेति तिसृभिरप्सु मे सोम इत्यथ ।।
तद्विष्णोः परमं पदमक्षीभ्यामिति सूक्ततः ।
ऋग्भिराशिः प्रत्यृचं च अष्टाविंशतिसङ्ख्यया ।।
अशक्तावष्टसङ्ख्यं वा दधिमध्वाज्यसंयुतम् ।
आदित्यादिग्रहाणां च होमं कुर्यात्समन्त्रकम् ।।

ग्रहाणां च होमं दधिमध्वाज्येनेत्यन्वयः । अन्यथा पुनर्दध्यादिग्रहणस्य वैयर्थ्यापत्तेः ।

इति गोमुखप्रसवविधिः ।

अथ गोमुखप्रसवप्रयोगः ।।

देशकालौ सङ्कीर्त्य अस्य बालकस्य अमुकनक्षत्रोत्पत्तिसूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं गोमुखप्रसवं करिष्ये । इति सङ्कल्प्य गणेशं संपूज्य आचार्यं वृणुयात् । आचार्यः– श्वेतपङ्कजमध्ये यथाशक्ति व्रीहीन्निक्षिप्य तेषु शूर्पं निधाय शूर्पे रक्तवस्त्रं प्रसार्य तिलान्विकीर्य प्राङ्मुखं शिशुं निधाय सूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय प्रसवं भावयित्वा 'विष्णुर्योनिम्'[1] इति सूक्तेन मिलितेन पञ्चगव्येन शिशुं स्नापयित्वा 'गवामङ्गेषु'[2] इति मन्त्रेण गोवामाङ्गेषु सर्वाङ्गेषु वा स्पृशेत् । ततो 'विष्णोः श्रेष्ठेन'[3] इति मन्त्रेण आचार्यः शिशुमादाय मात्रे दद्यात् । माता पित्रे, पिता मात्रे दत्त्वा वस्त्रं संप्रार्य (अपसार्य) पुत्रमीक्षेत । तत आचार्यः शिशुं पञ्चगव्येन 'आपो हिष्ठा'[4] इति तिसृभिरभिषिञ्चेत् । ततः पिता 'अङ्गादङ्गात्'[5] इति शिशुं मूर्ध्नि त्रिरवघ्राय मात्रे दत्त्वा– अस्य गोमुखप्रसवकर्मणः पुण्याहं भवन्तो ब्रुवन्तु । इत्युक्त्वा तान् वाचयित्वा गामाचार्याय दत्त्वा ग्रहप्रीत्यर्थे प्रत्येकं गोवस्त्रस्वर्णधान्यानि दत्त्वा यथाशक्ति भूयसीं दक्षिणां दद्यात् ।

तत आचार्योऽग्नि ग्रहाँश्च प्रतिष्ठाप्यान्वाधानं कुर्यात् । तत्र प्रधानं 'आपो हिष्ठा'[6] इति तिसृभिः 'अप्सु मे'[7] इत्यनया च

---

१. ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।। गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं तऽ अश्विनौ देवावाधत्तां पुष्करस्रजा ।। हिरण्ययीऽ अरणीयं निर्मन्थतोऽ अश्विना । तं ते गर्भं हवामहे दशमे मासि सूतवे ।।

२. ॐ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ।।

३. विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् । पुमांसं पुत्रानाधेहि दशमे मासि सूतवे ।।

४.. यी मन्त्र ३४१ पृष्ठमा छन् ।

५. अङ्गादङ्गात्संभवसि हृदयादधि जायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम् ।।

६. यी मन्त्र ३४१ पृष्ठमा छन् ।

७. ॐ अप्सु मे सोमोऽ अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः ।।

प्रत्यृचमष्टशताष्टाविंशत्यष्टसंख्याभिर्विष्णुं ‘तद्विष्णोः[1]’ इत्यृचा तावतीभिर्यक्ष्महणम् ‘अक्षीभ्याम्[2]’ इति सूक्तेन प्रत्यृचं तावतीभिर्ग्रहाँश्च तावतीभिर्दधिमध्वाज्याहुतिभिः ‘शेषेण स्विष्टकृतम्’ इत्याद्याज्यभागान्तं कृत्वा अग्नेरीशान्यां कुम्भं संस्थाप्य पूर्णपात्रोपरि ‘तद्विष्णोः[3]’ इति विष्णुप्रतिमाम् ‘तत्त्वायामि[4]’ इति वरुणं चाभ्यर्च्य कुम्भं स्पृष्ट्वा वक्ष्यमाणमन्त्रान् जपेत् ।

‘यत इन्द्रेति[5]’ षण्णां कण्वपुत्रः प्रतिरथ, इन्द्रो, बृहतीछन्दः जपे विनियोगः । ततो मिलितैर्दधिमध्वाज्यैर्होमं कुर्यात् ।

तत्र ‘आपो हिष्ठेति’ तिसृणां सिन्धुद्वीप आम्बरीष, आपः, गायत्री । ‘अप्सु मे’ मेधातिथिः, आपः, अनुष्टुप् । ‘तद्विष्णोः’ मेधातिथिः,

---

१. ॐ तद्विष्णोः परमं पद ठं० सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ।।

२. ॐ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुवुकादधि । यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ।। ग्रीवाभ्यस्तऽ उष्णिहाभ्यः कीकसाभ्योऽ अनूक्यात् । यक्ष्मं दोषण्यमंसाभ्यां वाहुभ्यां विवृहामि ते ।। आन्त्रेभ्यस्ते गुदाभ्योवनिष्ठोर्हृदयादधि । यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते ।। ऊरुभ्यां तेऽ अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् । यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते ।। मेहनाद्वनङ्करणाल्लोमभ्यस्ते नखेभ्यः । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते ।। अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते ।।

३. यो मन्त्र यसं पृष्टमा छ ।

४. ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह वोध्युरुश ठं० स मा नऽ आयुः प्रमोषीः ।।

५. ॐ यतऽ इन्द्र भयामहे ततो नोऽ अभयं कृधि । मघवञ्छग्धि तव तन्नऽ ऊतिभिर्विद्विषो विमृधो जहि ।। त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः । तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ।। इन्द्रः स्पडुत वृत्रहा परस्पानो वरेण्यः । स नो रक्षिषच्चरमं समध्यमं सपश्चात्पातु नः पुरः ।। त्वं नः पश्चादधरादुत्तरात्पुरऽ इन्द्र निपाहि विश्वतः । आरेऽ अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ।। अद्याद्याश्वश्वऽ इन्द्र त्रास्व परे च नः ।। विश्वा च नो जरितॄन्त्सत्पतेऽ अहा दिवानक्तं च रक्षिषः ।। प्रभङ्गी शूरो मघवातुवीमघः संमिश्लोवीर्यायकम् । उभा ते वाहू वृषणा शतक्रतो नियावज्रं मिमिक्षतुः ।।

विष्णुः, गायत्री। 'अक्षीभ्याम्' इति षण्णां विवृहा, यक्ष्महा, अनुष्टुप्। एभिर्मन्त्रैर्नवग्रहमन्त्रैश्च हुत्वा स्विष्टकृदादिकर्मशेषं समाप्य ब्राह्मणान् भोजयेत् । इति गोमुखप्रसवप्रयोगः ।।

अथ कृष्णचतुर्दशीजननशान्तिः ।।

पारिजाते मदनरत्ने गर्गः— –

'मन्दरे तु सुखासीनं गर्गं मुनिवरं प्रभुम् ।
नमस्कृत्य तु पप्रच्छ शौनको मुनिपुङ्गवः ।।
शान्तिकर्माणि सर्वाणि त्वत्तो जानाम्यहं पुरा ।
अधुना श्रोतुमिच्छामि कृष्णपक्षचतुर्दशीम् ।।
दिवा वा यदि वा रात्रौ प्रसूतेः किं फलं वद ।

कृष्णपक्षचतुर्दशीमभि लक्षीकृत्य प्रसूतेः फलं वदेत्यर्थः ।

कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं फलम् ।।
चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतम् ।
द्वितीये पितरं हन्ति तृतीये मातरं तथा ।।
चतुर्थे मातुलं हन्ति पञ्चमे वंशनाशनम् ।
षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनम् ।।
तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विधानतः ।
आचार्यं वरयेद्धीमान् पुत्रदारसमन्वितम् ।।
सर्वालङ्कारसंयुक्तं सर्वलक्षणसंयुतम् ।
ब्रह्माणमृत्विजश्चैव स्वस्तिवाचनपूर्वकम् ।।
रुद्राधिदेवता तस्याः कर्षमात्रसुवर्णतः ।
तदर्धार्धेन वा कुर्याद्वित्तशाठ्यविवर्जितः ।।'

तस्याश्चतुर्दश्याः । प्रतिमामाह—

'प्रतिमां कारयेच्छक्त्या सर्वलक्षणसंयुताम् ।
वृषभे च समासीनं वरदाभयपाणिनम् ।।

शुद्धस्फटिकसङ्काशं श्वेतमाल्याम्बरावृतम् ।
त्र्यम्बकेन तु मन्त्रेण पूजां कुर्याद्विधानतः ।।
स्थापयेच्चतुरः कुम्भाँश्चतुर्दिक्षु यथाविधि ।'

आग्नेयीमारभ्य स्थापनम् । आग्नेयकुम्भमारभ्येत्यग्रे दर्शनात् ।

'पुण्यतीर्थजलोपेतान्धान्यस्योपरि विन्यसेत् ।
तन्मध्ये स्थापयेत्कुम्भं शतच्छिद्रसमन्वितम् ।
पञ्चमृतपञ्चरत्नानि पञ्चत्वक्पञ्चपल्लवान् ।।
पञ्चधान्यं सुवर्णं च तत्तन्मन्त्रैर्विनिक्षिपेत् ।
शतौषधानि निक्षिप्य श्वेतवस्त्रैश्च वेष्टयेत् ।।
सुरभीणि च पुष्पाणि श्वेतानि परिवेष्टयेत् ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
आवाह्य वारुणैर्मन्त्रैरनेन च विधानतः ।।

वक्ष्यमाणैर्वारुणैर्मन्त्रैर्वरुणम् । अनेनोक्तेन समुद्रादीँश्चेत्यर्थः ।

इमम्मे वरुणेत्यनया तत्त्वा यामीत्यृचा तथा ।
त्वन्नो अग्नेत्यनया स त्वन्न इति मन्त्रतः ।।
आग्नेयकुम्भमारभ्य पूजां कुर्याद्यथाक्रमम् ।
आ नो भद्राख्यसूक्तं च भद्रा अग्नेश्च सूक्तकम् ।।
जप्त्वा पुरुषसूक्तं च कद्रुद्रं च क्रमाज्जपेत् ।
ईश्वरस्याभिषेकं च ग्रहपूजां च कारयेत् ।।

ईश्वरस्य- पूर्वस्थापितेश्वरप्रतिमाया इत्यर्थः ।

पूजाकर्म सुनिर्वर्त्य होमं कुर्याद्विधानतः ।
कुर्यादाघारपर्यन्तं स्वगृह्योक्तविधानतः ।।

आघारान्तत्वोक्त्या चक्षुषी न इति केचित् ।

समिदाज्यचरूँश्चैव तिलमाषाँश्च सर्षपैः ।

सर्षपैः सहितोक्त्या सर्षपाणां पृथक्द्रव्यत्वम् । समिधो विशिनष्टि–

अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः ।।
अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा ।
अष्टाविंशतिमेतैश्च होमं कुर्यात्पृथक् पृथक् ।।
त्र्यम्बकेनैव मन्त्रेण तिलान् व्याहृतिभिः क्रमात् ।
ग्रहा एवं च होतव्या अस्मदुक्तविधानतः ।।
एवं क्रमेण होतव्यं होमशेषं समापयेत् ।
सर्वालङ्कारयुक्तानां त्रयाणामभिषेचनम् ।

त्रयाणाम्– मतृपितृबालानाम् ।

चतुर्भिः कलशैरद्भिर्बृहत्कुम्भसमन्वितैः ।

बृहत्कुम्भः– शतच्छिद्रः ।

धौताम्बराणि धृत्वाथ कुर्यादाज्यावलोकनम् ।।
पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः ।
तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् ।।
सर्वालङ्कारसंयुक्तां सवत्सां गां पयस्विनीम् ।
प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् ।।
ईश्वरप्रीतये भक्त्या कुर्याद्ब्राह्मणभोजनम् ।
एवं यः कुरुते शान्ति सर्वपापैः प्रमुच्यते ।।
सर्वान्कामानवाप्नोति चिरञ्जीवी सुखी भवेत् ।'
इति चतुर्दशीजननशान्तिविधिः ।।

अथ प्रयोगः ।।

नामकरणात्पूर्वं शुभेऽह्नि– अस्य बालकस्य कृष्णचतुर्दशीजन्मसूचितारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं कृष्णचतुर्दशीजननशान्ति करिष्ये । इति सङ्कल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात् । षड्भागचतुर्दश्या द्वितीयतृतीयांशयोरुत्पत्तौ गोमुखप्रसवोऽपि । तत आचार्यः सर्षपान्विकीर्य भूमिं प्रोक्ष्य

आग्नेयीमारभ्य विदिक्षु चतुरः कुम्भान् मध्ये शतच्छिद्रं (कुम्भं) च संस्थाप्य तस्मिन् पञ्चमृदः पञ्चपल्लवान् पञ्चरत्नानि पञ्चत्वचः पञ्चधान्यानि सुवर्णं शतौषधानि च प्रक्षिप्य त्रिभिर्वस्त्रैर्माल्यादिभिश्च वेष्टयित्वा पूर्णपात्रोपरि कर्षतदर्धार्धकृतां रुद्रप्रतिमां 'त्र्यम्बकम्'[1] इति मन्त्रेण संपूज्य 'सर्वे समुद्राः'[2] इति कुम्भमभिमन्त्र्य आग्नेयकलशे 'इमम्मे वरुण'[3] इति, नैर्ऋत्ये- 'तत्त्वा यामि'[4] इति, वायव्ये- 'त्वन्नो अग्ने'[5] इति, ईशाने- 'स त्वन्न'[6] इति वरुणं संपूज्य आग्नेयादिकलशे 'आ नो भद्राः'[7],

---

१. ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव वन्धनान्मृत्योर्मुक्षीय मामृतात् । त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव वन्धनादितो मुक्षीयमामुतः ।।

२. ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ।।

३. इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ।।

४. यो मन्त्र ३४८ पृष्ठमा छ ।

५. त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषा ँ॒ सि प्रमुमुग्ध्यस्मत् ।।

६. ॐ स त्वन्नोऽ अग्नेवमो भवोती नेदिष्ठोऽ अस्याऽ उषसो व्युष्टौ । अवयक्ष्व नो वरुण ठं० रराणो वीहि मृडीक ठं० सुहवो नऽ एधि ।। ७ ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोदब्धासोऽ अपरीतासऽ उद्भिदः । देवा नो यथा सदमिद्वृधेऽ असन्नप्रायुवो रक्षितारो दिवे दिवे ।। देवानां भद्रा ँ॒ सुमतिर्ऋजूयतान्देवाना ँ॒ रातिरभि नो निवर्तताम् ।। देवाना ँ॒ सख्यमुपसेदिमा वयं देवा नऽ आयुः प्रतिरन्तु जीवसे ।। तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् । अर्यमणं वरुण टं० सोममश्विना सरस्वती नः सुभगा मयस्करत् ।। तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।। तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।। स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो वदिथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽ अवसा गमन्निह ।। भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ँ॒ सस्तनूभिर्व्यसेमहि देवहितं यदायुः ।।

भद्रा अग्ने[1], सहस्रशीर्षा[2], कद्रुद्राय[3], इति सूक्तानि क्रमेण जपेत्।

ततोऽग्निं ग्रहाँश्च प्रतिष्ठाप्य अन्वादध्यात्। अत्र प्रधानं– त्र्यम्बकम्। अश्वत्थप्लक्षपालाशखादिरसमिदाज्यचरुसर्षपयुततिलमाषैः प्रत्येकमष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्यया 'त्र्यम्बकम्' इति मन्त्रेण प्रजापतिं समस्तव्यस्तव्याहृतिभिस्तिलद्रव्येण तथैव संख्यया शेषेण स्विष्टकृतमित्यादि बलिदानान्ते शतच्छिद्रगतश्चतुष्कलशोदकैर्ग्रहकलशोदकेन च साचार्यर्त्विजो यजमानमभिषिञ्चेयुः। यजमानो धौतवाससी परिधाय सपरिवारो 'रूपं रूपम्[4]' इत्याज्यमवलोक्य तत्पात्रं सदक्षिणं विप्राय दत्त्वा पूर्णाहुतिं हुत्वा कृतं होमादिकर्म रुद्राय समर्प्य आचार्याय दक्षिणां दत्त्वा ब्राह्मणान् भोजयेत्। इति कृष्णचतुर्दशीजननशान्तिप्रयोगः॥

अथ सिनीवालीकुहू (जनन) शान्तिः॥

कुह्वादिशान्तेर्न दर्शशान्त्या समुच्चयः, या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूः। 'यां पर्यस्तमियादभ्युदयादिति सा तिथिः' इति बह्वृचब्राह्मणभेदोक्तेः।

अथ सिनीवालीकुह्वोर्दर्शे चोक्तयोः शान्त्योर्व्यवस्था छन्दोगपरिशिष्टभाष्ये– 'चतुर्दश्यन्तं अमायाश्चाष्टाविति' नवप्रहरश्चन्द्रस्य क्षयकालः।

चतुर्दश्यष्टमे यामे क्षीणो भवति चन्द्रमाः।
अमावस्याष्टमे यामे पुनः किल भवेदणुः॥ इति वाक्यात्।

'अत्रेन्दुराद्ये प्रहरेऽवतिष्ठते चतुर्थभागोनकलावशिष्टः।
तदन्तमेव क्षयमेति कृष्णमेवं ज्योतिश्चक्रविदो वदन्ति॥' इति।

---

१. यो १२ मन्त्रात्मकसूक्त परिशिष्टमा छ।

२. यो १६ मन्त्रात्मकसूक्त परिशिष्टमा छ।

३. यो ९ मन्त्रात्मकसूक्त परिशिष्टमा छ।

४. ॐ रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूपऽईयते युक्ता ह्यस्य हरयः शता दश॥

वाक्यात् । एवं चतुर्दश्यन्त्यामाद्ययामयोरणुश्चन्द्रः शास्त्रस्य चक्षुषो गोचरो भवति स कालो दृष्टचन्द्रत्वात्सा सिनीवाली, अमान्त्ययोर्यामयोः शास्त्रस्य चक्षुषोर्गोचर इति क्षीणश्चन्द्रः स कालः कुहूः। मध्यमाःपञ्चयामा दर्श इति व्यवस्थया शान्तिव्यवस्थेति ।

प्रयोगपारिजाते उत्तरगार्ग्यः–

'सिनीवाल्यां प्रसूता स्याद्यस्य भार्या पशुस्तथा ।
गजाश्वमहिषी चैव शक्रस्यापि श्रियं हरेत् ।।

ये सन्ति सकलाश्चान्ये स्वप्रसादोपजीविनः ।
वर्जयेत्तानशेषांस्तु पशुपक्षिमृगादिकान् ।।

सिनीवालीकुहूत्पन्नानिति शेषः ।

कुहूप्रसूतिरत्यर्थं सर्वदोषकरी स्मृता ।
यस्य प्रसूतिरेतेषां तस्यायुर्धननाशनम् ।।

कुह्वामपि पक्षादिप्रसवो निषिद्धः ।

सर्वगण्डसमस्तत्र दोषस्तु प्रबलो भवेत् ।
शान्तिं विना विशेषेण परित्यागो विधीयते ।।

विशेषेण– उत्तमपक्षेण शान्तिकरणं विना परित्यागः। यदि तूत्तमपक्षे न शक्तिस्तदा कियत्कालं त्यागं कृत्वा शान्तिः कर्तव्येत्याह ।

परित्यागात्तत्र शान्तिं कुर्याद्धीमान् विचक्षणः ।
रुद्रः शक्रश्च पितरः पूज्याः स्युर्देवताः क्रमात् ।।

कर्षमात्रसुवर्णेन तदर्धार्धेन वा पुनः ।
अथवा शक्तितः कुर्याद्वित्तशाठ्यविवर्जितः ।।

प्रतिमां कारयेच्छम्भोश्चतुर्भुजसमन्विताम् ।
त्रिशूलखड्गवरदाभयहस्तां यथाक्रमात् ।।

श्वेतवर्णां श्वेतपुष्पां श्वेताम्बरवृषस्थिताम् ।
त्रैयम्बकेन मन्त्रेण पूजां कुर्याद्यथाविधि ।।

इन्द्रश्चतुर्भुजो वज्राङ्कुशचापससायकः ।
वज्राङ्कुशचापैः सहितः सायकोऽस्येति विग्रहः ।।
रक्तवर्णो गजारूढो यत इन्द्रेति मन्त्रतः ।
पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः ।।
यष्ट्यक्षसूत्रकमण्डल्वभयस्यैव धारिणः ।
गदाक्षसूत्रेति वा पाठः ।
ये चेह इति मन्त्रेण पूजां कुर्यादनन्तरम् ।।
मदनरत्ने तु 'ये सत्या' इति मन्त्रेणेति पाठः । तस्मिन् पक्षे 'ये सत्यासो हविरद' इति मन्त्रः ।
आग्नेयीं दिशमारभ्य कुम्भान् कोणेषु विन्यसेत् ।
तन्मध्ये स्थापयेत्कुम्भं शतच्छिद्रसमन्वितम् ।।
तेष्वेव पञ्चगव्यादींस्तत्तन्मन्त्रैश्च निक्षिपेत् ।
चतुर्ष्वित्यर्थः ।
कल्पोक्तशान्तिः कर्तव्या कुर्याच्छीघ्रं स्वशक्तितः ।।
शान्तीः पाठयेदित्यर्थः ।
गोदानं वस्त्रदानं च सुवर्णं चोर्वरां शुभाम् ।
दशदानानि चोक्तानि क्षीरमाज्यं गुडस्तथा ।
गोदानादेर्दशदानान्तर्गतत्वाद्वारद्वयमनुष्ठानम् ।
आज्यावेक्षणमेतानि तत्तन्मन्त्रैश्च कारयेत् ।।
समिदाज्यचरोर्होमं तिलमाज्यैश्च सर्षपैः ।
तिलमाषाणामेकद्रव्यत्वम् । समिध आह--
अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः ।।
अष्टोत्तरशतं मुख्यं प्रत्येकं जुहुयाद् द्विजः ।
त्रैयम्बकेन मन्त्रेण तिलान् व्याहृतिभिः पुनः ।।
मुख्यमित्युक्तेनाधिदेवतादेः अष्टाविंशत्यादिन्यूनसङ्ख्यया होमः ।
चतुर्भिःकलशैर्युक्तं बृहत्कुम्भसमन्वितम् ।

शान्तिकं कलशं कार्यमभिषेकं च कारयेत् ।।

कार्यम्– कर्तव्यम् । अभिषेकं चतुर्दशीशान्तिवत्कुर्यादित्यर्थः ।

पितृमातृशिशूनां च अभिषिञ्चेत्तु वारुणैः ।

षष्ठी द्वितीयार्था ।

शङ्करस्याभिषेकं च कुर्याद्ब्राह्मणभोजनम् ।।
अन्येषां चैव सर्वेषां ब्राह्मणानां च तर्पणम् ।
यथाशक्त्यनुसारेण द्विजवाचनपूर्वकम् ।’

ब्राह्मणांस्तर्पयिष्ये, इति प्रश्नं वा कर्मसंपूर्णतावाचनं कृत्वेत्यर्थः । इति उत्तरगार्ग्योक्तसिनीवालीकुहू (जनन) शान्तिविधिः ।।

अथ प्रयोगः–– देशकालौ सङ्कीर्त्य अस्य बालकस्य सिनीवालीजन्मसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं सिनीवालीजननशान्तिं करिष्ये । इति सङ्कल्प्य गणपतिपूजनपुण्याहवाचननान्दीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात् । कुह्वां तु कुहूपदेन सङ्कल्पो गोमुखप्रसवश्च । तत आचार्यः सर्षपान् विकीर्य भूमिं संप्रोक्ष्य आग्नेयीमारभ्य विदिक्षु चतुरः कुम्भान् मध्ये शतच्छिद्रं (कुम्भम्) संस्थाप्य चतुर्षु पञ्चगव्यपञ्चमृत्पञ्चरत्नपञ्चत्वक्पञ्चधान्यसुवर्णानि निक्षिप्य शतच्छिद्रे पूर्णपात्रोपरि कर्षतदर्धार्धकल्पितां रुद्रप्रतिमां संपूज्य तद्दक्षिणतो ‘यत इन्द्र’[1] इतीन्द्रप्रतिमामुत्तरतश्च ‘ये चेह’[2] इति पितृप्रतिमां संपूज्य चतुर्षु कुम्भेषु वरुणं जपित्वा शान्तिं पठेत् ।

ततो यजमानो दानानि कुर्यात् । ‘गवामङ्गेषु’[3] इति गाम् ।

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम् ।
सुवेषधारि वस्त्र त्वमतःशान्तिं प्रयच्छ मे ।। इति वासः ।

---

१. यो मन्त्र ३४८ पृष्ठमा छ ।

२. ॐ ये चेह पितरो ये च नेह यांश्चविद्म यांऽ२।। उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ठं० सुकृतञ्जुषस्व ।।

३. यो मन्त्र पृष्ठ ३४७ मा छ ।

‘हिरण्यगर्भ[1]’ इति हिरण्यम् ।
सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा अतः शान्ति प्रयच्छ मे ।। इति भूमिम् ।
ततो दशदानानि कुर्यात् । तानि च–
गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि च ।
रौप्यं लवणमित्याहुर्दशदानानि पण्डिताः ।। तत्र चतुर्णां मन्त्रा उक्ताः ।
महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः ।
तस्मादेषां प्रदानेन मम पापं व्यपोहतु ।। इति तिलान् ।
कामधेनुषु संभूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारमतः शान्ति प्रयच्छ मे ।। इत्याज्यम् ।
सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् ।
प्राणिनां जीवनोपायमतः शान्ति प्रयच्छ मे ।। इति धान्यम् ।
यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ।।
प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ।।
मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा ।। इति गुडम् ।
प्रीतिर्यतः पितॄणां च विष्णुशङ्करयोः सदा ।
शिवनेत्रोद्भवं रूप्यमतःशान्ति प्रयच्छ मे ।। इति रूप्यम् ।
यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ।
शम्भोः प्रीतिकरं नित्यमत शान्तिः प्रयच्छ मे ।। इति लवणम् ।
इति दशदानानि ।।
क्षीरजातास्ततः शङ्खाः क्षीरादमृतसंभवः ।
क्षीरात्क्षीरोदवत्कीर्तिः क्षीरे प्राणस्य संभवः ।। इति क्षीरम् ।

---

१. ॐ हिरण्यगर्भगर्भस्त्वं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ।।

एतेषां वृक्षमूलानां त्वगादीन् पल्लवाँस्तथा ।
पञ्चरत्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत् ।।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।।
'आपोहिष्ठा' तृचेनाथ 'कया नश्चित्र' इत्यृचा ।
'यत्किञ्चेद' मृचा चैव 'समुद्रज्येष्ठ' इत्यृचा ।।
अभिमन्त्र्योदकं पश्चादग्नेः पूर्वप्रदेशके ।
हारिद्रं रक्तकं चैव कृष्णं श्वेतं च नीलकम् ।।
एतेषां तण्डुलैश्चैव सर्वतोभद्रमुद्धरेत् ।

कुम्भतः पश्चादग्नेश्च पूर्वतो हरिद्रारङ्गरक्तैस्तण्डुलैः सर्वतोभद्रमुद्धरेदित्यर्थः ।

दर्शस्य देवतायाश्च सोमसूर्यस्वरूपकम् ।
प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा ।।

पितृरूपाया दर्शदेवतायाः सोमसूर्ययोश्च स्वरूपं प्रतिरूपं स्थापयेदित्यर्थः । इति प्रयोगपारिजातः ।

सर्वतोभद्रमध्ये च स्थापयेद्दर्शदेवताम् ।
ग्रहवर्णवस्त्रयुग्मं तद्वर्णं गन्धपुष्पकम् ।।
'आप्यायस्वे' ति मन्त्रेण 'सविता पश्चा'त्तथैव च ।
उपचारैः समाराध्य ततो होमं चरेत्सुधीः ।।
कृत्वा वह्निं प्रतिष्ठाप्य क्रतुसङ्कल्पमीदृशम् ।
आयुरारोग्यसिद्ध्यर्थं सर्वारिष्टप्रशान्तये ।।
पुत्रस्य दर्शजननं तस्य दोषनिबर्हणम् ।
मातापित्रोः कुमारस्य सर्वारिष्टप्रशान्तये ।।
तेषामायुः श्रिये चैव शान्तिहोमं करोम्यहम् ।

आयुरारोग्येति श्लोकद्वयेन क्रतुसङ्कल्पं कृत्वेत्यर्थः ।

समिधश्च चरुद्रव्यं क्रमेण जुहुयाद्गृही ।।

पूर्वोक्तमन्त्राभ्यां पुनराज्यं गुडं च दत्त्वा कांस्यपात्रे 'रूपं रूपम्'[1] इति मन्त्रेण सकुटुम्बः प्रतिस्वरूपं वीक्ष्य–

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहारमाज्ये देवाः प्रतिष्ठिताः ।।

इत्याज्यपात्रम् । तत आचार्यो ग्रहाँश्च प्रतिष्ठाप्य अन्वादध्यात् । अत्र प्रधानम्– 'त्र्यम्बकम्'[2]। अश्वत्थप्लक्षपालाशखदिरसमिदाज्यमाषसर्षपद्रव्यैः प्रत्येकमष्टशतसङ्ख्यया इन्द्रं पितृँश्च तैरेव द्रव्यैरष्टाविंशतिसङ्ख्यया प्रजापतिं च व्याहृतिभिरष्टाविंशतिसङ्ख्यया शेषेण स्विष्टकृतमित्यादिबलिदानान्ते पूर्णाहुतिं हुत्वा शतच्छिद्रगतैश्चतुः कलशोदकैर्ग्रहकुम्भोदकेन च 'तत्त्वा यामि'[3] इत्यादिभिर्वारुणमन्त्रैरभिषिच्य रुद्रप्रतिमायां 'त्र्यम्बकम्'[4] इत्यभिषेकं कृत्वोत्तरपूजां कृत्वा विसृज्याचार्यहस्ते प्रतिपाद्य अग्निं विसृज्य ब्राह्मणांस्तर्पयिष्ये इति पृष्ट्वा यथाशक्ति ब्राह्मणान् भोजयेत् ।। इति सिनीवालीकुहू (जनन) शान्तिप्रयोगः ।

अथ दर्शजातशान्तिविधिः ।।

नारदः–

'अथातो दर्शजातानां मातापित्रोर्दरिद्रता ।
तद्दोषपरिहारार्थं शान्तिं वक्ष्यामि ते सदा ।।
पुण्याहं वाचयित्वादौ क्रतुसङ्कल्पपूर्वकम् ।
कुण्डं वा स्थण्डिलं कुर्यात्तद्देशे स्थापयेद्घटम् ।।

तद्देशे– तत्समीपे ।

तत्कुम्भे निक्षिपेद्द्रव्यं दधिक्षीरघृतादिकम् ।

आदिशब्दाद्गोमूत्रगोमये ।

न्यग्रोधोदुम्बराश्वत्थाः सचूता निम्बकास्तथा ।।

---

[1] यो मन्त्र ३५३ पृष्ठमा छ ।

[2] यो मन्त्र ३५२ पृष्ठमा छ ।

[3] यो मन्त्र ३४८ पृष्ठमा छ ।

[4] यो मन्त्र ३५२ पृष्ठमा छ ।

हुनेत्सवितृमन्त्रेण 'सोमोधेनुं' च मन्त्रतः ।
एतैर्मन्त्रैश्च प्रत्येकं हुनेदष्टोत्तरं शतम् ।।

एतैरिति बहुवचनात्पितृहोमोऽप्यष्टोत्तरशतमिति प्रयोगपारिजातः।

दर्शस्य देवताहोमः अष्टाविंशतिसङ्ख्यया ।
होममेवं तु कृत्वाथ विदध्याच्चाभिषेचनम् ।।
श्रीसूक्तमायुष्यसूक्तं 'समुद्रज्येष्ठ' इत्यृचा ।
एतैर्मन्त्रैरभिषेकं मातापित्रोः शिशोस्तथा ।।
ततः स्विष्टकृदादि स्याद्धोमशेषं समापयेत् ।
हिरण्यं रजतं चैव कृष्णां धेनुं सदक्षिणाम् ।।
अन्येभ्योऽपि यथाशक्ति दातव्या दक्षिणा तथा ।
ब्राह्मणान् भोजयेत्तत्र कारयेत्स्वस्तिवाचनम् ।।' इति

नारदोक्तदर्शशान्तिविधिः ।।

अथ प्रयोगः-- देशकालौ सङ्कीर्त्य अस्य बालकस्य दर्शजननसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शजननशान्तिं करिष्ये । इति सङ्कल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धाचार्यर्त्विग्वरणानि कुर्यात् । तत आचार्यः सर्षपान्विकीर्य भूमिं प्रोक्ष्य कुण्डात्स्थण्डिलाद्वा पूर्वप्रदेशे कुम्भं संस्थाप्य तत्र पञ्चगव्यं न्यग्रोधोदुम्बरोऽश्वत्थचूतनिम्बवृक्षाणां मूलत्वचः पल्लवान् पञ्चरत्नानि च निक्षिप्य वस्त्रयुग्मेन[1] संवेष्टय--

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।। इति 'आपो हिष्ठा[2]'

---

[1] वीर पुस्तकालयमा भएका र आफूसंग भएका प्रतिहरू कुनैमा पनि शान्तिप्रकरणको पाठ लेखिएको देखिएन । मूलप्रतिमा भएको शान्तिप्रकरणको पाठ पनि 'वस्त्रयुग्मेन' यहींसम्म मात्र भएको र, यसपछिको शान्तिप्रकरणको केही पत्रहरू टुटेको र घरेजसो विषय नै खण्डित भएको छ। ग्रन्थकारले विषयसूचीमा उल्लेख गरेको र व्यवहारमा पनि ज्यादै आवश्यक संझिएकोले शान्तिसार र शान्तिमयूख आदि ग्रन्थहरूको आधार लिएर शान्तिप्रकरण जतिको पाठ र र.ज्याभिरेक पनि विषयक्रमानुसार तयार गरेर राखिएको छ ।

[2] यी मन्त्र ३४१ पृष्ठमा छन् ।

इति तृचेन, ‘कथा नश्चित्र[१]’ इति, ,‘यत्किञ्चेदम्[२]’ इति, ‘समुद्रज्येष्ठा[३]’ इति चोदकमभिमन्त्र्य पूर्णपात्रं निधाय वरुणं पूजयेत् ।

ततः कुम्भात्पश्चिमे अग्नेः पुरतो हरिद्रारक्तैस्ताम्रैः कृष्णैश्च तण्डुलैर्यथाशोभं सर्वतोभद्रं विरचय्य तन्मध्ये ‘ये चेह[४]’ इति पितृनावाह्य दक्षिणतः ‘आप्यायस्व[५]’ इति सोममुत्तरतश्च ‘सविता पश्चात्[६]’ इति सूर्यमावाह्य सर्वान् पूजयेत् ।

ततोऽग्निं ग्रहाँश्च प्रतिष्ठाप्यान्वादध्यात् । अत्र प्रधानम्– ग्रहान् ग्रहयज्ञोक्तद्रव्येण पितृन् सोमं सूर्यं चाष्टोत्तरशताष्टाविंशत्यन्यतमसङ्ख्याभिः शेषेण स्विष्टकृतमित्यादि । आज्यभागान्ते– ‘आयुरारोग्येति’ मन्त्राभ्यां होमसङ्कल्पं कृत्वा ‘हिरण्यवर्णाम्[७]’ इति सूक्तेन, ‘आयुष्यं वर्चस्यम्[८]’ इति सूक्तेन, ‘समुद्रज्येष्ठाः[९]’ इत्यनया च मातापितृशिशूनभिषिच्य स्विष्टकृदादिबलिदानान्ते पूर्णाहुतिं हुत्वा शेषं समाप्य आचार्याय यथाशक्तिरजतं हिरण्यं कृष्णां धेनुं च सदक्षिणां दत्वा

---

१. ॐ कया नश्चित्रऽ आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

२. ॐ यत्किञ्चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि । अचित्तीयत्तव धर्मायुयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥

३. समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनानायन्त्यनिविशमानाः । इन्द्रो या वज्री वृषभोरराद ताऽ आपो देवीरिह मामवन्तु ॥

४. यो मन्त्र ३५६ पृष्ठमा छ ।

५. ॐ आप्यायस्व मदिन्तम सोम विश्वेभिर ꣳ शुभिः। भवा नः सप्रथस्तमः सखा वृधे ॥

६. ॐ सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

७. श्रीसूक्त परिशिष्टमा छ । ८. ॐ आयुष्यं वर्चस्य ꣳ रायस्पोषमौद्भिदम् । इद ꣳ हिरण्यं वर्चस्व जैत्रायाविशतादु माम् ॥ न तद्रक्षा ꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमज ꣳ ह्येतत् । यो बिभर्ति दाक्षायण ꣳ हिरण्य ꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ यदाबध्नन्दाक्षायणा हिरण्य ꣳ शतानीकाय सुमनस्यमानाः । तन्मऽ आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ ९. यो मन्त्र यसै पृष्ठमा छ ।

ऋत्विग्भ्यश्च यथाशक्ति दत्त्वा पित्रादीनामुत्तरपूजां कृत्वा विसृज्याचार्याय प्रतिपाद्याग्नि विसृज्य ब्राह्मणान्भोजयित्वा शान्तीः पाठयित्वा स्वस्तिवाचनं कुर्यात् । इति दर्शजातशान्तिप्रयोगः ॥

अथ मूलशान्तिः ॥

तत्र मूलवृक्षफलं जयार्णवे--

'मूलं स्तम्भस्त्वचा शाखा पत्रं पुष्पं फलं शिखा ।
वेदाश्च मुनयश्चैव दिशश्च वसवस्तथा ॥
नन्दा बाणा रसा रुद्रा मूलभेदाः प्रकीर्तिताः ।
मूले मूलविनाशः स्यात्स्तम्भे हानिर्धनक्षयः ॥
त्वचि भ्रातृविनाशाय शाखा मातुर्विनाशकृत् ।
पत्रे सपरिवारस्य पुष्पे तु नृपवल्लभः ॥
फलेषु लभते राज्यं शिखायामल्पजीवितम् ।'

अन्यत्र त्वन्यथोक्तम्--

'मूले सप्तघटीषु मूलहननं, स्तम्भेऽष्टसु स्वक्षयम्,
त्वग्दिग्बन्धुविनाशनं, च विटपे रुद्रैर्हतो मातुलः ।
पत्रेऽर्कैः सुकृती तु, बाणकुसुमे मन्त्री, फले सागरैः
राजा, वह्निशिखाल्पमायुरिति संमूलाङ्घ्रिपे स्यात्फलम् ॥'

पत्रादिघटिकानामुत्तमत्वेऽपि चरणदोषोऽस्त्येव । मूलस्य स्वर्गादिस्थितत्वम् । फलं च भूपालवल्लभे--

'वृषालिसिंहेषु घटे च मूलं दिवि स्थितं, युग्मतुलाङ्गनान्त्ये ।
पातालगं, मेषधनुः कुलीरनक्रेषु मर्त्येष्विति संस्मरन्ति ॥'

अत्र वृषादौ सूर्ये सति इत्यध्याहार्यम् ।

स्वर्गे मूलं भवेद्राज्यं पाताले च धनागमम् ।
मृत्युलोके यदा मूलं तदा शून्यं समादिशेत् ॥

स्वर्गादिस्थितेऽपि चरणदोषोऽस्ति । मर्त्यादिस्थितेऽपि शुभं पत्रादिफलमस्ति । वसिष्ठः --

'नैर्ऋत्यभोद्भूतसुतः सुता वा क्षिप्रादवश्यं श्वशुरं निहन्ति ।
तदन्त्यपादे जनितो निहन्ति तस्योत्क्रमेणाभिभवेत्कलत्रम् ।।

उत्क्रमेण– वैपरीत्येन, तस्य कलत्रमित्यन्वयः ।

सुरेशताराजनिता धवाग्रजं द्विदैवताराजनिता तु देवरम् ।
पुरन्दरर्क्षे जनितः सुतस्तथा स्वस्याग्रजं हन्ति न पुत्रिका यदि ।।'

नृसिहप्रसादे––

'धवाग्रजं हन्ति सुरेन्द्रजाता तथैव पत्न्या भगिनीं पुमांश्च ।
द्विदैवजा देवरमाशु हन्याद्भार्यानुजामाशु निहन्ति सूनुः ।।
पत्न्यग्रजामग्रजं वा हन्ति ज्येष्ठर्क्षजः पुमान् ।
तथा पत्नीस्वसारं वा शालकं च द्विदैवजः ।।
कन्यका देवरं हन्ति विशाखान्त्यसमुद्भवा ।
आद्यपादत्रये नैव आद्यभे तु पुमान्भवेत् ।।

आद्यपादत्रये देवरं हन्यात् पुमांस्तु आद्यपादत्रय एव पत्नीकनिष्ठं हन्यादित्यर्थः ।

न हन्याद्देवरं कन्या तुलामिश्रद्विदैवजा ।
तदृक्षान्त्योद्भवा वर्ज्या दुष्टा वृश्चिकपुच्छवत् ।।'

भल्लाटः ––

'अभुक्तमूलसंभवं परित्यजेत्तु बालकम् ।
समाष्टकं पिताथवा न तन्मुखं विलोकयेत् ।।
तदाद्यपादके पिता विपद्यते जनन्यथ ।
तृतीयके धनक्षयश्चतुर्थकः शुभावहः ।।
प्रतीपमन्त्यपादतः फलं तथैव सार्पभे ।'

चतुर्थः शुभः बालाभिप्रायम् ।

'मूलाद्यपादजो हन्ति पितरं तु द्वितीयजः ।
मातरं स्वां तृतीयोऽर्थान् सुहृदं च तुरीयजः ।।
फलं तदेव सार्पर्क्षे प्रतीपं त्वन्त्यपादतः ।' इति काश्यपसंहितोक्तेः ।

'प्रथमे पितुर्नेष्टो द्वितीये मातुस्तृतीये च धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यादिति' कालीयपरिशिष्टाच्च । यत्तु वसिष्ठेन—

'तुरीयजः शुभकरः फलमेतदेव
वैलोमतो भुजगधिष्ण्यभवस्य सर्वम् ।' इत्युक्तं तदपि बालपरम् ।

अभुक्तमूलमाह वसिष्ठः—

'ज्येष्ठान्ते घटिका चैका मूलादौ घटिकाद्वयम् ।
अभुक्तमूलमित्याहुर्जातं तत्र विवर्जयेत् ।।'

बृहन्मनुना त्वन्यथोक्तम्—

'ज्येष्ठान्तं घटिकार्धं तु मूलादौ घटिकार्धकम् ।
तयोरन्तर्गता नाडी अभुक्तं मूलमुच्यते ।।'

बृहन्नारदेनाप्यन्यथोक्तम्—

'अभुक्तमूलगण्डान्तं नाडिकानां चतुष्टयम् ।
तत्रैकान्त्यघटीद्वन्द्वं मूलाद्यं द्वन्द्वमेव च ।।'

गण्डान्तस्तु—

'गण्डान्तस्त्रिविधो ज्ञेयो नक्षत्रतिथिलग्नगः ।
नवपञ्चचतुर्थान्त्ये द्व्येकार्धातपरतोऽग्रगाः ।।'

अस्यार्थः — अश्विनीतो नवमम् आश्लेषा, ततो ज्येष्ठारेवती तदन्त्ये घटिके, परतो दशमं मघा, ततो मूलम्, ततोऽश्विनी, तदादौ घटिके, एवं चतुर्घट्यो नक्षत्रगण्डान्तः । एवं प्रतिपत्प्रभृतिपञ्चमान्ते षष्ठादौ चैकघटिका तिथिगण्डान्तः । एवं मेषप्रभृतिचतुर्थान्ते पञ्चमादौ च अर्धार्धघटिका लग्नगण्डान्तः ।

तदुक्तं रत्नमालायाम् —

पौष्णाश्विन्योः सार्पपित्रर्क्षयोश्च
यच्च ज्येष्ठामूलयोरन्तरालम् ।
तद्गण्डान्तं स्याच्चतुर्नाडिकं हि
यात्राजन्मोद्वाहकालेऽप्यनिष्टम् ।।

ज्योतिर्निबन्धे--

'पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीद्वयं तथा ।
गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥
कुलीरसिंहयोःकीटचापयोर्मीनमेषयोः ।
गण्डान्तमन्तरालं स्याद्घटिकार्धं मृतिप्रदम् ॥'

ज्योतिर्निबन्धे तु नक्षत्रगण्डान्तमन्यथोक्तम्--

'सार्पेन्द्रपौष्णभेष्वन्त्यषडंशांशा भसन्धयः ।
तदग्रभेष्वाद्यपादा भानां गण्डान्तसंज्ञकाः ॥'

उत्तरगार्ग्येणाप्यन्यथोक्तम्--

'अश्विनीमघमूलादौ द्विषट्कनवनाडिकाः ।
रेवतीसार्पशाक्रान्ते मासाश्च ऋतुसायकाः ॥'

साम्प्रदायिकास्तु चतुर्नाडिक एव गण्डान्ते गण्डान्तशान्तिकं कुर्वन्ति ।
गण्डान्तफलमुक्तं रत्नसङ्ग्रहे--

'सर्वेषां गण्डजातानां परित्यागो विधीयते ।
वर्जयेद्दर्शनं तेषां तच्च षाण्मासिकं भवेत् ॥
तिथ्यर्क्षगण्डे पितृमातृनाशो लग्ने तु सन्धौ तनयस्य नाशः ।
सर्वेषु नो जीवति हन्ति बन्धून् जीवेत्पुनः स्याद्बहुवारणाश्वः ॥'

अत्र केचिदभुक्तमूलजातस्याजन्मपरित्यागो वा समाष्टकादर्शनं
वा शान्त्यकरणे एव तत्करणे तु नोभयमित्याहुः । अन्ये तु– 'त्यागो वा
मूलजातस्य स्यादष्टाब्दात्प्रदर्शनम्' इति शौनकोक्तेरभुक्तमूलजातस्या-
ष्टाब्दादर्वाक् न शान्तिकरणेऽपि दर्शनम् । शान्तिश्च त्यागपक्षेऽपि
सिंहप्रसूतगोशान्तिवदित्याहुः । निष्कर्षस्तु न शान्तित्यागपक्षे दर्शना-
संभवेन गोमुखप्रसवासंभवात् । अत्र गण्डान्तोत्पत्तौ गण्डान्तशान्ते-
स्तत्तन्नक्षत्रशान्तिर्गण्डान्तसामान्यविहितशिवाभिषेकादेः 'तिथिगण्डे
त्वनड्वाहं नक्षत्रे धेनुरुच्यते' इत्येतद्विहितगोदानादेश्च समुच्चयः ।

अत्र त्यागविधाने स्वत्वस्यापायात्पातकिनं त्यजतीत्यादौ त्यजतेर्दानार्थत्वाभावाच्च । सिंहादिप्रसूतिवन्मूलप्रसूतस्यापि पीडनं न भवतीति केचित् । तन्न । त्यागविधानेऽपि स्वत्वापाये प्रमाणाभावात् । अतश्चात्र त्यजतिना जन्मदर्शनाभावो वा जन्मत्यागपक्षे समाष्टके दर्शने वान्यद्वारा जातकर्मादिकरणं मध्ये चाकस्मिकदर्शने शान्तिपूर्वं स्वयं तत्करणम् । अतस्त्यागपक्षे पीडनादि भवत्येवेति । एतेन सिंहाद्युत्पन्नगवादीनामपि दानं सिद्धम् । पुण्यं त्वल्पम्, अवश्यत्याज्यत्वात् । मूलोत्पन्नप्रतिगृहीतुश्च न त्यागशान्तिकादि न प्रत्युत्पत्तिकाले स्वत्वाभावेन मूलोत्पन्नपुत्रत्वाभावात् । मूलमध्ये प्रतिग्रहेऽपि न शान्तिकं तत्रानुत्पत्तेरिति ।

आश्लेषाफलमुक्तम् --

मूर्धास्यनेत्रगलकर्णयुगं च बाहु-
हृज्जानुगुह्यपदमित्यहिदेहभागाः ।
बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्र-
षण्नन्दपञ्चशिरसः क्रमशस्तु नाड्यः ।।

राज्यं च पितृनाशः स्यात्तथा कामक्रिया रतिः ।
पितृभक्तो बली स्वघ्नस्त्यागी भोगी धनी क्रमात् ।।

पादफलं पूर्वमुक्तम् । ज्येष्ठाफलमुक्तं ब्रह्मयामले--

ज्येष्ठादौ जननीमाता द्वितीये जननीपिता ।
तृतीये जननीभ्राता स्वस्य माता चतुर्थके ।।
आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयो भवेत् ।
सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे ।।
नवमे श्वशुरं हन्ति सर्वस्वं दशमेंऽशके ।

नक्षत्रविशेषेणापि फलमुक्तं नृसिंहप्रसादे--

चित्राद्यार्धे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये ।
जातः पुत्रश्चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातरं बालनाशम् ।।

सर्वनक्षत्रेषु फलावधिस्तत्रैव--

द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासिकः ।
पूर्वाषाढाष्टमे मासि चित्रा षाण्मासिकं फलम् ।।
नवमासं तथाश्लेषा मूले चैवाष्टवर्षकम् ।
ज्येष्ठा पञ्चदशे मासि पुत्रदर्शनवर्जिता ।।

यत्र तु पादजातादौ दोषमात्रं श्रूयते न शान्तिकं तत्र ग्रहमखः कर्तव्यः । तथा च वसिष्ठः --

व्यतीपातेऽङ्गहानिः स्यात्परिघे मृत्युमादिशेत् ।
वैधृतौ पितृहानिः स्यान्नष्टेन्दावन्धतां व्रजेत् ।।
मूले समूलनाशः स्यात्कुलनाशो धृतौ[1] भवेत् ।
विकृताङ्गे च हीने च सन्ध्ययोरुभयोरपि ।।
पर्वण्यपि प्रसूतौ च सर्वारिष्टभयप्रदा ।
तद्वत्सदन्तजात च पादजातस्तथैव च ।।
तस्माच्छान्ति प्रकुर्वीत ग्रहाणां क्रूरचेतसाम् । इति ।

व्यतीपातादौ तन्निमित्तकशान्तिग्रहमखयोः समुच्चयः । तत्रापि स्वतन्त्रप्रयोगतो वा । यत्तु, तत्तत्प्रकरणे पुनर्ग्रहमखविधानं तदेकप्रयोगतानियमार्थमिति केचित् । अन्ये त्वङ्गस्यैकप्रयोगतापि न्यायादेव सिद्धेत्यङ्गभूतग्रहमखाद्भिन्नं ग्रहमखान्तरं विधीयत इत्याहुः । ग्रहमखस्य च सर्वशान्तिषु पूर्वाङ्गत्वात्सहप्रयोगेऽपि पूर्वं ग्रहहोमः पश्चात्तत्तत्प्रधानहोम इति ।

अथ मूलशान्तिविधिः ।। तत्र शौनकः --

अथातः संप्रवक्ष्यामि मूलजातहिताय च । शान्तिमिति शेषः ।
मातापित्रोर्धनस्यापि कुलज्ञातिहिताय च ।।
त्यागो वा मूलजातस्य स्यादष्टाब्दात्प्रदर्शनम् ।
अभुक्तमूलजातानां परित्यागो विधीयते ।। इति ।

१, 'यतो' यो पाठ पनि पाइन्छ ।

अदर्शनाद्वापि पितुः स तु तिष्ठेत्समाष्टकम् ।
एवं च दुहितुर्ज्ञेयं मूलजातफलं बुधैः ॥
जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने ।

अत्र केचिच्छुभदिनपदं द्वादशाहादिविशेषणमिति न स्वतन्त्रकालविधानमिति वदन्ति । अन्ये तु, दिनपदस्य द्वादशाहपदान्तर्गतस्य वाहः पदस्य पौनरुक्त्यापत्तेः स्वतन्त्रकालविधानमित्याहुः । 'समाष्टके द्वादशाहे कुर्याद्वा शान्तिमादरात्' । अभुक्तमूलोत्पत्तौ समाष्टकादर्शनपक्षे समाष्टकानन्तरम् । तद्भिन्नमूलोत्पत्तौ द्वादशाहैवेत्यर्थः । मदनरत्ने तु 'द्वादशाब्दे' इति पाठः । अन्यथा पौनरुक्त्यापत्तेः ।

यदैव शान्तिकं कुर्यात्कर्मतन्त्रं प्रचक्षते ।
सुसमे पुण्यदेशे तु मण्डपं कारयेद्बुधः ॥
पुण्यर्ग्भिर्मन्त्रितैस्तोयैः प्रोक्षितायां क्षितौ ततः ।

ऋत्विजस्तु काश्यपेनोक्ताः —

ब्राह्मणाः श्रोत्रियाश्चाष्टौ द्वादश त्वथ षोडश ।
तत्रोदकुम्भं सुश्लक्ष्णं रक्तं व्रणविवर्जितम् ॥
अकृष्टमूलं निर्णिक्तं पूरयेन्निर्मलाम्भसा ।

निर्णिक्तं– प्रक्षालितम् ।

वस्त्रावगुण्ठितं कुर्यात्पूरयेत्तीर्थवारिणा ॥
कूर्चहेमसमायुक्तं चूतपल्लवसंयुतम् ।
स्वस्तिकोपरि विन्यस्य क्षीरद्रुमसपल्लवैः ॥
द्रोणव्रीहींश्च निक्षिप्य ईशान्यां च निधापयेत् ।
पञ्चरत्नानि निक्षिप्य सर्वौषधिसमन्वितम् ॥
अर्चितं गन्धपुष्पाद्यैः श्रीरुद्रं च स्पृशन् जपेत् ।

कुम्भं स्पृशन् रुद्रं जपेदित्यर्थः । अत्र च पूर्णपात्रोपरि रुद्रप्रतिमां पूजयित्वा जपः कर्तव्यः। 'तत्कुम्भमस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः'

इत्यग्रे दर्शनात् । अत्र केचित् सर्वौषधिसमन्वितमित्युक्तेः सर्वौषधीनामपि पूज्यत्वमाहुस्तन्निर्मूलम् ।

षडङ्गसहितं सम्यक् तं जपेद्रुद्रसङ्ख्यया ।
बह्वृचा रुद्रसूक्तैर्वा छन्दोगा रुद्रसामभिः ॥
एकादशाष्टत्रिद्व्येकसङ्ख्यया शक्तितो जपेत् ।

इयं सङ्ख्या सूक्तेषु सामसु च ।

तत्राप्रतिरथं सूक्तं शतरुद्रानुवाककम् ।

अप्रतिरथम्– आशुः शिशान इति । शतरुद्रानुवाकम्– 'स त्वमग्ने रुद्र' इति ।

रक्षामन्त्रं तथा पुण्यं रक्षोघ्नं च स्पृशन् जपेत् ।

एतेषामप्येकादशवारं जपः ।

त्र्यम्बकं तु जपेत्सम्यगष्टोत्तरसहस्रकम् ॥
एकवारं तथा जापी पावमानीः स्पृशन् जपेत् ।
जपस्य पञ्चकुम्भाँश्च द्वयं वा तदलाभतः ॥
पूर्वोक्त एकः कुम्भो वा वक्ष्यमाणो द्वितीयकः ।

एते पञ्चेत्येवं सप्तकुम्भा इति केचित् । अन्ये तु पूर्वोक्तकुम्भमध्ये ईशानादिकोणचतुष्के चत्वार इति पञ्च वक्ष्यमाणः षष्ठ इत्याहुः ।

काश्यपसंहितायां तु–

शतच्छिद्रस्य सहितं कुम्भपञ्चकमुक्तकम् ।
ईशानादिचतुष्कोणेष्वव्रणाञ्जलपूरितान् ॥
पूर्वोक्तद्रव्यसंयुक्तान् स्थापयेद्रक्तवर्णकान् ।
शतच्छिद्रं बृहत्कुम्भं स्थापयेत्तण्डुलोपरि ॥

कात्यायनपरिशिष्टे तु कुम्भद्वयमुक्तम्– 'द्वितीयोदकुम्भं कृत्वा चतुःप्रस्रवणसंयुक्तम्' इति । कुम्भद्वयपक्षेऽपि चतुर्विंशतिदलस्थः कुम्भो भिन्न एव । निर्ऋतिस्थापनं च तत्रैव । चतुः प्रस्रवणे च पूर्णपात्रोपरि शतमूलानि निधाय सामान्यप्राप्तं वरुणं पूजयेत् ।

तदुक्तं कात्यायनेन-- 'द्वितीयोदकुम्भं कृत्वा चतुः प्रस्रवणसंयुक्तं तदुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृतवस्त्रे बध्वेति' । पञ्चकुम्भपक्षेऽपि मध्यकुम्भोपरि शतमूलानि तस्य कुम्भचतुष्टयसहितस्य चतुः प्रस्रवणस्थानापन्नत्वाद्रुद्रकुम्भातिरेकेषु वरुणपूजा, निर्ऋतिश्चतुर्विंशद्दल एव पूज्यः । 'जपस्य पञ्चकुम्भाः' इत्युक्तेः । सर्वेषु पूर्वोक्तमन्त्रजपो वा शान्तिजपो वा कार्यः । कुम्भद्वयव्यवस्थामाह--

श्रीरुद्रश्चैव कुम्भश्च सर्वसूक्तानि तत्र तु ।
तथान्यं च शुभं कुम्भं पूर्वोक्तैर्लक्षणैर्युतम् ॥
चतुः प्रस्रवणं कुर्यात्पञ्चवक्त्रं तथैव च ।
वस्त्रावगुण्ठितं कुर्यात्पूरयेत्तीर्थवारिणा ॥
पञ्चरत्नसमायुक्तमाम्रपल्लवसंयुतम् ।
गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ॥
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ।
कुम्भस्य नैर्ऋते देशे होमस्थानं प्रकल्पयेत् ॥
गोमयालेपिते देशे कुर्यात्स्थण्डिलमुत्तमम् ।

मण्डपपक्षेऽपि स्थण्डिलमेव मण्डपमुपक्रम्यैव स्थण्डिलविधानात् ।

कृत्वाग्निमुखपर्यन्तमुल्लिख्यादि स्वशाखतः ॥

अग्निमुखम्- अग्निस्थापनम् ।

पूर्णपात्रनिधानान्तं कृत्वा पूजां समारभेत् ।

पूजाम्- तत्सामग्रीं तस्या वक्ष्यमाणत्वात् ।

नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः ॥
निष्कमानेन चार्धेन पादेनाथ स्वशक्तितः ।
प्रतिमां लक्षणेनैकां कारयित्वा विचक्षणः ॥
यद्वा मूल्यं सुवर्णस्य स्थापयित्वा प्रपूजयेत् ।
संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनम् ॥
रक्षोऽधिपं खड्गहस्तं दिव्याभरणभूषितम् ।

ज्योतिर्निबन्धे मूर्त्यन्तरमुक्तम्--

मूलरूपं विधातव्यं श्वेतं कुणपवाहनम् ।
खड्गखेटधरं चोग्रं द्विभुजं च वृकाननम् ।। इति ।
प्रतिमापूजनार्थाय वस्त्रयुग्मं प्रकल्पयेत् ।
पङ्कजं कारयेद्भूमौ रक्ताभैर्व्रीहितण्डुलैः ।।
चतुर्विंशद्दलोपेतं शुक्लैर्वा कर्णिकान्वितम् ।
तस्योपरि न्यसेत्पात्रं स्वर्णं वा रौप्यमृन्मयम् ।।

पात्रम्- कलशम् ।

शुद्धवस्त्रेण संछाद्य तत्र मूलानि निक्षिपेत् ।

मूलानि- शतमूलानि ।

विष्णुक्रान्ता सहदेवी तुलसी तु शतावरी ।।
मूलानीमानि गृह्णीयात्सर्वालाभे विशेषतः ।

'तस्योपरि न्यसेत्पात्रं' इति यदुक्तं तत्र विशेषमाह -

स्थापयेत्कर्णिकामध्ये वस्त्रगन्धाद्यलङ्कृतम् ।
कूर्चं हेमजलोपेतं कुङ्कुमौषधिसंयुतम् ।।

कूर्चः- दर्भस्तम्भः ।

कुम्भोपरि न्यसेद्विद्वान् मूलनक्षत्रदेवताम् ।
अधिप्रत्यधिदेवौ च दक्षिणोत्तरयोः क्रमात् ।।
अधिदेवं यजेदादौ ज्येष्ठानक्षत्रदैवतम् ।
तथा प्रत्यधिषाढाश्च[1] पूजयेद्देवतां शुभाम् ।।
उत्तराषाढऋक्षादि अनुराधान्तमर्चयेत् ।
ऐन्द्र्यादीशानपर्यन्तं पूजयेत्स्वस्वनामतः ।।

भूमिस्थचतुर्विंशतिदलेषु पूर्वदलमारभ्य चतुर्विंशतिनक्षत्राणि स्थाप्यानीत्यर्थः । नक्षत्रदेवताः स्थाप्या इति केचित् ।

लिङ्गोक्तैश्चैव मन्त्रैश्च प्रधानादीन्प्रपूजयेत् ।

१, 'प्रत्यधिदेवतां पूर्वाषाढाम्' इत्यर्थः ।

काश्यपेन तु--

सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः ।
यथावित्तानुसारेण प्रतिमां निर्ऋतेः सुधीः ।।
उदुम्बरवटाश्वत्थप्लक्षाम्रत्वक्सपल्लवान् ।
शतौषधीमूलशङ्खनवरत्नानि मृत्तिकाः ।।
पञ्चामृताम्बुसद्बीजं कुङ्कु ं रोचनं फलम् ।
कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् ।।
वचा कचोरकं मुस्ता सर्वौषध्यो दश स्मृताः ।
गजाश्वरथ्यावल्मीकसङ्गमस्थानसंभवाः ।।
ह्रदगोराजनगरद्वारतश्चाष्टमृत्तिकाः ।
तिलमाषव्रीहियवगोधूमाश्च प्रियङ्गवः ।।
चणकैः सहिताश्चाष्टौ सद्बीजाख्यानि सर्वदा ।
दधिमध्वक्षतैः कुम्भान् वस्त्रैस्तल्लिङ्गमन्त्रकैः ।।

प्रधा मन्त्रश्च--

'मोषुण' श्चेति मन्त्रेण निर्ऋतिं चार्चयेत्ततः ।
इति कश्यपसंहितोक्तेः ।
पञ्चामृतेन संस्नाप्य आवाह्याथ समर्चयेत् ।
उपचारैः षोडशभिर्यद्वा पञ्चोपचारकैः ।।
रक्तचन्दनगन्धाद्यैः पुष्पैः कृष्णसितादिभिः ।
मेषशृङ्गादिभिर्धूपैर्घृतदीपैस्तथैव च ।।
सुरापोलिकमांसाद्यैर्नैवेद्यैश्चोदनादिभिः ।
मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत् ।।
सुरास्थाने प्रदातव्यं क्षीरं सैन्धवमिश्रितम् ।
पायसं लवणोपेतं मांसस्थाने प्रकल्पयेत् ।।
उक्तमद्याद्यलाभे तु यथालाभं समर्पयेत् ।।
पुष्पान्तं तु समभ्यर्च्य होमं कुर्याद्यथोदितम् ।

पुष्पाञ्जल्यन्तमित्यर्थः ।

निर्वाणप्रोक्षणादीनि चरोः कुर्याद्यथाविधि ।।

हविर्गृहीत्वा विधिवन्नैर्ऋत्यैव ऋचा हुनेत् ।
'मोषुणः परापरेति' 'यत्ते देवीति' वा पुनः ।।

पायसं घृतसंमिश्रं हुनेदष्टोत्तरं शतम् ।
समिदाज्यचरून्पश्चाच्छक्तितः सङ्ख्यया हुनेत् ।।

अधिदेवतयोश्चैव जुहुयात्स्वस्वमन्त्रतः ।
चतुर्थ्यन्तैर्नमोन्तैश्च स्वाहान्तैः स्वस्वमन्त्रकैः ।।

नक्षत्रदेवताभ्यश्च पायसेन तु होमयेत् ।

स्वस्वमन्त्रकैर्नाममन्त्रकैरित्यर्थः ।

'कृणुष्वेति' पञ्चदशर्ग्भिर्जुहुयात्कृसरं ततः ।

अत्र ऋग्भिरिति ग्रहणात्प्रत्यृचं होमः । यत्र तु अमुकसूक्तेन होमः कर्तव्य इत्याम्नातम् । तथा तत्रैव श्रीसूक्तेनेति तत्र सूक्तेनैव होमः कर्तव्य इति युक्तम् । संप्रदायस्तु प्रत्यृचं होम इति ।

गायत्र्या जातवेदसे त्र्यम्बकमिति क्रमात् ।

अत्र क्रमादित्युक्तेरेतत्पर्यन्तं कृसरान्वयः । उत्तरत्र वक्ष्यमाणसमिदाज्यचर्वन्वयः । मन्त्रद्वयस्य पाठादेव सिद्धेरिति केचित् ।

'सीरा युञ्जन्ति' 'तामग्नि' 'वास्तोष्पत्यग्नि' मेव च ।।

'तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीमिति' ।
क्षेत्रस्य पतिना गृणानामग्निन्दूतं तथैव च ।

एतत्पर्यन्तं कृसरान्नमित्यपरे । सङ्ख्या तु वक्ष्यमाणा ।

श्रीसूक्तेन तथा विद्वान् समिदाज्यचरून् क्रमात् ।।

अष्टोत्तरशतैर्वापि अष्टाविंशतिभिः क्रमात् ।
अष्टाष्टसङ्ख्यया वापि जुहुयाच्छक्तितो बुधः ।।

‘त्वन्नः सोमेन’ जुहुयात्पायसं तु त्रयोदश ।
चतुर्गृहीतमाज्यं च ‘या ते रुद्रेति’ मन्त्रतः ।
स्रुवेण जुहुयादाज्यं महाव्याहृतिभिः क्रमात् ।।

महाव्याहृतिराह पराशरः —

संक्षेपायासृजद्ब्रह्मा सप्तमा व्याहृतीः पुरा ।
भूर्भुवः स्वर्महर्जनस्तपः सत्यं तथैव च ।।
आद्यास्तिस्रो महाप्रोक्ताः सुवस्तु प्रतियोजयेत् ।

शङ्खस्तु– ‘भूर्भुवः स्वर्महो जनस्तपः सत्यमिति महाव्याहृतयः’ इत्याह । बौधायनेन तु– ‘भूरग्नये’ चेति मन्त्रचतुष्टयं महाव्याहृतय इत्युक्तम् । चतुर्गृहीतादौ सकृदेव होमः ।

हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ताहुतीर्हुनेत् ।
आचार्यो यजमानो वा अग्नौ पूर्णाहुतिं हुनेत् ।।
‘समुद्रादूर्मी’ ति सूक्तेन प्राजापत्यऋचा तथा ।
‘पूर्णादर्वि’ ‘सप्त ते’ ति मन्त्रैः पूर्णाहुतिं हुनेत् ।।
होमशेषं समाप्याथ वह्निमारोपयेद्बुधः ।

जातारण्यग्निपक्षे नवग्रहविकृतित्वाद्वा स्मार्ताग्निपक्षेऽत्र वह्निसमारोपः । लौकिकाग्निपक्षे न समारोपः ।

कुम्भाभिमन्त्रणं कुर्याद्दक्षिणेनाभिमर्शयेत् ।
मृत्युप्रशमनार्थाय जपेच्च त्र्यम्बकं शतम् ।।
रुद्रकुम्भोक्तमार्गेण रुद्रमन्त्रं स्पृशन् जपेत् ।

रुद्रकुम्भं स्पृशन् पूर्वोक्तं रुद्रादिमन्त्रं जपेदित्यर्थः । तत्रायं नियमस्त्र्यम्बकस्य शतवारमेव न सहस्रवारम् ।

धूपं दीपं च नैवेद्यं कुम्भयुग्मे निवेदयेत् ।।

कुम्भयुग्मे– रुद्रकुम्भे निर्ऋतिकुम्भे च ।

प्रसादयेत्ततो देवमभिषेकार्थमादरात् ।।

निर्ऋतिं रुद्रं च ।

तस्मिन्काले ग्रहातिथ्यं कर्तव्यं भूतिमिच्छता ॥
पृथक्प्रशस्तं तेनैव नक्षत्रेष्ट्या सहैव वा ।

ग्रहातिथ्यम्— ग्रहमखः । तेन मूलशान्त्यग्निना नक्षत्रेष्टिमूलशान्तिः ।

अभिषेकविधिं वक्ष्ये सर्वाचार्यैरुदीरितम् ॥
भद्रासनोपविष्टस्य यजमानस्य ऋत्विजः ।
दारपुत्रसमेतस्य कुर्युः सर्वेऽभिषेचनम् ॥
'अक्षीभ्यामिति' सूक्तेन 'पावमानीभि' रेव च ।
'आपो हिष्ठेति' नवभि 'राप इद्वा' द्वयेन च ॥

मदनरत्ने तु 'यत इन्द्र' द्वयेन चेति पाठः ।

'सहस्राक्ष' तृचेनापि 'देवस्यत्वे' ति मन्त्रकैः ।
'शिवसङ्कल्प' मन्त्रेण वक्ष्यमाणैश्च मन्त्रकैः ॥

वक्ष्यमाणमन्त्राश्च प्रयोगे वक्तव्याः ।

'तच्छंयो' रभिषेकं च सर्वदोषोपशान्तिदम् ।
सर्वकामप्रदं दिव्यं मङ्गलानां च मङ्गलम् ॥
वस्त्रान्तरितकुम्भाभ्यां पश्चात्तु स्नापयेद्बुधः ।
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥
यजमानो दक्षिणाभिस्तोषयेदृत्विगादिकान् ।
धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकाम् ॥
निर्ऋतिप्रतिमां वस्त्रं कुम्भं हेम च दापयेत् ।

वस्त्रकुम्भौ निर्ऋतिसम्बन्धिनौ, हेम स्वतन्त्रं यथाशक्ति ।

ग्रहार्थं वस्त्रप्रतिमास्तत्तदुक्ता च दक्षिणा ।
श्रीरुद्रजापिने देयः कृष्णोऽनड्वान् प्रयत्नतः ॥
तत्कुम्भवस्त्रप्रतिमां तस्मै दद्यात्प्रयत्नतः ।
इतरेभ्योऽपि विप्रेभ्यः शक्त्या दद्याच्च दक्षिणाम् ।

ऋत्विग्भ्य इत्यर्थः ।

उक्तालाभे ततो दद्यादाचार्यब्रह्मऋत्विजाम् ॥

तत्तन्मूल्यं प्रदातव्यं शक्त्या वाथ प्रदापयेत् ।

उत्तमपक्षेण मूल्यं दातव्यं तदशक्तावधमपक्षेणेत्यर्थः ।

आचार्याय च यद्दत्तं तदर्धं ब्रह्मणे भवेत् ।।

सदस्याय ब्रह्मणोऽर्धमृत्विग्भ्यश्च तदर्धकम् ।

मुख्यदक्षिणाया अभावे अर्घादिकल्पना । ज्योतिर्निबन्धे त्वत्र सर्वमूलहोमोऽप्याम्नातः —

‘प्रच्छादनोर्णवस्त्रादि दद्याद्धेनुं च काञ्चनम् ।
दानं तद्धोमयेद्विप्रः सर्वमूलानि तत्र वै’ ।। इति ।

देवता चात्र मूलमेव ।

गृह्णीयादाशिषस्तेभ्यः प्रणम्याथ क्षमापयेत् ।
दद्यादन्नं पायसादि ब्राह्मणान्भोजयेच्छतम् ।।

अलाभे सति पञ्चाशद्दशकं तदलाभतः ।
सर्वशान्तेश्च पठनं ब्राह्मणैराशिषस्तथा ।।

गृही क्षमापयेद्विप्रान्निर्ऋतिः प्रीयतामिति ।
विधाने चरितेऽस्मिंस्तु ततः शान्तिर्भवेद्ध्रुवम् ।।
गण्डान्तेऽप्येवं कर्तव्यं पुष्यार्धे तद्वदेव तु ।

समाष्टके द्वादशाहे कुर्याद्वै शान्तिमादरात् ।।

पुष्यार्धे पुष्यस्नानमन्त्रैः स्नपनमित्यर्थः । अत एव ज्योतिर्निबन्धे—‘पुष्यस्नानोक्तमन्त्रैश्च स्नापयेद्दम्पती शिशुम्’ इत्युक्तम् । मदनरत्ने तु ‘पुष्यार्धे त्वेवमेव तु’ इति पाठः । इति शौनकोक्तमूलशान्तिविधिः ।।

शतमूलानि दैवज्ञमनोहरे, पुराणसमुच्चये—

बर्हिःशिखा विष्णुक्रान्ता सहदेवी पुनर्नवा ।

शरपुङ्खा वराही च काकजङ्घा सुलक्षणा ।।

तुम्बिका चैव कर्कन्धुः कर्पूरी कालवल्लिका ।

कर्कोटिका च चक्राङ्का श्वेतार्को व्याघ्रपत्रिका ।।

रुदन्ती चाश्वगन्धा च मुसली गिरिकर्णिका ।
इन्द्रवारुण्यपामार्गशङ्खपुष्पी कुमारीका ।।
शल्लकी चाथ गन्धारी निर्गुण्डी देवदालिका ।
वटः शमी तथा प्लक्षः पालाशोऽश्वत्थ एव च ।।
चूतश्चोदुम्बरो जम्बूर्नदीवृक्षोऽथ वेतसः ।
पुन्नागोऽथार्जुनोऽशोको बकुलोऽश्मन्तकस्तथा ।।
शालस्तालस्तमालश्च पाटलः शतपत्रिका ।
मधूकश्च शिरीषश्च श्रीवृक्षो बृहतीद्वयम् ।।
बला चातिबला चैव पाठा नागबला तथा ।
जाती च बकुलश्चैव केतकी कदली तथा ।।
मातुलिङ्गी जयन्ती च यवानी पुण्ड्रिका तथा ।
द्रोणपुष्पा तथा कुम्भी श्रीपर्णी मदनस्तथा ।।
चम्पकं पद्मकं चैव तथा काञ्चनपुष्पिका ।
सिद्धेश्वरी च बदरी राजवृक्षो धवस्तथा ।।
कुन्दश्च मुचुकुन्दश्च गोजिह्वा क्षारकन्दुका ।
दाडिमी बीजपूरी च ब्राह्मी चामलकी तथा ।।
भृङ्गराजः अधः पुष्पी मत्स्याक्षी चाटरूपकम् ।
तरङ्गिणी गुडूची च निशाह्वा शतमूलिका ।।
बाकुची काकजङ्घा च बर्बरी तुलसी तथा ।
कुशः काशश्चक्षुमूलस्तथा सर्षपमूलकम् ।।
अलाभे चोक्तमूलानां सद्वृक्षाणां समाहरेत् ।

सर्वेषामलाभे यथालाभमाहरेदित्यर्थः । सर्वौषधिगणश्च तत्रैवोक्तः—

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
सठी चम्पकमुस्ता च सर्वौषधिगणः स्मृतः ।।

अथ मूलशान्तिप्रयोगः ।।

तत्र कर्ता उक्तकाले गोमुखप्रसवं कृत्वा देशकालौ सङ्कीर्त्य ममास्य कुमारस्य कुमार्या वा मूलप्रथमचरणादिजन्मसूचितपित्राद्यरिष्टादिशान्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं (सनवग्रहमखां वा) मूलजननशान्ति करिष्ये । इति सङ्कल्प्य गणपतिपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धानि कृत्वाऽऽचार्यब्रह्मसदस्यानृत्विजश्चाष्टौ चतुरो वा वृत्वा यथाविभवमर्चयेत् ।

तत आचार्यः— अस्मिन् कर्मणि आचार्यकर्म करिष्ये । इति सङ्कल्प्य— 'यदत्र संस्थितम्'[1] इति सर्षपान्विकीर्य 'आपो हिष्ठा'[2] इत्यादिमन्त्रैः कर्मभूमिं प्रोक्ष्य ऐशान्यां 'मही द्यौः'[3] इति स्पृष्ट्वा 'ओषधयसम्'[4] इति द्रोणपरिमितं व्रीह्यादि क्षिप्त्वा 'आकलशेषु'[5] इति रुद्रकुंभं संस्थाप्य 'इमं मे गङ्गे'[6] इत्युदकेनापूर्य 'गन्धद्वाराम्'[7] इति गन्धम् । 'याऽओषधीः'[8] इति सर्वौषधीः । 'ओषधयः सम्'[9] इति यवान् । 'काण्डात्काण्डात्'[10] इति दूर्वा । 'अश्वत्थे वः'[11] इति पञ्चपल्लवान् । 'रुवति भीमः'[12] इति पञ्चत्वचः । 'स्योना पृथिवि'[13] इति सप्तमृदः । 'याः फलिनीः'[14] इति फलम् । 'स हि रत्नानि'[15] इति पञ्चरत्नानि । 'हिरण्यरूपः'[16] इति हिरण्यम् । 'आपो हिष्ठा'[17] इति ऋचा पञ्चगव्यं क्षिप्त्वा 'युवाः

१, ॐ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रत्यं तत्र गच्छतु ।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ।।
भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः । स्थानादस्माद् व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ।
२. आपो हिष्ठा मयोभुवस्ता न ऽ ऊर्जे दधातन । महे रणाय चक्षसे ।। यो वः शिवतमो रसस्तस्य
भाजयतेह नः उशतीरिव मातरः ।। तस्माऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो
जनयथा च नः ।। ३. यो ३३१ पृष्ठमा छ । ४. ३३१ पृष्ठमा छ ।
५. ३३१ पृष्ठमा छ । ६. इमंमे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या
मरुद्वृधे वितस्तयार्जिकीये शृणुह्यासुषोमया ।। ७. ३३२ पृष्ठमा छ । ८. ३३२ पृष्ठमा छ ।
९. ३३१ पृष्ठमा छ । १०. ३३२ पृष्ठमा छ । ११. ३३२ पृष्ठमा छ १२. रुवति भीमो
वृषभस्तविष्यया शृङ्गे शिशानो हरिणीविचक्षणः । आयोनि सोमः सुकृतं निषीदति गव्ययी त्वग्भवति निर्णिगव्ययी ।। १३. ३३२ पृष्ठमा छ । १४. ३३२ पृष्ठमा छ ।
१५. ३३३ पृष्ठमा छ । १६. ३३३ पृष्ठमा छ । १७. यसै पृष्ठमा छ ।

सुवासा:[1]' इति वस्त्रेण (सूत्रेण वा) कुम्भकण्ठमावेष्ट्य 'पूर्णा दर्विः[2]' इति पूर्णपात्रेण पिधाय, ततः प्रागुदग्वा चतुर्दिक्षु चतुरः कुम्भान् मध्ये चैकं कुम्भं प्रत्येकं मन्त्रावृत्या पदार्थानुसमयेन संस्थाप्य रुद्रकुम्भे सौवर्णप्रतिमायाम्—

त्र्यम्बकमिति वसिष्ठऋषी रुद्रो देवता अनुष्टुप्छन्दो रुद्रावाहने विनियोगः। 'त्र्यम्बकम्[3]' इति रुद्रमावाह्य पूजयेत्। तत एक ऋत्विक् रुद्रकुम्भं स्पृष्ट्वा याजुषश्चेद्रुद्रैकादशिनीम्, बह्वृचश्चेत्त्रीणि रुद्रसूक्तानि, छन्दोगश्चेद्रुद्रसामानि जपेत्। सूक्तसाम्नामेकद्वित्र्यैकादशावृत्तिः शक्तितो ज्ञेया।

'कद्रुद्राय[4]', घोरः कण्वो, रुद्रो, गायत्री। 'इमा रुद्राय[5]' कुत्स, रुद्र, आद्या नव जगत्योऽन्त्येऽनुष्टुभौ। 'आ ते पितः[6]' गृत्समदो, रुद्रस्त्रिष्टुप् जपे निवियोगः। सामानि— 'आ वो राजानम्' वामदेवो, रुद्रस्त्रिष्टुप्। 'तमुष्टुहि' भौमोत्री रुद्रस्त्रिष्टुप्। 'भुवनस्य पितरम्' ऋजिश्वा, रुद्रस्त्रिष्टुप् जपे विनियोगः।

ततोऽन्य ऋत्विक् जपार्थंकुम्भपञ्चके प्राक्क्रमेण जपेत्। 'आशुः शिशान[7]' इति त्रयोदशर्चस्येन्द्रोऽप्रतिरथऋषिरिन्द्रो देवता चतुर्थ्या बृहस्पतिस्त्रिष्टुप् जपे विनियोगः। 'त्वमग्ने रुद्र[8]' इत्यनुवाकस्य हव्यवाट् रुद्रो जगती जपे विनियोगः। 'त्वमग्ने[9]' इति वामदेवोऽग्निस्त्रिष्टुप् जपे विनि०। 'रक्षोहणम्[10]' इति पञ्चविंशर्चस्याङ्गिरसो वायुरग्निस्त्रिष्टुप् जपे विनियोगः।

ततो मध्यमकुम्भे जपेत्— 'त्र्यम्बकम्[11]' वसिष्ठो रुद्रोऽनुष्टुप् जपे विनियोगः। अत्रैव पवमानमपि सकृज्जपेत्। एवं षट्कुम्भाशक्तौ रुद्रकुम्भं चतुः प्रस्रवणं चेति कुम्भद्वयं संस्थाप्य रुद्रैकादशिन्यादि रुद्रकुम्भे जप्त्वा अप्रतिरथादीनि चत्वारि प्रस्रवणेषु त्र्यम्बकमन्त्रं पावमानीश्च मध्यमुखे जपेत्।

---

१. ३३३ पृष्ठमा छ। २. ३३३ पृष्ठमा छ।

३. ३५२ पृष्ठमा छ। ४. ५. ६. यी सबै सूक्तहरू परिशिष्टमा छन्।

७. ८. ९. १०. यी सूक्त परिशिष्टमा छन्। ११. ३५२ पृष्ठमा छ।

अथाचार्यो रुद्रकुम्भान्नैर्ऋत्ये स्थण्डिलेऽग्निं प्रतिष्ठाप्य तदीशान्यां नवग्रहस्थापनं कृत्वाऽन्वादध्यात् । तद्यथा– समिद्द्वयमादाय, अस्यां मूलशान्तौ देवतापरिग्रहार्थमन्वाधास्ये, अस्मिन्नन्वाहितेऽग्नावित्यादि चक्षुषी आज्येनेत्यन्तमुक्त्वा नवग्रहानधिदेवताप्रत्यधिदेवतालोकपालान् विनायकादींश्च प्रत्येकममुकसंख्यया समिच्चर्वाज्यैर्निर्ऋतिं प्रतिद्रव्यमष्टोत्तरशतसंख्यया इन्द्रमपश्च प्रत्येकमष्टाविंशतिसंख्यया घृताक्तपायससमिदाज्यचरुभिर्विश्वेदेवाद्याश्चतुर्विंशत्यृक्षदेवता अष्टाष्टसंख्यया पायसेन रक्षोहणं कृणुष्वेति पञ्चदशभिः कृसरान्नेन सवितारं दुर्गां जातवेदाग्निं रुद्रं ऋत्विक्श्रुतिं दुर्गां वास्तोष्पतिम् अग्निं क्षेत्राधिपतिं मित्रावरुणौ अग्निम् एताश्चाष्टाष्टसंख्यया कृसरान्नेन श्रियं तामग्निवर्णामिति पञ्चदशर्ग्भिः प्रत्यृचमष्टसंख्यया समिदाज्यचरुभिः सोमं त्रयोदशवारं पायसेन रुद्रं चतुर्गृहीतेनाज्येन अग्निं वायुं सूर्यं प्रजापतिं बृहस्पतिमिन्द्रं विश्वान्देवान् महाव्याहृतिभिराज्येन शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्ये । इत्यन्तमुक्त्वा समस्तव्याहृतिभिः समिद्द्वयमग्नावादध्यात् ।

आश्लेषाशान्तौ तु सर्पप्रधानदेवतामधिदेवतां बृहस्पतिं प्रत्यधिदेवतान् पितृन् भगाद्यदित्यन्तर्क्षदेवताश्चेति विशेषः ।

ततः परिसमूहनादिपूर्णपात्रनिधानान्तं कृत्वाऽग्नेः प्रागुदग्वा रक्तैः शुक्लैर्वा तण्डुलैश्चतुर्विंशद्दलं पद्मं कृत्वा तत्र प्राग्वत्कुम्भं संस्थाप्य तस्मिन् 'या ओषधीः'[1] इति शतमूलानि तदलाभे विष्णुक्रान्तासहदेवीतुलसीशतावरीकुशमूलानि क्षिप्त्वा पूर्णपात्रं निधाय तत्र साष्टदलं वासो वितत्य तत्कर्णिकायां निष्कं तदर्धमितां वा निर्ऋतिप्रतिमामग्न्युत्तारणपूर्वकं पञ्चामृतस्नापिताम्——

(मोषुण इति घोरः कण्वऋषिर्निर्ऋतिर्देवता गायत्रीछन्दः स्थापने विनियोगः) 'मोषुणः'[2] इति संस्थाप्य,

---

[1] ३३२ पृष्ठमा छ ।

[2] मोपुणः परापरा निर्ऋतिर्दुर्हणावधीत् । पदीष्ट तृणया सह ।।

संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनम् ।
रक्षोऽधिपं खड्गहस्तं दिव्याभरणभूषितम् ।।

इति ध्यात्वा तद्दक्षिणतः– 'इन्द्रं वः[1]' (मधुच्छन्दा इन्द्रो गायत्री) इतीन्द्रस्य । तदुत्तरतश्च– 'अप्सु मे[2]' (मेधातिथिरापोऽनुष्टुप्) इत्यपां च सौवर्णप्रतिमे संस्थाप्य पदार्थानुसमयेन स्वस्वमन्त्रैस्ताः पूजयेत् । तत्र वस्त्रयुग्मं, रक्तचन्दनं, कृष्णपुष्पाणि, मेषशृङ्गस्य धूपः, आज्यस्य दीपः, पोलिकोदनादिनैवेद्यं, ब्राह्मणानां सुरास्थाने सैन्धवमिश्रं क्षीरं, मांसस्थाने लवणयुक्तं पायसं, क्षत्रियादीनां तु मुख्यमेव ।

ततश्चतुर्विंशद्दलेषु प्रागादितो विश्वेदेवाः, विष्णुः, वसवः, वरुणः, अजैकपात्, अहिर्बुध्न्यः, पूषा, अश्विनौ, यमः, अग्निः, प्रजापतिः, सोमः, रुद्रः, अदितिः, बृहस्पतिः, सर्पाः, पितरः, भगः, अर्यमा, सविता, त्वष्टा, वायुः, इन्द्राग्नी, मित्र इत्येताश्चतुर्थ्यन्तनमोऽन्तैर्नामभिः क्रमेणावाह्य पूजयेत् ।

आश्लेषाशान्तौ तु सर्पप्रतिमां 'नमोस्तु सर्पेभ्यः[3]' इत्यावाह्य––

सर्पो रक्तस्त्रिनेत्रश्च द्विभुजः पीतवस्त्रकः ।
फलकासिधरस्तीक्ष्णो दिव्याभरणभूषितः ।।

इति ध्यात्वा तद्दक्षिणतः 'बृहस्पते[4]' (गृत्समदो बृहस्पतिस्त्रिष्टुप्) इति बृहस्पतिं, तदुत्तरश्च 'उदीरताम्[5]' (शङ्खः स्वधा त्रिष्टुप्) इति पितृनावाह्य चतुर्विंशतिदलेषु प्रागादितो भगाद्यदित्यन्तर्क्षदेवता आवाह्य पूजयेत् ।

---

[1] इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ।।

[2] अप्सु मे सोमोब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ।।

[3] ६५ पृष्ठमा छ ।

[4] वृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।।

[5] उदीरतामवर ऽ उत्परासऽ उन्मध्यमाः पितरः सोम्यासः । असुं यऽईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरो हवेषु ।।

ततोऽन्वाधानक्रमेण पायसचरुकृसरान् श्रपयित्वाऽऽज्यभागान्तं कृत्वा यजमानेन सर्वदेवतोद्देशेन द्रव्ये त्यक्ते सर्त्विगन्वाधानोक्तक्रमेणर्क्षदेवतां तत्तन्मन्त्रैर्हुत्वा रक्षोहाद्यान् वक्ष्यमाणर्ग्भिर्जुहुयात् । ताश्च—

कृणुष्वेति[1] पञ्चदशर्चस्य वामदेवो रक्षोहा त्रिष्टुप् कृसरहोमे विनियोगः । एवं सर्वत्र । गायत्र्या विश्वामित्रः सविता गायत्री । 'जातवेदसे[2]' कश्यपो दुर्गा त्रिष्टुप् । 'त्र्यम्बकम्[3]' वसिष्ठो रुद्रोऽनुष्टुप् । 'सीरा युञ्जति[4]' बुध ऋत्विक्श्रुतिर्गायत्री । 'तामग्निवर्णां[5]' सौभरि दुर्गा त्रिष्टुप् । 'वास्तोष्पते[6]' वसिष्ठो वास्तोष्पतिस्त्रिष्टुप् । 'अग्ने नय' अगस्त्योऽग्निस्त्रिष्टुप् । 'क्षेत्रस्य[8]' वामदेवः क्षेत्रपालोऽनुष्टुप् । 'गृणाना[9]' जमदग्निर्मित्रावरुणौ गायत्री । 'अग्निन्दूतं[10]' काण्वो मेधातिथिरग्निर्गायत्री । 'हिरण्यवर्णाम्[11]' इति पञ्चदशर्चस्य कर्दमानन्दचिक्लीतेन्दिरासुता ऋषयः श्रीर्देवता आद्यास्तिस्रोऽनुष्टुभस्तुर्या प्रस्तारपङ्क्तिः पञ्चमीषष्ठ्यौ त्रिष्टुभौ ततोष्टावनुष्टुभावन्त्या प्रस्तारपङ्क्तिः प्रत्यृचं

---

१. यी १५ ऋचाहरू परिशिष्टमा छन् ।

२. जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ।।

३. ३५२ पृष्ठमा छ ।

४. सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ।।

५. तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसितरसे नमः सुतरसितरसे नमः ।।

६. वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रतितन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ।।

७. अग्ने नय सुपथा रायेऽ अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेम ।।

८. क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृडातीदृशे ।।

९. गृणाना जमदग्निना योनावृतस्य सीदतम् । पातं सोममृतावृधा ।।

१०. अग्निन्दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।।

११. यी १५ ऋचा परिशिष्टमा छन् ।

समिदाज्यचरुहोमे विनियोगः । 'त्वन्नः सोमेति'[1], त्रयोदशर्चस्य प्रगाथः सोमस्त्रिष्टुप् पायसहोमे विनि० । 'या ते रुद्रेति'[2] कश्यपो रुद्रः स्वराडनुष्टुप् चतुर्गृहीताज्यहोमे विनि० । सप्तमहाव्याहृतीनां विश्वामित्रादय ऋषयोऽग्न्यादयो देवता गायत्र्यादीनि छन्दांसि आज्यहोमे विनि० । एवं हुत्वा स्विष्टकृदादि प्रायश्चित्ताहुत्यन्तं कृत्वा लोकपालनवग्रहविनायकादिभ्यो निर्ऋतीन्द्राद्भ्यो रुद्रक्षेत्रपालयोश्च बलीन् दत्त्वा पूर्णाहुतिं जुहुयात् । तत्र मन्त्राः[3]--

समुद्रादूर्मिरित्येकादशर्चस्य वामदेव आपस्त्रिष्टुप् अन्त्या जगती । प्रजापते, हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । पूर्णादर्वि विश्वदेवाः शतक्रतुरनुष्टुप् । सप्त ते अग्ने सप्तवानग्निर्जगती पूर्णाहुतिहोमे विनियोगः । एवं सर्वत्र ।

ततो होमशेषं समाप्य प्रधानकुम्भं दक्षिणतः स्पृष्ट्वा शतवारं त्र्यम्बकमन्त्रं जप्त्वा तथैव रुद्रकुम्भं च स्पृष्ट्वोक्तरीत्या रुद्रैकादशिन्यादि जप्त्वा गन्धादिभिः कुम्भद्वयगतनिर्ऋतिरुद्रावभ्यर्च्य सर्त्विगाचार्यः सर्वकुम्भोदकैर्भद्रासनोपविष्टं सापत्यकलत्रं यजमानमभिषिञ्चेत् । तत्र मन्त्राः[4]--

अक्षीभ्यामिति षण्णां काश्यपो यक्ष्महाऽनुष्टुप् अभिषेके विनियोगः । एवमुत्तरत्र । पवस्व विश्वचर्षण इति त्रिंशर्चस्य शतं वैखानसाः पवमानगायत्र्यन्त्ये द्वेऽनुष्टुभौ पञ्चमी वर्धमाना सप्तमी प्रतिष्ठा । यत इन्द्रेति द्वयोः सप्तर्षयो विश्वेदेवा अनुष्टुप् । सहस्राक्षेणेति तृचस्य प्राजापत्यो यक्ष्मनाशनो यक्ष्महा त्रिष्टुप् द्वयोरन्त्यानुष्टुप् । देवस्य त्वेति त्रिभिर्यजुर्भिश्च । यज्जाग्रतेति षण्णां शिवसङ्कल्पमन्त्राणां प्रजापतिर्मनस्त्रिष्टुप् ।

---

[1] यी १३ ऋचा परिशिष्टमा छन् ।

[2] या ते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ।।

[3] यी पूर्णाहुतिका मन्त्रहरू परिशिष्टमा छन् ।

[4] यी अभिषेकका सबै मन्त्रहरू परिशिष्टमा छन् ।

योऽसौ वज्रधरो देवो महेन्द्रो गजवाहनः ।
मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु ।।
योऽसौ शक्तिधरो देवो हुतभुङ मेषवाहनः ।
सप्तजिह्वश्च देवोऽग्निर्मूलदोषं व्यपोहतु ।।
योऽसौ दण्डधरो देवो धर्मो महिषवाहनः ।
मूलजातशिशोर्दोषं मातापित्रोर्व्यपोहतु ।।
योऽसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः ।
प्रशामयतु मूलोत्थं दोषं गण्डान्तसंभवम् ।।
योऽसौ पाशधरो देवो वरुणश्च जलेश्वरः ।
नक्रवाहः प्रचेताख्यो मूलोत्थाघं व्यपोहतु ।।
योऽसौ देवो जगत्प्राणो मारुतो मृगवाहनः ।
प्रशामयतु मूलोत्थं दोषं बालस्य शान्तिदः ।।
योऽसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः ।
मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु ।।
योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः ।
आश्लेषामूलगण्डान्तं दोषमाशु व्यपोहतु ।।
विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः ।
सर्वदोषप्रशमनं सर्वे कुर्वन्तु शान्तिदाः ।।

आश्लेषाशान्तौ तु---

आश्लेषाऋक्षजातस्य मातापित्रोर्धनस्य च ।
भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु ।।
योऽसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः ।
मातापित्रोः शिशोश्चैव गण्डान्तस्य व्यपोहतु ।।
पितरः सर्वभूतानां रक्षन्तु पितरं सदा ।
सर्पनक्षत्रजातस्य वित्तं च ज्ञातिबान्धवान् ।।

इति विशेषः । ततः 'तच्छंयोः' शंयुर्विश्वेदेवाः शक्वरी अभिषेके

विनियोगः । ततो वस्त्रान्तरितनिर्ऋतिकुम्भोदकेन स्नापितो यजमानो धृतधौतवासाः सापत्यकलत्रः कांस्यपात्रस्थाज्यं 'रूपं रूपम्' इत्यवेक्ष्य विप्राय दत्त्वाऽऽचार्यादीनभ्यर्च्याऽऽचार्याय गां, ब्रह्मणे वृषं, सदस्यायाऽश्वं, रुद्रजापिने कृष्णवृषं, धेन्वाद्यलाभे तत्तन्मूल्यं वा दत्त्वा स्वशक्त्या ऋत्विग्भ्यो भूयसीं च दत्त्वोत्तरपूजां कृत्वा 'यान्तु देवेति' विसृज्याऽऽचार्याय निर्ऋतिप्रतिमाकुम्भादि, रुद्रजापिने रुद्रप्रतिमाकुम्भादि सङ्कल्पपूर्वकं दत्त्वाग्निमभ्यर्च्य 'गच्छगच्छेति' विसृज्य शतं तदर्धं दश वा ब्राह्मणान् भोजयित्वा शान्त्याशीर्वाचयित्वा 'यस्यस्मृत्या' इत्याद्युक्त्वा सस्वजनो भुञ्जीत ।। इति मूलाश्लेषाशान्तिप्रयोगः ।।

अथैकनक्षत्रजननशान्तिः ।।

गर्गः—

'एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः[1] ।
प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चयः ।।
तद्दोषनाशाय तदा प्रशस्तां शान्तिं च कुर्यादभिषेचनं च ।
संपूज्य ऋक्षप्रतिमां तदग्रे दानं च कुर्याद्विभवानुरूपम् ।।
तत्र शान्तिं प्रवक्ष्यामि सर्वाचार्यमतेन तु ।
शुभर्क्षे शुभवारे च चन्द्रताराबलान्विते ।।
रिक्ताविष्टीविवर्ज्ये तु प्रारभेद्विभवे सुधीः ।
आचार्यं वरयेत्पूर्वं चतुरश्च द्विजोत्तमान् ।।
पुण्याहं वाचयित्वा तु शान्तिकर्म समाचरेत् ।
अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः ।।
तन्नक्षत्रोक्तमार्गेण अर्चयेत्कलशोपरि ।
रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् ।।
स्वशाखोक्तेन मार्गेण कुर्यादग्निमुखं ततः ।
अनेनैव तु मन्त्रेण हुनेदष्टोत्तरं शतम् ।।

---

[1] यहां 'भ्रात्रोः' भन्नाले दाजुबहिनी र 'पितृपुत्रयोः' भन्नाले बाबुछोरी पनि सम्झनु पर्छ ।

प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तान्तमेव च ।
अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः ।।
वस्त्रालङ्कारगोदानैराचार्यं पूजयेत्पुनः ।
ऋत्विजां दक्षिणां दद्यान्माषत्रयसुवर्णकम् ।।
देवताप्रतिमादानं धान्यवस्त्रादिभिः सह ।
यानशय्यासनादीनि दद्यात्तद्दोषशान्तये ।।
भोजयेद् ब्राह्मणान् सर्वान् वित्तशाठ्यविवर्जितः' ।

अथ प्रयोगः ।।

कर्ता मासपक्षाद्युल्लिख्यास्य कुमारस्य पित्राद्येकर्क्षोत्पत्तिसूचितारिष्टशान्त्यर्थमेकनक्षत्रजननशान्तिं करिष्ये। इति सङ्कल्प्य गणेशपूजनस्वस्तिवाचनाभ्युदयिकाचार्यर्त्विग्वरणानि कुर्यात् ।

अथाचार्योऽग्नेरीशान्यां कुम्भं संस्थाप्य रक्तवस्त्रयुग्मेनाच्छाद्य तस्मिन् पूर्णपात्रोपरि तत्तन्नक्षत्रोक्तमन्त्रेण प्रतिमायां तन्नक्षत्रं तद्देवतां वाऽऽवाह्य संपूज्याग्निं प्रतिष्ठाप्यान्वाधायाऽऽज्यभागान्तं कृत्वा तत्तन्नक्षत्रमन्त्रेण समिच्चर्वाज्यानि प्रत्येकमष्टोत्तरशतं हुत्वा होमशेषं समाप्य शिशुं तत्पित्रादींश्चाभिषिञ्चेत् ।

ततः कर्तोत्तरपूजां कृत्वा विसृज्य प्रतिमादिकं गवादि चाचार्याय दत्त्वा ऋत्विग्भ्यश्च प्रत्येकं सौवर्णमाषत्रयात्मिकां यथाशक्ति दक्षिणां दत्त्वा यथाविभवं यानशय्यासनादीनि च दत्त्वा ब्राह्मणान् भोजयित्वा स्वयं भुञ्जीत ।। इत्येकनक्षत्रजननशान्तिः ।

अथ नक्षत्रगण्डान्तशान्तिः ।।

गर्गः–

'अश्विनीमघमूलादौ त्रिषट्कनवनाडिकाः ।
रेवतीसार्पशाक्रान्ते मासाश्च ऋतुसायकाः ।।'

प्रकारान्तरेण गण्डान्तमाह–

'अश्विनीमघमूलादौ नाडिकाद्वितयं तथा ।
रेवतीसार्पशाक्रान्ते नाडिकाद्वितयं तथा ।।

अश्विनीमघमूलानां पूर्वार्धे बाध्यते पिता ।
पूषाहिशक्रपश्चार्धे जननी बाध्यते शिशोः ।।

पितृघ्नश्च दिवा जातो रात्रिजातस्तु मातृहा[1] ।
आत्महा सन्ध्ययोर्जातो नास्ति गण्डे निरामयः ।।

सर्वेषां गण्डजातानां परित्यागो विधीयते ।
वर्जयेद्दर्शनं यावद्वर्षं षाण्मासिकं भवेत् ।।

तस्य शान्ति प्रवक्ष्यामि सोममन्त्रेण भक्तिमान् ।
कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवम् ।।

अष्टभिर्वा चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा ।
तन्मध्ये पायसं शङ्खे नवनीतेन पूरितम् ।।

राजतं चन्द्रमर्चेत सितपुष्पसहस्रकैः ।
दैवज्ञः क्षौमवासाश्च शुक्लमाल्याम्बरार्चितः ।।
सोमोऽयमिति सञ्चिन्त्य पूजां कुर्यादतन्द्रितः ।
जपेत्साहस्रकं मन्त्रं श्रद्दधानः समाहितः ।।
आप्यायस्वेति मन्त्रेण पूजां कुर्यात्समाहितः ।
दद्याद्वै दक्षिणामिष्टां गण्डदोषोपशान्तये ।।
शुक्लं वागीश्वरं चैव ताम्रपात्रसमन्वितम् ।
गण्डदोषोपशान्त्यर्थं दद्याद्वेदविदे शुचिः ।।'

ज्योतिर्निबन्धे तु विशेषः–

ब्रह्मपुराणोक्तत्वेनैतावानेव श्लोकान्पठित्वा–

---

[1] गण्डान्तमा परेर दिनमा जन्मेकोले बाबु र गण्डान्तमा परेर रातमा जन्मेकोले आमा पिर्दछन् भन्ने यस्तो अर्थ गर्नुपर्दछ ।

'कुङ्कुमं चन्दनं कुष्ठं गोरोचनमथापि वा ।
घृतपूर्णेषु कुम्भेषु चतुर्षु प्रक्षिपेत्क्रमात् ।।
सहस्राक्षेण[1] मन्त्रेण बालकं स्नापयेत्क्रमात् ।
पितृयुक्तं दिवाजातं मातृयुक्तं तु रात्रिजम् ।।
स्नापयेत्पितृमातृभ्यां सन्ध्ययोरुभयोरपि ।
कांस्यपात्रं घृतैः पूर्णं गण्डदोषोपशान्तये ।।
सक्षीरमौक्तिकं शङ्खं श्वेतवस्त्रयुगं शुभम् ।
यजुर्वेदविदे दद्याद्गण्डदोषापनुत्तये ।।
दद्याद्धेनुं हिरण्यं च ग्रहाँश्चापि प्रपूजयेत् ।
आयुर्वृद्धिकरं जप्त्वा कुर्याद्ब्राह्मणतर्पणम् ।।

तिथिगण्डादौ तु गर्गः–

'तिथिगण्डे त्वनड्वाहं नक्षत्रे धेनुरुच्यते ।
काञ्चनं लग्नगण्डे तु गण्डदोषो विनश्यति ।।'

इति नक्षत्रगण्डान्तशान्तिविधिः ।

अथ दिनक्षयादिशान्तिः ।।

गर्गः–

'दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ ।
मूले गण्डेऽतिगण्डे च परिघे यमघण्टके ।।
कालदण्डे मृत्युयोगे दुष्टयोगे सुदारुणे ।
तस्मिन् गण्डदिने प्राप्ते प्रसूतिर्यदि जायते ।।
अतिदोषकरी प्रोक्ता तत्र पापयुते सति ।
विचार्य तत्र दैवज्ञः शान्तिं कुर्याद्यथाविधि ।।
यजमानो देवतानां ग्रहाणां चैव पूजनम् ।
दीपं शिवालये भक्त्या घृतेन परिदापयेत् ।।

---

[1] ॐ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् । शतं यथेमं शरदो न यातीन्द्रो विश्वस्य दुरितस्य पारम् ।।

अभिषेकं शङ्करस्य अश्वत्थस्य प्रदक्षिणम् ।
आयुर्वृद्धिकरं जाप्यं सर्वारिष्टविनाशनम् ।।
गुरुदैवतविप्राणां पूजनं गोत्रवर्धनम् ।
पुष्ट्यायुस्तुष्टिशान्त्यर्थमभीष्टफलसिद्धये ।।
सर्वारिष्टहरार्थाय ग्रहयज्ञं समाचरेत् ।
शिवाय विधिवद्भक्त्या दीपदानं करोति यः ।।
अखण्डं गोघृतेनैव स वै मृत्युं जयेन्नरः ।
विष्णुमूर्तिं महापुण्यमश्वत्थं श्रीकरं सदा ।।
प्रदक्षिणं नरो भक्त्या कृत्वा मृत्युं जयेन्नरः ।
सर्वसंपत्समृद्ध्यर्थं नित्यं कल्याणवृद्धये ।।
अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनम् ।
अभिषेकं शिवे शान्तिं कृत्वा भक्त्या नरोत्तमः ।
अकालमृत्युं निर्जित्य दीर्घायुर्जायते नरः ।।
गाणपत्यं पुरुषसूक्तं सौरं मृत्युञ्जयं शुभम् ।
शान्तिजाप्यं रुद्रजाप्यं कृत्वा मृत्युञ्जयो भवेत् ।।
मूले वा सार्पगण्डे वा कुर्यादेतानि यत्नतः ।
आयुर्वृद्धिकरार्थाय गण्डदोषप्रशान्तये ।।

अथ नक्षत्रगण्डान्तशान्तिप्रयोगः ।।

गोमुखप्रसवं कृत्वा, देशकालौ संकीर्त्यास्य शिशोरमुकनक्षत्रगण्डान्तोत्पत्तिसूचितसकलारिष्टनिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं नक्षत्रगण्डान्तशान्तिं करिष्ये । इति सङ्कल्प्य तदङ्गतया गणपतिपूजनपुण्याहवाचननान्दीश्राद्धानि कृत्वाऽऽचार्यं वृत्वा तं शुक्लैः क्षौमवस्त्रमाल्यैरर्चयेत् ।

तत आचार्यः सर्षपविकिरणभूमिप्रोक्षणादि कर्म कृत्वा षोडशभिरष्टभिश्चतुर्भिर्द्वाभ्यां वा पलैः कांस्यपात्रं कृत्वा तत्पात्रं पायसेन पूरयित्वा तत्र नवनीतपूरितं शङ्खं पूर्वाग्रं निधाय तन्मुखे राजतीं प्रतिमां

'आप्यायस्व'[1] इति मन्त्रेण षोडशोपचारैः संपूज्य सितपुष्पसहस्त्रत्रयेण (३०००) पुष्पाञ्जलिं दत्वा तदुत्तरतस्ताम्रपात्रे बृहस्पतिप्रतिमां तन्मन्त्रेणार्चयेत् । ततो यजमानः प्रतिमामाचार्याय दत्वा यथाशक्ति दक्षिणां दद्यात् । इति नक्षत्रगण्डान्तशान्तिप्रयोगः ।

अथोत्तरादिशान्तिविधिः ।।

'उत्तरातिष्यचित्रासु पूर्वाषाढोद्भवस्य च ।
कुर्याच्छान्तिं प्रयत्नेन नक्षत्राकारजां बुधः ।।
सुवर्णेन तदर्धेन यथावित्तानुसारतः ।
नक्षत्राधिपते रूपं कृत्वा वस्त्रद्वयान्वितम् ।।
वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकम् ।

कुम्भे वरुणमभ्यर्च्य पूर्णपात्रोपरि नक्षत्राधिपतिं पूजयेदित्यर्थः ।

शतौषधानि निक्षिप्य मृत्त्वक्पल्लवसंयुतम् ।।
पूजान्ते समिदन्नाज्यैर्होमं तिलयवैस्तथा ।
ततः पूर्णाहुतिं हुत्वा वेदाध्यायिकुटुम्बिने ।।
उत्तराप्रथमे पादे तिलपात्रं तथैव च ।
तिष्ये तु गां सवत्सां च सुशीलां च पयस्विनीम् ।।
अजां चित्रासु वै दद्यात् पूर्वाषाढे तु काञ्चनम् ।
यवाँश्च व्रीहिमाषांश्च तिलमुद्गान्प्रदापयेत् ।।
यथावित्तानुसारेण कुर्याद्ब्राह्मणभोजनम् ।
पितुरायुष्यवृद्ध्यर्थं शान्तिरत्र विधीयते ।।
इत्युत्तरादिशान्तिविधिः ।।

अथ विषघटिकाशान्तिविधिः ।।

विषनाड्यो ज्योतिर्निबन्धे–

'तिथीषुनागाद्रिगिरीशवारिधि–
र्गजाद्रिदिक्पावकविश्ववासवाः ।

---

[1] यो मन्त्र १३४ पृष्ठमा छ ।

मुनीभसङ्ख्या प्रथमातिथेः क्रमात्
परं विषाख्यं घटिकाचतुष्टयम् ।।
नखा द्वयं द्वादश दिक्च शैला
बाणश्च तत्त्वानि यथाक्रमेण ।
सूर्यादिवारेषु परं चतस्रो
नाड्यो विषं स्यात्खलु वर्जनीयम् ।।'

नारदः– 'खमार्गणा वेदपक्षाः खरामव्योमसागराः ।
वार्धिचन्द्रा रूपदस्राः खरामाव्योमबाहवः ।।
द्विरामाः खाग्नयः शून्यदस्राः कुञ्जरभूमयः ।
रूपपक्षा व्योमदस्रा वेदचन्द्राश्चतुर्दश ।।
शून्यचन्द्रा वेदचन्द्राः षडक्षा वेदबाहवः ।
शून्यदस्राः शून्यचन्द्राः पूर्णचन्द्रा गजेन्दवः ।।
तर्कचन्द्रा वेदपक्षाः खरामाश्चाश्विभात् क्रमात् ।
आभ्यः पराः स्युर्घटिकाश्चतस्रो विषसंज्ञिताः ।।'

वृद्धगर्गः– 'विषनाडीषु संजातः सर्वारिष्टभयप्रदः ।
पितृमातुलमात्मानं घातयेन्नात्र संशयः ।।
मातुश्च विषशस्त्रास्त्रैः क्रूरे लग्नेऽशकेऽपि वा ।
तद्दोषपरिहाराय शान्तिकर्म समारभेत् ।।
रुद्रो यमोऽग्निर्मृत्युश्च देवताः परिकीर्तिताः ।
सुवर्णेन यथाशक्त्या तत्तल्लक्षणलक्षिताः ।।
प्रतिमाः कारयित्वा तु आढकव्रीहिभिः स्थले ।
स्थण्डिलं परिकल्प्याथ कुम्भमौषधिसंयुतम्[1] ।।
जलैः संपूर्य संस्थाप्य मृदादि प्रक्षिपेत्ततः ।
वस्त्रद्वयेन संवेष्ट्य पञ्चरत्नानि निक्षिपेत् ।।
कुम्भोपरि तु संस्थाप्य चतस्रः प्रतिमास्तथा ।
तत्तन्मन्त्रैश्च संपूज्य गन्धपुष्पोपहारकैः ।।

---

[1] आढक्यव्रीहिभिः कुम्भस्थलं परिकल्पयेदित्यन्वयः ।

कद्रुद्रायेति[1] मन्त्रेण यमाय सोम[2]मित्यथ ।
अग्निर्मूर्धेति[3] मन्त्रेण परं मृत्यो[4] इति त्वथ ।।
एतैश्चतुर्भिर्मन्त्रैस्तु क्रमादर्चेद्धुनेत्तथा ।
समिच्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमम् ।
ऋत्विग्भिश्च सहाचार्यो हुनेदष्टसहस्रकम् ।।
अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा ।
ततस्तिलैर्हुनेद्देवाँस्तत्तन्मन्त्रैश्च कल्पवित् ।।
ततोऽभिषिञ्चयेदेनं मन्त्रैः पौराणिकैः क्रमात् ।
ततस्तु प्रतिमादानं कुर्यादेवं प्रसन्नधीः ।।
प्रीयतां भगवानीशः पिनाकी सर्वतोमुखः ।
तव मूर्तिप्रदानेन समस्ताभीष्टदो भव ।।
ईषत्पीनो यमः कालो दण्डहस्तः प्रशान्तधीः ।
रक्तदृक् पाशभृत् कृष्णो महिषस्थः शिवं कुरु ।।
पिङ्गलश्मश्रुकेशाक्षः पिङ्गाक्षचतुरोऽरुणः ।
छागस्थः साक्षसूत्रश्च सप्तार्चिः शक्तिधारकः ।।
तव मूर्तिप्रदानेन मम पापं विनाशय ।
दंष्ट्राकरालवदनो नीलाञ्जनसमाकृतिः ।।
वृकखड्गगदापाणिर्मृत्युर्मां पातु सर्वदा ।
इत्थमेवंविधैर्मन्त्रैर्यथाविधि समाहितः ।।
गोभूहिरण्यवस्त्रैश्च आचार्यं पूजयेत्सुधीः ।
एवं कुर्यात्प्रदानेन विषदोषः प्रशाम्यति ।।'
इति विषघटीशान्तिः ।

---

[1] ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमं हृदे ।।
[2] ॐ यमाय सोमं सुनुत यमाय जुहुता हविः । यमं ह यज्ञो गच्छत्यग्निदूतोऽ अरंकृतः ।।
[3] ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽ अयम् । अपाꣳ रेताꣳसि जिन्वति ।।
[4] ॐ परं मृत्योऽ अनुपरेहि पन्थां यस्तेस्वऽ इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ।।

अथ ग्रहणोत्पत्तौ शान्तिः ।।

शौनकः –

"ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते ।
व्याधिःपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ।।
इत्थं संजायते यस्तु तस्य मृत्युर्न संशयः ।
व्याधिःपीडा च दारिद्र्यं शोकश्च कलहो भवेत् ।।
शान्ति तेषां प्रवक्ष्यामि नराणां हितकाम्यया ।
यस्मिन्नृक्षे विशेषेण ग्रहणं संप्रजायते ।।
तदृक्षाधिपते रूपं सुवर्णेन प्रकल्पयेत् ।
यथाशक्त्यनुसारेण वित्तशाठ्यं नकारयेत् ।।
सूर्यग्रहे सूर्यरूपं सुवर्णेन विशेषतः ।
चन्द्रं चन्द्रग्रहे धीमान् रजतेन विशेषतः ।।
राहुरूपं प्रकुर्वीत नागेनैव[1] विचक्षणः ।
शुचौ देशे प्रयत्नेन गोमयेन प्रलेपयेत् ।।
तस्योपरि न्यसेद्धीमान्नववस्त्रं सुशोभनम् ।
त्रयाणां चैकरूपाणां स्थापनं तत्र कारयेत् ।।
रक्ताक्षतं रक्तगन्धं रक्तपुष्पाम्बराणि च ।
सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकराय च ।।
श्वेतवस्त्रं श्वेतमाल्यं श्वेतगन्धाक्षतादिभिः ।।
चन्द्रग्रहे प्रदातव्यं चन्द्रप्रीतिकराय च ।
राहवे चैव दातव्यं कृष्णपुष्पाम्बराणि च ।।
दद्यान्नक्षत्रनाथाय श्वेतगन्धानुलेपने ।

---

[1] नागेन– सीसेन ।

सूर्यं संपूजयेद्धीमान् ‘आकृष्णेने[1]’ ति मन्त्रतः ।
चन्द्रग्रहे तथा सम्यग् ‘आप्यायस्वे[2]’ ति मन्त्रतः ।।
‘स्वर्भानो[3]’ रिति मन्त्रेण राहुं यत्नेन पूजयेत् ।
एवं संपूजयेद्धीमान् समिद्भिश्चार्कसम्भवैः[4] ।।
चन्द्रग्रहे च पालाशसमिद्भिर्जुहुयात्ततः ।
दूर्वाभिर्जुहुयाद्धीमान् राहोः संप्रीणनाय च ।।
समिद्भिर्जलवृक्षोत्थैर्भेशाय[5] जुहुयाद्बुधः ।
आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः ।।
पञ्चगव्यैः पञ्चरत्नैः पञ्चत्वक्पञ्चपल्लवैः ।
जलैरौषधकल्कैश्च सहितैः कलशोदकैः ।।
अभिषेकं प्रकुर्वीत यजमाने प्रयत्नतः ।
मन्त्रैर्वरुणदैवत्यै‘रापोहिष्ठा[6]’दिभिस्त्रिभिः ।।
‘इमं मे गङ्गे[7]’ इत्यादि ‘तत्त्वायामी[8]’ ति मन्त्रकैः ।
अभिषेके निवृत्ते तु यजमानः समाहितः ।।
आचार्यं पूजयेत्पश्चात्सुशान्तो नियतेन्द्रियः ।
तस्मै दद्यात् प्रयत्नेन भक्त्या प्रतिकृतित्रयम् ।।
दक्षिणाभिश्च संयुक्तं यथाशक्त्यनुसारतः ।
ब्राह्मणान् भोजयित्वा तु प्रणिपत्य क्षमापयेत् ।।
तेभ्योऽपि दक्षिणां दद्याद्यजमानः समाहितः ।
इत्थं ग्रहणजातानां सर्वारिष्टविनाशनम् ।।
कथितं भार्गवेणेदं शौनकाय महात्मने ।”
इति चन्द्रसूर्यग्रहणप्रसूतिशान्तिः ।।

---

[1] यो मन्त्र ११४ पृष्ठमा छ ।

[2] यो १३४ पृष्ठमा छ ।

[3] स्वर्भानोरधयदिन्द्रमायाऽ अवोदिवो वर्तमानाऽ अवाहन् । गूढं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः ।।

[4] सूर्यग्रहेऽर्कसम्भवैरित्यर्थः ।

[5] भेशाय = नक्षत्रस्वामिने

[6] यी मन्त्र ११४ पृष्ठमा छन् ।

[7] यो मन्त्र १५१ पृष्ठमा छ ।

[8] यो १२१ पृष्ठमा छ ।

अथ यमलजननशान्तिः ।।

कात्यायनः–

"अथातो यमलजनने प्रायश्चित्तविधिं व्याख्यास्यामः । यस्य भार्या गौर्दासी महिषी वडवा वा विकृतिं प्रसवेत् प्रायश्चित्तिर्भवेत् । पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां कषायमुपसंहरेत्[1] । प्लक्षवटोदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषां मिश्रमापो हिरण्यं दूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान्प्रपूर्य सर्वौषधीनां दम्पती स्नापयित्वा 'आपो हिष्ठा[2]' इति तिसृभिः, 'कयानश्चित्र[3]' इति द्वाभ्यां, पञ्चैन्द्रेण[4], पञ्च वारुणेन[5], 'इदमापः प्रवहता,[6]' इति 'अपाघम्[7]' इति स्नापयित्वाऽलङ्कृत्य तौ दर्भेषूपवेश्य तत्र मारुतं स्थालीपाकं श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः ।

स्थालीपाकस्य जुहोति– अग्नये स्वाहा । सोमाय स्वाहा । पवमानाय स्वाहा । पावकाय स्वाहा । मरुताय स्वाहा । मारुताय स्वाहा । मरुद्भ्यः स्वाहा । यमाय स्वाहा । अन्तकाय स्वाहा । मृत्यवे स्वाहा । ब्रह्मणे स्वाहा । अग्नये स्विष्टकृते स्वाहा । इति । एतदेव गृहोत्पातेषु- उलूकः कङ्कः कपोतो गृध्रः श्येनो वा प्रविशेत्, स्तम्बो वा प्ररोहेत्,

---

१. कषायम्– निर्यासम् ।

२. यी तीन मन्त्र ११४ पृष्ठमा छन् ।

३. ॐ कयानश्चित्रऽ आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ।। कस्त्वा सत्यो मदानां म ठं॰ हिष्ठो मत्सदन्धसः । दृढाचिदारुजेव्वसु ।।

४. पांच ठाउँमा इन्द्रशब्द परेको मन्त्र । यो मन्त्र 'त्रातारमिन्द्रम्' हो र यो मन्त्र ६५ पृष्ठमा छ ।

५. ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्यस्कम्भसर्जनीस्थो व्वरुणस्यऽ ऋतसदन्यसि व्वरुणस्यऽ ऋतसदनमसि व्वरुणस्यऽ ऋतसदनमासीद ।। यो मन्त्रमा पाँच ठाउँमा वरुणशब्द परेको छ ।

६. ॐ इदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽ अभीरुणम् । आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ।।

७. ॐ अपाघमप किल्विषमप कृत्यामपो रपः । अपामार्गत्वमस्मदप दुःष्वप्न्यँ, सुव ।।

वल्मीकं मधुजालं वा भवेत्, उदकुम्भप्रज्वलने, आसनशयनयानभङ्गेषु, गृहगोधिकाकृकलासशरीरसर्पणे, छत्रध्वजविनाशेऽन्येष्वप्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्ति चोक्तविधिनाऽऽचार्याय वरं दत्त्वा ब्राह्मणान्भोजयित्वा स्वस्ति वाच्याऽऽशिषः प्रतिगृह्णीयात् शान्तिर्भवति इति ।।"

अत्र 'विकृतिं प्रसवेत्' इत्यस्य यमलजननेऽपीत्यर्थः । तथायं क्रमात् । इदं च कुलनाशाद्यरिष्टनिवारणार्थत्वाच्छ्रौतेन मारुतत्रयोदशकपालेन प्रत्यवायपरिहारार्थेन समुच्चीयते ।।

भार्यायाः, गोः, दास्याः, महिष्याः, वडवाया वा द्विशीर्षत्वादिविकारविशिष्टप्रसवे–

उलूकस्य, कङ्कस्य, कपोतस्य, गृध्रस्य, श्येनस्य वा गृहे प्रवेशे, गृहे तृणादिगुच्छप्ररोहे–

गृहे वल्मीकस्य, मधुजालस्य वा उद्भवे–
उदकुम्भस्य (जलोष्णीकरणार्थं स्थापितस्य) प्रज्वलने–
आसनस्य, शय्यायाः, यानस्य वा भङ्गे–
गृहगोधिकायाः, कृकलासस्य वा शरीरे सर्पणे–
छत्रस्य, ध्वजस्य वा विनाशे–
काकमैथुनस्य, सर्पमैथुनस्य वा प्रेक्षणे च इयमेव शान्तिः कर्तव्या ।
इति यमलजननशान्तिः ।।

अथ सदन्तजननशान्तिः ।।

हेमाद्रौ, पाद्मे, विष्णुधर्मोत्तरे च––

'दन्तजन्मनि बालानां लक्षणं तन्निबोध मे ।
उपरि प्रथमं यस्य जायन्ते च शिशोर्द्विजाः ।।
दन्तैर्वा सह यस्य स्याज्जन्म भार्गवसत्तम ।
मातरं पितरं चैव खादत्यात्मानमेव च ।।

शान्ति तत्र प्रवक्ष्यामि तां मे निगदतः शृणु ।
गजपृष्ठस्थितं बालं नौस्थं वा स्नापयेद्बुधः ।।
तदभावे तु धर्मज्ञ काञ्चने च वरासने ।
सर्वौषधैः सर्वगन्धैर्बीजैः पुष्पैः फलैस्तथा ।।
पञ्चगव्यैः पञ्चरत्नैर्मृत्तिकाभिश्च[1] भार्गव ।
स्थालीपाकेन धातारं पूजयेत्तदनन्तरम् ।।
सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनम् ।
अष्टमेऽहनि विप्राणां तथा देया च दक्षिणा ।।
काञ्चनं रजतं गां च भुवं वा धान्यमेव च[2] ।।" इति ।

अद्भुतसागरे त्वत्र पञ्चदशी शान्तिरुक्ता । तत्रैव बृहस्पतिः –

"बालानामष्टमे मासि षष्ठे मासि ततः पुनः ।
दन्ता यस्य च जायन्ते माता वा म्रियते पिता ।।
बालकः पीड्यते तत्र स्वयमेव न संशयः ।
दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः ।।
जुहुयादष्ट च शतं प्राज्ञः मन्त्रेण मन्त्रवित् ।
धेनुं च दक्षिणां दद्यात्ततः संपद्यते शुभम् ।।' इति ।

प्रकारान्तरमुक्तं पद्मपुराणे--

'दन्तजन्मनि सामान्ये[3] शृणु स्नानमतः परम् ।
भद्रासने निवेश्यैनं मूर्ध्नि मूलफलैस्तथा ।।
सर्वौषधैः सर्वबीजैः सर्वगन्धैस्तथैव च ।
स्नापयेत्पूजयेच्चाथ वह्निसोमसमीरणान् ।।
पर्वतांश्च तथा ख्यातान् देवदेवं च केशवम् ।
एतेषामेव जुहुयात् घृतमग्नौ यथाविधि ।।
ब्राह्मणानां तु दातव्या यथाशक्त्या च दक्षिणा ।
ततस्त्वलङ्कृतं बालमासने तूपवेशयेत् ।।

---

[1] स्नापयेदित्यन्वयः । [2] दद्यादिति शेषः । [3] निषिद्धे इत्यर्थः ।

पूज्याश्चाविधवा नार्यो ब्राह्मणाः सुहृदस्तथा ।'
प्रथमोर्ध्वदन्तजनने ऽपि शान्तिप्रकारोऽयमेवानुष्ठेयः ।
इति सदन्तजननशान्तिः ।।

अथ त्रिकप्रसवशान्तिः ।।

स च शान्तिसर्वस्वे--

'सुतत्रये सुता चेत्स्यात्तत्त्रये वा सुतो यदि ।
मातापित्रोः कुलस्यापि तदाऽनिष्टं महद्भवेत् ।।
ज्येष्ठनाशो धने हानिर्दुःखं च सुमहद्भवेत् ।
जातस्यैकादशाहे वा द्वादशाहे शुभे दिने ।।
आचार्यमृत्विजो वृत्वा ग्रहयज्ञपुरः सरम् ।
ब्रह्मविष्णुमहेशेन्द्रप्रतिमाः स्वर्णतः कृताः ।।
पूजयेद्धान्यराशिस्थकलशोपरि संस्थिताः ।
पञ्चमे कलशे रुद्रं पूजयेद्रुद्रसंख्यया ।।
रुद्रसूक्तानि चत्वारि शान्तिसूक्तानि सर्वशः[1] ।
द्विज एको जपेद्धोमकाले शुचिसमाहितः ।।
आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरून् ।
अष्टोत्तरसहस्रं वा शतं वा त्रिशतं तु वा ।।
देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरः सरम् ।
ब्रह्मादिमन्त्रै[2]रिन्द्रस्य 'यत इन्द्रभयामहे[3]' ।।

---

[1] सूक्त जप गर्नाका निमित्त एकजना ब्राह्मणलाई वरण गर्नु पर्छ । ती ब्राह्मणले रुद्रकलशलाई छोएर अथवा हेरेर चारौटा रुद्रसूक्तहरू एघारपल्ट पढ्नु पर्छ । ती चार रुद्रसूक्तहरू यिनै हुन्–'कद्रुद्राय ९ मन्त्र, इमारुद्राय तवसे ११ मन्त्र, आते पितः १५ मन्त्र र इमारुद्राय स्थिरधन्वने ४ मन्त्र । यी सबै ऋग्वेदका सूक्तहरू हुन् र यी सबै नै परिशिष्टमा छन् । शान्तिसूक्त भनिएकोमा ऋग्वेदको शान्तिसूक्त पढेमा 'शन्न इन्द्राग्नी' यो सूक्त पढ्नु पर्छ । यजुर्वेदको पढेमा 'ऋचं वाचम्' को एक अध्याय सबै पढ्नु पर्छ ।

[2] ब्रह्मविष्णुमहेशमन्त्रैरित्यर्थः ।

[3] ॐ यतऽइन्द्र भयामहे ततो नोऽअभयं कृधि । मघवञ्छग्धि तव तन्नऽ ऊतिभिर्विद्विषो विमृधो जहि ।।

ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः ।
अभिषेकं कुटुम्बस्य कृत्वाऽऽचार्यं प्रतोषयेत् ।।
हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा तथा ।
प्रतिमा गुरवे देया उपस्करसमन्विताः ।।
आज्यस्य वीक्षणं कृत्वा शान्तिपाठं च कारयेत् ।'
इति त्रिकप्रसवशान्तिः ।।

अथ सिंहराशौ गोप्रसूते शान्तिः ।।

अद्भुतसागरे नारदः --

'भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ।।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ।
ततो होमं प्रकुर्वीत घृताक्तमधुसर्षपैः ।।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः[1] ।
सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ।।
वस्त्रयुग्मं च गां चैव सुवर्णं च प्रदापयेत्
इष्टदैवतमन्त्रेण ततः शान्तिर्भविष्यति ।।'

अथर्ववेदपरिशिष्टे--

'माघे बुधे च महिषी श्रावणे वडवा दिवा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ।।
विधानं तत्र कर्तव्यं नरेण हितमिच्छता ।
सौरैः सूक्तैः प्रकर्तव्यो होमः सूर्यस्य तुष्टये ।।
प्रधानं तिलसर्पिश्च पायसं शर्करायुतम् ।
सहस्रं हवनं प्रोक्तं दानान्यष्टौ यथाविधि ।।
प्रत्यृचं पायसं हुत्वा तां गां विप्राय दापयेत् ।

---

[1] इष्टदैवतमन्त्रेण जुहुयादिति दूरेणान्वयः । व्याहृतिभिर्वा होमः ।

अष्टौ दानानि--

तिला लोहं हिरण्यं च कार्पासं लवणं तथा ।।
सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतम् ।'

(माघे बुधवासरे प्रसूताया महिष्याः, श्रावणे दिवा प्रसूताया वडवाया अपि गोशान्तिप्रकारेण शान्तिप्रकारोऽनुष्ठेयः) ।

इति सिंहराशौ गोप्रसूते शान्तिः ।।

अथ बालग्रहशान्तिः ।।

मदनरत्ने, योगसारे--

"प्रथमेऽहनि गृह्णाति बालकं बालिनी ग्रही ।
तथा गृहीतमात्रस्य चेष्टितान्युपलक्षयेत् ।।
गात्रोद्वेगो निराहारो लाला ग्रीवानिवर्तनम् ।
लिम्पेत धातकीलोध्रमञ्जिष्ठातालचन्दनैः ।।
धूपयेन्महिषाक्षेण ततो मुञ्चति सा ग्रही[1] ।
मत्स्यमांससुराभक्ष्यगन्धस्रग्धूदीपकैः[2] ।।"

बलिमन्त्रः प्रयोगसारे--

"ॐनमश्चामुण्डे भगवति विद्युज्जिह्वे हाँ२ हीँ२ अपसरन्तु दुष्टग्रहा हुम्, तद्यथा गच्छन्तु यातान्यतः स्थाने रुद्रो ज्ञापयति स्वाहा, विद्युज्जिह्वे हाँ हीँ हुँ हुँ मुञ्च मुञ्च स्वाहा ।" इति ।

'बालग्रहाणां विद्येयं शस्ता बलिनिवेदने[3] ।'

बलिस्थानानि प्रयोगसारे--

'कदम्बश्च करञ्जश्च बिभीतो निम्ब एव च ।
अश्वत्थोदुम्बरश्चैव श्लेष्मातकवटौ तथा ।।

---

[1] एतैर्बालं लेपयेत्ततो मुञ्चतीत्यर्थः । एवं धूपने च । नारायणीये तु बलिदानानन्तरं बालस्य लेपनधूपने ।

[2] एतैर्बलिं दद्यादिति शेषः ।

[3] बलिश्च रवेरुदयेऽस्ते दिनार्धे वा देयः ।

मातृवृक्षाः क्रमेणोक्ताः पूर्वादीशान्तदिग्गताः ।
तेषामेकं समाश्रित्य बलिं दद्याद्यथोदितम् ।।
प्रतिस्थूलं प्रत्युदकं प्रतिवृक्षमथापि वा[1] ।
अत्राशायामनूक्तायां प्राक्प्रोक्ता नानुसारतः ।।
यत्र वा रोचते तत्र मातृणां बलिमाहरेत् ।
कृत्वा नीराजनान्तं बलिमिति विधिवद्बालमाहूय संस्पृ-
श्याद्भिस्तत्सर्वगात्रं शिरसि सकुसुमैरक्षतैर्भ्रामयित्वा ।
क्षिप्त्वाग्रे देवताया विधिवदुपहितैस्तत्र गीतैः सुमन्त्रैः
कुर्याद्रक्षां समीक्ष्य क्षणमिव विलयं याति दुष्टग्रहार्चिः ।।'

नीराजनमन्त्रोद्धारो नारायणीये--

'ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वैश्रवणस्तथा ।
रक्षन्तु त्वरितं बालं मुञ्च मुञ्च कुमारकम् ।'

कालगुणोत्तरे--

'पलाशाश्वत्थकापित्थबिल्वौदुम्बरपल्लवाः ।
पञ्चभङ्गाः स्मृता ह्येते बालानां हितकारकाः ।।
स्नापितं भूषितं बालं ततो मुञ्चति सा ग्रही ।'

प्रयोगसारेऽपि--

'पलाशोदुम्बरोऽश्वत्थबिल्वन्यग्रोधपल्लवाः ।
क्वथितेन कषायेन परिषिञ्चेत्प्रशान्तये[2] ।।'

अत्र मन्त्रः – 'ॐ नमश्चामुण्डे' इत्यादि । (बलिदाने पूर्वमुक्तः)

रक्षामन्त्रः प्रयोगसारे--

'रक्ष रक्ष महादेव नीलग्रीव जटाधर ।
ग्रहैस्तु सहितो रक्ष मुञ्च मुञ्च कुमारकम् ।।'

---

[1] स्थूलं– तटमिति शान्तियूखः, उच्चप्रदेश इति शान्तिसारः, कूलमित्यपि क्वचित्पाठः ।

[2] परिषिञ्चेत्– स्नापयेदिति मदनः, अभिषेक इति केचित् ।

अमुं मन्त्रं भूर्जपत्रे विलिख्य तत्पत्रं भुजे बध्नीयादिति मदनः । बालकशिखास्पर्शपूर्वकं जपे मन्त्र उक्तः । अन्यच्च प्रयोगसारे--

"ॐ सर्वमातर इमं ग्रहं संहरन्तु तुहु २ रोदय २ स्फोटय २ स्वाहा गर्ज २ सर २ गृह्ण २ आमर्दय २ हिम २ हन एवं सिद्धिं रुद्रो ज्ञापयति स्वाहा"

होमोऽपि तत्रैव--

"ॐ कुष्माण्डि भगवति सुरागिणि समुण्डिते मुञ्च २ दह २ पच २ सर २ गच्छ २ स्वाहा"

कृत्वा चतुष्पथे कुण्डं मन्त्रेणानेन तत्त्ववित् ।
त्रिरात्रं पञ्चरात्रं वा सहस्रं जुहुयात्तिलैः ।।
यान्ति दुष्टग्रहाः शान्ति बलिना चानुमोदिताः ।

बालरोदनपरिहारार्थं यन्त्रमुक्तं तत्रैव--

षडस्रमध्ये हींकारस्तन्मध्ये शिशोर्नाम विलिख्य षट्सु अस्रेषु 'ॐ लु लु व स्वाहा' इति मन्त्रस्य षडक्षराणि विलिख्य तद्बहिर्नमिवद्वितयं विलिख्य तद्बहिरधोमुखैरर्धचन्द्रैरावेष्टय पञ्चोपचारैः संपूज्य बालहस्ते बध्नीयादिति ।

बालग्रहस्तवः प्रयोगसारे--

"प्रणम्य शिरसा शान्तं गणेशानन्तमीश्वरम् ।
बालग्रहस्तवं वक्ष्ये समस्ताभ्युदयप्रदम् ।।

तपसा यशसा दीप्त्या वपुषा विक्रमेण च ।
निर्दिष्टो यः सदा स्कन्दः स नो देवः प्रसीदतु ।।

रक्तमाल्याम्बरधरो रक्तगन्धानुलेपनः ।
रक्तादित्योज्ज्वलः शान्तः स नो देवः प्रसीदतु ।।

यो नन्दनः पशुपतेर्मातृणां पावकस्य च ।
गङ्गोमाकृत्तिकानां च स नो देवः प्रसीदतु ।।

देवसेनापरिवृतो देवसेनार्चितः सदा ।
देवसेनापतिः श्रीमान् स नो देवः प्रसीदतु ।।
शक्तिः शक्तिधरापूरः कुमारः शिखिवाहनः ।
सुरारिहा महासेनः स नो देवः प्रसीदतु ।।
प्रकृत्या सुन्दरो दान्तो देवैश्वर्योदयान्वितः ।
नानाविनोदसंपन्नः स नो देवः प्रसीदतु ।।
प्रबोधा सुप्रबोधा च बोधना सुप्रबोधना ।
प्रबुद्धा च प्रबोधा च सुप्रीता सुमनास्तथा ।।
मनोन्मनीति विख्याता योगिन्यः पान्तु बालकम् ।
सुव्रता रुक्मिणी चैव मन्दवेगा विभीषणा ।।
विद्युज्जिह्वा महानासा शतानन्दा तथा परा ।
बालदा प्रमदा चेति योगिन्यः पान्तु बालकम् ।।
हरिणी चाथ वाराही वानरी क्रोष्टुकी तथा ।
कुवेरी कोटराक्षी च कुम्भकर्णा च चण्डिनी ।।
बला विकारिणी चेति योगिन्यः पान्तु बालकम् ।
शुद्धा विशुद्धा श्रद्धा च योगा सिद्धा मितंवदा ।।
सुभगा शुभदा गौरी बला विकरिणीति च ।
नानाविज्ञानविख्याता योगिन्यः पान्तु बालकम् ।।
लम्बा प्रलम्बा च तथा लम्बकर्णा च लम्बिका ।
ज्वाला कराली कालिन्दी कालिकेति यथोदिताः ।।
स्वच्छन्दाचारसंपन्ना योगिन्यः पान्तु बालकम् ।
प्रणीता सुप्रणीता च मालिनी विश्वमालिनी ।।
विमला कमला माली लोला रौद्री च विश्वदा ।
विचरन्त्यो यथाकामं योगिन्यः पान्तु बालकम् ।।
वायुवेगा महावेगा सुवेगा वेगवाहिनी ।
शशिनी हंसिनी हृष्टिः पुष्टिः पौष्टिकसिद्धिदा ।।

दिव्यानुभावा वाहिन्यो योगिन्यः पान्तु बालकम् ।
भ्रमिगी भामिनी नित्या निर्भिन्ना सुभगा गुहा ।।
क्लेदिनी द्राविणी वामा योगिन्यः पान्तु बालकम् ।
रुद्रशक्तिविनिष्क्रान्तमेकाशीतिक्रमोदितम् ।।
योगिनीवृन्दमेतद्धि सिद्धविद्याधरार्चितम् ।
स्कन्दग्रहाधिदैवं तद्बालकं पातु सर्वदा ।।
शङ्कुनी रेवती देवी शिखा च मुखमण्डिका ।
प्रलम्बा पूतनाख्या च कटपूतनिका पुनः ।।
विजया गोमुखी धूम्रा मुण्डमाला तथा परा ।
अधोलम्बा च पद्मा च कुमुदाप्यथ चाम्बिका ।।
भानिनी चैव काली च देवी प्रेतमुखी तथा ।
ऐन्द्री मार्जारिका भूयः कुरुणी च शुभा कृशा ।।
कालरात्रिश्च माया च लोहिता पिलिपिञ्चिका ।
भीतारणी चक्रवादा भीषणा दुर्जया परा ।।
तापनी कटकोली च मुक्तकेशी महाबला ।
अहङ्कारी जया तद्वदजमेषा त्रिदण्डिका ।।
रोदनी मुकुटाभिख्या ललाटा पिङ्गला तथा ।
शीतला बालिनी चैव तापसी पापराक्षसी ।।
मानसा धनदा देवी बलानावर्तिनी तथा ।
यमुना जातवेदा च मानिनी कलहंसिनी ।।
बालिका देवदूती च वायसी यक्षिणी तथा ।
स्वच्छन्दा पालिका चैव वासिनी चाम्बिकेति च ।।
पञ्चाशत्तु कुलोत्पन्नाश्चतुःषष्टिसमीरिताः ।
योगिन्यो नित्यसन्तुष्टाः स्कन्दापस्मारदेवताः ।।
नानारक्षाधिकारस्था बालकं पान्तु सर्वदा ।
महालक्ष्मीर्महातङ्गा महासेना महाबला ।।

महाकम्पा महाभीमा महातेजा महोत्सवा ।
महासेना महाचण्डा मोहिनी वीरनायिका ।।
एकवीरा विशालाक्षी सुकेशी सुमनास्तथा ।
सुकेशिनी च सन्तुष्टा दण्डिनी च विलम्बिनी ।।
भामिनी चाथ सौवर्णी सिंहवक्त्रा कटङ्किनी ।
भ्रमरा चञ्चला चम्पा सिद्धिदा च तथापरा ।।
शातोदरी धृतिः स्वाहा स्वधाख्या च सनातनी ।
शम्बरा च तथा देवी नीलग्रीवा तथाम्बिका ।।
वितला गन्धिनी वामा क्रीडन्ती चैव वाहिनी ।
कर्षिणी मालती फुल्ला कालकर्णी च चण्डिका ।।
चित्रानना गुहा चेति पार्वती सङ्गतिर्गता ।
पञ्चाशन्नवसंपन्ना शकुनी दैवतप्रिया ।।
योगिन्यः कामरूपिण्यो बालकं पान्तु सर्वदा ।
विश्वंतपा प्रभावज्ञा सर्वज्ञा सर्वगा गुहा ।।
दुर्गा सरस्वती ज्येष्ठा श्रेष्ठा पद्मा परापरा ।
प्रमदा रोहिणी शीता प्रह्वी प्रह्लादिनी विभा ।।
विभूतिर्विततिः प्रीतिः प्रकृतिः प्रमतिर्यथा ।
एता भगवता सृष्टा योगिन्यो योगसिद्धिदाः ।।
पञ्चविंशतिराख्याता रेवती शक्तिगोचरा ।
जगदाप्यायनकरा बालकं पान्तु सर्वदा ।।
नन्दश्चैवोपनन्दश्च गोमतिः सुमतिस्तथा ।
विद्युज्जिह्वो महाकालः करालस्तिमिलोचनः ।।
तेजहोडा विरूपाक्षो गोमुखो वडवामुखः ।
कालाननः करालश्च शङ्कुकर्णो विभीषणः ।।
एते शकुन्दनोत्पन्ना वीराः षोडश राक्षसाः ।
पूतना देवता जुष्टा बालकं पान्तु सर्वदा ।।

वज्रिणी शक्तिनी चाढ्या दण्डिनी खड्गिनी तथा ।
पाशिनी ध्वजिनी देवी गदिनी शूलिनी परा ।।
पविनी चक्रिणी चेति सर्वाकारा भयप्रदाः ।
एता दिङ्निर्मिता देव्यो योगिन्यो देवकीर्तिताः ।।
अधिभूतप्रधाना या पायात् सा शान्तपूतना ।
प्रसन्ना मातरः सर्वा बालकं पान्तु सर्वदा ।।
अर्थको जलको भूमा उग्रः स्कन्दश्च कीर्तितः ।
वीरेशाः पितृभिः सृष्टा नैजमेषाधिदेवताः ।।
पञ्चशक्तिप्रधानास्ते बालकं पान्तु सर्वदा ।
आदित्या वसवो रुद्राः पितरो मरुतस्तथा ।।
मुनयो मनवः काला ग्रहयोगाः सनातनाः ।
सिद्धाः साध्याश्च गन्धर्वा देव्यश्चाप्सरसां वराः ।।
विद्याधरा महादैत्या बालकं पान्तु सर्वदा ।
सहजा योगजा चैव वीरजा मन्त्रजा तथा ।।
योगिन्यो योगवनिता नानाविभवगोचराः ।
भवानीनामसन्तुष्टा बालकं पान्तु सर्वदा ।।
भूर्लोके च भुवर्लोके स्वर्लोके याश्च मातरः ।
अधश्चोर्ध्वं च तिर्यक्च क्रीडन्त्योऽनन्तमूर्तयः ।।
प्रसन्नयोगसंपन्ना दिव्यैश्वर्यसमन्विताः ।
स्वच्छन्दपदसम्भूतैर्भैरवैः परिवारिताः ।
रक्षन्तु बालकं प्रीताः शान्तिर्नयतु चेतसा ।
दिव्यं स्तोत्रमिदं पुण्यं बालरक्षाधिकारकम् ।।
जपेत् सन्तानरक्षार्थं बालद्रोहोपशान्तिदम् ।"
इति बालग्रहस्तवः ।

इदं च स्तवान्तकृत्यमाद्यमासवर्षयोर्द्वितीयादिदिनमासवर्षेष्वपि कार्यम् । विशेषस्तूच्यते कुमारतन्त्रे–

(१)– "प्रथमे दिवसे मासे वर्षे वा योगिनी तदा ।
अथवा नन्दिनी नाम्ना पूतनाऽऽक्रमते शिशुम् ॥
तद्गृहीतस्य बालस्य ज्वरः स्यात्प्रथमं ततः ।
गात्रशोषश्च वैवर्ण्यं नाहारेच्छा भृशं भवेत् ॥
छर्दिर्मूर्छा च कम्पश्च हीनज्वरयुतस्तथा ।
विधानं तत्र वक्ष्यामि येन मुञ्चति पूतना ॥
नदीमृत्तिकया कुर्याच्छोभनां पुत्रिकां ततः ।
शुक्लौदनं शुक्लगन्धस्तथा शुक्लानुलेपनम् ॥
शुक्लपुष्पाणि वै पञ्च ध्वजाः पञ्चप्रदीपिकाः ।
स्वस्तिकाः पञ्च पूर्वाह्णे पूर्वस्यां दिशि संयतः ॥
बलिं दद्यादथो श्वेतसर्षपोशीरमेव वा ।
शिवनिर्माल्यमार्जारनृकेशान्निम्बपत्रकम् ॥
गव्यं घृतं चेत्येतेन धूपयेच्चैव बालकम् ।
एवं दिनत्रयं कृत्वा चतुर्थे शान्तिवारिणा[1] ॥
स्नापयेद्बालकं पश्चाद्भोजयेच्चापि भिक्षुकम् ।
क्षीरेण भोजयेदेवं सुस्थो भवति बालकः ॥"

(२)– "द्वितीयदिवसे मासे हायने वा सुनन्दना ।
गृह्णाति पूतना बालं योगिनी स्वस्तनापि वा ॥
ततो भवेज्ज्वरः पूर्वं सङ्कोचो हस्तपादयोः ।
दन्तान् प्रखादत्यनिशं निमीलयति चक्षुषी ॥
आहारं च न गृह्णाति दिवारात्रं च रोदिति ।
अक्षिरोगं छर्दनं च भवेद्भीतिः पुनः पुनः ॥
कृशत्वं च प्रजायेत इत्येतच्छिशुलक्षणम् ।
तण्डुलप्रस्थपिष्टेन विनिर्मायाथ पुत्रिकाम् ॥

---

[1] शान्तिवारिणेति– 'शन्न इन्द्राग्नी, शन्नो वातः' इत्यादिकैः स्वस्वशाखापठितैर्मन्त्रैरभिमन्त्रितं वारि शान्तिवारि ।

त्रयोदशध्वजा दीपाः स्वस्तिका यवलोदना ।
प्रस्थप्रमाणपिष्टेन सिद्धापूपाश्च मत्स्यकाः ।।
मांसं चेत्येतदखिलं पश्चिमायां दिशि क्षिपेत् ।
पश्चिमायां च सन्ध्यायामेतद्दद्याद्दिनत्रयम् ।।"
धूपशान्तिस्नानब्राह्मणभोजनानि पूर्ववत् ।

(३)– "तृतीये दिवसे मासे वर्षे वा पूतनाभिधा ।।
गृह्णीयाद्योगिनी बालं ततः पूर्वं ज्वरो भवेत् ।
प्रस्थप्रमाणपिष्टेन पुत्रिकां कारयेत्ततः ।।
रक्तौदनं ध्वजो रक्तः स्वस्तिको रक्त एव च ।
रक्तपुष्पं रक्तगन्धस्तथा रक्तानुलेपनम् ।।
पश्चिमायां च सन्ध्यायामुदीच्यां निक्षिपेद्बलिम् ।"
धूपशान्तिस्नानब्राह्मणभोजनानि पूर्ववत् ।

(४)– "चतुर्थेऽहनि मासे तु वर्षे गृह्णाति बालकम् ।
तुषमण्डनिका नाम पूतना चाथ योगिनी ।।
भीषणाख्या ततस्तस्य जायते प्रथमं ज्वरः ।
गात्रभङ्गोऽस्थितिर्मूर्ध्नो वैवर्ण्यं चाक्षिमीलनम् ।।
वैकल्यं श्यामता श्वासः कासोऽरुचिरितीङ्गितम् ।
तिलपिष्टमयैः कृत्वा पुत्रिकां बिल्वकण्टकैः ।।
अष्टाङ्गं रचयेत्पुष्पयुक्तं शुक्लध्वजोऽर्जुनः ।
स्वस्तिकोऽर्धप्रस्थसिद्धं भक्तं तावदपूपकाः[1] ।।
त्रिसन्ध्यं पश्चिमाशायां बलिं दद्यात्प्रयत्नतः ।
गोशृङ्गं सर्पनिर्मोकं लशुनं निम्बपत्रकम् ।।
मनुष्यकेशमार्जारलोमान्याजघृतं तथा ।
एतैश्च धूपयेदेकनिशि सन्ध्यात्रयेऽपि च[2] ।।"

---

[1] 'तावदपूपकाः' इति अर्धप्रस्थपरिमितेनान्नेन कृता इत्यर्थः ।

[2] 'एकनिशि'– एकस्मिन्नेव दिने बलिरित्यर्थः ।

शान्तिस्नानमन्त्रब्राह्मणभोजनानि च पूर्ववत् ।

(५)- "पञ्चमे दिवसे मासे वर्षे वा पूतना शिशुम् ।
विडालिकाख्या गृह्णीयात्प्रथमं जायते ज्वरः ।
हिक्का श्वासश्च शूलं च गात्रभङ्गोऽरुचिस्तथा ॥

तण्डुलप्रस्थपिण्डेन निर्माथाथोरुपुत्रिकाम् ।
शुक्लौदनं ध्वजाः पञ्च स्वस्तिकाः पञ्च चोज्ज्वलाः ॥

पञ्चदोषास्त्रशुक्लानि कुसुमानि च चन्दनम् ।
अपराह्णे वृक्षमूले पश्चिमायां दिशि क्षिपेत् ॥"

धूपस्तु- 'गोशृङ्गं सर्पनिर्मोक' मित्यादिकः । शान्तिस्नानमन्त्रब्राह्मणभोजनानि पूर्ववत् ।

(६)- "षष्ठेऽहनि तथा मासे हायने चापि बालकम् ।
पूतना शकुनिर्नाम गृह्णीयात्तदनन्तरम् ॥

ज्वरउद्वेजनं गात्रे शोषः श्वासोऽरुचिस्तथा ।
काशश्च हस्तपादाक्षिसङ्कोचश्चेति लक्षणम् ॥

तण्डुलप्रस्थपिष्टेन विनिर्माथाथ पुत्रिकाम्
कृष्णौदनं ध्वजाः पञ्च कृष्णाः स्वस्तिकपञ्चकम् ॥

कृष्णमेवाथ मत्स्याँश्च पायसं दुग्धमेव च ।
मांसं चापूपकास्त्वर्धप्रस्थपिष्टविनिर्मिताः ॥
अपराह्णे पश्चिमायां निक्षिपेद्बलिपुत्रिकाम् ।
पुत्रिकां पूर्ववत्कृत्वा पललं शूलपाचितम् ॥
मत्स्याः पर्पटिकाश्चैव रक्तं च प्रस्थसंमितम् ।
उदीच्यां पूर्वसन्ध्यायां बलिर्देयः प्रशान्तये ॥"

अत्र बलिदानयोर्विकल्पः । तयोरेव कालयोर्बालकस्य धूपो देयः । धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् । बलिदाने पूजायां मन्त्रस्तु- 'ॐ फट् फट् स्वाहा' इति ।

(७)- "सप्तमे दिवसे मासे वर्षे वा शुष्करेवती ।
गृह्णाति पूतना बालं ततः स्यात्प्रथमं ज्वरः ।।
गात्रभङ्गोऽथ विद्वेष आहारे कम्परोदने ।
इत्येतल्लक्षणं तत्र बलिर्देयः प्रशान्तये ।।
प्रस्थसंमितपिष्टेन सम्यक् कृत्वाथ पुत्रिकाम् ।
सप्तध्वजाः सप्तदीपाः स्वतिकाः सप्त वै तथा ।।
पुष्पाणि मत्स्यमांसं च भक्तं चेत्युदगाहरेत् ।"

धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् । मन्त्रस्तु-
'ॐ ह्रीँ फट् स्वाहा' इति ।

(८)- "अष्टमे दिवसे मासे वर्षे चाक्रमते शिशुम् ।
विडालिका नामधेया पूतनास्य ततो ज्वरः ।।
गात्रभेदोऽत्र रुदितं रोदनं नेत्रमीलनम् ।
जिह्वाशोषः शिरस्फोट आहारद्वेष एव च ।।
अक्षिरोगो भवेदेतदिङ्गितं तद्ग्रहाच्छिशोः ।
तण्डुलप्रस्थपिष्टेन पुत्तलां कारयेत्ततः ।।
पायसं मधु सर्पिश्च क्षीरलाजाश्च शष्कुली ।
गुग्गुलं मेषमांसं च तथा पर्पटिका अपि ।।
ध्वजा दीपाश्च चत्वारो गन्धा नानाविधा अपि ।
सुमनांसि च रक्तानीत्येवं मन्त्रोदितो बलिः ।।
अमुं समाहरेत् पूर्वं सन्ध्यायां दक्षिणादिशि ।
कृष्णाष्टम्यां वक्ष्यमाणमन्त्रेणानेन संयतः ।।"

'ॐ नमो नारायणाय त्रैलोक्यविद्रावणाय ॐ ह्रीँ फट् स्वाहा'। अनेनैव मन्त्रेण पूजादिबलिहरणान्तं कर्म कुर्यात् । धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् । अत्र कृष्णाष्टम्यां बलिहरणमिति न नियमार्थम् । किन्तु सति सम्भवे प्राशस्त्यर्थम् । अन्यथा तत्प्रतीक्षायां शिशुविनाशापत्तेः ।

(९)- “नवमे दिवसे मासे हायने वापि बालकम् ।
गृह्णाति मदनानाम्नी पूतना तदनन्तरम् ।।
ज्वरश्छर्दिर्व्रणाध्मानं कासःश्वासश्च तृषणता ।
गात्रभङ्गश्च शूलं च चिह्नान्येतानि बालके ।।
प्रस्थमात्रेण पिष्टेन विनिर्माय च पुत्रिकाम् ।
ओदनं मत्स्यमांसं च पर्पटीं चेक्षुमूलिकाम् ।।
निक्षिपेत्पूर्वसन्ध्यायामुत्तरस्यां बलिं दिशि ।”

अत्र मन्त्रः- ‘ॐ नमो भगवते वासुदेवाय कृष्णमण्डले बलिमादाय हर हुं फट् स्वाहा’ । धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् ।

(१०)- “दशमे दिवसे मासे हायने वाथ बालकम् ।
पूतना रेवतीनाम्नी गृह्णीयाद्बालकं ततः ।।
ज्वरश्छर्दिः कासश्वासौ शूलं चेत्येतदीरितम् ।
यत्र द्वेषश्च तत्रायं बलिर्देयो विचक्षणः ।।
प्रस्थप्रमाणपिष्टेन पुत्रिकां तत्र कल्पयेत् ।
अष्टाङ्गं लेखयेत्तत्र बिल्ववृक्षस्य कण्टकः ।।
गुडौदनं च सर्पिश्च ध्वजानां पञ्चविंशतिः ।
स्वस्तिकानां प्रदीपानां पञ्चविंशतिरेव च ।।
चत्वारि रक्तपुष्पाणि ह्येतद्दक्षिणदिग्गतः ।
सन्ध्यात्रये वक्ष्यमाणमन्त्रेणानेन निक्षिपेत् ।।”
‘ॐ नमो भगवते वासुदेवाय हन हुं फट् स्वाहा’ ।

धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् ।

(११)- “एकादशदिने मासे हायने पूतनार्चिका ।
गृह्णाति बालकं पश्चाज्ज्वरस्तस्य प्रजायते ।।
अन्नद्वेषो मुखे शोषो गात्रभङ्गश्च रोदनम् ।
ऊर्ध्वदृष्टिरपीत्येतल्लक्षणं तद्गृहाच्छिशोः ।।

पुत्रिकां माषपिष्टेन रचित्वा शुक्लमोदनम् ।
पुष्पाण्यपि च शुक्लानि ध्वजानां पञ्चविंशतिः ।।
स्वस्तिकानां प्रदीपानां पञ्चविंशतिरेव च ।
एतत्सर्वं यमाशायां सन्ध्यायां प्रातराहरेत् ।।"

अत्र मन्त्रः– 'ॐ नमो भगवते ताराय चन्द्रहासवज्रहस्ताय ज्वल दुष्टग्रहाय ॐ फट् स्वाहा' । धूपस्तु गोशृङ्गलशुनादिकः । शान्तिस्नानं ब्राह्मणभोजनं च प्रथमदिवसमासवर्षगृहीतपूतनाहरोक्तं द्रष्टव्यम् ।

(१२)– "द्वादशे दिवसे मासे वर्षे वा पूतना शिशुम् ।
अद्भुताख्या प्रगृह्णाति ज्वरः स्यात्प्रथमं ततः ।।
रोदनं सर्वदा दन्तखादनं रक्तनेत्रता ।
रोमाञ्चस्ताप इत्येतदखिलं तस्य लक्षणम् ।।
तण्डुलप्रस्थपिष्टेन कृत्वा तन्नामपुत्रिकाम् ।
त्रयोदशस्वस्तिकाश्च ध्वजा दीपास्त्रयोदश ।।
अपूपा मत्स्यमांसं च तथा पर्पटिका अपि ।
एतत्सर्वं दक्षिणस्यां दिशि मन्त्रेण निक्षिपेत् ।।"

मन्त्रस्तु– 'ॐ नमो नारायणाय ज्वल वज्रहस्ताय हर हर शोषय२ मर्दय२ पातय२ हन२ दुष्टसत्त्वानां हुं फट् स्वाहा' । गोशृङ्गादिको धूपः शान्तिस्नानं ब्राह्मणभोजनं च पूर्ववत् । इति बालग्रहशान्तिः ।।

अथ ज्वरादिरोगोत्पत्तौ शान्तयः ।

तत्रादौ तिथिषु । अत्र बौधायनः–

प्रतिपदि कष्टं सन्देहो वा दिनान्यष्टादश, अग्निर्देवता 'अग्निरश्मि' इति पूजामन्त्रः, हैमी प्रतिमा, घृतधूपो घृतदीपश्च, यथासम्भवं नैवेद्यं, घृतं होमद्रव्यं, शान्तिर्भवति । अत्र सर्वत्र प्रथमं तत्तत्तिथिदेवतामन्त्रजपः सहस्रसङ्ख्याकः, पश्चात् पूजाहोमदानादि होमसङ्ख्या चाष्टोत्तरशतादिर्व्याधितारतम्येन कल्प्या । सहस्रं मृत्युनिर्देशः ।

द्वितीयायां दिनानि षोडश, ब्रह्मा देवता, 'ब्रह्म जज्ञानम्' इति जपपूजाहोममन्त्रः, अगुरुर्धूपः, घृतदीपः, सर्वत्र शर्करानैवेद्यं, तिलचर्वाज्यानि होमद्रव्यं, प्रतिमा च हैमी ।

तृतीयायां दिनानि नव, पार्वती देवता, 'गौरीर्मिमाय' इति मन्त्रः, दूर्वाभिः पूजा, कुङ्कुमधूपः (गुग्गुलुर्वा), घृतदीपः, द्राक्षा क्षीराज्यं नैवेद्यं, पायसं मधुराक्तं दूर्वाश्च होमद्रव्यं, प्रतिमा हैमी ।

चतुर्थ्यां दिनानि षोडश, गणपतिर्देवता, 'गणानान्त्वा' इति पूजाहोमादिमन्त्रः, हैमी प्रतिमा, कुङ्कुमं रक्तचन्दनं गन्धः, करवीरादिनी पुष्पाणि, अगुरुर्धूपः, घृतदीपः, लड्डुका इक्षुखण्डानि नैवेद्यं, नारिकेलशकलानि कदलीफलानि च होमद्रव्यम् ।

पञ्चम्यां दिनान्येकविंशतिः, नागा देवताः, हैमी प्रतिमा, 'नमोस्तु सर्पेभ्यः' इति मन्त्रः, चन्दनं गन्धः, सुरभि पुष्पाणि, घृतधूपः, पयोनैवेद्यं, तिलयवाज्यपायसशर्करामधूनि यथायोगं होमद्रव्यम् ।

षष्ठ्यां दिनानि द्वादश, स्कन्दो देवता, 'द्रप्सश्चस्कन्द' इति पूजामन्त्रः, पीतं चन्दनं (रक्तं वा), रक्तानि पुष्पाणि, (जातिपुष्पाणि वा), जटामांसीधूपः, लड्डुकादिनैवेद्यं (फलानि वा), तिलयवाज्यं होमद्रव्यं, हैमी प्रतिमा, शान्तिर्भवति ।

सप्तम्यां दिनान्यष्टौ, दिननाथो देवता, 'आसत्येन, आकृष्णेन' इति वा मन्त्रः, हैमी ताम्रजा वा प्रतिमा, कुङ्कुमं गन्धः, करवीरादीनि पुष्पाणि, गुग्गुलो धूपः, शर्कराघृतसंयुतं पायसं नानाफलानि च नैवेद्यं, अर्कसमिधः, पायसं होमद्रव्यम् ।

अष्टम्यां दिनानि त्रयोदश, ईश्वरो देवता, 'तमीशानम्' इति पूजामन्त्रः, राजती प्रतिमा, कर्पूरमिश्रितं चन्दनं वा गन्धः, बिल्वदलान्यर्कपुष्पाणि नीलोत्पलानि च पुष्पाणि, जटामांसी धूपः, पायसं नानाभक्षाश्च नैवेद्यं, मधुराक्तास्तिला होमद्रव्यं, साङ्गशान्तिर्भवति ।

नवम्यां दिनान्यष्टादश, भगवती दुर्गा देवता 'जातवेदसे' इति पूजामन्त्रः, हैमी प्रतिमा, रक्तचन्दनं कुङ्कुमं वा गन्धः, जपाकुसुमादिकं पुष्पं, गुग्गुलुर्धूपः, घृतपक्वं नैवेद्यं, त्रिमधुराक्तं पायसं, होमद्रव्यं, देव्यै दधिभक्तपात्रदानं तद्भक्ताय वा ।

दशम्यां दिनानि पञ्चविंशतिः, यमो देवता, हैमी लौही वा प्रतिमा, 'यमाय त्वा' इति पूजामन्त्रः, चन्दनं मृगमदश्च गन्धः, मधु सर्जरसश्च धूपः, तिलतैलदीपः, बिल्वपत्राणि कृष्णतिलाश्च पूजाद्रव्यं, कृशरान्नं नैवेद्यं, घृतं मधुतिलमुद्गा होमद्रव्यम् ।

एकादश्यां दिनानि सप्त, विश्वेदेवा देवता, 'विश्वेदेवास' इति मन्त्रः, हैमी प्रतिमा, श्वेतचन्दनगन्धः, कृष्णागुरुर्धूपः, घृतदीपः, तुलसीपत्राणि पूजायां (पुष्पाणि) यवमोदकं नैवेद्यं, तिलयवमध्वाज्यं होमद्रव्यम् ।

द्वादश्यां दिनानि दश, रुद्रो देवता, 'या ते रुद्र' इति मन्त्रः, हैमी प्रतिमा, चन्दनं श्रीखण्डं, अगुरुर्धूपः, घृतदीपः, पायसं नैवेद्यं, चम्पकं कमलं वा पुष्पं, तिलयवाज्यव्रीहिमधूनि होमद्रव्यं, शान्तिर्भवति ।

त्रयोदश्यां दिनान्यष्टौ, शशी देवता, रौक्मी राजती वा मूर्तिः, 'आप्यायस्व' इति मन्त्रः पूजादौ, श्वेतचन्दनं गन्धः, चन्दनधूपः, घृतदीपः, दधिशर्करा नैवेद्यं, तिलयवास्त्रिमध्वक्ता होमद्रव्यं शान्तिर्भवति ।

चतुर्दश्यां दिनानि द्वाविंशतिः, शम्भुर्देवता, रौक्मी राजती वा मूर्तिः, 'नमः शम्भवाय' इति मन्त्रः, श्वेतचन्दनं गन्धः, अर्कपुष्पं बिल्वदलानि वा पूजायाम्, अगुरुर्धूपः, पायसं नैवेद्यं, त्रिमध्वक्तास्तिला होमद्रव्यम् ।

अमायां दिनान्यष्टादश, शची देवता, हैमी प्रतिमा, 'होता यक्षत्[1]' इति मन्त्रः, कुङ्कुमादिगन्धः, नानासुगन्धपुष्पाणि, कृष्णा-

---

[1] 'होता यक्षत्तिस्रो देवीः' (शु. य. २८ अ. ८ मं.) यो मन्त्रमा 'इन्द्रपत्नी' शब्द भएकोले मन्त्र यही हो ।

गुरुर्धूपः, फेणिका पूरिकादिनैवेद्यं, शर्कराघृतपायसं होमद्रव्यम् ।

पूर्णिमायां दिनानि षोडश, चन्द्रो देवता, दमनकं पूजार्थं (पुष्पम्), अन्यत्सर्वं त्रयोदशीशान्तावुक्तं ग्राह्यम् ।

इति तिथिदोषशान्तिः ।

अथ वारशान्तयः ।।

तत्राश्वलायनः–

आदित्यवारस्य रुद्रो देवता, हैमी राजती वा मूर्तिः, 'या ते रुद्र' इति मन्त्रः, चन्दनं गन्धः, अगुरुर्धूधः, घृतदीपः, पायसं नैवेद्यं होमद्रव्यं च ।

सोमवारस्य पार्वती देवता, हैमी राजती वा मूर्तिः, 'गौरीर्मिमाय' इति मन्त्रः, कुङ्कुमगन्धः, सुगन्धिपुष्पम्, अगुरुर्धूपः, घृतदीपः, नानाभक्ष्याणि नैवेद्यं, तिलयवा होमद्रव्यं देवभक्तसन्तर्पणं च ।

भौमस्य स्कन्दो देवता, अन्यत्सर्वं षष्ठीशान्तिवत् ।

बुधवारस्य विष्णुर्देवता, हैमं स्वरूपं, 'विष्णो रराटम्' इति मन्त्रः, पीतचन्दनं, पीतपुष्पाणि कमलानि च, अगुरुर्धूपः, घृतदीपः, यवलड्डुका नैवेद्यं, तिलयवाज्यहोमः ।

गुरुवासरस्य ब्रह्मा देवता, हैमी प्रतिमा, 'ब्रह्मजज्ञानम्' इति मन्त्रः, कुङ्कुमगन्धः, पर्णपुष्पं, गुग्गुलुर्धूपः, शर्कराज्यं नैवेद्यं, तिलयवधानाघृतं होमद्रव्यम् ।

शुक्रवासरस्य इन्द्रो देवता, हैमी राजती वा मूर्तिः, 'त्रातारमिन्द्रम्' इति मन्त्रः, चन्दनं गन्धः, चम्पकं पुष्पम्, अगुरुर्धूपः, घृतपक्वं नैवेद्यं, तिलयवाज्यमधूनि होमद्रव्यम् ।

शनिवासरस्य यमो देवता,हैमी लौही वा प्रतिमा,(ताम्रजेति केचित्) 'यमेन दत्तम्' इति मन्त्रः, चन्दनगन्धः, कृष्णं पुष्पं, मधु धूपः, तिलतैलदीपः, मधुमत्स्याश्च नैवेद्यं, तिला मधु च होमद्रव्यं शान्तिर्भवति ।

इति वारशान्तिः ।

अथ नक्षत्रशान्तयः ।।

(तत्रादौ सामान्यशान्तिविधिः)

वृद्धवसिष्ठः—

“रोगशान्तिं प्रवक्ष्यामि रोगार्तानां शरीरिणाम् ।
बलिपूजाङ्गहोमैश्च जपब्राह्मणभोजनैः ।।
यस्मिन् धिष्ण्ये यदा नृणां रोगः संजायते तदा ।
तद्धिष्ण्यपूजा कर्तव्या तत्तदीश्वरतुष्टये ।।
सुवर्णेन प्रमाणेन तदर्धार्धेन वा पुनः ।
धिष्ण्येशप्रतिमा कल्प्या यथावित्तानुसारतः ।।
ईशान्यामथवा प्राच्यामुदीच्यां दिशि संलिखेत् ।
तण्डुलोपर्यष्टदलं पद्मं गोमयमण्डले ।।
पञ्चामृतैः सलेपैश्च तत्तन्मन्त्रैः पृथक् पृथक् ।
स्नाप्य कल्पोक्तमन्त्रेण प्रतिमां स्थापयेत्पुनः ।।
कर्णिकायां सुसंस्थाप्य ध्यात्वा देवं समर्चयेत् ।
तद्वर्णवस्त्रगन्धाद्यै रक्तधूपोपहारकैः ।।
आरक्तवर्णं कुम्भं च पञ्चत्वक्पल्लवैर्युतम् ।।
शुक्लवस्त्रस्वर्णरत्नसर्वौषधिसमन्वितम् ।।
मृत्पञ्चगव्यसद्बीजफलक्षौद्रकुशान्वितम् ।
देवस्य पूर्वतः स्थाप्यं जलमन्त्रैः समर्चयेत् ।।
प्रतीच्यां स्थण्डिले वह्निं विधिवत्स्थापयेत्ततः ।
मुखान्ते जुहुयादुक्तद्रव्येणाष्टसहस्रकम् ।।
तिलहोमं व्याहृतिभिरष्टोत्तरसहस्रकम् ।
पूर्णाहुतिं च जुहुयात्सम्यक् जपादिपूर्वकम् ।।
ततः शुद्धोपविष्टस्य रोगिणः प्राङ्मुखस्य च ।
मन्त्रपूतैः कुम्भजलैरब्लिङ्गैर्वारिमन्त्रकैः ।।

मार्जनं कारयेत्तस्य सम्यक् सङ्कल्पपूर्वकम् ।
नीराजनं च शुद्धात्मा पूजास्थानं समागतः ।।
देवं हुताशनं भक्त्या प्रणम्य प्रार्थयेदिति ।
अमृतोद्भव धिष्ण्येश यतस्त्वं शङ्करात्मकः ।।
रोगादस्माच्च मां रक्ष तव वश्यश्च धिष्ण्यपः ।
इति प्रार्थ्य ततो दद्यात् प्रतिमां वस्त्रसंयुताम् ।।
दक्षिणासहितां भक्त्या आचार्याय कुटुम्बिने ।
ब्राह्मणाय यथाशक्त्या ब्राह्मणान्भोजयेत्ततः ।।
कृत्वा नक्षत्रपूजान्तं तिथिवासरयोरपि ।
सर्वान् कामानवाप्नोति रोगी रोगात्प्रमुच्यते ।।"
इति सामान्यशान्तिविधिः ।

अथ विशेषशान्तिविधिः ।।

(१) —"अश्विन्यामुत्थितो व्याधिर्नवरात्रेण मुञ्चति ।
देवस्यत्वेति मन्त्रस्य गायत्री कश्यपोऽश्विनौ ।।
श्वेतवर्णौ सुधापूर्णकलशाम्भोजधरौ पृथक् ।
चन्दनोत्पलपुष्पाज्यगुग्गुलौ तु गुडप्रियौ ।।
क्षीरलड्डुकभोक्तारौ समिधः क्षीरवृक्षजाः ।
गुडौदनबलिं दद्याद्दीपैः सार्धं निशामुखे ।।"

(२) —"भरण्यामुत्थितो व्याधिरचिरान्निधनप्रदः ।
मासेन मुञ्चत्यथवा दैवस्य कुटिला गतिः ।।
त्र्यम्बकस्य मन्त्रस्य प्रोक्ताश्छन्दर्षिदेवताः ।
गन्धोऽगुरुः करवीरं पुष्पं धूपश्च गुग्गुलः ।।
अष्टदीपं च सर्वेषां नैवेद्यं च गुडौदनम् ।
पाशदण्डधरो रक्तस्त्वाज्यमध्वाक्षतैर्हविः ।।
महिषीनायकारूढः कृसरान्नं बलिं हरेत् ।
वक्ष्यमाणेन मन्त्रेण बलिं सम्यक् प्रदापयेत् ।।"

(३) –"कृत्तिकासूत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
स्रुक्स्रुवाभयवरदस्ववर्णो मेषवाहनः ।।
मेधातिथिर्जगत्यग्नी पुनन्तु मामित्यस्य च ।
चन्दनं यूथिकापुष्पं घृतदीपः सगुग्गुलुः ।।
नैवेद्यं तिलमाषान्नं वरकान्नेन संयुतम् ।
गुडौदनं हविस्तत्र पायसेन बलिं हरेत् ।।"

(४) –"रोहिण्यामुत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
नमो ब्रह्मणमन्त्रस्य गायत्री विधिरीश्वरः ।।
शुक्लःकमण्डलुस्त्वक्षसूत्राभयवरप्रदः ।
चन्दनं कमलं पुष्पं सदशाङ्गं च गुग्गुलम् ।।
नैवेद्यं पायसं साज्यं सर्वदा तैर्हविर्भवेत् ।
दधिक्षीरघृतक्षौद्रशाल्यन्नेन बलिं हरेत् ।।"

(५) –"चन्द्रभे चोत्थितो व्याधिः पञ्चरात्रेण मुञ्चति ।
गदावरदपाणिश्च श्वेतोऽसौ रथवाहनः ।।
नवो नवो भवत्यस्य गायत्री गौतमः शशी ।
चन्दनं कुमुदं पुष्पं दशाङ्गं पायसौदनम् ।।
नैवेद्यं मण्डकापूपघृतक्षौद्रसमन्वितम् ।
शर्करादधिमिश्रेण शुक्लान्नेन बलिं हरेत् ।।"

(६) –"अर्द्रायामुत्थितो व्याधिरचिरान्निधनप्रदः ।
मासेन मुञ्चत्यथवा दैवस्य कुटिला गतिः ।।
शुद्धस्फटिकसङ्काशशूलखड्गाभयेष्टदः ।
नमः शङ्करायेत्यस्य बृहतीशो विधी ऋषिः ।।
चन्दनं सौरभं पुष्पं दशाङ्गं पायसौदनम् ।
समध्वाज्यं हविस्तत्र दध्योदनबलिं हरेत् ।।"

(७) –"पुनर्वसौ भवेद्व्याधिर्नवरात्रेण मुञ्चति ।
कमण्डलवक्षसूत्रेध्मदर्भास्रुक्स्रुवभृत्सदा ।।

अदितिर्द्यौश्च मन्त्रस्य त्रिष्टुभो द्रुहिणोऽदितिः ।
हरिद्राकुङ्कुमं गन्धं पुष्पं सेवन्तिकाह्वयम् ।।
धूपो मलयजं पिष्टं घृतान्नं पीतवर्णकम् ।
घृताक्ततण्डुलहविः पीतान्नेन बलिं हरेत् ।।"

(८) —"पुष्ये समुत्थितो व्याधिः सप्तरात्रेण मुञ्चति ।
पीतो दण्डकमण्डलवक्षसूत्राभयवरोद्यतः ।।
बृहस्पते परीत्यस्य त्रिष्टुब्जीवोऽङ्गिरा ऋषिः ।
कुङ्कुमं वारिजं पुष्पं नैवेद्यं घृतपायसम् ।।
मण्डकागुडसंयुक्तमेतदेव हविर्भवेत् ।
समण्डकघृतान्नेन बलिं तत्र प्रदापयेत् ।।"

(९) —"आश्लेषासूत्थितो व्याधिः क्लेशान्मासेन मुञ्चति ।
नमो अस्त्विति[1] मन्त्रस्य विराडग्निश्च सर्पराट् ।।
मधुवर्णो भोगयुक्तः खड्गचर्मधरः शुभः ।
सकुङ्कुमागुरुर्गन्धः पुष्पं चागस्तिसम्भवम् ।।
घृतगुग्गुलधूपोऽत्र नैवेद्यं क्षीरसर्पिषा ।
हविः साज्यं सुदध्यन्नं दध्योदनबलिं हरेत् ।।"

(१०) —"मघायां चोत्थितो व्याधिरचिरान्निधनप्रदः ।
अथवा सार्धमासेन धूम्रो दण्डपवित्रधृक् ।।
आयन्तु नस्त्विति चास्य जगती पितरोऽक्षजः ।
चन्दनं चम्पकं पुष्पं धूपः सघृतगुग्गुलुः ।।
नैवेद्यं घृतपिष्टान्नं तिलाज्यं सघृतं हविः ।
सतिलान्नं च मुद्गान्नं बलिं च पितृतृप्तये ।।"

(११) —"पूर्वाफाल्गुनभे व्याधिरर्धमासेन मुञ्चति ।
भग एव भगवान्नित्यस्यानुष्टुब्भगो विधिः ।।
यथाभयकरः पद्मवर्णः सिंहासने स्थितः ।
चन्दनं मालतीपुष्पं बिल्वदीपो घृतौदनम् ।।

---

[1] १. 'नमोस्तु सर्पेभ्यः' इति मन्त्रः ।

नैवेद्यं शर्करायूथलड्डुकाभिश्च संयुतम् ।
घृतौदनं हविस्तत्र पायसेन बलिं हरेत् ।।"

(१२) —"अर्यमर्क्षे भवेद्व्याधिरर्धमासेन मुञ्चति ।
पद्मवर्णः पद्मसंस्थः पद्मगर्भसमद्युतिः ।।
अर्यमार्णेति मन्त्रस्य अर्यमा त्रिष्टुबब्जजः ।
कर्पूरं कुङ्कुमं गन्धं पुष्पं धूपकसंज्ञकम् ।।
घृतगुग्गुलधूपोऽत्र नैवेद्यं घृतपायसम् ।
होमद्रव्यं घृतान्नं स्याच्छाल्यन्नेन बलिं हरेत् ।।"

(१३) —"हस्ते समुत्थितो व्याधिर्नवरात्रेण मुञ्चति ।
उदुत्यमिति हिरण्यस्तूपो गायत्र्यदितिर्जपेत् ।।
रक्तगन्धं कुङ्कुमं च पुष्पं राजीवसंज्ञकम् ।
सगन्धगुग्गुलो धूपो नैवेद्यं घृतपायसम् ।।
मधुपुष्पं तिलाज्यान्नं दूर्वाभिः सहितं हविः ।
गुडशर्करमध्वाज्यपिष्टान्नेन बलिं हरेत् ।।"

(१४) —"चित्रायासुस्थितो व्याधिर्दशरात्रेण मुञ्चति ।
चित्रन्देवानामित्यस्य त्वष्टानुष्टुप्पितामहः ।।
अक्षसूत्राभयकरश्चित्रवर्णः शिवे रतः ।
सकुङ्कुमागुरुर्गन्धः कुसुमं चित्रवर्णकम् ।।
नैवेद्यं मोदकान्नाज्यं चित्रान्नं सघृतं हविः ।
तदन्नेन बलिं दद्यात्सर्वरोगापनुत्तये ।।"

(१५) —"स्वात्यृक्षे चोत्थितो व्याधिः सर्वदा निधनप्रदः ।
एकद्वित्रिचतुः पञ्चमासैर्वापि विमुञ्चति ।।
स नः पितेति मन्त्रस्य गायत्रीमरुदङ्गिराः ।
खड्गचर्मधरः कृष्णो गन्धः कृष्णागुरुर्भृशम् ।।
पुष्पं दमनकं धूपः चन्दनागुरुगुग्गुलुः ।
नैवेद्यं पायसं साज्यं हविस्तेन बलिं हरेत् ।।"

(१६) –"द्विदैवभे भवेद्व्याधिर्मासेनैकेन मुञ्चति ।
इन्द्राग्नी आगतमिति गायत्री चास्य चैव हि ।।
मधुच्छन्द ऋषीन्द्राग्नी तयोर्ध्यानं च पूर्ववत् ।
श्रीखण्डकुङ्कुमं गन्धं तयोः पुष्पं सरोरुहम् ।।
देवदारुस्तयोर्धूपो नैवेद्यं घृतपायसम् ।
तदेवान्नं हविस्तत्र चित्रान्नेन बलिं हरेत् ।।"

(१७) –"मित्रभे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
मित्रस्य चर्षणीरेति गायत्री चास्य चैव हि ।।
ऋषिर्हिरण्यस्तूपाख्यस्तत्र मित्रोऽधिदेवता ।
द्विभुजः पद्मगर्भाभः पद्मभृत्पद्मसंस्थितः ।।
कुङ्कुमं पुण्डरीकाख्यं पुष्पं धूपं च चन्दनम् ।
नैवेद्यं पायसं साज्यं हविः कन्दं च सूरणम् ।।
बलिस्तत्र प्रदातव्यो मधुशर्करपायसम् ।
घृतपूरकमाषान्नं मुद्गगर्भैश्च संयुतम् ।।"

(१८) –"ज्येष्ठायामुत्थितो व्याधिर्मृत्युरेव न संशयः ।
अथवा मासमेकं वा मुञ्चत्येव न संशयः ।।
इन्द्रं च इति मन्त्रस्य गायत्रीन्द्रोऽङ्गिराऋषिः ।
इन्द्राय पूर्ववद्गन्धं चन्दनं कुसुमं शुभम् ।।
कर्पूरधूपो नैवेद्यं चित्रान्नं सुमनोहरम् ।
हविस्तु सूरणं कन्दं मधुकन्दं सुपायसम् ।।
विचित्रपुष्पगन्धेन दध्यन्नेन बलिं हरेत् ।।"

(१९) –"मूलभे चोत्थितो व्याधिर्मासार्धेन विमुञ्चति ।
खड्गचर्मधरः कृष्णः करालवदनः प्रभुः ।।
मोषुणो ऽस्य च गायत्री घोरः कण्वोऽथ नैर्ऋतिः ।
गन्धः कृष्णागुरुः पुष्पं पद्मं नीलोत्पलं शुभम् ।।

धूपः कृष्णागुरुर्माषमिश्रान्नमुपहारकम् ।
तदेवान्नं हविस्तत्र माषान्नेन बलिं हरेत् ।।”

(२०) –“वारिभे चोत्थितो व्याधी रोगिणो निधनप्रदः ।
विमुञ्चत्यथवा मासैर्द्वित्रिषड्नवसप्तभिः ।।
आप्यायस्वेति मन्त्रस्य गायत्री पद्मजो जलम् ।
सुवर्णो द्विभुजः पद्मपाणिर्गन्धस्तु चन्दनम् ।।
पद्म शैलेयधूपोऽत्र नैवेद्यं घृतपायसम् ।
हविर्मसूरपिष्टान्नं तदन्नेन बलिं हरेत् ।।”

(२१) –“विश्वभे चोत्थितो व्याधिः सार्धमासेन मुञ्चति ।
विश्वे देवास इत्यस्य गायत्री विश्वदेवता ।।
कमण्डल्वभयाम्भोजवरदश्च कुशासनः ।
चन्दनं कमलं पुष्पं धूपः सघृतगुग्गुलुः ।।
नैवेद्यं पायसाज्यान्नं हविरप्येतदेव हि ।
समिद्भिर्निचुलैः सार्धं तदन्नेन बलिं हरेत् ।।”

(२२) –“श्रवणे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
अतो देवेति मन्त्रस्य गायत्री पद्मजो हरिः ।।
पीताम्बरः कृष्णवर्णः शङ्खचक्रगदाम्बुजः ।
चन्दनं मालतीपुष्पं धूपः कर्पूरगुग्गुलुः ।।
शाल्यन्नं षड्रसोपेतं भक्ष्यभोज्यादिभिः सह ।
नैवेद्यं हविरप्येतत्पायसेन बलिं हरेत् ।।”

(२३) –“वसुभे चोत्थितो व्याधिर्दशरात्रेण मुञ्चति ।
शपन्तामिति मन्त्रस्यानुष्टुब् व्यासो वसुस्ततः ।।
चापबाणधरः शुक्लगन्धकर्पूरचन्दनम् ।
वारितं गुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ।।
हविश्चोदुम्बरसमिद्गुडपायससंयुतम् ।
लड्डुका धूपमध्वाज्यतिलपिष्टर्बलिं हरेत् ।।”

(२४) –"वारुणे चोत्थितो व्याधिरष्टरात्रेण मुञ्चति ।
इमं मे वरुण इत्यस्य गायत्री कण्ववारिपः ।।
नागपाशधरः श्रीमान् वररत्नविभूषितः ।
मकरस्थोऽगुरुर्गन्धः पुष्पं च कमलोत्पलम् ।।
कर्पूरं चन्दनं धूपो नैवेद्यं घृतपोलिका ।
हविरश्वत्थसम्भिधश्चित्रान्नेन बलिं हरेत् ।।"

(२५) –"अजपाद्भे भवेद्व्याधिः सर्वदा निधनप्रदः ।
अथवा बहुभिर्मासैर्दिवसैर्वा विमुञ्चति ।।
वामपादकरं भूम्यामाकाशे त्वपरद्वयम् ।
प्रसार्य प्राञ्जलिः साक्षादीश्वरं चिन्तयेत्स्थितः ।।
शमग्निरित्यस्याजपाद्गायत्री चतुराननः ।
कुङकुमं चन्दनं गन्धं पुष्पं श्वेतार्कसम्भवम् ।।
धूपः शतौषधीमिश्रो नैवेद्यं दधिपायसम् ।
हविः कुष्माण्डगन्धः स्याद्दध्यन्नेन बलिं हरेत् ।।"

(२६) –"अहिर्बुध्न्ये भवेद्व्याधिः सार्धमासेन मुञ्चति ।
नमस्ते रुद्र इत्यस्य सर्वं तत्रैव संस्थितम् ।।
गन्धचन्दनकर्पूरैः पुष्पं पद्मोत्पलं शुभम् ।
सबिलवगुग्गुलुर्धूपो नैवेद्यं घृतपायसम् ।।
मुद्गमाषतिलान्नाज्ययवव्रीहिमयं हविः ।"

(२७) –"पूषा च देवताम्भोजवर्णोऽम्भोजधरं शुभम् ।
रक्तचन्दनगन्धोऽत्र पुष्पं मन्दारसंज्ञकम् ।।
धूपस्तु गुग्गुलुः साज्यो नैवेद्यं घृतपायसम् ।
हविस्तदेव सजलं दध्यन्नेन बलिं हरेत् ।।"

बलिदानमन्त्रः —

भूतेशानुगतो यस्माद्रोगनाथ महाज्वरः ।
रोगादस्माच्च मां त्राहि त्वं गृहीत्वोत्तमं बलिम् ।। इति ।

जन्मसन्धिषु नक्षत्रराशिलग्नेषु यमघण्टेषु प्रत्यरे नैधनतारकेऽष्टमचन्द्रे रोगोत्पत्तौ मृत्युः । रविमघाद्वादशीनां, सोमविशाखैकादशीनां, भौमार्द्रापञ्चमीनां, बुधोत्तराषाढातृतीयानां, गुरुशतभिषक्षष्ठीनां, शुक्राश्विन्यष्टमीनां, शनिपूर्वाषाढानवमीनां च योगे मृत्युः । भरण्यनुराधा वा चन्द्रे (रवौ), आर्द्रोत्तराषाढा वा सोमे, मघा शतभिषग्वा भौमे, अश्विनी विशाखा वा बुधे, ज्येष्ठा मृगशिरो वा गुरौ, श्रवण आश्लेषा वा भृगौ, पूर्वाभाद्रपदा शनौ चेन्मृत्युयोगः । अतोऽत्रोक्तास्तिथिवारनक्षत्रशान्तयो विस्तृताः कार्याः ।

इति विशेषनक्षत्रेषु रोगोत्पत्तौ शान्तिविधिः ॥

अथ तिथिवारर्क्षेषु साधारणप्रयोगः ॥

मासपक्षाद्युल्लिख्य, ममोत्पन्नस्य व्याधेर्जीवच्छरीराविरोधेन समूलनाशार्थममुकनक्षत्रामुकदेवताया अमुकसंख्यात्मकं जपं करिष्ये । इति सङ्कल्प्याष्टशताष्टसहस्त्रायुतान्यतमसंख्यया तत्तद्देवतामन्त्रस्य जपं कृत्वा अन्येन वा कारयित्वा, पुनः—

मासपक्षाद्युल्लिख्य, ममोत्पन्नस्य व्याधेर्जीवच्छरीराविरोधेन समूलनिवृत्तये शान्तिं करिष्ये । इति सङ्कल्प्य गणेशपूजाऽऽचार्यवरणान्तं कृत्वाऽऽचार्यं पूजयेत् ।

तत आचार्यो भूमौ तण्डुलैश्चतुरस्रं मण्डलं कृत्वा तत्र हैमीं तत्तन्नक्षत्रदेवतां वस्त्रद्वयपरिवृतामुक्तक्रमेण तत्तद्गन्धधूपादिभिः पूजयेत् । तदीशान्यां धान्ये कुम्भं संस्थाप्य जलेनापूर्य गन्धसर्वौषधिदूर्वापल्लवपञ्चत्वक्सप्तमृत्फलं पञ्चरत्नपञ्चगव्यहिरण्यानि तत्तन्मन्त्रैः क्षिप्त्वा वस्त्रद्वयेनाऽऽवेष्ट्य 'सर्वे समुद्रा' इति तत्र तीर्थान्यावाह्य 'तत्त्वायामि' इति तत्र वरुणमावाह्य संपूज्याग्निं ग्रहाँश्च प्रतिष्ठाप्याऽऽज्यभागान्ते तत्तन्नक्षत्रदेवतामन्त्रेण तत्तद्द्रव्येण चाष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशत्यन्यतरसंख्यया होमं कृत्वा शान्तिकलशेनाभिषेके विहिते रोगी यजमानस्तां प्रतिमां ब्राह्मणाय दद्यात् ।

उक्तगन्धाभावे– चन्दनम् । पुष्पाभावे– शतपत्रम् । धूपाभावे–गुग्गुलुः । नैवेद्याभावे– घृतौदनम् । होमद्रव्याभावे– तिलाः । मन्त्राविज्ञाने– गायत्री । मृत्युनिर्देशे ऽष्टोत्तरसहस्रमन्यत्राष्टोत्तरशतं जुहुयात् ।

ततः कुशोदकैर्वरुणसूक्तैः पुराणमन्त्रैश्चाभिषेकं कुर्यात् । पूर्णाहुतिं वसोर्धारां च कृत्वा शान्तिपाठं पठित्वा ऽऽशिषं दद्यात् । अतः सर्वशान्तिर्भवति ।

तत आचार्य सुवर्णप्रतिमां वस्त्रयुग्मेन वेष्टितां सवत्सां सालङ्कारां गां दद्यादितरेभ्योऽपि दक्षिणां दत्त्वा ब्राह्मणाँश्च भोजयेत् । इति रोगोत्पत्तौ तिथिवारर्क्षेषु साधारणशान्तिप्रयोगः ।।

अथ पञ्चकमरणशान्तिः ।।

तत्र बौधायनः––

"पञ्चकेषु मृतो योऽसौ लभते न गतिं नरः ।
तिलान् गां च हिरण्यं च तमुद्दिश्य घृतं ददेत् ।।
भाजनोपानहौ छत्रं हेम मुद्रा च वाससी ।
दक्षिणा दीयते विप्रे सर्वपातकमोचनी ।।" इति ।

धनिष्ठातो नक्षत्रपञ्चकं सार्धचतुष्टयं वा पञ्चकम् ।

दैवज्ञमनोहरे––

'कुर्यान्न दारुतृणसङ्ग्रहमन्तकाशा–
यानं मृतस्य दहनं गृहगोपनं च ।
शय्यावितानमिह वासवपञ्चकं चे–
त्केचिद्वदन्ति परतो वसुदैवतार्धात् ।।'

अत्र च मरणमप्यनिष्टावहम् । त्रिपुष्करे ऽपि मरणदाहावनिष्टौ त्रिपादभे मरणमात्रं, तत्तन्निमित्तशान्तिविधिषु तथा निर्देशात् ।

त्रिपुष्करमाह भूपालवल्लभः ––

'रविभौममन्दवारे भद्रातिथिषु त्रिपादके धिष्ण्ये ।
योगस्त्रिपुष्कराख्यो द्विपादके यमलनामा स्यात् ।।'

रत्नकोशे तु--

'गुरुभौममन्दवारे भद्रायां विषमपादर्क्षे ।
योगस्त्रिपुष्करोऽयं त्रिगुणफलो यमलभे द्विगुणम् ।।

गर्गः--

'पञ्चके पञ्चगुणितं त्रिगुणं च त्रिपुष्करे ।
यमले द्विगुणं सर्वं हानिवृद्ध्यादिकं भवेत् ।।'

दैवज्ञमनोहरे, गारुडे च--

'पञ्चकाभ्यन्तरे नैव कार्या दाहादिका क्रिया ।
पुनर्मृत्युभयात्तस्मात्पञ्चकानन्तरं शुभा ।।'

कारिकायाम्--

'सद्यो दाहादिकं कार्यं पञ्चकर्क्षमृतस्य च ।
वक्ष्यमाणविधानेन प्रायश्चित्तपुरः सरम् ।।
चत्वारः पुरुषा दर्भमयाः शवसमीपतः ।
तन्मन्त्रैर्मन्त्रिताः स्थाप्यास्ततो दाहस्तु तैः सह ।।
सूतकान्ते तु पुत्राद्यैः कार्यं शान्तिकमुक्तवत् ।
कांस्यपात्रघृतं दद्यात् कुर्याद्ब्राह्मणभोजनम् ।।'

मदनरत्ने ब्राह्मे--

'धनिष्ठापञ्चके जीवो मृतो यदि कथञ्चन ।
त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवम् ।।
तदानिष्टविनाशार्थं विधानं समुदीर्यते ।
दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः ।।
यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ।
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ।।
प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ।'

अत्र प्रतिमा गन्धमाल्याद्यैरलङ्कृत्य प्रथमां शवस्य शिरसि, द्वितीयां नेत्रयोः, तृतीयां वामकुक्षौ, चतुर्थीं नाभौ, पञ्चमीं पादयोर्न्यस्य

तदुपरि तन्नामभिर्घृतं हुत्वा पुनः 'यमाय सोमम्,[१] त्र्यम्बकम्[२]' इति मन्त्राभ्यां प्रत्येकं तासु आज्यं हुत्वा दहेदिति ।

'सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ।
कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मने ॥
ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतये ततः ।
माषमुद्गयवव्रीहिप्रियङ्ग्वादि प्रयच्छति ॥
स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनम् ।
गोभूदानं षडंशेन कुर्याद्दोषोपशान्तये ॥'

अथ प्रयोगः--

नद्यादौ स्नानं कृत्वा अहते वाससी परिधाय सन्ध्यावन्दनं समाप्य ब्राह्मणसमीपं गत्वा तदनुज्ञया गणेशं स्मृत्वा स्वस्ति वाचयित्वा– 'स्वस्ति न इन्द्रः, यथेमां वाचम्' इति मन्त्राभ्यां पिष्टेनाष्टदलं विलिख्य सङ्कल्पं कुर्यात्--

अद्येत्यादि देशकालौ स्मृत्वा अमुकस्य पञ्चकमरणदोषोपशान्त्यर्थं सदारापत्यस्यामुकशर्मणो मम कुले गृहे सपरिवाराणां सर्वेषामायुरारोग्यसुखश्रीप्राप्त्यर्थं गणेशविष्णवघोररुद्रपूजनपूर्वकं पञ्चकविधानरूपशान्तिकर्माहं करिष्ये । इति सङ्कल्प्य, ततः–

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥

इति ध्यात्वा 'गणानान्त्वा' इति मन्त्रेणासनपाद्यादिभिः षोडशोपचारैर्गणेशं संपूज्य 'वक्रतुण्ड' इत्यादिभिः प्रार्थयेत् ।

ततो विष्णुं पुरुषसूक्तेन षोडशोपचारैः संपूजयेत् । ततः स्थण्डिले पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य तद्दक्षिणतो ब्रह्मासनं कल्पयित्वा ब्रह्मवरणादिपरिसमूहनान्तं कर्म कुर्यात् । ततोऽग्नेरीशान-

---

[१] यो मन्त्र ३९२ पृष्ठमा छ ।

[२] यो मन्त्र १२५ पृष्ठमा छ ।

दिशि हस्तमात्रं स्थण्डिलं रचयित्वा तत्र कृष्णवस्त्रमास्तीर्य चतुर्दिक्षु मध्ये च क्रमेण पञ्चकलशं संस्थाप्य तत्र वारुणैर्मन्त्रैस्तीर्थजलेनापूर्य सर्वौषधीः, दूर्वा, पञ्चमृत्तिका, पञ्चपल्लवान्, पञ्चरत्नानि, हिरण्यं, फलानि च तत्तन्मन्त्रैः प्रक्षिप्य वस्त्रेणावेष्ट्य तेषु स्वर्णमयीं तत्तन्नक्षत्रप्रतिमां संस्थाप्य तदीशानदिशि अघोररुद्रं संस्थाप्य,

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ।।

इति मन्त्रेण अघोररुद्रं षोडशोपचारैः पूजयेत् ।

पञ्चकलशेषु नक्षत्राधिदेवतास्थापनक्रमो यथा– (यन्नक्षत्रे यो मृतस्तस्य तं नक्षत्रं मध्ये कृत्वा ततः पूर्वादिप्रादक्षिण्यक्रमेण स्थापनम् । तत्पार्श्वे चतुर्दश यमादयः स्थाप्याः । मध्यादारभ्य पूजा कार्या) ।

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः । इति मन्त्रेण धनिष्ठाधिदेवं वसुं पूजयेत् ।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य ऽऋतसदनमासीद ।।
इति मन्त्रेण शतभिषाधिदेवं वरुणं पूजयेत् ।

ॐ शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा माहिꣳसीः । निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ।।
इति मन्त्रेण पूर्वाभाद्रपदाधिदेवमजैकचरणं पूजयेत् ।

ॐउत नोहिर्बुध्न्यः शृणोत्वजऽ एकपात्पृथिवी समुद्रः । विश्वेदेवा ऽऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ताऽ अवन्तु ।।
इति मन्त्रेणोत्तराभाद्रपदाधिदेवमहिर्बुध्न्यं पूजयेत् ।

ॐपूषन्तव व्रते वयन्नरिष्येम कदाचन । स्तोतारस्तऽ इह स्मसि ।। इति मन्त्रेण रेवतीनक्षत्राधिदेवं पूषणं पूजयेत् ।

ततो धनिष्ठादिनक्षत्रक्रमेण– माष, मुद्ग, यव, व्रीहि, प्रियङ्गवः पञ्चसु पञ्च निवेदयेत् । तत्पश्चात् चतुर्दश यमादीन् पूजयेत् । तद्यथा––

ॐ यमाय नमः । ॐ धर्मराजाय नमः । ॐ मृत्यवे नमः । ॐ अन्तकाय नमः । ॐ वैवस्वताय नमः । ॐ कालाय नमः । ॐ सर्वभूतक्षयाय नमः । ॐ औदुम्बराय नमः । ॐ दध्नाय नमः । ॐ नीलाय नमः । ॐ परमेष्ठिने नमः । ॐ वृकोदराय नमः । ॐ चित्राय नमः । ॐ चित्रगुप्ताय नमः । इति ।

ततः प्रथमकलशे– ‘कृणुष्व पाजः[१]’ इति पञ्चमन्त्रात्मकं-सूक्तं, द्वितीयकलशे– ‘बिभ्राड्बृहत्[२]’ इति चतुर्दशमन्त्रात्मकं सूक्तं, तृतीयकलशे– ‘आशुः शिशानः[३]’ इति सप्तदशमन्त्रात्मकं सूक्तं, चतुर्थकलशे– ‘नमस्ते[४]’ इति षट्षष्टिमन्त्रात्मकं सूक्तं, पञ्चमकलशे– ‘ऋचं वाचम्[५]’ इति चतुर्विंशतिमन्त्रात्मकं सूक्तं जपेत् । सूक्तजपे कलशं हस्तेन स्पृशन् पश्यन् वा जपः ।

तत आज्येनाघाराज्यभागौ हुत्वा– वसोः पवित्रमिति वसुभ्यः, वरुणस्योत्तम्भनमिति वरुणाय, शिवो नामासीत्यजैकचरणाय, उत नोहिर्बुध्न्य इत्यहिर्बुध्न्याय, पूषन् तवेति मन्त्रेण पूष्णे, चतुर्दश यमादिभ्यश्च प्रत्येकं नाममन्त्रेण समिद्भिः, तिलैः, आज्येन, चरुणा च पृथक् पृथक् चतस्र आहुतयो देयाः । अघोरमन्त्रेणाघोररुद्रं च समिद्भिस्तिलैराज्येन चाष्टोत्तरशतसङ्ख्यया पृथक् जुहुयात् । अत्र समिद्धोमे ‘नमस्ते’ इति मन्त्रः, तिलहोमे ‘इदं विष्णुः’ इति च विशेषमन्त्रौ विहितौ । त्र्यम्बकमन्त्रेण चाष्टोत्तरशतहोमः । ब्रह्माण्डपुराणे व्याहृतिमन्त्रेण दशसहस्रतिलाहुतेर्विधानं कृतम् । इच्छा चेत्कर्तव्यमकृते

---

१. शुक्लयजुः (अ. १३ मं. ९–१३) । २. शुल्कयजुः (अ. ३३ मं. ३०–४३) ।
३. शु. य. (अ. १७ मं. ३३–४९) । ४. शु. य. (अ. १६ मं. १–६६) ।
५. शु. य. (अ. ३६ मं. १–२४) ।

न दोषः कात्यायनबौधायनादिभिरनुक्तत्वादिति पद्धतिकृन्मतम् । स्विष्टकृतं हुत्वा आज्येन नवाहुतीश्च जुहुयात् ।

ततः पञ्चर्क्षदेवेभ्यश्चतुर्दशयमादिभ्योऽघोररुद्रायेन्द्रादिदशदिक्पालेभ्यश्च बलिदानं दत्त्वा होमशेषं समाप्य पूर्णाहुतिं जुहुयात् । ततः संस्रवप्राशनं, ब्रह्मणे पूर्णपात्रदानं, मार्जनं, पवित्रप्रतिपत्तिः, प्रणीताविमोकः इत्यादिकर्म समाप्य "मृतस्यास्य पञ्चकमरणदोषोपशान्तिनिमित्तकषड्ब्राह्मणभोजनमहं करिष्ये" इति सङ्कल्प्य कांस्यपात्रे तैलं क्षिप्त्वा मुखमवलोक्य ब्राह्मणाय दद्यात् । इदमकृतेऽपि न दोषः । स्थापितदेवतानामुत्तराङ्गपूजां विधाय ऋक्षाधीशान् विसर्जयेत् ।

ततः सवत्सां गां, धान्यसहितां महिषीं, सहिरण्यं तिलपात्रं, सहिरण्यं घृतपात्रं, दक्षिणायुतं कृष्णवस्त्रं पञ्च ब्राह्मणेभ्यो दद्यात् । सहिरण्यघृतपात्रदाने मुखावलोकनं कृत्वा देयः । ततः पञ्चकलशोदकैः सपरिवारस्य यजमानस्य वक्ष्यमाणमन्त्रेणाभिषेकः—

ॐ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा । शन्नऽ इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ।। शन्नो वातः पवताꣳ शन्नस्तपतु सूर्यः । शन्नः कनिक्रदद्देवः पर्जन्योऽ अभिवर्षतु ।। अहानि शं भवन्तु नः शꣳ रात्रीः प्रतिधीयताम् । शन्नऽ इन्द्राग्नी भवतामवोभिः शन्नऽ इन्द्रावरुणा रातहव्या । शन्नऽ इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ।। शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ।।

इति मन्त्रैरभिषिच्य तैरेव कलशोदकैः स्नानं कृत्वा स्नानवस्त्रं परित्यजेत् ।

ततोऽघोररुद्रं पञ्चामृतेन गन्धादिभिश्च पुनः संपूज्याष्टोत्तरशतं मृत्युञ्जयमन्त्रस्य जपः, पाठः, होमश्च कार्यः । ततो देवं विसृज्य विष्णुं स्मृत्वा कर्मेश्वरार्पणं कुर्यात् ।

इति पञ्चकशान्तिप्रयोगः ।

अथ त्रिपुष्करद्विपुष्करशान्तिः ।।

त्रिपुष्करद्विपुष्करयोगे मरणे दहनेऽपि पञ्चकशान्तिवच्छान्ति कुर्यात् । विशेषविधिस्तु मदनरत्ने गर्गः—

"द्वित्रिपुष्करयोगे तु मृतिर्मृत्यन्तरावहा ।
दहने मरणे चैव त्रिगुण्यं स्यात्त्रिपुष्करे ।।
खननेऽप्येवमेव स्याद्देहाद्दोषोपशान्तये ।
तिलपिष्टैर्यवैर्वापि शरीरं तस्य कारयेत् ।।
शूर्पे निधायालङ्कृत्य दाहयेत्पैतृकोपरि ।
अष्टा त्वामिति मन्त्रेण तिलपिष्टं प्रदापयेत् ।।
द्वित्रिपुष्करयोर्दोषं त्रिभिः कृच्छ्रैर्व्यपोहति ।।"

गारुडे —'त्रिपुष्करे त्रयः कार्याः पुत्तला द्वौ द्विपुष्करे ।
मृतस्य च समीपे तु स्थाप्याः पिष्टमयास्ततः ।।
कार्यो दाहस्तु तत्सार्धं सूतकान्ते तु शान्तिकम् ।
कृत्वा गाश्च हिरण्यं च दद्याद्वित्तं च शक्तितः ।।'

तथा— 'त्रिपुष्करमृते दद्याद्गोत्रयं मूल्यमेव वा ।
द्विपुष्करे च गोयुग्मं ततो दाहो न दोषकृत् ।।'
इति त्रिपुष्करद्विपुष्करशान्तिः ।

अथ त्रिपादर्क्षमरणशान्तिविधिः ।।

अपरार्के— 'पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी ।
पूर्वाभाद्रविशाखा च ज्ञेयमेतत्त्रिपादभम् ।।
त्रिपादर्क्षमृतौ तद्वद्धिरण्यशकलं मुखे ।
तस्य पिष्टमयं कुर्यात्पुरुषत्रितयं यतः ।।
होमं प्रतिमुखं कुर्यात्तथा वह वपामिति ।
कर्णायसं च कार्पासं कुसुम्भं प्रतिपाद्य च ।।
निर्यात्य साग्निं संस्कुर्याद्भुव्यग्नौ वान्यमुत्सृजेत् ।'

मरणपद्धतौ– 'स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनं ततः ।
अन्वाधानं निर्वपणं देवतानां तथाहुतीः ।।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ।।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात् ।।
विधिना श्रपणं कृत्वा एकैकामाहुतिं हुनेत् ।
कृष्णां गां कृष्णवस्त्रां च हेमनिष्कसमन्विताम् ।।
दद्याद् विप्राय शान्ताय प्रीतो भवतु मे यम । '
इति त्रिपादर्क्षशान्तिः ।।

अथ गजशान्तिः ।।

सनत्कुमार उवाच–
अथ राजा प्रकुर्वीत चतुर्थ्यां गजवाजिनाम् ।
शान्तिमामयतप्तानां तदुत्पातोदये सति ।।
कवलानि च नादत्ते यदा त्वश्रूणि मुञ्चति ।
स्तब्धः प्रशान्तो निर्वेदो स्यान्मदेन विवर्जितः ।।
विहीनमतिरत्यर्थं परिक्षीणतनुर्द्विपः ।
विमानात्स्रस्तसर्वाङ्गगुप्तो नष्टपराक्रमः ।।
नष्टशोभः सदा हीनो नष्टसंज्ञो रुषान्वितः ।
नानाव्याधिसमुत्थाभिः पीडाभिः पीड्यते यदा ।।
अरिष्टोपनिपातेषु तथोत्पातभयेषु च ।
तदा शान्तिं प्रकुर्वीत गजरक्षापरो नृपः ।।
अरिष्टाद्यशुभं त्वेवं वाजिनां लक्ष्यते यदा ।
युद्धारम्भेषु च तथा तेषां शान्तिं च कारयेत् ।।
शान्त्यर्थं गजवाजीनां मण्डपं चतुरस्रकम् ।
द्वादशारत्निमानेन सम्मितं कारयेत्सुधीः ।।

बाहुप्रमाणं मध्ये तु योनिनाभिसमुज्ज्वलम् ।
कुण्डं त्रिमेखलं कुर्याद् वृत्तं वा चतुरस्रकम् ।।
तत्पुरस्ताद्दक्षिणतः पश्चिमे चोत्तरे तथा ।
चतुरस्रं ततः कुर्यात्कुण्डं हस्तप्रमाणकम् ।।
कोणेषु च तथा कुर्याद्वृत्तं चाष्टत्रिकोणकम् ।
अर्कखादिरपालाशबिल्वाश्वत्थवटैरपि ।।
औदुम्बरअपामार्गसमिद्भिस्तत्र तत्र च ।
मध्ये सर्वसमिद्भिर्वा पालाशैर्वाज्यबिल्वकैः ।।
तिलतण्डुललाजाभिः सक्तुसिद्धार्थशालिभिः ।
यवैरेभिस्त्रिमधवक्तैर्मध्ये सर्वमिति स्थितिः ।।
दत्त्वा च पयसा चैव घृतेन मधुनापि वा ।
कोणेषु च तथाज्येन मध्ये तु कलशैरपि ।।
स्थापयेत ततः कुम्भानष्टावष्टासु दिक्षु च ।
वस्त्रयुग्मेन संछन्नान् सर्वौषधिसमन्वितान् ।।
सर्वरत्नयुतान् युग्मान् गन्धपुष्पोदकैरपि ।
हस्तावरप्रमाणं तु बृहत्कुम्भं तु मध्यमे ।।
तीर्थोदकेन संपूर्णं सर्वरत्नौषधैरपि ।
चतुरः कलशाँस्तत्र चतुर्थस्य समन्ततः ।।
कोणेषु च यथान्यायं जलवस्त्रादिकैर्युतान् ।
स्मरेत् प्रधानकुम्भे तु नरसिंहाकृतिं हरिम् ।।
चक्रशङ्खगदापद्मचर्मासिशरशक्तयः ।
पूर्वादिक्रमयोगेन ध्यातव्यं कलशेष्वपि ।।
बहिः शक्रादिदिक्पालाँस्तत्र तत्र च संस्मरेत् ।
प्रधानकुम्भात्पुरतः कुर्याच्चक्रं तु मण्डलम् ।।
तत्र संपूज्य देवेशं पश्चाद्धोमादि साधयेत् ।
मण्डलाग्रे तदा कुम्भं कुम्भाग्रे कुण्डमेव च ।।

सर्वत्रानलसंस्कारान् स्वगृह्योक्तेन कर्मणा ।
जुहुयादग्निसिद्ध्यर्थमाज्याहुतिसहस्रकम् ।।
आनुष्टुभेन मन्त्रेण गुरुर्वास्य पुरोहितः ।
आनुष्टुभो नृसिंहमन्त्रो दशसाहस्रमिष्यते ।।
समिद्द्रव्यचरूण्येवं हुत्वा मन्त्री समाहितः ।
संपत्न्याज्याहुतीनां च सहस्रं वायुतं चरेत् ।।
ततः स्विष्टकृदित्यादि समापनविधिः क्रमात् ।
एवं समाप्य विधिवद्धोमं तत्र पुरोहितः ।
संस्पृशेदुदकुम्भं च जपेद्दशसहस्रकम् ।
पर्यन्तकलशान् स्पृष्ट्वा जपेत्तत्र सहस्रकम् ।।
अनन्तरेषु कुण्डेषु गायत्र्या प्रणवेन वा ।
ऋत्विग्भिर्युगपत्कार्यं होमतन्त्रं तु पूर्ववत् ।
प्रतिकुम्भं सहस्रं च जपेत्तान्यप्युपस्पृशन् ।
पूजयेल्लोकपालादीन् गन्धादिभिरलङ्कृतः ।।
अथ राजानमाकार्य स्वास्तीर्णे सिंहविस्तरे ।
समाप्य च शुचिस्नानं सर्वालङ्कारसंयुतम् ।।
कुम्भोदकेन देवाग्रे तन्मन्त्रेणाभिषेचयेत् ।
पर्यन्तकलशैश्चापि नृपं पश्चाद्गजादिकम् ।।
अन्यांश्च वाहनान् पूज्य दिव्यलक्षणसंयुतान् ।
गजादिनावशिष्टेन तोयेन स्नापयेद्बुधः ।
अन्यवाहान् द्विपायातान् सर्वानेव समाहितः ।
बाह्यकुम्भोदकेनैव स्नापयेच्छत्रसाधकः ।।
राज्ञो नीराजनं कुर्याद्वाहनेषु च मन्त्रवित् ।।
अन्येष्वेवं विधिः कार्यः स हि रत्नकरः परः ।।
राजानं वाहनादींश्च तथान्यांश्च पुरोहितः ।
सर्वालङ्कारसंयुक्तान् सर्वमङ्गलसंयुतान् ।।

कृत्वा तु वाचयेत् पश्चाद् ब्राह्मणैराशिषो बहु ।
दक्षिणामप्यलं दत्त्वा ऋत्विग्भ्यो गुरवे नृपः ।।
वाहनं वस्त्रभूषाणामाचार्याय निवेदयेत् ।
दासदासीषु भृत्येषु ग्रामादिषु च सर्वशः ।।
सर्वालङ्कारसंयुक्तं राजवाहोपरि स्थितम् ।
मन्त्रद्वीपैर्हयैश्चैव ब्राह्मणैः स्वस्तिवाचनैः ।।
सानन्दैश्चैव ऋत्विग्भिर्वृद्धैर्मन्त्रवरैस्तथा ।
आचार्यो राजभवने नृपं संवेशयेत्स्वयम् ।।
पूर्वस्नानावशिष्टेन कुम्भतोयेन मन्त्रवित् ।
गजशालां च संप्रोक्ष्य वाजिशालां तथैव च ।।
सिद्धार्थतण्डुलतिलैः पुष्पैर्वाप्यवकीर्य च ।
शालामध्ये नृपः सिंहं सुदर्शनमनामयम् ।।
पूजयेद्गन्धपुष्पाद्यैः सर्वालङ्कारसंयुतैः ।
सक्तुभिः कृसरान्नेन कुर्याद्भूतबलिं बहिः ।।
ततः शालासु सर्वासु ब्राह्मणान् भोजयेद्बहून् ।
ततः संवेशनं कुर्यादाचार्यो गजवाजिनाम् ।।
एवं शान्ति प्रकुर्वीत निमित्ते सति तद्गुरुः ।
सपरिच्छदस्य नृपतेर्मन्त्रवित्सुसमाहितः ।।
सर्वकल्याणसंपूर्णः सर्वबाधाविवर्जितः ।
सपुत्रो गजयुक्तस्तु नृपस्तेन महीयते ।। ”
इति गजशान्तिः ।।

अथाश्वशान्तिः ।

गर्गः—

“अश्वशान्ति प्रवक्ष्यामि शृणु शौनक यत्नतः ।
अश्वशालासमीपे तु कुण्डं कुर्याद्विधानतः ।।

उत्खातं हस्तमात्रं च आयामं च तथा भवेत् ।
मेखलात्रयसंयुक्तं योनिरश्वत्थपत्रवत् ।।
कुण्डस्योत्तरपूर्वे तु वेदिं कुर्यात् सुशोभनाम् ।
सार्धहस्तं तथायाममुत्सेधं हस्तमात्रकम् ।।
वर्तुलां चतुरस्रां च देवानां स्थापनाय च ।
कुर्यादष्टदलं पद्मं तण्डुलैर्वेदिकोपरि ।।
तन्मध्ये पूजयेद्देवं सुवर्णेन प्रकल्पितम् ।
अश्वारूढं महातेजः सप्तहस्तं महाबलम् ।।
अश्वारिष्टहरं शूरं देवं तं हयवल्लभम् ।
देवेन्द्रं च धराधीशं सुवर्णेन प्रकल्पयेत् ।।
वरुणं च तथेशानं रजतेन प्रकल्पितम् ।
यमं च काललोहेन ताम्रेणापि तथैव च ।
निर्ऋतिं च तथा वायुं नागेनैव प्रकल्पयेत् ।
सोमं च रजतेनैव कल्पयेत्सुसमाहितः ।।
कृत्वैवं लोकपालांश्च स्वेषु स्थानेषु विन्यसेत् ।
आवाहनार्घ्यपाद्याद्यैर्गन्धपुष्पादिकैः शुभैः ।।
धूपदीपैश्च नैवेद्यैः पूजयेन्मन्त्रपूर्वकम् ।
पञ्चामृतेन स्नपनं कुर्यदिव स्वमन्त्रकैः ।।
त्यमूषु वाजिनमिति मन्त्रेणावाहनं चरेत् ।
अश्वस्तूपरो गर्विति कुर्यात्संस्थापनं बुधः ।।
मानस्तोकेति मन्त्रेण स्नानं सम्यक् प्रकल्पयेत् ।
युवं वस्त्राणीति तथा वस्त्रं चैव प्रदापयेत् ।।
यज्ञोपवीतं दातव्यं देवस्यत्वेति मन्त्रतः ।
वित्तदायेति मन्त्रेण अर्चयेत्सुसमाहितः ।।
गन्धद्वारेति वै गन्धं पुष्पं श्रीश्च तथैव च ।
धूरसीति तथा धूपं दीपं चापि विशेषतः ।।

अन्नपतेति मन्त्रेण नैवेद्यं बहु कल्पयेत् ।
एवं संपूज्य विप्रेन्द्र रविपुत्रं हयाधिपम् ॥
ततः संपूजयेद्धीमान् लोकपालान् समन्ततः ।
इन्द्रं वो विश्वतः शक्रं अग्निन्दूतेति पावकम् ॥
यमाय सोमेति यमं निर्ऋतिं मोषुणेति च ।
त्वन्नो अग्नेति वरुणं तव वायेति चानिलम् ॥
सोमो धेनुं तथा सोमं कद्रुद्रेति तथा शिवम् ।
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपनिवेदनैः ।
क्रमेण पूजयेदित्थं देवान्संपूजयेत्ततः ।
अश्वारूढ महावीर तुरङ्गेश महाबल ॥
अश्वारूढं च रेवन्तं शक्त्या चाशु विनाशय ।
आखण्डल गजारूढ वज्रहस्त सुरेश्वर ॥
वज्रेण तुरगारिष्टं भिन्नं कुरु शचीपते ।
मेषारूढ महातेजो ज्वलज्ज्वालाविभूषितः ॥
तीक्ष्णासिना हुतवह अश्वारिष्टं विनाशय ।
कालदण्डधरो देव महामहिषवाहन ॥
कालदण्डेन दण्डोत्थमश्वारिष्टं विनाशय ।
खड्गहस्त महाभीम निर्ऋते प्रेतवाहन ॥
छिन्नं कुरु हयारिष्टं तीक्ष्णखड्गेन शीघ्रतः ।
पाशहस्त जलाधीश सदा मकरवाहन ॥
पाशेन च हयारिष्टं भिन्नं कुरु जलाधिप ।
ध्वजहस्त महाकाय मृगारूढ महाबल ॥
ताडयस्व हयारिष्टं ध्वजदण्डेन वानिल ।
शक्तिहस्त महाराज कुबेर नरवाहन ॥
अश्वारिष्टं च यक्षेश शक्त्या चाशु विनाशय ।
शूलहस्त महारौद्र पिनाकिन् वृषवाहन ॥

नाशयाशु हयारिष्टं त्रिशूलेन त्रिलोचन ।
एवं संप्रार्थ्य विप्रेन्द्र लोकपालक्रमेण च ।।
अग्नेः संस्थापनं कृत्वा कुण्डे होमं च कारयेत् ।
तिलव्रीहियवैश्चैव प्रत्येकं चाढकाढकम् ।।
होमं कुर्यादश्वकामश्चरुणा घृतपूर्वकम् ।
स्थापयित्वाज्यसंस्थालीं तत्स्थेनाज्येन यत्नतः ।।
इत्थं सर्वैश्च मन्त्रैश्च देवमुद्दिश्य कारयेत् ।

अग्नये स्वाहा । सोमाय स्वाहा । वायवे स्वाहा । विष्णवे स्वाहा । सर्वज्ञाय स्वाहा । सर्वदुरितनाशाय स्वाहा । रेवन्ताय स्वाहा । सर्वकामप्रदाय स्वाहा । प्रजापतये स्वाहा । एवं सर्वत्र होमः कार्यः । अग्निरन्नादोऽन्नपतिरन्नाद्यमस्मिन् यज्ञे यजमानाय ददातु स्वाहा ।

'सोमो राजा राजपति०' । एवं सर्वत्र होमविधिः ।
इत्थं कृत्वा होमकर्म आचार्यो विधिवत्ततः ।।
शन्नो भवन्तु मन्त्रेण अश्वशालां प्रवेशयेत् ।
पवित्रं तेति मन्त्रेण अश्वान् संप्रोक्षयेद्द्विजः ।।
एष वाजीति मन्त्रेण तथाश्वाँश्च विसर्जयेत् ।
मा नो मित्रेति मन्त्रेण तुरगान्स्थापयेत्सुधीः ।।
पूर्णाहुतिं च जुहुयादच्छिन्नघृतधारया ।
भूतेभ्यश्च बलिं दद्यात् छिन्नान्तं मन्त्रपूर्वकम् ।।
असुराः पन्नगा यक्षा यातुधानाश्च राक्षसाः ।
पिशाचाः सिद्धगन्धर्वा वेताला योगिनी शिवा ।।
डाकिनी लाकिनी चैव शाकिन्यः जम्बुकादयः ।
अश्वारिष्टप्रशान्त्यर्थं बलिं गृह्णन्त्वमी ग्रहाः ।।
इत्थं दत्त्वा बलिं सम्यक् भूतेभ्यश्च विधानतः ।
अश्वं च दक्षिणायुक्तं प्रतिमां वत्ससंयुताम् ।।

उद्दिश्य भास्करं देवमाचार्याय प्रदापयेत् ।
आकृतीर्देवतानां च द्विजेभ्यो वस्त्रसंयुताः ॥
दद्यात्ता दक्षिणायुक्ताः श्रद्धापूतः समाश्रितः ।
अनेन विधिना कृत्वा हयानां शान्तिकं महत् ॥
अश्वानां नीरुजत्वं च बलं पुष्टिबलं तथा ।
लक्ष्मीस्थितामनूनां च सङ्ग्रामे विजयो भवेत् ॥
ब्राह्मणान् भोजयेत्पश्चात्ततः शान्तिर्भविष्यति ।"
इत्यश्वशान्तिः ॥

अथ गोशान्तिः ॥

विष्णुधर्मे–

"अतः परं प्रवक्ष्यामि कर्म नैमित्तिकं तव ।
धेनूनां मारके प्राप्ते तथा रोगाद्युपद्रवे ॥
क्षीरक्षये तथान्यस्मिन् प्रकृतेस्तु विपर्यये ।
त्रिरात्रोपोषितो विद्वानेकरात्रोषितोऽपि च ॥
गवां मध्ये शुभे देशे स्थण्डिलेऽग्निं प्रकल्पयेत् ।
अष्टपत्रं न्यसेत्पद्मं कर्णिकाकेसरान्वितम् ॥
पूजयेत्कर्णिकामध्ये वासुदेवं श्रिया सह ।
केसरे पूजनं कार्यं देवतानां यथाक्रमम् ॥
यासां तासां तु वक्ष्यामि तव नामानि भार्गव ।
सुभद्रां नाम देवीं तु पूर्वभागे समर्चयेत् ॥
पूजनीयस्ततो ब्रह्मा सुरभिस्तदनन्तरम् ।
ततः सूर्यस्ततो धेनुर्बहुरूपा द्विजोत्तम ॥
ततस्तु पृथिवीं देवीं ततोऽनन्तं तु पूजयेत् ।
ततः स्वं विष्णुरूपाख्यं दिग्धेनुं तदनन्तरम् ॥

ततः सिद्धिं ततः ऋद्धिं ततः शान्तिं समर्चयेत् ।
गेहिनीनाम दिग्धेनुस्ततः पूज्या द्विजोत्तम ।।
ततश्चन्द्रमसं देवं महादेववृषं ततः ।
महादेवं ततो देवीं पूजयेत्तदनन्तरम् ।।
इत्येता देवताः प्रोक्ताः केसरष्वेव षोडश ।
पत्रेषु पूजनीयाश्च दिक्पालाश्च यथादिशम् ।।
गन्धमाल्यादिवस्त्रं च धूपदीपान्नसंपदा ।
प्रत्येकं पूजयेद्राम देवताः प्रयतो द्विजः ।।
पूर्णकुम्भांश्च सर्वासां प्रत्येकं विनिवेदयेत् ।
भक्तश्च गीतवस्त्राणि वर्धमानैः सुतण्डुलैः ।।
सहिरण्यैर्यथाशक्ति ततो होमं समाचरेत् ।
वेदिं कृत्वा यथाशास्त्रं समिध्य च हुताशनम् ।।
एकैकां देवतां राम समुद्दिश्य यथाविधि ।
चतुर्थ्यन्तेन नाम्ना तु धर्मज्ञो जुहुयात्क्रमात् ।।
ततो रक्षोहणैर्मन्त्रैर्जुहुयाद्गौरसर्षपान् ।
ततः समापयेद्विद्वानग्निकर्म यथाविधि ।।
सुवर्णं च तथा कांस्यं धेनुं वस्त्रयुगं तथा ।
कर्त्रा देयमुपद्रष्ट्रे वस्त्रयुग्मं शुभं तथा ।।
भोजनं गोरसप्रायं ब्राह्मणांश्चात्र भोजयेत् ।
स्वस्तिवाच्यं ततः पश्चादन्नमादाय वै द्विजः ।।
रक्षोहणं तथा मन्त्रैः कुर्युस्ते उक्षणं गवाम् ।
गवां च पूजा कर्तव्या गन्धमाल्यानुलेपनैः ।।
कर्तव्याश्च तथा वत्सा यथाकामं द्विजोत्तम ।
शान्तिकर्म गवामेतत्सर्वोत्पातप्रशान्तये ।।"
इति गोशान्तिः ।।

अथ काकमैथुनदर्शनशान्तिः ।।

गर्गसंहितायाम्—

"काकस्य मैथुनं पश्येत् काकः शिरसि चेद्विशेत् ।
शिरस्युरसि वा कुर्यात्पक्षघातं नखैस्तथा ।।
विदारणं च कुरुते शयाने च स्पृशेद्यदि ।
तदा वदेत्तु मरणं महारिष्टमथापि वा ।।
मध्यरात्रे यदा काको वासते हेतुना विना ।
तद्गृहारिष्टमाचष्टे ग्रामारिष्टमथापि वा ।।
शान्ति तत्र प्रकुर्वीत विधानेन यथोदिताम् ।
उद्दिश्यारिष्टशमनं कुर्यात्सङ्कल्पमादितः ।।
शुचौ देशेऽरत्निमात्रे स्थण्डिलेऽग्निं निधाय च ।
तदीशाने ह्यष्टदले कुम्भोपरि स्वशक्तितः ।।
हिरण्यनिर्मितं त्विन्द्रं लोकपालसमन्वितम् ।
पूजयित्वा स्वशाखोक्तविधिना श्रपयेच्चरुम् ।।
कृत्वाऽऽज्यभागपर्यन्तं जुहुयात् क्रमशो हविः ।
पालाशीः समिधो व्रीहीञ्चरुमाज्यमिति क्रमात् ।।
अष्टोत्तरसहस्रं वा ह्यष्टोत्तरशतं तु वा ।
यत इन्द्रेति मन्त्रेण लोकपालेभ्य एव च ।।
शक्त्या हुत्वा स्वशाखोक्तप्रायश्चित्ताहुतीर्हुनेत् ।
लोकपालबलिं दत्त्वा इन्द्राग्रे चरुशेषतः ।।
वायसेभ्यो बलिं दद्यादैन्द्रवारुणमन्त्रतः ।
(ऐन्द्रवारुणवायव्यां याम्यां वै नैर्ऋताश्च ये ।।
ते काकाः प्रतिगृह्णन्तु भूम्यां पिण्डं मयार्पितम् ।)
पूर्णाहुतिं ततो हुत्वा आचार्यं पूजयेत्ततः ।।
कुम्भोदकेनाभिषेको यजमानस्य विस्तरात् ।
आचार्यायेन्द्रप्रतिमां दद्यात्सोपस्करां ततः ।।

शक्त्या च भूयसीं दद्याद् द्विजानां भोजनं दिशेत् ।
शतं तदर्धमर्धं वा शक्त्यभावे दशापि वा ॥

सर्वशान्तिं पाठयित्वा गृह्णीयाच्च द्विजाशिषः ।
एवं कृते भवेच्छान्तिः काकारिष्टविनाशिनी ॥"

इति काकमैथुनदर्शनशान्तिः ।

प्रकारान्तरेण काकमैथुनदर्शनशान्तिः ।

नारदः–

"दिवा वा यदि वा रात्रौ यः पश्येत् काकमैथुनम् ।
स नरो मृत्युमाप्नोति ह्यथवा स्थाननाशनम् ॥
काकघातव्रतं यद्वा विदधीताथ वत्सरम् ।
पितृवद्वै द्विजान् भक्त्या प्रत्यहं चाभिवादयेत् ॥
जितेन्द्रियो जितक्रोधः सत्यधर्मपरायणः ।
तद्दोषशमनार्थाय शान्तिकर्म समारभेत् ॥
गृहस्येशानदिग्भागे होमस्थानं प्रकल्पयेत् ।
गृह्योक्तविधिना तत्र प्रतिष्ठाप्य हुताशनम् ॥
मुखान्ते समिदाज्यान्नैर्हुनेदष्टोत्तरं शतम् ।
प्रतिमन्त्रं त्र्यम्बकेन तथा मृत्युञ्जयेन च ॥
व्याहृतिभिर्व्रीहितिलैर्जपाद्यन्तं प्रकल्पयेत् ।
पूर्णाहुतिं च जुहुयात् कर्ता शुचिरलङ्कृतः ॥
स्वर्णशृङ्गीं रौप्यखुरां कृष्णां धेनुं पयस्विनीम् ।
वस्त्रालङ्कारसंयुक्तां निष्कद्वादशसंयुताम् ॥
तदर्धेन तदर्धेन दद्याद्दक्षिणया युतम् ।
यथावित्तानुसारेण न्यूनाधिक्यस्य कल्पना ॥
आचार्याय श्रोत्रियाय तां गां दद्यात् कुटुम्बिने ।
यस्मात्त्वं पृथिवी सर्वा धेनो वै कृष्णसन्निभे ॥

सर्वमृत्युहरे नित्यमतः शान्ति प्रयच्छ मे ।
ब्राह्मणेभ्यो विशिष्टेभ्यो यथाशक्त्या च दक्षिणाम् ।।
ब्राह्मणान् भोजयेत्पश्चाच्छान्तिवाचनपूर्वकम् ।
एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते ।।"
इति काकमैथुनदर्शनशान्तिः ।।

अथ काकस्पर्शशान्तिः ।।

नारदः—

"सूर्यास्तमनवेलायां वायसः संस्पृशेद्यदि ।
निःशब्दो वा सशब्दो वा पुंसो मृत्युप्रदायकः ।।
अङ्गनां च स्पृशेत्काको वैधव्यं तत्र निर्दिशेत् ।
नदीतीरे गवां गोष्ठे क्षीरवृक्षे सुरालये ।।
नरो वायससंस्पृष्टो वधबन्धनमाप्नुयात् ।
प्रतिचन्द्रं प्रतिसूर्यं वायसः स्पृशते यदि ।।
अर्थहानिं तथा मृत्युं शस्त्रेण च विनिर्दिशेत् ।
मासैः पञ्चभिरेवास्य निशाभिः फलमादिशेत् ।।
तद्दिनादिफलं सद्भिः प्रोक्तमत्र शुभाशुभम् ।
शान्ति तत्र प्रकुर्वीत शास्त्रदृष्टेन कर्मणा ।।
महानद्यम्भसि स्नात्वा शिवलिङ्गं निरीक्षयेत् ।
नत्वा संपूज्य लिङ्गं तु स्तुत्वा च दिक्पतीनपि ।।
आरभ्य तद्दिनादेव वायसेभ्यो बलिं क्षिपेत् ।
शनैश्चरदिने प्राप्ते एकान्ते शुभमन्दिरे ।।
कृष्णानि नववस्त्राणि अहतानि नवानि च ।
पूर्वदिक्क्रमयोगेन स्थापयेच्च पृथक् पृथक् ।।
माषप्रस्थप्रमाणेन स्थापयेत्तत्र वायसान् ।
पूर्वस्यां कपिलं तत्र स्थापयेन्मन्त्रपूर्वकम् ।।

नीलग्रीवमथाग्नेय्यां याम्यां च विकृतस्वरम् ।
नैऋत्यां च न्यसेत्क्रौञ्चमपमृत्युविनाशनम् ।।

विद्युज्जिह्वं च वारुण्यां वायव्यां कृष्णकर्बुरम् ।
कौवेर्यां कालनामानमीशान्यां श्वेतमेव च ।।

अहते कृष्णवस्त्रे तु यमं मध्ये प्रपूजयेत् ।
महिषं कृष्णवर्णं च यमं माषैश्च पूजयेत् ।।

रक्तोत्तमाङ्गं सर्वत्र आयुधैश्च समन्वितम् ।
लोहदण्डं चतुर्बाहुं पूजयेन्मन्त्रपूर्वकम् ।।

'यस्मिन् वृक्षे'[1],'परेयिवांसं'[2], सुगन्नः पन्थान'[3], मेव च ।
एते मन्त्राः समाख्याताः शूद्राणां नाममन्त्रतः ।।

अकालकलशं तत्र स्थापयेत्तस्य सन्निधौ ।
जलपूर्णं रत्नगर्भं पूर्णपात्रसमन्वितम् ।।
स्थापयेत्तत्र देवेशं शूलपाणिं महेश्वरम् ।
प्रतिष्ठाप्य च तान्सर्वानथ मन्त्रैः प्रपूजयेत् ।।
कपिलस्त्वं च वर्णेन शुभाशुभनिवेदकः ।
गृहाणार्घ्यं मया दत्तं भवाशुभविनाशनः ।।
नीलग्रीव गृहाणार्घ्यं मया दत्तं खगेश्वर ।
अल्पमृत्युविनाशाय ददामि बलिमुत्तमम् ।।
क्रूरस्त्वं पापिनां नित्यं सौम्यस्त्वं धार्मिके जने ।
विकृतस्वर गृहाणार्घ्यं मया दत्तं शुभाय नः ।।

---

[1] यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधिविश्वे । तस्य यदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ।।

[2] परेयिवांसं प्रवतो महीरिति वहुभ्यः पन्थामनुपस्पशानम् । वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्यत ।।

[3] सुगन्नः पन्थां प्रदिशन्न एहि ज्योतिष्मद्धे ह्यजरन्न आयुः । अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु ।।

क्रूरस्त्वं पापिनां नित्यं वधाशुभं न ऋच्छसि ।
गृहाणार्घ्यं मया दत्तं क्रौञ्च सौम्यप्रदो भव ।।
विद्युज्जिह्व नमस्तेऽस्तु शोकव्याधिविनाशन ।
बलिं पूजां मया दत्तां गृहाण सुखदो भव ।।
कृष्णकर्बुरनामा त्वं भूतभव्यनिवेदक ।
गृहाणार्घ्यं मया दत्तं भव वैधव्यनाशन ।।
काक त्वं कालनामासि दुष्टकालनिवेदक ।
गृहाण बलिपूजां मे दत्तां दुःखविनाशिनीम् ।।
श्वेतस्त्वसितपर्णोऽसि मृत्युभावस्य सूचकः ।
गृहाणार्घ्यं मया दत्तं भव मृत्युविनाशनः ।।
तन्मध्ये पूजयेद्देवं धर्मराजं चतुर्भुजम् ।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।।
वैवस्वताय कालाय सर्वभूतक्षयाय च ।
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।
नीलग्रीवाय लोकेश दण्डहस्ताय ते नमः ।।
पाशहस्ताय सायुधाय सपरिवाराय ते नमः ।
चन्दनैश्च सुगन्धैश्च वासोभिः पूजयेद्यमम् ।।
आदौ त्र्यम्बकमन्त्रेण ईश्वरं च प्रपूजयेत् ।
मृत्युविनाशिनीं विद्यां कुम्भे चैव नियोजयेत् ।।
शतमष्टोत्तरं चैव आचार्यो हृष्टमानसः ।
स्वगृह्योक्तविधानेन चरुं च यमदैवतम् ।।
संश्रप्य जुहुयाद्वह्नौ समिदाज्यचरूंस्तिलान् ।
तद्दैवत्या समित्कार्या शतमष्टोत्तरं तथा ।।
समित्क्रमेण जुहुयात् प्रतिद्रव्यं शतं हुनेत् ।
'सुगन्नः पन्था' मन्त्रेण होतव्यं सर्वमत्र तु ।।

भद्रासनं प्रकर्तव्यं पञ्चवर्णकसंयुतम् ।
तस्योपरि न्यसेत्पट्टं यजमानमथाह्वयेत् ॥
निवेश्याच्छादिते पट्टे अभिषेकं च कारयेत् ।
पावमानीभिस्तल्लिङ्गै[1]र्मन्त्रैर्वारुणसम्भवैः ॥
तत्र स्नानं प्रकर्तव्यं तीर्थानीतेन वारिणा ।
सहस्राक्षादिभिर्मन्त्रैः स्नानं कार्यं द्विजोत्तमैः ॥
ततोऽन्यद्वस्त्रमादाय धर्मराजं तु पूजयेत् ।
उक्तैः षोडशभिर्मन्त्रैः सुगन्नेत्यर्घ्यमर्पयेत् ॥
तत उत्थाय संप्रार्थ्य भक्तिभावसमन्वितः ।
रक्ष मां पुत्रपौत्राँश्च रक्ष मां पशुबान्धवान् ॥
रक्ष पत्नीं पतिं चैव पितरं मातरं धनम् ।
अग्नितो मे भयं मास्तु रोगाच्च व्याधिबन्धनात् ॥
शस्त्रतो विषतोयौघाद्भयं नाशय मे सदा ।
प्रार्थना च प्रकर्तव्या नमस्कारसमन्विता ॥
काकस्पृष्टं च यद्वस्त्रं स्नानक्लिन्नं च यद्भवेत् ।
सहिरण्यं च तत्कृत्वा ब्राह्मणाय निवेदयेत् ॥

वस्त्रदानमन्त्रः–

यत्किञ्चित्पर्शदोषोक्तं दुष्कृतमपि विद्यते ।
तत्सर्वं नाशमायातु वस्त्रदानेन सूर्यज ॥
वायसाँस्तान् यमं चैतमाचार्याय निवेदयेत् ।
माषान् वासांसि कृष्णां तु धेनुं चैव पयस्विनीम् ॥
शनिवारे च तत्कार्यं रविवारेऽथवा पुनः ।
घृतपात्रे ससौवर्णे दर्शयेदात्मनस्तनुम् ॥
ब्राह्मणेभ्यो ददेदन्नं भूयसीं चैव शक्तितः ।
यथोक्तं दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत् ॥

---

[1] तल्लिङ्गैः सुगन्नः पन्थामित्यादिभिः ।

स्थाने यत्र स्पृशेत्काकस्तत्स्थानं पूजयेत्तदा ।
एवं कुर्यात्प्रयत्नेन ध्वांक्षदोषः प्रशाम्यति ।।”
इति काकस्पर्शशान्तिः ।।

अथ पल्लीसरटशान्तिः ।।

वृद्धगर्गः–

“पल्ल्याः प्रपातस्य फलं सरटस्य तथैव च ।
शीर्षे राज्यं श्रियः प्राप्तिर्भाले चैश्वर्यवर्धनम् ।।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम् ।
नासिकायां तु सौभाग्यं वक्त्रे मिष्टान्नभोजनम् ।।
कण्ठे नित्यं प्रियाश्लेषः स्कन्धयोर्विजयो ध्रुवम् ।
धनलाभो बाहुयुग्मे करयोरर्थसंक्षयः ।।
जङ्घयोश्च निरुद्योगः पादयोर्भ्रमणं भवेत् ।
एवं पल्ल्याः प्रपातस्य फलं ज्ञेयं विचक्षणैः ।।
एतदेव फलं विद्याच्छरटस्य प्ररोहणे ।
पल्ल्याः प्रपतने चैव सरटस्य प्रपातने ।
पञ्चरात्रं भवेत्तस्य व्याधिः पीडा विशेषतः ।
पतनानन्तरं तस्य रोहणं यदि जायते ।।
पतने फलमुत्कृष्टं रोहणेऽल्पफलं भवेत् ।
आरोहणं चोर्ध्ववक्त्रे अधोवक्त्रे निपातनम् ।।
भवेद्यदि सुशीघ्रेण तत्फलं जायते ध्रुवम् ।
मृत्युयोगे दग्धदिने पाते च यमघण्टके ।।
चन्द्राष्टमे नैधने च जन्मर्क्षे विषनाडिके ।
क्रूरलग्ने क्रूरयुते क्रूरेण च निरीक्षिते ।।
अष्टमे ते क्रूरयुते विष्टिवैधृतिसंयुते ।
दुर्निमित्ते तयोः पाते निधनं जायते ध्रुवम् ।।

तयोः स्पर्शनमात्रेण सचैलं स्नानमाचरेत् ।
गव्यं पञ्चविधं प्राश्य कुर्यादाज्यावलोकनम् ।।
शस्ते वाप्यथवाशस्ते यदीच्छेदात्मनः शुभम् ।
पुण्याहं वाचयित्वा तु शान्तिकर्म ततश्चरेत् ।।
प्रतिरूपं तयोः कुर्यात् सुवर्णेन स्वशक्तितः ।
रक्तवस्त्रेण संवेष्ट्य गन्धपुष्पैः प्रपूजयेत् ।।
कलशे वस्त्रयुग्मेन पूजयेद्विधिना ततः ।
अग्निसंस्थापनं कृत्वा होमं कुर्याद्विधानतः ।।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होमं ह्यष्टोत्तरसहस्रकम् ।।
अष्टोत्तरशतं वापि कुर्यात् सम्यक् समाहितः ।
महाव्याहृतिभिर्होमं सर्पिः क्षीरेण कारयेत् ।
अभिषेकं ततः कुर्याद्यजमानस्य मूर्धनि ।।
पुण्यैर्वारुणसूक्तैश्च द्यौः शान्त्यादिकमन्त्रकैः ।
इत्थं मन्त्रविधानेन यः कुर्याच्छान्तिमुत्तमाम् ।।
तस्यायुर्विजयो लक्ष्मीः कीर्तिः पुष्टिश्च जायते ।,,
इति पल्यादिपतनशान्तिः ।।

अथ ग्राम्यारण्यादिशान्तिः ।।

गर्गः—

"प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलोद्भवाः ।।
स्थलजा वा जलं यान्ति घोरं वासन्ति निर्भयाः ।
राजद्वारे पुरद्वारे शिवाश्चाप्यशिवप्रदाः ।।
दिवा रात्रिञ्चरा वापि रात्रौ वापि दिवाचराः ।
ग्राम्यास्त्यजन्ति ग्रामं वा तच्चोत्पातस्य निर्दिशेत् ।।

दीप्ता वासन्ति सन्ध्यासु मण्डलानि च कुर्वते ।
वासन्ते विस्तरं यत्र तदा प्रेतफलं लभेत् ॥
प्रदोषे कुक्कुटो वासेद्धेमन्ते वापि कोकिलः ।
अर्कोदयेऽर्काभिमुखस्तदामात्यभयं वदेत् ॥
गृहं कपोतः प्रविशेत् क्रव्याद्यनुविलीयते ।
मधु वा मक्षिकाः कुर्यान्मृत्युर्गृहपतेर्भवेत् ॥
प्राकारद्वारगेहेषु तोरणापणवीथिषु ।
केतुच्छत्रायुधाग्रेषु क्रव्यात्संश्रयते यदि ॥
जायते वाथ वल्मीको मधु वा दृश्यते यदि ।
स देशो नाशमायाति राजा च म्रियते तदा ॥
मूषिकाः शलभा दृष्ट्वा प्रभूतं क्षुद्भयं वदेत् ।
काष्ठोल्मुकास्थिशृङ्गास्याःश्वानो मरकवेदिनः ॥
दुर्भिक्षवेदिनो ज्ञेयाः काका धान्यक्षुपे यदि ।
जनानभिभवन्तश्च निर्भया रणवेदिनः ॥
काको मैथुनयुक्तश्चेत् श्वेतः स यदि दृश्यते ।
राजा च म्रियते तत्र तदा देशो विनश्यति ॥
उलूको वासते यत्र निपतेद्वा गृहे यदि ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥
मृगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणम् ।
‘देवाः कपोत’[१] इति च जप्तव्यं पञ्चभिर्द्विजैः ॥

---

१. ॐ देवाः कपोतऽ इषितो यदिच्छन्दूतो निर्ऋत्याऽ इदमाजगाम । तस्माऽ अर्चाम कृणवाम निष्कृतिं शन्नोऽ अस्तु द्विपदे शञ्चतुष्पदे ॥ शिवः कपोतऽ इषितो नोऽ अस्त्वनागा देवाः शकुनो गृहेषु । अग्निर्हि विप्रो जुषतां हविर्नः परिहेतिः पक्षिणी नो वृणक्तु ॥ हेतिः पक्षिणी नदभात्यस्मानाष्ट्र्यां पदं कृणुतेऽ अग्निधाने शन्नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥ यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति । यस्य दूतः प्रहितऽ एषऽ एतत्तस्मै यमाय नमोऽ अस्तु मृत्यवे ॥ ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परिगां नयध्वम् । संयोपयन्तो दुरितानि विश्वा हित्वा नऽ ऊर्जं प्रपतात्पतिष्ठः ॥

‘सुदेव[1]” इति चैकेन देया गावस्तु दक्षिणा ।
जपेच्छकुन्तसूक्तं च नमो वेदशिरांसि च[2] ।।

गावश्च देया विधिवद् द्विजानां
सकाञ्चनावस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वापि निवेदितं यत् ।।”

इति ग्राम्यारण्यादिशान्तिः ।।

अथ कपोतशान्तिः ।।

नारदः–

“आरोहयेद्गृहं यस्य कपोतो वा प्रवेशयेत् ।
स्थानहानिर्भवेत्तस्य यद्वानर्थपरंपरा ।।

दोषाय धनिनां गेहे दरिद्राय शिवाय च ।
तस्य शान्तिश्च कर्तव्या जपहोमविधानतः ।।

ब्राह्मणान् वरयेत्तत्र स्वस्तिवाचनपूर्वकम् ।
षोडश द्वादशाष्टौ वा श्रौतस्मार्तक्रियापराः ।।

‘देवाः कपोत’[3], इत्यादि ऋचाभिः[4] पञ्चभिर्जपम् ।
लक्षं कृत्वा प्रयत्नेन स्वगृह्योक्तविधानतः ।।

ऐशान्यां स्थापयेद्वह्निं मुखान्ते[5]ऽष्टोत्तरं शतम् ।
प्रत्येकं समिदाज्यान्नैः प्रतिप्रणवपूर्वकम् ।।

---

[1] सुदेवो, ऽ अद्य प्रपतेदनावृत्परावतं परमाङ्गं तवाऽ उ । अधाशयीत निर्ऋतेरुपस्थेधैनं वृकार-भसासोऽ अद्युः ।।

[2] एते ऋग्वेदे प्रसिद्धा मन्त्राः ।

[3] यो सूक्त ४४६ पृष्ठमा छ ।

[4] ‘आपं चैव हलन्तानाम्’ इति भागुरिमतेन साधुः ।

[5] मुखान्ते– अग्निमुखान्ते ।

'यत इन्द्र भयामहे'[1], 'स्वस्ति देति'[2], 'त्रियम्बकैः'[3] ।
त्रिभिर्मन्त्रैश्च जुहुयात्तिलान् व्याहृतिभिस्तथा ।।
जयाहुतीस्ततो हुत्वा कुर्यात्पूर्णाहुतिं स्वयम् ।
विप्रेभ्यो दक्षिणां दद्यात् 'द्यौःशान्ति' च ततो जपेत् ।।
ब्राह्मणान् भोजयेत्पश्चात्स्वयं भुञ्जीत बन्धुभिः ।
एवं यः कुरुते सम्यक् तस्माद्दोषात्प्रमुच्यते ।।
पिङ्गलायाः स्वरेऽप्येवं मधुवल्मीकयोरपि ।
सम्पूर्णे मन्दिरे हानिः शून्यसद्मनि मङ्गलम् ।।
प्राकारे च पुरद्वारे रथ्यादिषु च वीथिषु ।
ग्रामस्य तत्फलं चैव गुरुकल्पनया ततः ।।
शान्तिकर्माखिलं कार्यं पूर्वोक्तेन क्रमेण तु ।"
इति कपोतादिशान्तिः ।।

अथ कृत्याशान्तिः ।।

"शौनकोऽहं प्रवक्ष्यामि कृत्याशान्तिं द्विजन्मनाम् ।
कुर्यात्स्वजन्मनक्षत्रे मासे मासे समाहितः ।।
सुसंस्नातो नवं वस्त्रमाच्छाद्य समलङ्कृतः ।
द्विजाग्र्यैः स्वस्तिवाच्योच्चैराशीर्भिर्वेदपारगैः ।।
सुसंस्कृते सुप्रदेशे परेणानवलोकिते ।
अथाज्यभागपर्यन्तं यज्ञतन्त्रं प्रकल्पयेत् ।।
उपलेपनप्रभृतिजुहुयात् पायसं चरुम् ।
यां कल्पयति सूक्तेन ऋचोद्धारिशनैः पुनः ।।

---

१. ॐ यतऽइन्द्र भयामहे ततो नोऽ अभयं कृधि । मघवञ्छग्धि तव तन्न ऽ ऊतभिर्विद्विषो विमृधो जहि ।।

२. ॐ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुरऽ एतु नः सोमपाऽ अभयंकरः ।।

३. यो मन्त्र १२५ पृष्ठमा छ ।

इन्द्रस्तवेति सूक्तेन जुहुयाच्च घृताहुतिम् ।
ततः स्विष्टकृत्प्रभृतिहोमशेषं समापयेत् ।।
शान्त्यर्थं दक्षिणा देया ब्राह्मणांश्चैव भोजयेत् ।
जपेद्वैतानि सूक्तानि यतात्मा सुसमाहितः ।।
प्रत्याङ्गिरसकल्पेन सद्यस्तां प्रतिबाधते ।"
इति कृत्याशान्तिः ।।

अथाशनिदग्धगृहादिशान्तिः ।।

"वेश्मक्षेत्रादिदग्धेषु वैद्युतेनाग्निना यदि ।
तेषां शान्तिं प्रवक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।।
तस्मिन् देशे जानुमात्रं गर्तं कृत्वा वसेन्निशि ।
तुलसीमवकां चैव निधाय स्वस्तिवाचयेत् ।।
कर्तास्य पश्चिमे देशे होमं कुर्याद्विचक्षणः ।
इध्माधानादिपर्यन्तं यज्ञतन्त्रं प्रकल्पयेत् ।।
उपलेपादिकं सर्वमिध्माधानाज्यभागयोः ।
आज्याहुतीः शंवतीभिर्जुहुयादग्निमग्रतः ।।
सप्रत्नथेति सूक्तेन जुहुयाच्च चरुं ततः ।
ततः स्विष्टकृत्प्रभृतिहोमशेषं समापयेत् ।।
अग्नेरुत्तरतः स्विष्टात्स्वस्त्यात्रेयं जपेत्ततः ।
ब्राह्मणान् भोजयेत्तत्र यथाशक्ति च दक्षिणा ।।
तदग्निदग्धवपुषे प्रदद्याब्राह्मणाय च ।
प्राणदग्धेषु सर्वेषु हिरण्यं दक्षिणा भवेत् ।।"
इत्यशनिदग्धगृहादिशान्तिः ।।

अथोत्पातलक्षणानि ।।

उत्पात, उपसर्ग, अद्भुतं चेति पर्यायाः । तल्लक्षणं वसिष्ठसंहितायाम्–

“अन्यत्वं प्रकृतेर्यत्तदसावुत्पातसंज्ञकः ।
अधर्मतस्त्वसत्याच्च नास्तिक्यादतिलोभतः ।।
अनाचारान्नृणां नित्यमुपसर्गः प्रजायते ।”

तद्भेदस्तत्रैव–

“दिव्यान्तरिक्षक्षितिजा विकारा घोररूपिणः ।
ग्रहर्क्षजाः केतवश्च उत्पाता दिव्यसंज्ञकाः ।।

निर्घातापरिवेषोल्कापुरन्दरधनुर्ध्वजाः ।
एवमाद्या महोत्पाता अन्तरिक्षाह्वयाः स्मृताः ।।

उत्पद्यते क्षितौ यच्च स्थावरं वाथ जङ्गमम् ।
तदेकदेशिकं भौम उत्पातः परिकीर्तितः ।।

भौमाः स्युस्तुच्छफलदा आन्तरिक्षास्तु मध्यमाः ।
संपूर्णफलदा दिव्या वर्षादर्धात्तदर्धतः ।।”

केतुफलं वसिष्ठसंहितायाम्–

“केतोरुदयास्तमयं ज्ञातुं गणितान्न शक्यते यस्मात् ।
दिव्यान्तरिक्षभौमास्तस्मात्त्रिविधाश्च केतवो जगति ।।
एकोत्तरशतभेदा दृश्यन्ते वा सहस्रभेदास्ते ।
औत्पादिकरूपत्वाद्भवन्ति बहवस्तथैको वा ।।
दिवि ऋक्षग्रहजास्ते दिव्याख्याः केतवो महाफलदाः ।
परिवेषेन्द्रधनुरुल्का गन्धर्वनगराणि निर्घाताः ।।
गगनविकारजमेतन्मध्यमफलदं तथान्तरिक्षं च ।
भूमिभवा भौमाः स्युश्चरस्थिरा वस्तुसंभवा ये च ।।
तेऽधमफलदास्तेषां कथयामि फलानि रूपाणि ।
वर्षैर्मासैः पक्षैः क्रमशः परिपाकमुपयान्ति ।।
स्निग्धः प्रसन्नरूपः शुक्लनिभो ह्रस्वदण्डवत्सौम्यः ।
उदयास्तमये त्वेवं सुभिक्षसौख्यावहः केतुः ।।

धूम्रनिभो धूमाख्यः केतुर्दोषप्रदो भवति ।
इन्द्रशरासनरूपः स्थूलनिभो वर्षभीतिदः सम्यक् ।।
बहुभिः शिखिभिरतुला विद्युन्मणिहारहेमनिभाः ।
अपरेन्द्रदिशोर्दिश्यान्महाह्वं तद्दिगीशानाम् ।।
शुकमुखबन्धुनिभा वह्निसुराक्षतजसन्निभा रूक्षाः ।
दृश्यन्ते यद्यनलदिशि तावन्तस्तेऽपि शिखिभयदाः ।।
मृत्युसुता वक्रशिखाः कृष्णा रूक्षाः प्रहरणाकाराः
दृश्यन्ते याम्यायां जनमारकभयप्रदास्ते ।।
क्षितितनया द्वात्रिंशद्दर्पणसदृशाः सरश्मयो विशिखाः ।
क्षुद्भयदाः सशिरस्का यमतनया मृत्युदाश्च शैलनिभाः ।।
शशितनयाः कुसुमनिभाः कुन्देन्दुक्षीररजतनिभाः ।
उत्तरभागे शिखिनो जन्तूनां ते सुभिक्षकराः ।।
त्रिशिखी त्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्मदण्डनिभः ।
अनियतदिक्प्रभवोऽसौ शान्तिकरो ब्रह्मदण्डाख्यः ।।
शनितनयास्ताराख्याः शुक्लऋजवश्च षट्संख्याः ।
दृश्यन्ते द्वित्रिदिनैः शुभदा मासैश्च रुग्भयदाः ।।
जीवसुता विचकाख्या शुक्लास्ताराश्रिताः स्निग्धाः ।
याम्यायां दिशि संस्था बहवस्ते तापदाः सततम् ।।
बुधतनयाश्चोराख्याः शुक्लाः सूक्ष्मा यथेष्टदिक्प्रभवाः ।
आमयभयदाः सततं जन्तूनां पञ्चपञ्चाशत् ।।
कुजतनयाः कैकेयाः क्षतजानलसन्निभास्त्रिशूलधराः ।
याम्यायां दिशि संस्थाः क्षुद्भयदाः षष्टिसंख्याकाः ।।
तामसकीलकसंज्ञा राहुसुताः सूर्यमण्डले दृष्टाः ।
तेषां तन्निखिलफलं सम्यक्कथितं च सूर्यवारेऽपि ।।
अग्निसुतास्त्वाग्नेय्यां विंशत्यधिकाश्च शतसंख्याकाः ।
प्रलयानलसदृशभानुवह्निभयप्रदास्तेऽपि ।।

अरुणाख्याः श्यामनिभाः शुक्रसुता विविधरूपसङ्कीर्णाः ।
शस्त्रक्षुद्भयदास्ते सप्तोत्तरसप्ततिश्च संख्याकाः ।।
दण्डकसंज्ञाश्चाष्टौ तारासदृशाः प्रजापतेस्तनयाः ।
द्वाचत्वारिंशोत्तरशताधिकाः पापदा विधातृसुताः ।।
वरुणभवार्ककाख्या द्वात्रिंशद्वंशगुल्मयष्टिनिभाः ।
शशिवत्प्रभासमेता राज्ञोऽन्यत्वं प्रकुर्वन्ति ।।
कालभवाः षण्णवतिसंख्यास्तेषां कबन्धनिभाः ।
तन्नामानः शिखिनः पुण्ड्रामयभीतिदा जगतः ।।
विमलास्ताराकारा दशदिक्षु समुद्भवाः शिखिनः ।
एवं सहस्रभेदाः पापाश्चैषां विशेषमभिधास्ये ।।
पश्चिमदिशि संभूतश्चोत्तरनम्रश्च सौम्यकेतुः सः ।
कुरुते सुभिक्षमतुलं सितवर्णोऽसौ महास्निग्धः ।।
दक्षिणनम्रः प्राच्यां तथाविधो याम्यकेतुः सः ।
रूक्षः क्षुद्भयदायी मरकभयं वा करोत्येव ।।
धूमनिभो याम्यायां कपालकेतुर्बृहत्तनुः स्निग्धः ।
दिक्षु विदिक्षु प्रभवः क्षुन्मरकावृष्टिरोगकरः ।।
प्राच्यां दिशि संभूतः प्रदक्षिणं भ्रमति चक्रवद्रूक्षः ।
स च चक्रकेतुरनिशं कपालकेतोश्च तुल्यफलः ।।
पश्चिमतः संभूतो याम्यं दिशं भ्रमति च प्रादक्षिण्यम् ।
धूमनिभो विषमाख्यःकेतुर्भूभारमपनयति ।।
कतिपयदिवसं गत्वा गमननिवृत्तिकरो धूमनिभः ।
नरपतिकलहाज्जगतः करोति विलयं स चक्रकाख्यः ।।
गगनत्रिभागदीर्घः श्यामनिभोऽसौ महासटाकारः ।
ऋतुवक्रगतिं कुरुते क्रमशो जगतस्त्रिभागहरः ।।
गतिरहितो ध्रुवकेतुः प्रमाणवर्णाकृतिर्नभवेत् ।
ग्रहनक्षत्रोपगते दृष्टो नैवाशुभप्रदः केतुः ।।

उपकरणेषु च राज्ञां सुरगृहतरुपर्वतेषु सदनेषु ।
दर्शनमुपैति पतितं विनाशिनामेव नियमेन ।।
कुमुदनिभः कुमुदाख्यो दिवसैः षड्भिस्तु पश्चिमे दृष्टः ।
प्रागुत्तरदिशि यदि वा सुभिक्षमतुलं करोत्येव ।।
तारोपरि मणिकेतुर्याम्यायां दिशि सकृद्दृष्टः ।
उदयास्तमयसमये शुभदोऽसौ क्षीरधारेव ।।
जलधारेव हि ऋज्वीनतया शिखया परेण दृष्टः सः ।
जलकेतुर्जलसदृशः सुभिक्षकरस्तु सर्वजन्तूनाम् ।।
हरिलाङ्गूलनिभो जलकेतुः ऋकचसन्निभो वापि ।।
बहुरोगभयं कुरुते सर्पाकारस्तु सर्वदा भवति ।।
अपरोऽपि पद्मकेतुः पद्मनिभः पद्मसंकाशः ।
क्षेमकरो नृपतीनां सुभिक्षदः सर्वजन्तूनाम् ।।
आवर्तकेतुरयं प्रादक्षिण्येन दीप्तिमान् शुक्लः ।
शुभदो व्यत्ययकेतुस्त्वतुलाभयभीतिरीतिकरः ।।
आक्रम्य गगनमखिलं संवर्ताख्यः स धूमनिभः ।
शूलाग्रस्त्वितरो वा स केतुरसकृद्भयप्रदो जगतः ।।
शुभदाः शुक्लनिभा ये कृष्णास्त्वशुभप्रदा जगतः ।
केतूनां फलमुक्त्वा वक्ष्ये दस्रादिभेषु जातानाम् ।।
अश्विन्यां यदि केतुर्जातस्तदाश्वजीविनो हन्यात् ।
याम्ये म्लेच्छाधिपतिं बहुलायां कलिङ्गाधिपतिम् ।।
रोहिण्यामतुलबलं निहन्ति केतुश्च शूरसेनेशम् ।
औशीनरमुख्यपतीन् सौम्ये रौद्रे च जलजन्तून् ।।
अश्मकदेशाधिपतिं त्वादित्ये पुष्यभे च मगधपतिम् ।
आर्याधिपतिं सार्पे पाण्ड्याधिपतिं च पितृधिष्ण्ये ।।
भाग्यर्क्षे तूज्जयिनं चोत्तरे दण्डनायकाँस्त्वखिलान् ।
हस्तर्क्षे धनिकवराँश्चित्रायां कुरुभवाँस्त्वखिलान् ।।

काम्बोजनृपतिमुख्यं प्रभञ्जने जातकेतुरपि ।
इक्ष्वाकुवंशनाशं द्विदैवभे च गौडेशम् ।।

ज्येष्ठायां यदि जातः स हन्यते सर्वमण्डलाधीशम् ।
मूले मद्राधिपतिं जलदैवे कलिङ्गदेशपतिम् ।।

गृञ्जरिका ये देशास्तान् हन्याद्वैश्वधिष्ण्यजः सोऽपि ।
केकयनाथं हन्याच्छ्रवणर्क्षे वसुभे चाखिलान्द्रविडान् ।।

नैमिषं नृपतिं हन्याच्छतभिषजस्त्वजाङ्घ्रिजश्च पाञ्चालान् ।
अहिर्बुध्न्यर्क्षभवः संकरिकान्किरातकोणभवान् ।।

पौषणर्क्षभवः केतुर्द्विजसज्जनधर्ममार्गस्थान् ।
अभिजिन्नक्षत्रभवः कोङ्कणदेशं च निशिचराँश्चापि ।।

ये केतवश्चाशिवसुखर्क्षजाता–
स्ताराग्रहादिष्वपि संभवाश्च ।
कुर्वन्तु ते तीक्ष्णफलं जनाना–
मन्येऽपि सामान्यफलप्रदाः स्युः ।।"

उल्कादिलक्षणं तत्फलं च नारदीये–

"स्वर्गच्युतानां रूपाणि यान्युल्कास्तानि वै भुवि ।
धिष्ण्योल्काविद्युदशनितारा: पञ्चविधाः स्मृताः ।।

पीडा चोष्ट्राहि गोमायुखरगोगजदंष्ट्रिकाः ।
कपिगोधा धूमनिभा विविधाः पापदा नृणाम् ।।

उदयास्तमयेऽर्केन्द्वोः पतितोल्का शुभप्रदा ।
सितरक्ता पीतसिता सोल्का हन्ति द्विजातिनः ।।
राजराष्ट्रविनाशाय प्रासादप्रतिमासु च ।
गृहेषु स्वामिनां पीडा नृपाणां पर्वतेषु च ।।
दिक्षु तत्तद्दिगीशानां कर्षकाणां स्थलेषु च ।
गोष्ठे गोस्वामिनां पीडा शिल्पिकानां जलेषु च ।।

वर्तुलोल्का पुरं हन्ति छत्राकारा पुरोहितम् ।
वंशगुल्मलताकारा राष्ट्रविद्राविणी तथा ।।"
इति केतुफलम् ।।

अथ परिवेषः–

"किरणा वायुनिहता उच्छ्रिता मण्डलीकृताः ।
नानावर्णाकृतयः खे परिवेषाः शशीनयोः ।।
मुहुर्मुहुः प्रलीयन्ते न सम्पूर्णफलप्रदाः ।
अनेकवृत्तवर्णश्च परिवेषो नृपान्तकृत् ।।
द्विमण्डलश्च भूनाथं नृपघ्नोऽथ त्रिमण्डलः ।
द्वौ ग्रहौ परिवेषस्थौ क्षितीशकलहप्रदौ ।।
कुर्वन्ति कलहानर्थं परिवेषगतास्त्रयः ।
चत्वारः परिवेषस्था नृपस्य मरणप्रदाः ।।
परिवेषगताः पञ्च जगत्प्रलयदा ग्रहाः ।
नृपहानिः कुजादीनां परिवेषे पृथक् पृथक् ।।
प्रावृडृतौ तु शरदि परिवेषो जलप्रदः ।
प्रायेणान्येषु ऋतुषु तदुक्तफलदायिनः ।।"

अन्यत्रापि:–

"रविशशिपरिवेषे पूर्वयामे च पीडा
रविशशिपरिवेषे मध्यमे चातिवृष्टिः ।
रविशशिपरिवेषे धान्यनाशस्तृतीये
रविशशिपरिवेषे राज्यनाशश्चतुर्थे ।।"
इति परिवेषः ।।

अथेन्द्रधनुः–

"नानावर्णांशवो भानोः साभ्रवायुनिघट्टिताः ।
यद् व्योम्नि चैव संस्थानमिन्द्रचापं प्रदृश्यते ।।

अथवा शेषनागेन्द्रदीर्घनिःश्वाससंभवम् ।
विदिक्षुजं दिक्षुजं च तद्दिक्कूपविनाशनम् ।।
अवृष्टौ वृष्टिदं त्वैन्द्र्यां दिशि वृष्ट्यामवृष्टिदम् ।
अवनीगाढमच्छिन्नं प्रतिकूलं धनुर्द्वयम् ।।
नृपान्तकृद्यदि भवेदानुकूले तु तच्छुभम् ।"
इतीन्द्रधनुः ।।

अथनिर्घातः—

"वायुना निहतो वायुर्गगनात्पतति क्षितौ ।
तदा दीप्तः सुगुरुतः स निर्घातोऽतिदोषकृत् ।।"
इति निर्घातः ।।

अथ रजः—

"सितेन रजसाच्छन्ना दिग्ग्रामवनपर्वताः ।
यदा तदा भवन्त्येते निधनं यान्ति भूमिपाः ।।
भूमोद्भवस्तु यस्यां वै तस्यां दिशि विनाशनम् ।
ऋतावन्यत्र शिशिरात्संपूर्णफलदं रजः ।।"
इति रजः ।।

अथ भूकम्पः—

"भूभारखिन्ननागेन्द्रशेषविश्रामसंभवः ।
भूकम्पः सोऽपि जगतामशुभाय भवेत्सदा ।।
यामक्रमेण भूकम्पाद् द्विजादीनामनिष्टदाः ।
अनिष्टदाः क्षितीशानां सन्ध्ययोरुभयोरपि ।।
प्रायेण निखिलोत्पाताः क्षितीशानामनिष्टदाः ।
षड्भिर्मासैश्च भूकम्पो द्वाभ्यां दाहः फलप्रदः ।।
अनुक्ताः पञ्चभिर्मासैस्तदानीं फलदं रजः ।"
इति भूकम्पः ।।

अथ ग्रहयुद्धम् । अद्भूतसागरे गर्गः–

'छादनं रोधनं चैव रश्मिरोधं तथैव च ।
अपसव्यं ग्रहाणां च चतुर्धा युद्धमुच्यते[1] ।'

पराजयलक्षणं च तत्रैव–

'ग्रहो ग्रहं समागम्य श्यामीभवति यो भृशम् ।
हानिं प्राप्नोति वक्तव्यं स्यन्दते च मुहुर्मुहुः ।।'

तत्फलं ग्रन्थविस्तरभयान्नोच्यते । अत्र सामान्यशान्तिरेव-विशेषानुक्तेः ।

इति ग्रहयुद्धम् ।।

अथ प्रतिसूर्यः । तत्रैव मयूरचित्रे–

"उदीयमानः सूर्यो वै दृश्यते प्रतिरूपकः ।
त्रीण्यब्दानि भवेन्नाशो मासार्धेन न संशयः ।।"

अत्रापि साधारणशान्तिः । इति प्रतिसूर्यः ।।

अथ रश्मिदण्डः । वाराहसंहितायाम्–

'रविकिरणजलदमरुतां सङ्घातो दण्डवत्सितो दण्डः ।
स विदिङ्मुखो नृपाणामशुभो दिक्षु द्विजानां च ।।'

इति रश्मिदण्डः ।

अथ दिग्दाहः । अद्भुतसागरे बार्हस्पत्ये –

'यदास्तमितआदित्ये वह्निज्वालाप्रदृश्यते ।
दिशां दाहं तु तं विद्यादिति भार्गवभाषितम् ।।'

नारदसंहितायाम्–

'दिग्दाहः पीतवर्णश्चेत् क्षितीशानां भयप्रदः ।'

इति दिग्दाहः ।।

---

[1] इदं च ग्रहयुद्धं भौमादिग्रहाणामेव । न तु चन्द्रसूर्ययोः ।
'ताराग्रहाणां पञ्चानां युद्धान्युक्तानि योगतः' इत्युपसंहारात् ।

अथचच्छाया । तत्रैव मात्स्ये–

'विरजस्के रवौ चैव यदा छाया न दृश्यते ।
दृश्यते च प्रतीपा वा तदा देशभयं वदेत् ॥'
अत्र मासिकः फलपाकः । अनुक्तफलकालत्वात् ।
इतिच्छाया ॥

अथ मेघगर्भोपघातः । तत्रैव वटकनिकायाम्–

'गर्भोपघातलिङ्गान्युल्काशनिभूकम्पनिर्घाताः ।
ग्रहयुग्मराहुशशिनां भ्रंशः पुरो वा रजो वापि ॥'

तत्रैव बृहत्संहितायाम्–

'रुधिरादिवृष्टिवैकृतमथवेन्द्रधनुर्निदर्शनं राहोः ।
इत्युत्पातैरेतैर्विविधैश्चान्यैर्हतो गर्भः ॥'
इति मेघगर्भोपघातः ॥

अथाद्भुतपाककालः । अद्भुतसागरे बृहत्पाराशरः–

“तत्रोत्पातफलं दिव्यं पूर्णे वर्षेऽपि पच्यते ।
आन्तरिक्षं तथा भौमं मासैः षड्भिस्तथर्तुभिः ॥
निर्घातस्तु त्रिभिर्मासैर्गन्धर्वनगराणि च ।
अग्निना सप्तरात्रेण मासेनोल्का विपच्यते ॥
पुरचैत्यादिभङ्गेषु पुरसङ्क्रमणेषु च ।
नरेन्द्रध्वजभङ्गेषु फलं मासाद्विपच्यते ॥
शान्तिस्वरूपजातानां पाकः षाण्मासिको भवेत् ।
अरिष्टं पच्यते षट्सु मासेषु फलदं त्रिषु ॥
अतिहर्षोऽतिशोकश्च सद्य एव विपच्यते ।
कीटमूषकसर्पाणां मक्षिकादिषु यत्फलम् ॥
पच्यते तद् द्विमासेषु मधु सप्तसु पच्यते ।
हयानां हस्तिनां चैव शकुनं च शुनस्तथा ॥

सद्यस्त्र्यहाद्वा नियतमुलूकस्य तथैव च ।
विदेहवाक्संश्रवणं दर्शनं यक्षरक्षसाम् ।।
पशूनां विकृतं यच्च षष्ठे मासि विपच्यते ।
मांसतैलविकारेषु देहाङ्गस्पन्दनेषु च ।।
वस्त्रजातिविकारेषु फलं स्यात्सप्तमेऽहनि ।
चित्रकर्मणि मासाभ्यां शयने षष्ठमासिकम् ।।
वल्मीके षट्सु मासेषु क्षये वृद्धौ तथा त्रिषु ।
जयोच्छ्रायेषु भङ्गेषु यज्ञकर्मणि वैकृते ।।
सोमध्वजविकारे च विकाराः सप्तमासिकाः ।
तन्तुबीजे विकारेषु राज्ञः शस्त्रेवजृम्भणे ।।
पद्मोत्पलफलादीनां फलं षाण्मासिकं भवेत् ।
विनाशे निष्फलं तेषां पाककाले निवर्तते ।।"

तत्रैव गर्गः-

"पक्षाद्विपाकः सूर्यस्य पाकः सोमस्य मासिकः ।
मासद्वये स्मृतो राहोर्विपाको नात्र संशयः ।।
त्रिभिर्मासैर्विपाकस्तु नियतं धूमकेतवः ।
संवत्सरविपाकौ तु ज्ञेयौ बुधबृहस्पती ।।
षाण्मासिकश्चोशनसः सूर्यजस्य तु पञ्चभिः ।
त्रिभिर्मासैस्तु भौमस्य उल्कापातस्तु मासिकः ।।
अष्टभिर्भूमिकम्पस्तु निर्घातः पच्यते त्रिभिः ।
अनार्तवं पुष्पफलं षड्भिर्मासैर्विपच्यते ।।
पक्षिकीटपतङ्गानां दशाहात्फलमादिशेत् ।
घृततैलवसावर्षे सद्यः फलमुदाहृतम् ।।
अरिष्टं षट्सु मासेषु पच्यते कलहं त्रिषु ।
हिरण्यविक्रियायां तु फलं मासाद्विपच्यते ।।

कलहार्थविपर्यास उत्सवक्रियया सह ।
अचलानां च चलने षण्मासात्फलमादिशेत् ।।
कीटमूषकसर्पाणां मक्षिकाणां तथैव च ।
दशने त्वतिमात्रेण फलं त्रैमासिकं भवेत् ।।
रात्राविन्द्रधनुर्दृष्ट्वा राज्ञः शीलविपर्ययम् ।
वानराणां नराणां च तथैव गजवाजिनाम् ।।
नानावादित्रशब्दानां फलं मासाद्विपच्यते ।
गृध्रगोमायुसिंहानां फलं मासाद्विपच्यते ।।
बिडालनकुलानां च वाराहव्याघ्रयोस्तथा ।
श्रुत्वान्तरिक्षे शब्दं तु फलं मासाद्विपच्यते ।।”

मात्स्ये, विष्णुधर्मोत्तरे च–

“अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा[1] भवेत् ।
दशाहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं भवेत् ।।”

इत्यद्भुतपाककालः ।।

अद्भुतफलस्नानानि । अद्भुतसागरे पाराशरः–

‘राज्ञः शरीरे लोके च पुरदारपुरोहिते ।
पाक आयाति पुत्रेषु तथा कोशे च वाहने ।।’

तत्रैव गर्गः–

“पुरे जनपदे कोशे वाहने च पुरोहिते ।
पुत्रे स्वामिनि भृत्ये च पच्यते दैवमष्टधा ।।”

वसिष्ठसंहितायाम्–

“भौमं शान्त्या शमं याति मार्दवं त्वन्तरिक्षजम् ।
दिव्यं हेमान्नगोभूमिदानैस्तत्कोटिहोमतः ।।
महोपहाराद्रुद्रस्य गोदोहात्तत्पुरःसरम् ।
अलङ्कृते क्षितितले यावत्क्षारप्लवं भवेत् ।।

---

[1] शिवा– निर्विकारा ।

अपि दिव्यं शमं याति किं पुनस्त्वितरद्वयम् ।
अकृत्वा शान्तिकं राजा दुःखाम्भोधौ निमज्जति ॥"

अद्भुतसागरे गर्गः–

"ये तेषु शान्तिं कुर्वन्ति न ते यान्ति पराभवम् ।
ये तु न प्रतिकुर्वन्ति क्रियामश्रद्धयान्विताः ॥
नास्तिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात् ।"

वृक्षोत्पाते तत्फलमाह नारदः–

"अकाले पुष्पिता वृक्षा दृश्यन्ते फलिता यदि ।
कार्यं तच्छेदनं तत्र ततः शान्तिर्मनीषिभिः ॥"

अथोत्पातशान्तिः । नारदसंहितायाम्–

"उत्पाता विविधा लोके दिव्यभौमान्तरिक्षगाः ।
तेजोनामानि तां शान्तिं सम्यक् वक्ष्ये पृथक् पृथक् ॥
देवताद्याः प्रनृत्यन्ति पतन्ति प्रज्वलन्ति वा ।
मुहुर्गायन्ति रोदन्ति प्रस्विद्यन्ति हसन्ति च ॥
वमन्त्यग्निं तथा धूमं स्नेहं रक्तं पयो जलम् ।
अधोमुखं तु तिष्ठन्ति स्थानात्स्थानं व्रजन्ति वा ॥
एवमाद्याश्च दृश्यन्ते विकाराः प्रतिमादिषु ।
गन्धर्वनगरं चैव दिवा नक्षत्रदर्शनम् ॥
महोल्कापतनं कष्टं नृणां रक्तप्रवर्षणम् ।
गान्धर्वगेहं दिग्दाहं भूमिकम्पं दिवानिशि ॥
अनग्नौ च स्फुलिङ्गाःस्युर्ज्वलनं च विनेन्धनम् ।
निशीन्द्रचापं मण्डूकशिखरे श्वेतवायसम् ॥
दृश्यन्ते विस्फुलिङ्गा ये गोगजाश्वोष्ट्रगास्ततः ।
जन्तवो द्वित्रिशिरसो जायन्ते चावियोनिषु ॥
प्रतिसूर्याश्च तिसृषु स्युर्दिक्षु युगपद्रवेः ।
जम्बूको ग्रामसंवेशः केतूनां च प्रदर्शनम् ॥

काकानामाकुलं रात्रौ कपोतानां दिवा यदि ।
एवमेते महोत्पाता बहवः स्थाननाशकाः ।।
केचिन्मृत्युप्रदाः केचिच्छत्रुभ्यश्च भयप्रदाः ।
देवालये स्वगेहे वा ऐशान्यां पूर्वतोऽपि वा ।।
कुण्डं लक्षणसंयुक्तं कल्पयेन्मेखलायुतम् ।
गृह्योक्तविधिना तत्र स्थापयेच्च हुताशनम् ।।
जुहुयादाज्यभागान्तमथवाष्टोत्तरं शतम् ।
यत इन्द्र भयामहे[1] स्वस्ति[2] येन[3] च मन्त्रकैः ।।
समिदाज्यचरुव्रीहितिलैर्व्याहृतिभिस्ततः ।
कोटिहोमं तदर्धं वा लक्षहोममथायुतम् ।।
यथावित्तानुसारेण पादहोममथापि वा ।
एकविंशतिरात्रं वा पक्षं पक्षार्धमेव वा ।।
त्रिरात्रमेकरात्रं वा होमकर्म समाचरेत् ।
गणेशक्षेत्रपालार्कदुर्गाख्या अङ्गदेवताः ।।
तासां प्रीत्यै जपः कार्यः शेषं पूर्ववदाचरेत् ।
ऋत्विग्भ्यो दक्षिणां दद्यात् षोडशेभ्यः स्वशक्तितः ।।"
इत्युत्पातसाधारणशान्तिः ।।

देवताप्रतिमादिविकारे, गर्गः–

"देवताद्याः प्रनृत्यन्ति वेपन्ते प्रज्वलन्ति वा ।
आरटन्ति च रोदन्ति प्रस्विद्यन्ति हसन्ति च ।।
उत्तिष्ठन्ति निषीदन्ति प्रधावन्ति रमन्ति च ।
भजन्ति विकृतिं भूम्ना मानुषाणां भयावहा ।।

१, ॐ यतऽ इन्द्र भयामहे ततो नोऽ अभयं कृधि । मघवञ्छग्धि तव तन्नऽ ऊतिभिर्विद्विषो विमृधो जहि ।।

२. ॐ स्वस्तिदाविशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुरऽ एतु नः सोमपाऽ अभयंकरः ।।

३. ॐ येन वृद्धो न शवसातुरो न स्वाभिरूतिभिः । सोमः सुतः स ऽ इन्द्र तेस्ति स्वधापते मदः ।।

अवाङ्मुखावतिष्ठन्ति स्थानात्स्थानं भ्रमन्ति च ।
वमन्त्यग्निं तथा धूमं स्नेहरक्ते तथा वसाम् ।।
एवमादीनि दृश्यन्ते विकाराः सहजोत्थिताः ।
लिङ्गायतनचित्रेषु तत्र वासं न रोचयेत् ।।
राज्ञो वा व्यसनं तत्र स च देशो विनश्यति ।
देवयात्रासु चोत्पातान् दृष्ट्वा देशभयं वदेत् ।।
विना साहसधर्मेण तत्र वासं न रोचयेत् ।
पशूनां रुद्रजं[1] ज्ञेयं नृपाणां लोकपालजम् ।।
ज्ञेयं सेनापतीनां च यत्स्यात् स्कन्दविशाखजम् ।
लोकानां विश्ववस्विन्द्रविश्वकर्मसमुद्भवम् ।।
विनायकोद्भवं ज्ञेयं गणानां सेवकाय च ।
देवदूते च याः प्रेष्या देवस्त्रीषु नृपस्त्रियः ।।
वासुदेवेषु विज्ञेयं गृहाणामेव नान्यथा ।
देवतानां विकारेषु श्रुतिवेत्ता पुरोहितः ।।
देवतार्चां तु गत्वा वै स्नातामाच्छाद्य भूषयेत् ।
पूजयेत्तां महाभाग गन्धमाल्यान्नसंपदा ।।
मधुपर्केण विधिवदुपतिष्ठेदनन्तरम् ।
तल्लिङ्गेन च मन्त्रेण स्थालीपाकं यथाविधि ।।
पुरोधा जुहुयाद्वह्नौ सप्तरात्रमतन्द्रितः ।
विप्राश्च पूज्या मधुरान्नपानैः सदक्षिणैः सप्तदिनं नरेन्द्र ।
प्राप्तेऽष्टमेऽह्नि क्षितिगोप्रदानैः सकाञ्चनैः शान्तिमुपैति पापम् ।।"

इत्यद्भुतशान्तिषु देवताप्रतिमावैकृत्यशान्तिः ।।

अग्निविकारे गर्गः–

"अग्निः प्रदीप्यते यत्र राष्ट्रे भृशमनिन्धनः ।
न दीप्यते चेन्धनवाँस्तद्राष्ट्रं पीड्यते नृप ।।

---

[1] रुद्रजम्=रुद्रप्रतिमासूत्पन्नं वैकृत्यं पशुभयदमित्यर्थः । एवं सर्वत्र ज्ञेयम् ।

प्रासादतोरणद्वारनृपवेश्मसुरालयाः ।
एते च यत्र दह्यन्ते तत्र राजभयं वदेत् ।।
विद्युता वा प्रदह्यन्ते तत्रापि नृपतेर्भयम् ।
अनैशानि तमांसि स्युर्विना पांसुरजांसि च ।।
धूमश्चानग्निजो यत्र तत्र विद्यान्महद्भयम् ।
तडिद्विनाभ्रं गगने भयं स्याद् वृष्टिवर्जिते ।।
दिवा सतारे गगने तथैव भयमादिशेत् ।
ग्रहनक्षत्रवैकृत्ये ताराविकृतिदर्शने ।।
पुत्रवाहनदारेषु चतुष्पदगृहेषु च ।
स्वभावाद्वापि हीयेत धेनुवत्सादिकं च यत् ।।
लोहायुधविकारः स्यात्तत्र सङ्ग्राममादिशेत् ।
त्रिरात्रोपोषितस्तत्र पुरोधाः सुसमाहितः ।।
समिद्भिः क्षीरवृक्षाणां सर्षपैश्च घृतेन च ।
होमं कुर्यादग्निमन्त्रैर्ब्राह्मणाँश्चैव भोजयेत् ।।
दद्यात्सुवर्णं च तथा द्विजेभ्यो गाश्चैव वस्त्राणि तथा भुवं च ।
एवं कृते तत्समुपैति नाशं यदग्निवैकृत्यभवं द्विजेन्द्र ।।"
इत्यग्निवैकृत्यशान्तिः ।।

वृक्षविकारे, गर्गः–

"पुरेषु येषु दृश्यन्ते पादपा दैवचोदिताः ।
रुदन्तो वा हसन्तो वा वमन्तो वा रसान् भुवि ।।
अरोगा वा सरोगा वा नित्यमेव विचारयेत् ।
अरोगा वा विना वातं शाखां मुञ्चन्ति पादपाः ।।
पुष्पं जलं तथा काष्ठं दर्शयन्ति च पादपाः ।
पूर्वावस्थां दर्शयन्ति फलं पुष्पमनार्तवे ।।
क्षीरं स्नेहं सुरां रक्तं मधु तोयं स्रवन्ति वा ।
शुष्यन्त्यरोगाः सहसा शुष्का रोहन्ति वा पुनः ।।

उत्तिष्ठन्तीह पतिताः पतन्ति च तथोत्थिताः ।
तत्र वक्ष्यामि ते ब्रह्मन् विपाके फलमेव च ।।
रोदने व्याधिरल्पेऽतिहसने देशविभ्रमः ।
शाखाप्रपतने कुर्यात्सङ्ग्रामं योधपातनम् ।।
बालानां मरणं कुर्याद् बालानां फलपुष्पतः ।
स्वराष्ट्रभेदं कुरुते फलपुष्पमनार्तवम् ।।
क्षीरं सर्वत्र गम्भीरं स्नेहं दुर्भिक्षलक्षणम् ।
वाहनापचयं मद्ये रक्ते सङ्ग्राममादिशेत् ।।
मधुस्रावे भवेद् व्याधिर्जलस्रावेण वर्षति ।
अरोगशोषणं ज्ञेयं ब्रह्मन् दुर्भिक्षलक्षणम् ।।
शुष्केषु संप्ररोहत्सु वीर्यमन्नं महीपते ।
उत्थाने पतितानां च भयं भेदकरं भवेत् ।।
स्थानात्स्थाने तु गमने देशभङ्गं तथादिशेत् ।
जलपत्स्वपि च वृक्षेषु स्वनत्स्वपि धनक्षयम् ।।
एतत्पूजितवृक्षेषु सर्वराजोऽपि पच्यते ।
पुष्पैः फलैर्वा विकृते राज्ञो मृत्युं तथादिशेत् ।।
अन्येषु चैव वृक्षेषु वृक्षोत्पातेष्वतन्द्रितः ।
आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत् ।
वृक्षोपरि तथा छत्रं कुर्यात्पापप्रशान्तये ।
शिवमभ्यर्चयेद्देवं पशुं चास्मै निवेदयेत् ।।
‘मूलेभ्य’[1] इति वृक्षेषु हुत्वा रुद्रं जपेत्ततः ।

मध्वाज्ययुक्तेन तु पायसेन
संपूज्य विप्राँश्च भुवं च दद्यात् ।
गीतेन नृत्येन तथार्चयेत्तं
देवं हरं पापविनाशहेतोः ।।

---

[1] ॐ मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ।

अद्भुतसागरे, उशनाः—--

अश्वत्थे पुष्पिते क्षिप्रं ब्राह्मणास्तु ह्युदुम्बरे ।
प्लक्षे वैश्यास्तु पीड्यन्ते न्यग्रोधे दस्यवस्तथा ॥
कदम्बइक्षुर्वंशो वा फुल्लितश्चेत्कथञ्चन ।
वसन्ते पुष्पिते यत्र बाणजम्बूर्धवस्तथा ॥
शृङ्गवेरोऽथवा यत्र मासैः षड्भिर्जनक्षयः ।
कुसुमे कुसुमोत्पत्तिः परचक्रागमं वदेत् ॥
औदुम्बराणां समिधो जुहुयादयुतं ततः ।
महाव्याहृतिभिर्विप्रान् भोजयेद्वै सदक्षिणम् ॥
कदलीगर्भमूर्धन्यः प्ररोहति गृहे यदि ।
अरण्यं स भवेद्देशो गर्गस्य वचनं यथा ॥
सहिरण्यं वृषं दद्याद् द्विजायौदुम्बरीसमित् ।
'इमारुद्रेति[1]' मन्त्रेण होतव्यं च सहस्रधा ॥"
इति वृक्षविकारशान्तिः ॥

वृष्टिविकारे, गर्गः—

"अतिवृष्टिरनावृष्टिर्दुर्भिक्षायोभयी मता ।
अनृतौ तु दिवानन्तावृष्टिर्व्याधिभयाय तु ॥

अनभ्रवैकृताश्चैव विज्ञेया राजमृत्यवे ।
अनभ्रवैकृता मेघमन्तरे गर्जितादयः ॥

शीतोष्णानां विपर्यासे ऋतूनां रिपुजं भयम् ।
शोणितं वर्षते यत्र तत्र शस्त्रभयं भवेत् ॥

अङ्गारपांशुवर्षेण नगरं तद्विनश्यति ।
मज्जास्थिस्नेहमांसानां जनमारभयं भवेत् ॥

---

[1] ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथासमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽ अस्मिन्ननातुरम् ॥

फलं पुष्पं तथा धान्यं परेणातिभयाय तु ।
पांशुजं तूपलानां च वर्षतो रोगजं भयम् ।।

छिद्रं वान्नप्रवर्षेण सस्यानामीतिवर्धनम् ।
विरजस्के रवौ व्यभ्रे यदा छाया न दृश्यते ।।

दृश्यते तु प्रतीपा[1] वा तत्र देशे भयं भवेत् ।
निरभ्रे वा तथा रात्रौ श्वेतं याम्योत्तरेण तु ।।

इन्द्रायुधं तथा दृष्ट्वा उल्कापातं तथैव च ।
दिग्दाहपरिवेषौ च गन्धर्वनगरं तथा ।।

परचक्रभयं विद्याद्देशोपद्रवमेव च ।
सूर्येन्दुपर्जन्यसमीरणानां
यागस्तु कार्यो विधिवद्द्विजेन्द्रैः ।।

धान्यानि गोकाञ्चनदक्षिणाश्च
देया द्विजानामघनाशहेतोः ।।"

इति वृष्टिवैकृतशान्तिः ।।

जलाशयविकारे, गर्गः–

"नगरादपसर्पन्ते समीप उपयान्ति च ।
नद्योह्लदप्रस्रवणा विरसा वै भवन्ति च ।।

विवर्णं कलुषं तप्तं फेनावर्तं तु सङ्कुलम् ।
क्षीरं स्नेहं सुरां रक्तं वहन्ते व्याकुलोदकम् ।।

षण्मासाभ्यन्तरे तत्र परचक्रभयं विदुः ।
जलाशया नदन्ते च प्रज्वलन्ति क्वथन्ति च ।।

विमुञ्चन्ति तथा ब्रह्मन् ज्वाला धूमं रजांसि च ।
अखाते वा जलोत्पत्तिः ससत्त्वा वा जलाशयाः ।।

---

[1] प्रतीपा=प्रतिकूला छाया, विपरीता छायेत्यर्थः ।

सङ्गीतशब्दा दृश्यन्ते जनमारभयं विदुः ।
दिव्यं महाभयं विद्धि मधुमात्रावसेचनम् ॥
जप्तव्या वारुणा मन्त्रास्तैश्च होमो जले भवेत् ।
मध्वाज्ययुक्तं परमान्नमत्र ।
देयं द्विजानामथ भोजनार्थम् ।
गावश्च देयाः सितवस्त्रयुक्ता-
स्तथोदकुम्भाः सकलाघशान्त्यै ॥"

इति जलाशयवैकृतिशान्तिः ॥

उपस्करविकारे, गर्गः-

"यान्ति यानान्ययुक्तानि युक्तान्यपि न यान्ति चेत् ।
चोद्यमानानि तत्र स्यान्महद्भयमुपस्थितम् ॥
वाद्यमाना न वाद्यन्ते वाद्यन्ते वाप्यनाहताः ।
अचलाश्च चलन्त्येव न चलाश्च चलन्ति च ॥
आकाशे तूपनादश्च गीतगन्धर्वनिस्वनः ।
काष्ठदर्वीकुठारादिविकारं कुरुते यदि ॥
गवलं शूलसङ्घाश्च स्त्रियस्त्री वापि जायते ।
उपस्करादिविकृतौ घोरशस्त्रभयं भवेत् ॥
वायोस्तु पूजां द्विज ! सक्तुभिश्च
कृत्वा नियुक्ताँश्च जपेच्च मन्त्रान् ।
दद्यात्प्रभूतं परमान्नमत्र
सदक्षिणं तेन शमो ऽस्य भूयात् ॥"

इत्युपस्करवैकृतिशान्तिः ॥

मृगपक्षिविकारे, गर्गः-

"प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति जलोद्भवाः ॥

स्थलजा वा जलं यान्ति घोरं वाशन्ति निर्भयाः ।
राजद्वारे पुरद्वारे शिवाश्चाप्यशिवप्रदाः ।।

दिवा रात्रिञ्चरा वापि रात्रौ वापि दिवाचराः ।
ग्राम्यास्त्यजन्ति ग्रामं वा तच्चोत्पातस्य निर्दिशेत् ।।

दीप्ता वाशन्ति सन्ध्यासु मण्डलानि च कुर्वते ।
वाशन्ते विस्वरं यत्र तदाप्येतत्फलं लभेत् ।।

प्रदोषे कुक्कटो वाशेद्धेमन्ते वापि कोकिलः ।
अर्कोदयेऽर्काभिमुखी शिवा वापि भयं दिशेत् ।।

गृहे कपोतः प्रविशेत् क्रव्यादो[१] मूर्ध्नि लीयते ।
मधु वा मक्षिका कुर्यान्मृत्युर्गृहपतेर्भवेत् ।।

प्राकारद्वारगेहेषु तोरणापणवीथिषु ।
केतुच्छत्रायुधाग्रेषु क्रव्यात्संश्रयते यदि ।।

जायते वाथ वल्मीको मधु वा दृश्यते यदि ।
स देशो नाशमायाति राजा च म्रियते तदा ।।

मूषिकाः शलभान्दृष्ट्वा प्रभूतक्षुद्भयं वदेत् ।
काष्ठोल्मुकादिशृङ्गास्याः श्वानो मरकवेदिनः ।।

दुर्भिक्षवेदिनो ज्ञेयाः काकाः धान्यक्षुपे यदि ।
जनानभिभवन्तश्च निर्भया रणवेदिनः ।।

काको मैथुनयुक्तश्चेच्छ्वेतः स यदि दृश्यते ।
राजा वा म्रियते तत्र स देशो वा विनश्यति ।।

उलूको वाशते यत्र निपतेद्वा गृहे यदि ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ।।

---

१. क्रव्यादः— गृध्रकाकादिः ।

मृगपक्षिविकारेषु कुर्याद्धोमं सदक्षिणम् ।
'देवाः कपोत'[1] इति च जप्तव्यं पञ्चभिर्द्विजैः ।।
'सुदेव'[2] इति वैकेन देया गावस्तु दक्षिणाः ।
जपेच्छकुन्तसूक्तं[3] च नमो[4] वेदशिरांसि[5] च ।।
गावश्च देया विधिवद् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते शान्तिमुपैति पापं
मृगैर्द्विजैर्वापि निवेदितं यत् ।।
इति मृगपक्षिवैकृतिशान्तिः ।।

अनिमित्तगृहादिपाते, गर्गः–

"प्रासादतोरणाट्टालद्वारप्राकारवेश्मनाम् ।
अनिमित्तं तु पतनं दृढानां राजमृत्यवे ।।
रजसा वाथ धूमेन दिशो यत्र समाकुलाः ।
आदित्यचन्द्रताराश्च विवर्णा भयवृद्धये ।।
राक्षसा यत्र दृश्यन्ते ब्राह्मणाश्च विधर्मिणः ।
ऋतवश्च विपर्यस्ता अपूज्यं पूजयेज्जनः ।।
नक्षत्राणि वियोगानि तन्महद्भयलक्षणम् ।
केतूदयोपरागौ च छिद्रं वा शशिसूर्ययोः ।।
ग्रहर्क्षविकृतिर्यत्र तत्रापि भयमादिशेत् ।
स्त्रियश्च कलहायन्ते बाला निघ्नन्ति बालकान् ।।

---

१. यो ५ मन्त्र भएको सूक्त ४४६ पृष्ठमा छ ।
२. यो मन्त्र ४५० पृष्ठमा छ ।
३. शकुन्तसूक्त परिशिष्टमा छ ।
४. नमो नमो ब्रह्मणे नमः ।
५. वेदशिरांसि– उपनिषदः ।

क्रियाणामुचितानां च विच्छित्तिर्यत्र दृश्यते ।
अग्निर्यत्र न दृश्येत हूयमानोऽथ शाम्यति ।।

क्रव्यादा वायसा वाहा यान्ति चोत्तरतस्तथा ।
पूर्णकुम्भाः स्रवन्ते च वह्नयो वा विलुम्पते ।।

माङ्गल्यध्वनयो यत्र न श्रूयन्ते समन्ततः ।
क्षवथुर्बाधते वाथ प्रोत्साहे सति निन्दिताः ।।

न दैवतेषु वर्तन्ते यथावद्ब्राह्मणेषु च ।
मन्दघोषाणि वाद्यानि वाद्यन्ते विस्वराणि च ।।

गुरुमित्रद्विषो यत्र शत्रुषूपारता जनाः ।
ब्राह्मणान् सुहृदो मान्यान् जनो यत्रावमन्यते ।।

शान्तिमङ्गलहोमेषु नास्तिक्यं यत्र मन्यते ।
राजा वा म्रियते तत्राथवा देशो विनश्यति ।।

राज्ञो विनाशे संप्राप्ते निमित्तानि निबोध मे ।
ब्राह्मणान् प्रथमं द्वेष्टि ब्राह्मणाँश्च विनिन्दति ।।

ब्राह्मणस्वानि चादत्ते ब्राह्मणाँश्च जिघांसति ।
नैतान् स्मरति कृत्येषु याचिताँश्चात्यसूयति ।।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ।
अपूर्वं तु करं लोभात्तथा पातयते जने ।।

एतेष्वभ्यर्चयेत्सम्यक् सपत्नीकान् द्विजोत्तमान् ।
भोज्यानि चैव कार्याणि सुराणां बलयस्तथा ।।

गावश्च देया द्विजपुङ्गवेभ्यो
भुवं तथा काञ्चनमम्बराणि ।
होमं च कुर्याद् द्विजपूजनं च
एवं कृते शान्तिमुपैति पापम् ।।"

मयूरचित्रेऽपि–

‘यदा कटकटायन्ते भवनान्यायुधानि च ।
मासाभ्यन्तरमात्रेण तदा सङ्ग्राममादिशेत् ।।
दिव्या चैकादशीशान्तिः करणीया विपश्चिता ।,
इत्यनिमित्तकगृहादिपतनशान्तिः ।।

अथ नानोत्पातशान्तिः ।।

गर्गः– “औत्पातिकीं महाशान्तिं तत्त्वतः शृणु मेऽधुना ।
यत्र व्याधिरनावृष्टिः परचक्रमुपस्थितम् ।।
दुर्भिक्षं जनमारो वा राज्ञो मरणमेव वा ।
तत्र शान्तिक्रमः प्रोक्तो महाक्रतुमिहारभेत् ।।
पुनर्होमश्च कर्तव्यो बृहस्पतिमतं यथा ।
गावस्तथैव दातव्यास्तथैवायुर्विवृद्धये ।।
राज्ञोऽभिषेकं कुर्वीत तथैव च सऋत्विजः ।
त्रिरात्रं सप्तरात्रं वा उपोष्य च पुरोहितः ।।
औदुम्बरीणां विधिवत्समिधां च शतं दहेत् ।
सावित्र्या कारयेत्कर्म ततः पापं प्रशाम्यति ।।
अत्युष्णमतिशीतं च अतिवर्षमनूदकम् ।
अनार्तवं पुष्पफलमतिमात्रं च मारुतः ।।
भैरवं चातिमात्रं च रुदन्ति मृगपक्षिणः ।
विद्युत्स्तनितनिर्घोषमनभ्रे वातिवर्षणम् ।।
सिंहव्याघ्रतरक्षूणां दर्शनं च चतुष्पथे ।
ईदृशैर्लक्षणोत्पातैर्विनाशमभिलक्षयेत् ।।
अन्योऽत्र जायते राजा तथा चान्यः पुरोहितः ।
तत्र शान्तिं प्रवक्ष्यामि पापप्रशमनीं शुभाम् ।।
औदुम्बरीणां समिधां शतमष्टोत्तरं दहेत् ।
सह क्षीरघृताक्तानां महामन्त्रगणैः शुभैः ।।

हुत्वा शतसहस्रं तु परां शान्तिमवाप्नुयात् ।
यमलानि च जायन्तेऽशुभानि निजवाहनाः ।।
मुण्डवक्रमुखाश्चैव कुब्जाश्च कुणपास्तथा ।
अमानुषा मानुषाणां गजानां मृगपक्षिणाम् ।।
जायन्ते चोपरिदन्ता अश्वाश्च विकृताननाः ।
बहुशीर्षमशीर्षं वा बहुवर्णमवर्णकम् ।।
एकशृङ्गमशृङ्गं वा चतुर्भुजमथाभुजम् ।
दीर्घकर्णमकर्णं वा गजकर्णमुखं तथा ।।
व्यालव्याघ्रमुखाकारं बिडालमुखमुन्नतम् ।
ईदृशानि विरूपाणि दृश्यन्ते यत्र गौतम ।।
तत्र सङग्रामतो ब्रूयाद्भयं क्षयकरं महत् ।
जनक्षयं च पौराणां राज्ञः श्रेणिवधं तथा ।।
तत्र शान्ति प्रवक्ष्यामि सर्वपापप्रणाशिनीम् ।
खदिराश्वत्थसमिधां सहस्राष्टोत्तरं दहेत् ।।
विरूपाक्षेण मन्त्रेण[1] विधिवत्सुसमाहितः ।
दद्याच्च कपिलां धेनुं हुतान्ते शान्तिमिच्छता ।।
ततस्तच्छाम्यते पापं जातवेदोवचो यथा ।
यत्राकार्याणि कार्यन्ते अदण्ड्ये दण्डपातनम् ।।
अपूज्याश्चैव पूज्यन्ते मान्याँश्चैवावमन्यते ।
अनड्वाँश्च पिबेद्धेनुं चानड्वाहं पिबेद्यदि ।।
विधुनोति च गां वत्सः प्रजातं नाभिनन्दति ।
मैथुनं विपरीतं च अकाले मृगपक्षिणाम् ।।
ब्राह्मणा भिन्नमर्यादा न तिष्ठन्ति स्वकर्मसु ।
ईदृशैर्लक्षणोत्पातैर्विद्याद्देशस्य विभ्रमम् ।।

---

[1] विरूपाक्षऋषिणा दृष्टो मन्त्रस्तेनेत्यर्थः । स च यथा– ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽ अयम् । अपा ँ॒ रेता ँ॒सि जिन्वति ।

कलहं जायते घोरं दुर्भिक्षं जनमारकम् ।
राजामात्यविनाशं च पौराणां च महद्भयम् ।।
तत्र शान्ति प्रवक्ष्यामि सर्वपापप्रणाशिनीम् ।
प्रज्वाल्याश्वत्थसमिधः कृत्वा संस्तरणं महत् ।।
औदुम्बरीणां समिधं सहस्राष्टोत्तरं बुधः ।
जुहुयाद् विधिवद्वह्नौ परां शान्तिमभीप्सता ।।
दासीदाससमायुक्तं गृहं दद्याद् द्विजातये ।
ततः प्रशाम्यते पापं वसिष्ठस्य वचो यथा ।।
तथैव— कृष्णाः पिपीलिका यत्र ग्रामेषु नगरेषु च ।
दृश्यन्ते ह्यतिमात्रं चेदूर्ध्ववंशकृतालयाः ।
शान्तिगृहे देवगृहे तथा च नृपतेर्गृहे ।।
उपर्युपरिमात्रं तु दृश्यते वेश्मनस्तदा ।
मक्षिका मशका दंशा अतिमात्रं भयावहाः ।।
ईदृशैर्लक्षणोत्पातैर्महाचौरभयं भवेत् ।
द्रव्याणां हरणं ब्रूयात्परचक्रस्य चागमम् ।।
तत्र शान्ति प्रवक्ष्यामि विश्वामित्रोपदर्शिताम् ।
अश्वत्थसमिधां चैव हुत्वा चाष्टोत्तरं शतम् ।।
पूर्णपात्राणि वै दद्याद्धुतान्ते भूरिदक्षिणाम् ।
दासीदाससमायुक्तं गृहं दद्याद् द्विजातये ।।
तिलपात्रं प्रदातव्यं तिलान् जुह्वीत संयतः ।
अन्यच्च— अनग्निर्ज्वलते यत्र विधूमे धूमदर्शनम् ।
अलयुक्तमयुक्तं वा पुरं प्रविशते तदा ।।
बालैः सह कुमाराश्च कलहं यत्र कुर्वते ।
कलहं ब्राह्मणानां च सेनापतिपरिग्रहम् ।।
गवाद्यानां भवेन्नित्यं तथा घोषनिवासिनाम् ।
श्रेष्ठिनां सार्थवाहानां कलहो यत्र जायते ।।

राजामात्यविनाशं च पौराणां च सहद्भयम् ।
तत्र शान्तिं प्रवक्ष्यामि पितामहवचो यथा ।।

पालाशसमिधश्चाग्नौ सहस्राष्टोत्तरं दहेत् ।
ब्राह्मणान् भोजयेत्तत्र परमान्नेन शान्तये ।।

प्राकारे नगरद्वारे गोपुराट्टालकेषु च ।
रथ्याचतुष्पथे चैव देवतायतनेषु च ।।

निवासं यत्र कुर्वन्ति बकाः काकाश्च कौशिकाः ।
गृध्राः परभृतश्चैव आरण्या मृगपक्षिणः ।।

निरूहेत्[1] कलहं घोरं सिद्धानां वचनं यथा ।
तत्र शान्तिं प्रवक्ष्यामि नारदेनोपलक्षिताम् ।।

अश्वत्थसमिधां चैव घृताक्तानां विभावसौ ।
वायव्येनेह मन्त्रेण निवेद्यं च सुशोणितम् ।।
ततस्तु शाम्यते पापं नारदस्य वचो यथा ।

तथैव– श्वाशृगालोऽथवा गृध्राः काको वा यदि मानुषः ।
श्मशानान्मांसमादाय पुरमध्ये प्रवेशयेत् ।।

नगरं पत्तनं वापि ग्रामं वा यदि वा गृहम् ।
अचिरेणैव कालेन तत् श्मशानं भविष्यति ।।

चौरमण्डलपातं तु परचक्रस्य चागमम् ।
अनारोग्यमनावृष्टिर्दुर्भिक्षं जनमारकम् ।।

सङ्ग्रामशस्त्रसङ्घातं क्षिप्रमेव विनिर्दिशेत् ।
तत्र शान्तिं प्रवक्ष्यामि यथा पापं प्रशाम्यति ।।

अश्वत्थसमिधश्चैव तिलाँश्च मधुसंयुतान् ।
विरूपाक्षेण मन्त्रेण विरूपाक्षान् सशोणितान् ।।

---

१. निरूहेत्– तर्कयेत् ।

तिलपात्रोपहारं च क्षीरशान्तिं[1] च कारयेत् ।
ततश्च शाम्यते पापं प्रजापतिमतं यथा ।।

स एव– अनारोग्यमनावृष्टिर्दुर्भिक्षं जनमारकम् ।
ज्वरः कासस्तथा श्वासः कण्डूर्दद्रूर्विकोचिकाः ।।
शिरोरोगोऽक्षिरोगश्च पाण्डुरोगो गलग्रहः ।
व्याधयश्च प्रवर्तन्ते दुर्दृष्टैः स्वप्नलक्षणैः ।।
तत्र शान्तिं प्रवक्ष्यामि बृहस्पतिमतं यथा ।
त्रिरात्रोपोषितो भूत्वा हविष्याशी पुरोहितः ।।
सक्षीराणां घृताक्तानां समिधानां शतं दहेत्[2] ।
ततस्तच्छाम्यते पापं बृहस्पतिमतं यथा ।।

स एव– वज्रमिन्द्राशनिर्वापि ज्वलन्नापतते यदि ।
पुरे जनपदे वापि तत्र विद्यान्महद्भयम् ।।
संवत्सरे ततो घोरे विद्याच्चैव जनक्षयम् ।
राजामात्यविनाशं च निर्दिशेन्नात्र संशयः ।।
तत्र शान्तिं प्रवक्ष्यामि इन्द्राग्निवचनं यथा ।
अपमार्गस्य समिधां सहस्राष्टोत्तरं दहेत् ।।
पायसं भोजयेद्विप्रान् क्षीरशान्तिं च कारयेत् ।

क्षीरशान्तिविधिश्च यथा–

रक्तानामेकवर्णानां गवां क्षीरं समादिशेत्[3] ।
हुत्वाऽऽहुतिशतं विप्रो महेन्द्रेणैव[4] मन्त्रवित् ।।

---

[1] क्षीरशान्तिश्च 'रक्तानामेकवर्णाना' मित्यादिनोक्ता वक्ष्यमाणा शान्तिः ।

[2] पलाशानामिति शेषः ।

[3] समादिशेत्– होमार्थं संपादयेदित्यर्थः ।

[4] महेन्द्रदेवतात्मकेन मन्त्रेणेति शेषः । स च मन्त्रो यथा– 'ॐ महाँ २।। इन्द्रो यऽ ओजसा पर्जन्यो वृष्टिमाँ २।। इव । स्तोमैर्वत्सस्य वावृधे । उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्महेन्द्रायत्वा ।।'

सुवर्णमणिसंकाशा हुतान्ते भूरिदक्षिणा[१] ।
ततस्तच्छाम्यते पापमिन्द्राग्निवचनं यथा।।"
इति नानोत्पातशान्तिः ।।

अथ मृतजीवनशान्तिः ।

"मृतः श्मशानं यो नीतः पुनर्जीवति मानवः ।
गृहे यस्य प्रविष्टोऽसौ तिष्ठेदथ कदाचन ।।
अचिराच्छून्यतां याति हृतदारपरिग्रहः ।
तत्र शान्तिं प्रवक्ष्यामि धर्मराजमतं यथा ।।
सक्षीराणां घृताक्तानामग्नौ हुत्वा सुखं बुधः ।
उदुम्बरीणां विधिवत्ततः शान्तिः कृता भवेत् ।।
सावित्र्यष्टसहस्रेण क्षीरशान्तिं च कारयेत् ।
कपिलां तिलकांस्यं च हुतान्ते भूरिदक्षिणाम् ।।"
इति मृतजीवनशान्तिः

अथ जनमारीशान्तिः ।

हेमाद्रौ, गर्गः–

"रुद्रप्रकोपजो यस्माज्जनमारः प्रवर्तते ।
तस्मात्प्रसादयेद्यत्नाद्देवदेवं महेश्वरम् ।।
गाणपत्येन विधिना ह्यथर्वशिरसा तथा ।
यामलेन विधानेन कुर्याद्देवप्रसादनम् ।।
शिवसूक्तसुमासूक्तं जपेच्च शतरुद्रियम् ।
बल्युपहारान् विविधाँश्चत्वरेषु निवेदयेत् ।।
आवाहयित्वा सगणं रुद्रं रात्रावहस्सु च ।
ब्राह्मणान् भक्ष्यभोज्यैश्च दक्षिणाभिश्च तोषयेत् ।
प्रसादिते ततो रुद्रे जनमारी निवर्तते ।।

---

[१] गौरिति शेषः ।

उपोषितो नृपः स्नातः शुक्लवस्त्रः समाहितः ।
आत्मरक्षां स्वयं कृत्वा ततः शान्तिं प्रयोजयेत् ।।"
इति जनमारीशान्तिः ।।

अकालहस्तिमदशान्तिः ।।

ऊर्ध्वं विंशतिवर्षात्तु मदो भवति वारणे ।
तदर्वाग्यदि माद्येत स्वामिनो मरणं दिशेत् ।।

कारयेत्तत्र शान्तिं च ब्राह्मणाँश्चापि तर्पयेत् ।
स्नानं पूर्वं नरेन्द्राणां यथावदभिधीयते ।।

एकरात्रोषितः स्नात्वा प्रियः प्रयतमानसः ।
अष्टोत्तरसहस्रं तु मन्त्रं चापि जपेच्छुचिः ।।

ततो जपितमन्त्रैस्तु सलिलं चाभिमन्त्रयेत् ।
गजानां गजतत्त्वज्ञः सर्वदोषहरं शुभम् ।।

गजस्नानं प्रकुर्वीत तद्दिने तूर्यनिःस्वनैः ।
पूर्वाह्णे चाग्निकार्यं तु कृत्वा कुम्भशतेन हि ।।

ततो होमं प्रकुर्वीत विधिदृष्टेन होमवित् ।

अग्नये स्वाहा । रुद्राय स्वाहा । गणपतयेस्वाहा । वरुणाय स्वाहा । बृहस्पतये स्वाहा शुक्राय स्वाहा । इन्द्राय स्वाहा ।

ततः स्नानं प्रकुर्वीत मन्त्रेणानेन चारभेत् ।
स्नानं कुम्भशतेनेह सर्वोपद्रवनाशनम् ।

अमदो मदेन सहितो वर्धितजातश्च भवति जातः ।
द्विजभोजनपूर्वं स्यात्सलिलं गुडमिश्रितं ततः कृत्वा ।।

यवयावकसंयुक्तं पिण्डं मधुनाथ पूजयेद्बहुशः ।
कृतपूजासंस्कारं गणाधिपं वन्दयेत्तूर्णम् ।।

नैवेद्यमन्त्रः –

ईश्वरस्य महः सान्ध्यमुमाललाटसम्भवम् ।
इदं कृतोपनीतं तु नैवेद्यं भक्षयस्व नः ।।

इति हस्तिनोऽकालमदे शान्तिः ।।

अथ हस्तिनीधेनुमदशान्तिः ।।

मदं यदा तु सुरभी विसृजेत्सूतिमेव च ।
औत्पातिकं तदा विद्याद्रूपैरेतैर्महीपते ।।
पुरे राष्ट्रे वने वापि गृहे वा हस्तिनी यदि ।
मत्ता मूत्रपुरीषाणि यदा संघ्राय तिष्ठति ।।
तदा पुरे च राष्ट्रे च भवेद्घोरं महद्भयम् ।
मत्तया भज्यते युद्धे हस्तिन्या यदि वारणः ।।
महद्भयं तत्र भवेद्देशस्य नगरस्य च ।
संघ्राय निपतेन्नागं मत्ता यत्र च धेनुका ।।
तदा नाशं विजानीयाद्धान्यस्य च धनस्य च ।
अस्मिन्नौत्पातिके शान्तिमिमां कुर्यान्नराधिपः ।।
उपोष्य बान्धवैस्तत्र सामात्यः सपुरोहितः ।
ततो ऽपि विधिवच्चैव धेनुकां तां न वर्तयेत् ।।
हस्तिवत्कल्पितां तां तु विषाणाभ्यां च योजिताम् ।
नीराजयित्वा तां रात्रौ धेनुकां कृतकौतुकाम् ।।
अथैनां हस्तिनीं नीत्वा शत्रुराष्ट्रे विमोक्षयेत् ।
इत्येवमेनां कुर्वीत रात्रौ वननिवासिनीम् ।।
तां विशिष्टबलिं होमानुपचारांश्च कारयेत् ।
अन्यैश्च पेशलैर्विप्रान्दक्षिणाभिश्च तोषयेत् ।।
अथवा पूर्ववत्कृत्वा शान्ति कृत्वा कटद्वयम् ।
सुवर्णेन सुतप्तेन वनमेव प्रधावयेत् ।।
इति हस्तिनीधेनुमदशान्तिः ।।

अथ लिङ्गादिभङ्गे शान्तिः ।।

अद्भुतसागरे, नारदः –

“यत्र देवकुले वज्रं पतेद् गृध्रोऽथवा पुनः ।
कङ्कोऽथ पतते चैव चूडायामग्निदर्शनम् ।।

लिङ्गं वा भिद्यते यत्र कम्पते चानिमित्ततः ।
चूडाभङ्गो भवेद्यत्र प्रतिमा भिद्यतेऽथवा ।।

ग्रामोत्सादो भवेत्तत्र स्वामिनो मरणं दिशेत् ।
तत्र शान्ति प्रवक्ष्यामि येन संपद्यते शुभम् ।।

कुण्डं कृत्वा विधानेन ततो होमं समारभेत् ।
चरुं च यमदैवत्यं साधयित्वा विधानतः ।।

ससुवर्णेन हस्तेन ततः कर्म समारभेत् ।
अष्टोत्तरशतं हुत्वा घृताक्तसमिधां ततः ।।

माषैर्मुद्गैस्तिलैश्चैव घृतेन मधुना सह ।
एभिः पञ्चसहस्राणि शक्तिबीजेन[1] होमयेत् ।।

होमान्ते तर्पयेद्विप्रान् दक्षिणाभोजनादिभिः ।
भूमिं धेनुमनड्वाहं स्वर्णं धान्यं सदक्षिणम् ।।

पञ्चगव्यं ततः कृत्वा स्नाप्य देवालयं द्विजः ।
बलिं दत्त्वा विधानेन कृसरैः पायसैस्तथा ।।

ईशानं स्थापयेत्तत्र बलिं दत्त्वा विधानतः ।
एवं कृत्वा विधानं तु कृतकृत्यो भवेन्नरः ।।

मण्डपस्य तथा भित्तिश्चूडा देवकुलस्य च ।
पूजायां पार्थिवस्यापि प्रतिमायास्तथैव च ।।

अकस्मान्निपतेद्यत्र कम्पते वानिमित्ततः ।
दधिक्षौद्रघृताक्तानामश्वत्थसमिधां ततः ।।

हुनेदष्टशतं प्राज्ञ 'इमारुद्रे' ति मन्त्रवित् ।
धेनुं च दक्षिणां दद्यात्तिलपात्रं सकाञ्चनम् ।।"
इति लिङ्गादिभङ्गे शान्तिः ।।

---

[1] शक्तिवीजेन– 'ह्रीँ' इत्यनेन ।

अथ स्वप्नाः ।

तत्र दुःस्वप्नशान्तिं वक्तुं स्वप्नदर्शनविधिस्तत्फलानि चोच्यन्ते । अद्भुतसागरे पराशरः–

"दुकूलमुक्तामणिभिर्नरेन्द्राः सामन्तदैवज्ञपुरोहिताश्च ।
तद्देवतागारमनुप्रविश्य प्रवेशतस्तत्र दिगीश्वरं च ।।
अभ्यर्च्य मन्त्रैस्तु पुरोहितस्तु संयम्य तस्यां भुवि संस्कृतायाम् ।
दर्भैस्तु कृत्वा सुरभाक्षतैश्च किरेत्समन्तात्सितसर्षपैश्च ।।
ब्राह्मीं सदूर्वामथ नागपुष्पीं कृत्वोपधानं शिरसि क्षितीशः ।
पूर्णान्घटान्पुष्पफलान्वितास्यानाशासु कुर्याच्चतुरः क्रमेण ।।
यज्जाग्रतो दूरमुदैति दैवमावर्त्य मन्त्रान्प्रणतस्त्रिरेतान् ।
तथैकभुग्दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशम् ।।
नमः शम्भो त्रिनेत्राय रुद्राय वरदाय ते ।
वामनाय विरूपाय स्वप्नाधिपतये नमः ।।
भगवन्देवदेवेश शूलभृद्वृषवाहन ।
इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वतः ।।
एकवस्त्रः कुशास्तीर्णे सुप्तः प्रयतमानसः ।
निशान्ते पश्यते स्वप्नं शुभं वा यदि वाशुभम् ।।"

सत्याचार्यः–

'आयुस्तृतीयभागे शेषे पतितः प्रकीर्तितः स्वप्नः ।
पित्तेऽधिके काञ्चनरत्नमाल्यदिवाकराग्निज्वलनानि पश्येत् ।
श्लेष्माधिकश्चन्द्रभशुक्लपुष्पसरित्सरोऽम्भोनिधिलङ्घनानि ।।
यदन्यमध्यप्रथमे निशान्ते प्रावृट्शरत्माधवसंज्ञिते वा ।
काले मरुत्पित्तकफप्रकोपः साधारणं स्याद्बलसन्निपातात् ।।
दृष्टश्रुतानुभूतं च पार्थिवं कथितं तथा ।
भावितं दोषजं चैव स्वप्नं सप्तविधं विदुः ।।
तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत् ।'

अथ शुभस्वप्नाः ।।

तत्र पराशरः–

‘स्वाङ्गप्रज्वलनं परोपशमनं शक्रध्वजालिङ्गकृ–
त्संयुक्तोऽपि नरैर्निपत्य च तथा प्रक्षेपणं दिक्षु च ।
बद्धो वा निगडैर्ग्रसेच्च दहनं नार्योन्मितो बाहुना
छन्नं वा द्विरदादिरोहणविधिर्दिव्योऽपि च ब्राह्मणः ।।

दिनकरशशिताराभक्षणस्पर्शनानि
विशरणमपि मूर्ध्नः सप्त पञ्च त्रिधा वा ।

वृषभगृहनरेन्द्रश्वेतसिंहाधिरोहो–
ग्रसनमुदधिभूम्योर्भूमिराज्यप्रदानि ।।

विपुलरणविमर्दद्यूतवादैर्जयश्च
पशुमृगमनुजानां लब्धिरध्यासनं वा ।
विडशनपरिलेपोऽगम्यनारीगमो वा
स्वमरणशिखिलाभः सस्यसन्दर्शनं च ।।

सितसुरभिमनोज्ञालेपमाल्याम्बराणां
द्विजसुरगुरुराज्ञां दर्शनान्याशिषश्च ।
मणिरजतसुवर्णाम्भोजपात्रेषु भुङ्क्ते
घृतदधिपरमान्नं सर्वमेतच्छुभं स्यात् ।।’

योगयात्रायां वराहः–

‘शैलप्रासादनागाश्ववृषभारोहणं हितम् ।
चन्द्रताराऽर्कग्रहणं परिमार्गणमेव च ।।
भूम्यम्बुधीनां ग्रसनं शत्रूणां च वधक्रिया ।
जयो विवादद्यूतेषु सङ्ग्रामे च तथा जयः ।।
भक्षणं चैव मांसानां मत्स्यानां पयसां तथा ।
दर्शनं रुधिरस्यापि स्नानं वा रुधिरेण च ।।

सुरारुधिरमद्यानां पानं क्षीरस्य पायसः ।
अन्त्रेण वेष्टितं भूमौ निर्मलं गगनं तथा ।।
मुखेन दोहनं शस्तं महिषीणां तथा गवाम् ।
सिंहीनां हस्तिनीनां च वडवानां तथैव च ।।
प्रसादो देवविप्रेभ्यो गुरुभ्यश्च तथा शुभः ।
अम्भसा त्वभिषेकश्च ज्ञेयं राज्यप्रदं हि तत् ।।
राज्याभिषेकश्च तथा छेदनं शिरसोऽपि च ।
मरणं वह्निलाभश्च वह्निदाहो गृहादिषु ।।
तथोदकानां तरणं तथा विषमलङ्घनम् ।
हस्तिनीवडवानां च गवां च प्रसवो गृहे ।।
आरोहणं गजेन्द्राणां रोदनं च तथा शुभम् ।
परस्त्रीणां तथा लाभस्तथालिङ्गनमेव च ।।
निगडैर्बन्धनं धन्यं तथा विष्ठानुलेपनम् ।
बीजानां भूमिपालानां सुहृदामपि दर्शनम् ।।
शुभान्येतानि प्रोक्तानि राज्यलाभकराणि च ।'

बृहस्पतिसंहितायाम्—

'यस्तु श्वेतेन सर्पेण दंशितो दक्षिणे भुजे ।
सहस्रलाभस्तस्य स्यात्पूर्णे तु दशमे दिने ।।
उरगो वृश्चिको वापि जलूका दशते यदि ।
विजयं चार्थसिद्धिं च पुत्रं तस्य विनिर्दिशेत् ।।
बलाकां कुक्कुटीं क्रौञ्चीं लब्ध्वा यः प्रतिबुध्यते ।
क्रोशान्तां लभते भूमिं भार्यां च प्रियवादिनीम् ।।
रुधिरं पिबति स्वप्ने सुरां वा पिबति क्वचित् ।
ब्राह्मणो लभते विद्यामितरस्तु धनं लभेत् ।।
क्षीरं पिबति यः स्वप्ने सफेनं मेहने कृते ।
सोमपानं भवेत्तस्य धनं वा बहु निर्दिशेत् ।।

दधिलाभे धनं तु स्याद् घृतलाभे ध्रुवं यशः ।
घृतप्राशे महाक्लेशो यशस्तु दधिभक्षणे ।।
गोधूमैर्वा यवैर्वापि लाभं सिद्धार्थकेषु च ।
पुष्पे प्राप्ते धनं विद्यात् फले वृद्धिरनुत्तमा ।।
आसने शयने याने शरीरे वाहने गृहे ।
ज्वलमाने विबुध्येत तस्य श्रीः सर्वतोमुखी ।।'

वराह –

'वृश्चिकादिदशनं मणिरत्नकाञ्चनं कलशदीपकिशोराः ।
वत्सहंसशशकार्भकलाभो विनिर्दिशेत् पुत्रलाभाय ।।'

विष्णुधर्मे:–

'एकस्यां यदि वा रात्रौ शुभं वा यदि वाशुभम् ।
पश्चाद् दृश्येत यत्तत्र तस्य पाकं विनिर्दिशेत् ।।'

अथ दुःस्वप्नाः ।

अद्भुतसागरे देवल:–

'रक्तगन्धाम्बरस्रग्वी गच्छेद्वै दक्षिणामुखः ।
खरोष्ट्रमहिषारोही त्रिमासान्नाभिजीवति ।।
श्वभ्रे यो निपतेत्स्वप्ने द्वारं चास्य पिधीयते ।
न चोत्तिष्ठति यस्तस्मात्तदन्तं तस्य जीवितम् ।।'

मार्कण्डेय:–

'वात्या मूत्रपुरीषं तु सुवर्णं रजतं तथा ।
प्रत्यक्षमथवा स्वप्ने जीवेत्तु दशमासकम् ।।
केशाङ्गारं तथा भस्म उरगं निर्जलां नदीम् ।
दृष्ट्वा स्वप्ने दशाहात्तु मृत्युरेकादशे दिने ।।
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः ।
पाषाणैस्ताड्यते स्वप्ने सद्योमृत्युर्भवेन्नरः ।।

कृष्णरक्ताम्बरधरा गायन्ति च हसन्ति च ।
दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ।।

यस्तु प्रावरणं शुक्लं स्वप्ने पश्यति मानवः ।।
कृष्णरक्तमपि स्वप्ने तस्य मृत्युरुपस्थितः ।।'

वराहः–

'हरिणारोहे भ्रमणं मृत्युर्नचिरेण सूकरारोहे ।
उष्ट्रारोहे व्याधिर्वृद्धिः स्यात्कुञ्जरारोहे ।।'

मात्स्ये, विष्णुधर्मे च–

'मलिनाम्बरधारित्वमभ्यङ्गः पङ्कदिग्धता ।
उच्चात्प्रपतनं चैव दोलारोहणमेव च ।।

शक्रध्वजस्य पतनं पतनं शशिसूर्ययोः ।
देवद्विजातिभूपानां प्रजानां क्रोध एव च ।।

आलिङ्गनं कुमारीणां विधवानां च मैथुनम् ।
हानिश्चैव स्वगात्राणां विरेकवमनक्रिया ।।

दक्षिणाशाभिगमनं व्याधिनाभिभवस्तथा ।
फलोपहारश्च तथा शाद्वलानां विशोधनम् ।।
गृहाणां चैव भङ्गश्च गृहसंमार्जनं तथा ।
क्रीडा पिशाचक्रव्यादवानराश्वतरैरपि ।
तैलपानावगाहौ च रक्तमाल्यानुलेपनम् ।।
एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् ।'

पराशरः–

'कायस्यालेपनं वा कलुषजलमषीगोमयस्नेहपङ्कै–
र्दृग्जिह्वादन्तबाहुप्रपतनमथवाऽनर्थशोकप्रदानि ।
गीतक्रीडितभूषितप्रहसितप्रेताः पिशाचास्तथा
वार्केन्द्रध्वजतारकाप्रपतनं विघ्नस्य हेतोस्ततः ।।'

लैङ्गे–

‘मुक्तकेशो हसँश्चैव गायते नृत्यते नरः ।
याम्यां दिशमितो गच्छेत्तदन्तं तस्य जीवितम् ॥’

अन्ये ऽप्युद्योगभीष्मद्रोणकर्णपर्वादौ महाभारते, युद्धकाण्डादौ रामायणे च ज्ञेयाः ।

यथा अयोध्याकाण्डे भरतस्वप्नाः–

‘दृष्टो मयाद्य स्वप्ने वै चन्द्रमाः पतितः क्षितौ ।
सीदन्तं च तथाद्राक्षं पङ्के मग्नं महागजम् ॥
विशीर्यमाणः शैलेन्द्रो भग्नश्चात्र महाद्रुमः ।
स्वप्ने चाद्य मया दृष्टो निपतँश्च महाध्वजः ॥’

सुन्दरकाण्डे त्रिजटास्वप्नाः–

‘कण्ठे बध्वा दशग्रीवं प्रमदा रक्तवासिनी ।
काली कमलपत्राक्षी दिशं याम्यां प्रकर्षती ॥
लङ्का चेयं पुरी कृत्स्ना सवाजिरथकुञ्जरा ।
सागरे पतिता दृष्टा मया सपुरतोरणा ॥’

मात्स्ये, विष्णुधर्मे च–

‘स्वप्नस्तु प्रथमे यामे संवत्सरफलो भवेत् ।
षड्भिर्मासैर्द्वितीये च त्रिभिर्मासैस्तृतीयके ॥
चतुर्थे मासमात्रेण फलं भवति नान्यथा ।’

स्वप्नचिन्तामणौ–

‘सूर्योदये तु दृष्टः सद्यः फलदायकः स्वप्नः ।’

पराशरः–

‘शुभाशुभस्वप्नविचारमुक्तमयुक्तयुक्तं च समूह्य बुद्ध्या ।
देशादिवर्णाकृतिसंपदश्च तत्तत्फलं संपरिकल्पयेच्च ॥
पादद्विपादोत्तरपादवृद्ध्या वर्षार्धमासत्रयमासकालाः ।
निशाविभागेषु चतुर्षु दृष्टाः स्वप्ना अनिष्टेष्टफलप्रदाः स्युः ॥’

वराहः–

‘आद्ये वर्षाद्वत्सरार्धाद् द्वितीये पाको वर्षार्धार्धभागे तृतीये ।
मासात्पाकः शर्वरीपश्चिमान्ते दुष्टादुष्टस्वप्नयोगात्भवेत्सः ।।’

अथ दुःस्वप्नशान्तिः ।

ऐतरेयोपनिषदि–

“अथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति वराह एनं हन्ति मर्कट एनमास्कन्दयत्याशु वायुरेनं प्रवहति सुवर्णं खादित्वाऽपगिरति मध्वश्नाति बिसानि भक्षयत्येकपुण्डरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णवत्सां नलदमाली दक्षिणामुखो व्राजयति स यद्येतेषां किञ्चित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वाऽन्येनान्नेन ब्राह्मणान्भोजयित्वा चरुं स्वयं प्राश्नीयादिति” ।

अत्र लक्षहोमः कार्यः । ‘दुःस्वप्नाद्भुतदर्शने’ इति पूर्वमुक्तेः । तथा चण्डीपाठोऽपि– ‘शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने । ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ।। दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते’ इति मार्कण्डेयपुराणात् ।

पराशरः–

‘देवद्विजाग्निप्रतिपूजनानि मन्त्रोपवासादि पवित्रसेवा ।
तिलान्नगोभूमिहिरण्यदानं दुःस्वप्नसंदर्शननाशनानि ।।
नद्यम्बुसंस्पर्शनमन्त्रहोमतिलप्रदानं जपनं च भूयः ।
शान्तिर्जपो होमगुडान्नदानं दुःस्वप्नहन्तॄणि पयश्च गाङ्गम् ।।
तिलानामयुतं तत्र जुहुयात्तु समाहितः ।
‘तिलोसी’ ति च मन्त्रेण धेनुं दद्याच्च दक्षिणाम् ।।
ब्राह्मणाँस्तर्पयेत्तत्र दक्षिणाभोजनादिना ।
दानं च विविधं देयमशुभानां विनाशने ।।
षड्भिर्मासैस्तु संपूर्णैरन्यथा मरणं भवेत् ।’

मात्स्ये–

'स्तुतिश्च वासुदेवस्य तथा तस्य च पूजनम् ।
गजेन्द्रमोक्षश्रवणं ज्ञेयं दुःस्वप्ननाशनम् ।।'

(स्तुतिः– विष्णुसहस्रनामजपः । 'पुण्यो दुःस्वप्ननाशनः' इत्युक्तेः) ।

प्रयोगपारिजाते शौनकः–

'स्वप्नोत्पातेषु चैतेषु कालरात्र्यधिदेवता ।
पूजाविधानं पूर्वोक्तं कुर्यादत्रापि यत्नतः ।।

होमं कुर्यात्प्रयत्नेन रात्रावेव द्विजोत्तमः ।
प्रत्यृचं पायसं हुत्वा 'रात्री व्यख्य[1]' दिति क्रमात् ।।

अष्टोत्तरशतं हुत्वा सूक्तेनानेन यत्नतः ।
स्वप्नाधिपतिमन्त्रेण[2] हुनेदष्टोत्तरं शतम् ।।

गुरवे दक्षिणां दद्याद्वस्त्रहेमपशूनपि ।
यद्युक्तदक्षिणादानेऽप्यशक्तो होमकर्मणि ।।
हिरण्यं दक्षिणां दद्यात्तदानीमेव वा बुधः ।
वस्त्रकुम्भादि सकलं तद्धोत्रे प्रतिपादयेत् ।।'

स एव–

'यद्यनिष्टफलं स्वप्नं पश्येत्तस्योच्यते विधिः ।
'अद्या नो देव सवित[3]' रित्यृचा पूर्वमेकया ।।
ततः परं 'यच्च गोषु दुःष्वप्न्य[4]' मिति पञ्चभिः ।
ऋग्भिः परं ततो 'यो मे राजन्युज्य[5]' इति त्वृचा ।।

---

[1] ऋग्वेद (अष्टक ८ अध्याय ७ सूक्त १४ त्य..को परिशिष्टका ६ सूक्त सहित ।)

[2] कालरात्रीमन्त्रेणेत्यर्थः ।

[3] ॐ अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुःष्वप्न्य ठं० सुव ।।

[4] ऋग्वेद– (अष्ट ६ अध्या ४. सूक्त ९ को अन्त्यका २ मन्त्र र सूक्त १० को ३ मन्त्र) ।

[5] ॐ यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह । स्तेनो वायो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ।।

ऋग्भिः सर्वाभिरेताभिरुपतिष्ठेत भास्करम् ।
एवं कृते तु दुःस्वप्नदर्शनं निष्फलं भवेत् ।।
'अधस्वप्नस्ये[1] ' ति जपन् प्रातः प्रातर्दिने दिने ।
दुःस्वप्नं नुदते कृत्स्नं न तस्माद्विन्दते भयम् ।।'

अत्र श्राद्धमपि कार्यम् ।

'श्राद्धार्हद्रव्यसम्पत्तौ तथा दुःस्वप्नदर्शने ।
जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ।।'

इति दुःस्वप्नशान्तिः ।।

अनावृष्टिशान्तिः ।।

ऋग्विधाने–

'अच्छावदे[2] ' तिसूक्तं तु वृष्टिकामः प्रयोजयेत् ।
निराहारः क्लिन्नवासा अचिरेण प्रवर्षति ।।
हुत्वायुतं वैतसीनां क्षीराक्तानां हुताशने ।
महद्वर्षमवाप्नोति सूक्तेनाच्छावदेन हि ।।

तत्रैव–

'आस्यदघ्नं विगाह्याम्भः प्राङ्मुखः प्रयतः शुचिः ।
सूक्ताभ्यां 'तिस्र[3] ' एताभ्यामुपतिष्ठेद्दिवाकरम् ।।
अनश्नता तु जप्तव्यं वृष्टिकामेन यत्नतः ।
पञ्चरात्रे व्यतीते तु महद्वर्षमवाप्नुयात् ।।'

यद्वा तत्रैव–

'वृष्टिकामो यताहारः प्रपद्येत बृहस्पतिम् ।
पायसेनोपहारेग होमेन च समन्वितः ।।

---

[1] ॐ अधस्दप्नस्य निर्विदे भुञ्जतश्च रेवतः । उभा तावस्त्रि नश्यतः ।।

[2] ऋग्वेद– (अष्ट ४ अध्या. ४ सूक्त २७ र २८) जम्मा दश मन्त्र ।

[3] ऋग्वेद– (अष्ट. ५ अध्या' ७ सूक्त १ र २) अर्थात् 'तिस्रो वाचः प्रवद ०' यो र 'पर्जन्याय प्रगायत' समेत २ सूक्त ।

'बृहस्पते प्रती[१]' त्येतद् वृष्टिकामः प्रयोजयेत् ।
पर्जन्यं च नमस्कृत्य वृष्टिं विन्दति शोभनाम् ।।'

मात्स्ययाज्ञवल्क्यौ–

'श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ।।'

स ग्रहयज्ञोऽयुतहोमो लक्षहोमः कोटिहोमश्चेति त्रिष्वन्यतरः शक्त्या कार्यः । यद्वा– 'एवं विनायकं पूज्य ग्रहाँश्चैव विधानतः । कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम् ।।' इत्युक्तेर्विनायकशान्तिपूर्वकं पर्जन्यशान्त्यङ्गत्वेन समानतन्त्रो वा ग्रहयज्ञः कार्यः ।

बौधायनः–

"अथातः पर्जन्यविधिं व्याख्यास्यामो ब्राह्मणान् वरणपूर्वकमभ्यर्च्य वरुणप्रतिमां पूजयित्वोदके स्थित्वा तत्सवितुरिति पच्छोऽर्धर्चशोऽनवानञ्जपतीमंमेवरुणेति पञ्चर्चमुदुत्तममिति षडर्चमाप उन्दन्तूदायुषा महाँ२।। इन्द्रो य ओजसा वाचामैन्द्रियेण यो वै सप्तदशं मैत्रावरुणीं द्विरूपामसावादित्योऽसौ सौरीं वरुणꣳ सुषुवाणं प्रजापतिर्वरुणाय या वामिन्द्रावरुणैतद्वा अपां नामधेयं हिरण्यवर्णाः पवमानः सुवर्जनो वृषासो अꣳशुः पवते सिꣳहे व्याघ्रे सर्वेषु वा एषु लोकेषु योऽसौ तपन्नुदेति योऽपां पुष्पं वेदेत्यादि सर्वानुवाकान् सुवर्ण घर्मं सहस्रशीर्षाऽद्भ्यः संभृत आदित्यो वा एष एतन्मण्डलं पृथिवीसमिदित्यनुवाकान् जपित्वा जलाद्बहिःराचम्य प्रत्यङ्मुखः पीवोऽन्नामित्यनुवाकमेकादशवारं जपित्वाग्निं प्रतिष्ठाप्याज्यभागान्ते क्षीराज्यवैतससमिच्चरुभिः प्रत्येकमष्टशतमष्टाविंशतिं वा पुरोवातो वर्षन्निति जुहुयाद्वर्षाय पुरोवातायेत्युद्देशत्यागौ जयादीन्पूर्णाहुतिं हुत्वा शान्तिपाठं कुर्यादाचार्याय वरुणप्रतिमामृत्विग्भ्यो दक्षिणां दद्यादित्याह भगवान् बौधायनः ।।"

---

[१] ऋग्वेद– (अष्ट. ८ अध्या. ५ सूक्त १२ र १३)

अश्विनीयाम्यसंस्थेऽर्के यदा देवो हि वर्षति ।
सुभिक्षं क्षेममतुलमीतिभीतिश्च वह्निभे ।।
ब्रह्मद्वितयगे भानौ वृष्टिश्चेद्भयदायिनी ।
रौद्रप्रवेशे यदि वर्षतीन्द्रस्ततसार्धमासं न हि वृष्टिरस्ति ।
दिवाप्रवेशे बहुसस्यहानी रात्रौ सुभिक्षं न च रोगपीडा ।।
सायङ्कालेऽर्धरात्रे चेत्प्रवेशस्तु महार्घदः ।
आर्द्रायां रविसंयोगे फलमेतदुदीरितम् ।।
आदित्यादिदशर्क्षेषु वृष्टिः सूर्ये सुभिक्षदा ।
सिंहप्रवेशनं हित्वा कर्कटे व्यत्ययः शुभः ।।

बौधायनः–

'मारुतमसि मरुतामोज' इति । देवा वसव्या, देवाः शर्मण्याः कूष्माण्डैर्जुहुयात् प्रवाता वान्ति पतयन्तीति ।'

गायत्रीजपयुक्तस्तु महामृत्युञ्जयं जपेत् ।

(सूक्तजपसङ्ख्या प्रत्येकं शतम् । कूष्माण्डहोमः आवृत्तित्रयम् । गायत्रीजपो लक्षम् । महामृत्युञ्जयजपो दशसहस्रम् । रुद्राभिषेकः) । इत्यनावृष्टिशान्तिः ।।

अथ राज्याभिषेकः ।।

"स द्विधा प्रथमाभिषेकः सांवत्सरिकश्चेति । तत्राद्ये पुरोहितादिना पितृकृतं राजप्रथमाभिषेके रथसिंहासनासिच्छत्रचामरध्वजगजवाजिवस्त्रालङ्कारसांवत्सरचिकित्सकपुरोहितादीन्युपयुक्तानि नोपयोजयेत्" । इति गोपथब्राह्मणात् ।

तत्रादौ पुरोहितवरणम् । 'तस्माद्गुरुं वेदरहस्ययुक्तं चतुर्विधेकर्मणि चाप्रमत्तम् । शान्तं च दान्तं च जितेन्द्रियं च कुर्यान्नरेन्द्रः प्रियदर्शनं च ।।' इति गोपथब्राह्मणात् । वरणोत्तरं कर्तव्यं च तत्रैवोक्तम्–

'मधुपर्काद्येन सर्वार्थं संपाद्य दक्षिणां दद्यात्कोटिमध्यात्तृतीयं भागं यथाभूमिप्रमाणेन वा हस्त्यश्वनरयानं दिव्यमाभरणमातपत्रं हिरण्यं क्षितिगोधनधान्यरत्नादिकं च गुरवे दद्याद्येन वा तुष्येतेति' ।

ततो विनायकशान्ति कृत्वा मण्डपं कुण्डं च विधाय ग्रहमख ऐन्द्रीशान्तिश्च कार्येत्याथर्वणसूत्रे उक्तम् । विष्णुधर्मोत्तरे तु विनायकशान्तिर्नोक्ता । राज्याभिषेके कालो विधिश्च वसिष्ठसंहितायाम्—

'आधानजन्मेशदशाधिनाथरवीन्दुभौमेज्यसितैर्बलिष्ठैः ।
उत्पातदोषादिविवर्जितेषु धराधिपानामभिषेक इष्टः ।।
मूलत्रिकोणस्वगृहोच्चमित्रगृहस्थितैर्वापि तदंशसंस्थैः ।
शुभे विलग्ने सततं ग्रहेन्द्रा दिशन्ति लक्ष्मीं विपुलां च कीर्तिम् ।।
स्वनीचवैरिगृहगैस्तदंशैरस्तंगतैर्वक्रमुपागतैर्वा ।
पापोदये शोकभयं त्वकीर्तिं दिशन्ति राज्ञां भृशमम्बराटाः ।।
शीर्षोदये चोपचये ग्रहे वा स्वजन्मलग्नादथ लग्नगेऽपि ।
शुभग्रहैर्युक्तनिरीक्षिते वा पदं स्थिरं स्यात्सततं च राज्ञाम् ।।
रिक्तास्वमायां बुधभौमवारवर्ज्येषु वारेषु दिनेषु चैव ।
खले दिने ऋक्षनिशेशयोश्च न नैधनेभे त्वभिषेक इष्टः ।।
पापग्रहैः स्वान्त्यगतैश्च निःस्वो रोगी विलग्नोपगतैर्भवेत्सः ।
पदच्युतः सप्तचतुर्थगैस्तैः पुत्रस्थितैः सर्वसुखैर्विहीनः ।।
भ्रष्टोद्यमः कर्मगतैरनायुर्मृत्युस्थितैर्वीर्ययुतैश्च पापैः ।
लग्नव्ययारिष्टगतः शशाङ्कः क्षितीश्वरं हन्ति तदा बलौ चेत् ।।
केन्द्रत्रिकोणत्रिधनायसौम्यैस्त्रिषष्ठलाभोपगतैश्च पापैः ।
षष्ठाष्टलग्नव्ययवर्जितेन चन्द्रेण राज्ञां शुभदोऽभिषेकः ।।
यस्याभिषेके पुरुहूतमन्त्री लग्ने त्रिकोणे यदि वा भवेत्सः ।
षष्ठे कुजः कर्मगतश्च शुक्रः स मोदते विक्रमराजलक्ष्म्या ।।
दुश्चिक्यलाभारिगता विनार्की खस्थोऽमरेज्यो यदि बन्धुगेहे ।
यस्यात्र योगे क्रियते ऽभिषेकश्चिरायुषस्तस्य पदं स्थिरं स्यात् ।।

शुभेषु चन्द्रयोगेषु स्वयोगेषु शुभेषु च ।
राजयोगेषु यो राजा त्वभिषिक्तः क्षितीश्वरः ॥
प्राग्भागे मन्दिरस्याथ गोमयेन तु कारयेत् ।
मण्डलं चतुरस्रं तद्वर्णकैः समलङ्कृतम् ॥
तत्र भद्रासनं सम्यग्रचयेत्सुमनोहरम् ।
गङ्गातोयसुसम्पूर्णं पूर्णकुम्भोदकैः सह ॥
दिग्विदिक्षु स्थितैः शुक्लगन्धमाल्याम्बरार्चितैः ।
शतौषधीमूलहेमरत्नसद्बीजपल्लवैः ॥
मृत्तिका वृषशृङ्गं च गजदन्तं च रोचनम् ।
उत्पलं पद्मकं पद्म मुरारेणुककुङ्कुमम् ॥
राजसर्षपमुस्तं च देवदारुसमन्वितैः ।
देवस्यत्वेति मन्त्रेण आयुः पुष्टियशस्करैः ॥
अब्लिङ्गैर्वेदमन्त्रैश्च शुभलग्ने शुभान्विते ।
भद्रासने सनृपतेरभिषेकं च कारयेत् ॥
नीराजनं च कर्तव्यं शङ्खवादित्रनिः स्वनैः ।
आशिषो वाचनं कृत्वा पूजयेच्च सुरान् पितृन् ॥
आयुधानि च पट्टं च विप्रान्गन्धादिनार्चयेत् ।
शुक्लमाल्याम्बरवृतः प्राङ्मुखस्य महीपतेः ॥
पट्टं शिरसि बध्नीयात् सिंहासनगतस्य च ।
विप्रेभ्यो दक्षिणां दद्यान्मानयेन्मन्त्रपूर्वकम् ॥
ब्रूयात्प्रत्यङ्मुखो राजा नमामि त्वां धरेति च ।
प्राच्यां मामभिषिञ्चन्तु वसवस्तेजसे श्रिये ॥
याम्यायामभिषिञ्चन्तु मां रुद्रा विजयाय च ।
आदित्यास्त्वभिषिञ्चन्तु प्रतीच्यां दिशि वृद्धये ॥
विश्वेदेवास्तथोदीच्यामभिषिञ्चन्तु पुष्टये ।
दिगीशास्त्वभिषिञ्चन्तु मां सदा विजयाय च ॥

साम्राज्यमिति मन्त्रेण राजानं सम्यगर्चयेत् ।
व्याघ्रचर्मण्यथासीनं नवालङ्कारभूषितम् ।।
छत्रचामरसंयुक्तं राजचिह्नसमन्वितम् ।
पुरोहितश्च जुहुयात् सावित्र्याग्नौ प्रयत्नतः ।।
उदुम्बरसमिद्भिश्च आज्येनाष्टोत्तरं शतम् ।
विद्वत्पुरोहितामात्यवृद्धबन्धुसमन्वितः ।।
तदा सञ्चिन्त्य सप्ताङ्गःप्रजा धर्मेण पालयेत् ।
एवं यः कुरुते सम्यक् स राजा वर्धते चिरम् ।।'
इति विष्णुधर्मोक्तो राजाभिषेकः ।

हेमाद्रौ–

'अथ सम्भृतसंभारो राज्ञः सांवत्सरस्ततः ।
कालेऽभिषेचनं कुर्यात्तं कालं कथयाम्यहम् ।।
मृते राज्ञि न कालस्य नियमोऽत्र विधीयते ।
तत्रास्य स्नपनं कार्यं विधिवत्तिलसर्षपैः ।।
घोषयित्वा जयं चास्य सांवत्सरपुरोहितौ ।
अन्यासनोपविष्टस्य दर्शयेतां जनं शनैः ।।
स शान्तयित्वा तु जनं मुक्त्वा बन्धनगाँस्ततः ।
अभयं घोषयित्वा तु कालाकाङ्क्षी ततो भवेत् ।।
नाभिषिच्यो नृपश्चैत्रे नाधिमासे च भार्गव! ।
न प्रसुप्ते तथा विष्णौ विशेषात् प्रावृषि द्विज! ।।
न च भौमदिने राम! चतुर्थ्यां च तथैव च ।
नवम्यां नाभिषेक्तव्यश्चतुर्दश्यां च भार्गव! ।।
ध्रुवाणि वैष्णवं शाक्रं दास्रपुष्यौ तथैव च ।
नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने ।।
नागं चतुष्पदं विष्टिः किंस्तुघ्नं शकुनं तथा ।
करणानि न शस्यन्ते व्यतीपातदिनं तथा ।।

नक्षत्रमुल्काभिहतमुत्पाताभिहतं च यत् ।
सोमसूर्यकुजाक्रान्तं परिविष्टं च भार्गव ।।

मुहूर्ताश्चोक्तनक्षत्रसमा मानहितप्रदाः ।
कुजहोरा तथा नेष्टा सर्वत्र कुलिकश्च हि ।।

वृषोऽथ कीटः सिंहस्तु कुम्भो लग्नं प्रशस्यते ।
एतेषां जन्मलग्नेशात्स्यादप्युपचये स्थितम् ।।
प्राप्तेऽभिषेकदिवसे सोपवासः पुरोहितः ।

तारा द्वितीया षष्ठी च चतुर्थी चाष्टमी तथा ।
नवमी च तथा शस्ता अनुकूलश्च चन्द्रमाः ।।

पापाश्चोपचयस्थाने शस्तो लग्ने दिवाकरः ।
सौम्याः केन्द्रगता लग्नाच्छुभाश्चैव त्रिकोणयोः ।।

लग्ने नवांशे क्षितिजस्य वर्ज्यो वर्ज्यस्तथा तस्य महानुभावः ।
सूर्यस्य वर्गः सकलः प्रशस्तो राज्ञोऽभिषेके स नृपो ग्रहाणाम् ।।

कार्या पौरन्दरीशान्तिः प्रागेवास्य पुरोधसा ।
सोष्णीषः श्वेतवसनः सितचन्दनभूषितः ।।

सितमाल्योपवीतश्च सर्वाभरणभूषितः ।
वेदिमुल्लिख्य मन्त्रेण हुत्वा च विधिवत्ततः ।।
जुहुयाद् वैष्णवान् मन्त्रांस्तथा शाक्तान् विशेषतः ।
सावित्रीं वैश्वदेवाद्यान् सौम्यांश्च विधिवत्ततः ।।
आशुः शर्मगणं चैव तथा स्वस्त्ययनं गणम् ।
आयुष्यमभयं चैव तथा चैवापराजितम् ।।
सम्पातवन्तं कलशं तथा कुर्याच्च काञ्चनम् ।
स्नानं समारभेद्राज्ञो होमकाले पुरोहितः ।।
आदौ तु स्वेच्छया स्नातः पुनर्ऋग्भिः समाचरेत् ।
पर्वताग्रमृदा तावन्मूर्धानं शोधयेन्नृपः ।।

वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात् ।
इन्द्रालयमृदा ग्रीवां हृदयं तु नृपाजिरात् ।।
करिदन्तोद्धृतमृदा दक्षिणं तु तथा भुजम् ।
सरोमृदा तथा पृष्ठमुदरं सङ्गमान्मृदा ।।
नदीकूलद्वयमृदा पार्श्वौ संशोभयेत्तदा ।
वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते ।।
गजस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा ।
अश्वस्थानात्तथा जङ्घे राज्ञः संशोधयेद्बुधः ।।
रथचक्रोद्धृतमृदा तथैव चरणद्वयम् ।
मृत्पूतः स्नपनीयः स्यात् पञ्चगव्यजलेन तु ।।
ततो भद्रासनगतं मुख्यामात्यचतुष्टयम् ।
बलप्रधानं भूपालमभिषिञ्चेद्यथाविधि ।।
पूर्वतो हेमकुम्भेन घृतपूर्णेन वाडवः ।
(वाडवो ब्राह्मणः) ।
दक्षिणे क्षीरपूर्णेन रौप्यकुम्भेन बाहुजः ।।
दध्ना च ताम्रकुम्भेन वैश्यः पश्चिमतो द्विज ! ।
माहेयेन जलेनोदक् शूद्रामात्योऽभिषेचयेत् ।।
(माहेयं– गोशृङ्गपुच्छसंबन्धि) ।
ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः ।
कौवेर्यां मधुना राम ! छन्दोगश्च कुशोदकैः ।।
सम्पातवन्तं कलशं तथाहृत्य पुरोहितः ।
विधाय वह्निरक्षां तु सदस्येषु यथाविधि ।।
राजसूयाभिषेके तु ये मन्त्राः परिकीर्तितताः ।
तैस्तु दद्यान्महाभाग ब्राह्मणानां स्वरेण तु ।।
ततः पुरोहितो गच्छेद्वेदिमूलं तदैव तु ।
विभूषितं तु राजानं संस्थितं भद्र आसने ।।

शतच्छिद्रेण पात्रेण सौवर्णेन यथाविधि ।
अभिषिञ्चेत्तु धर्मज्ञः सम्यग्वेदविशारदः ।।
या ओषधीरोषधिभिः शृताभिः सुसमाहितः ।
रथे तिष्ठेति गन्धैश्च आब्रह्मन्ब्राह्मणस्तथा ।।
बीजैः पुष्पैस्तथा चैनं राम! पुष्पवतीति च ।
तेनैव चैव मन्त्रेण फलैस्तमभिषेचयेत् ।।
आशुः शिशान इत्येवं सर्वरत्नैश्च भार्गव ।
ये देवाः पुरः सदेति कुशोदैः परिमार्जयेत् ।।
ऋग्वेदवित्तथा राज्ञश्चन्दनेन यथाविधि ।
मूर्धानं च तथा कण्ठं गन्धद्वारेति संस्पृशेत् ।।
ततो ब्राह्मणमुख्याश्च क्षत्रियाश्च विशस्तथा ।
शूद्राश्च वारमुख्याश्च नानातीर्थसमुद्भवैः ।।
नादेयैः सारसैः कौपैर्नानाकलशसंस्थितैः ।
चतुः सागरजैर्लाभादलाभे द्विजकल्पितैः ।।
गङ्गायमुनयोश्चैव निर्झरैश्च तथाद्रिजैः ।
छत्रपाणिर्भवेत् कश्चित् केचिच्चामरपाणयः ।।
अमात्यमुख्यास्तत्कालं केचिद्वेत्रधरास्तथा ।
शङ्खभेरीनिनादेन वन्दिनादस्वनेन च ।।
गीतवादित्रघोषेण द्विजकोलाहलेन च ।
राजानमभिषिञ्चेयुः समेत्य सहिता जनाः ।।
सर्वलोकाभिषिक्तस्य संमिश्रजलसंयुतम् ।
मन्त्रौषधियुतं पुण्यं सर्वगन्धयुतं तथा ।
रत्नबीजसमायुक्तं फलबीजयुतं तथा ।।
पूजितं सितवस्त्रेण वेष्टितग्रीवमेव च ।
श्वेतवस्त्रावकीतैश्च संवीतं शुचिभूषितम् ।।

क्षीरवृक्षलताच्छन्नं सुदृढं काञ्चनं नवम् ।
आदाय कलशं राज्ञः स्वयं सांवत्सरस्तदा ।।
मन्त्रावसाने कलशं दद्याद्भृगुकुलोद्वह ।
ततः पश्येन्मुखं राजा दर्पणे वाथ सर्पिषि ।।
सोष्णीषः सितवस्त्रश्च मङ्गलालम्भनं चरेत् ।
ततः संपूजयेद्विष्णुं ब्रह्माणं शङ्करं तथा ।।
लोकपालान् ग्रहाँश्चैव नक्षत्राणि च भार्गव ।
ततः स्वपूजां कुर्वीत शयनीयं ततो व्रजेत् ।।
व्याघ्रचर्मोत्तरं रम्यं सितवस्त्रोत्तरच्छदम् ।
पुरोधा मधुपर्केण तत्रस्थं तं समर्चयेत् ।।
राजा चैवार्चयेत्तत्र सांवत्सरपुरोहितौ ।
मधुपर्केण धर्मज्ञस्ततस्तस्य स दैववित् ।।
पट्टबन्धं प्रकुर्वीत ततो मुकुटबन्धनम् ।
ततः स बद्धमुकुटः काले पूर्वं मयोदिते ।।
परार्ध्यास्तरणोपेते मञ्चे बद्धोत्तरच्छदे ।
ध्रुवा द्यौरिति मन्त्रेण सोपवेश्यः पुरोधसा ।।
वृषस्य वृषदंशस्य द्वीपिनश्च भृगूत्तम! ।
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परम् ।।
तत्रोपविष्टस्य तदा प्रतीहारः प्रदर्शयेत् ।
अमात्याँश्च तथा पौरान्नैगमाँश्चापणेश्वरान् ।।
तथा प्रकृतयश्चान्या यथावदनुपूर्वशः ।
ततो ऽग्रहारवस्त्रेभतुरङ्गकनकोत्तमैः ।।
गोऽजाविगृहदानैश्च सांवत्सरपुरोहितौ ।।
पूजयित्वा ततः पश्चात्पूजयेद् ब्राह्मणत्रयम् ।।
अनेनैव विधानेन येन राजाभिषेचितः ।
ततः सदस्यान्संपूज्य सांवत्सरपुरोधसः ।।

ततो ब्राह्मणमुख्यानां पूजनं तु समारभेत् ।
गोरौप्यतिलवस्त्रान्नफलकाञ्चनगोरसैः ॥

मोदकैः श्वेतपुष्पैश्च महादानैश्च पार्थिवः ।
मङ्गलालम्भनं कृत्वा गृहीत्वा सशरं धनुः ॥

वह्निं प्रदक्षिणं कृत्वा प्रणिपत्य तथा गुरून् ।
पृष्ठतो वृषमालभ्य गां सवत्सां च पार्थिवः ॥

पूजयित्वा च तुरगं मन्त्रितं चाभिषेचितम् ।
मन्त्रितं दक्षिणे कर्णे स्वयं दैवविदा ततः ॥

आरुह्य राजमार्गेण स्वपुरं च परिभ्रमेत् ।
मुख्यामात्यैः ससामन्तैः सांवत्सरपुरोहितैः ॥

सहितः कुञ्जरारूढो अभिगच्छेच्च देवताः ।
तासां संपूजनं कृत्वा नगरं याति वेष्टितः ॥

प्रविश्यान्तर्गृहं राजा प्रहृष्टनरवाहनः ।
दानमानादिसत्कारैर्गृह्णीयात्प्रकृतीस्ततः ॥

संपूजितास्ता विसृजेद् द्वितीये स्वके गृहे स्यान्मुदितो महात्मा ।
विधानमेतत्समवाप्य राजा कृत्स्नां च धात्रीं वशगां विदध्यात् ॥

इति विष्णुधर्मोत्तरे राजाभिषेकविधिः ।

बौधायनेनाभिषेकान्ते विशेष उक्तः—

'अथ रथमारुह्य ग्रामं प्रदक्षिणीकृत्य दुन्दुभिशब्देन स्वस्तिसूक्तेनेति' ।

हेमाद्रावाथर्वणगोपथब्राह्मणे—

'अथ राज्ञोऽभिषेकविधि व्याख्यास्यामो बिल्वप्रभृतीन्संभारान्संभृत्य षोडशकलशान् षोडशबिल्वानि वल्मीकस्य च मृत्तिकाः सर्वान्नं सर्वरसान् सर्वबीजानि, तत्र चत्वारः सौवर्णाश्चत्वारो राजताश्चत्वारस्ताम्राश्चत्वारो मृन्मयास्तान् ह्रदे सरसि वोर्ध्वस्रुतो 'नामैनाम'[1] इत्युदकेन पूरयित्वा वेदिपृष्ठे संस्थाप्य कुम्भे बिल्वमेकैकं दद्यात्सर्वान्नं सर्व-

---

[1] 'वनांव एता आपः' इति पाठान्तरम् ।

रसान् सर्वबीजानि च प्रक्षिप्योभयैरपराजितैरायुष्यैः स्वस्त्ययनैः सौवर्णेषु संपातान् संश्राव्यैः संसिक्तीयैश्च[1] राजतेषु भेषज्यांहोमुचैस्ताम्रेषु संवेशसंवर्ग्याभ्यां शान्तातीयैः प्राणसूक्तेन च मृन्मयेषु ततस्तान् कलशान् गृहीत्वा स्तौत्रियैः पवित्रियैरभिष्टुयै राजानमभिषिञ्चेत् । भूमिमिन्द्रियं वर्धय क्षत्रियं म इति सिंहासनमारूढमभिमन्त्रयेत् । एवमभिषिक्तस्तु रसान् प्राश्नीयात् । विप्रेभ्यश्च दद्याद्गोसहस्रं सदस्येभ्यः क्षेत्रं ग्रामं च विपुलां पृथ्वीं यशः प्राप्नोति भुङ्क्ते धरां जितशत्रुः सदा भवेदिति' ।

अथाभिषेकमन्त्राः ।।

हेमाद्रौ विष्णुधर्मोत्तरे—

'शृणुष्वावहितो मन्त्रं राम ! कल्मषनाशनम् ।
येनाभिषिक्तो नृपतिश्चिरं यशसि तिष्ठति ।।

राज्ञोऽभिषिक्तशब्दान्ते दैववित्कुशवारिणा ।
कुम्भादभ्युक्षणं कुर्यान्मन्त्रान्ते कलशं न्यसेत् ।।

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।।

प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।।

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ।।

रुद्रो धर्मो मरुद्दक्षो रुचिःश्रद्धा च पार्थिव ।
भृगुरत्रिर्वसिष्ठश्च सनकश्च सनन्दनः ।।

सनत्कुमारश्च तथा भगवानपि चाङ्गिराः ।
पुलहश्च पुलस्त्यश्च मरीचिः कश्यपः प्रभुः ।।

एते त्वामभिषिञ्चन्तु प्रजाध्यक्षाः समागताः ।
प्रभाकरा बर्हिषदो अग्निष्वात्तास्तथैव च ।।

---

[1] 'सोमाग्नीयैश्च' इति पाठान्तरम् ।

क्रव्यादाश्चोपहूताश्च आज्यपाश्च सुकालिनः ।
एते त्वामभिषिञ्चन्तु पितरश्चाग्निभिः सह ॥
लक्ष्मीर्वेदी सती क्षान्तिरनुसूया तथा स्मृतिः ।
सम्भूतिः सन्ततिश्चैव क्षमा प्रीतिस्तथैव च ॥
स्वाहा स्वधा च ते राजन्नभिषिञ्चन्तु मातरः ।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः सिद्धिश्च पार्थिव ।
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ॥
अरुन्धती वसुर्यामी लम्बा भानुर्मरुत्वती ।
सङ्कल्पा च मुहूर्ता च साध्या विश्वा तथैव च ॥
धर्मपत्न्यो दशान्यास्त्वामभिषिञ्चन्तु पार्थिव ।
अदितिर्दितिर्दनुस्ताम्रा ह्यरिष्टानायुषा मुनिः ॥
कद्रूः क्रोधवशा प्राची वितता सुरभिस्तथा ।
एतास्त्वामभिषिञ्चन्तु कश्यपस्य प्रियाः स्त्रियः ॥
पत्नी ते बहुपुत्रस्य सुपुत्राया च भामिनि ।
समा यात्वभिषेकाय विजयाय च पार्थिव ॥
कृशाश्वपत्नी च तथा सुप्रभा तु जया तथा ।
सुदर्शना तयोः पुत्रो विजयं विदधातु ते ।
मनोरमा भानुमती विशाला या च बाहुदा ।
अरिष्टनेमिपत्न्यस्त्वामभिषिञ्चन्तु पार्थिव ॥
कृत्तिका रोहिणी देवी इला रौद्री तथैव च ।
पुनर्वसुश्च पुष्यश्च तथाश्लेषा च पार्थिव ॥
मघा च फाल्गुनी पूर्वा तथैवोत्तरफाल्गुनी ।
हस्तश्चित्रा तथा स्वाती विशाखा च तथा नृप ॥
अनुराधा तथा ज्येष्ठा मूलं च वसुधाधिप ।
आषाढा च तथा पूर्वा तथा चान्योत्तराह्वया ॥

अभिजिच्च श्रुतिश्चैव धनिष्ठा च तथैव च ।
तथा शतभिषक् चैव पूर्वभाद्रपदा च या ।।
उत्तरा रेवती राजन्नश्विनी भरणी तथा ।
एतास्त्वामभिषिञ्चन्तु सोमपत्न्यः समागताः ।।
महाकल्पश्च कल्पश्च मन्वन्तरयुगानि च ।
संवत्सराणि सर्वाणि तथा चैवायनद्वयम् ।।
ऋतवश्च तथा मासाः पक्षरात्र्यहनी तथा ।
सन्ध्याश्च तिथयश्चैव मुहूर्ताः करणानि च ।।
एते त्वामभिषिञ्चन्तु कालस्यावयवाः शुभाः ।
आदित्यश्चन्द्रमा भौमो बुधो जीवः सितार्कजौ ।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च पार्थिव ।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ।
स्वायम्भुवो मनोः पुत्रो मनुः स्वारोचिषस्तथा ।।
वैवस्वतोऽथ सावर्णिर्दक्षब्रह्मसुतावुभौ ।
धर्मपुत्रो रुद्रपुत्रो रौच्यो भौत्यश्च यो मनुः ।।
एते त्वामभिषिञ्चन्तु मनवश्च चतुर्दश ।
नासत्यौ देवभिषजौ भवेतां विजयाय ते ।।
धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ महाप्रभाः ।।
एते त्वामभिषिञ्चन्तु देवमुख्याः समागताः ।
धाता मित्रोऽर्यमा पूषा शक्रोंशो वरुणो भगः ।।
त्वष्टा विवस्वान् सविता विष्णुर्द्वादशमस्तथा ।
एते त्वामभिषिञ्चन्तु काश्यपाऽदितिसंभवाः ।।
एकज्योतिर्द्विज्योतिश्च त्रिचतुर्ज्योतिरेव च ।
एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ।।

इन्द्रश्च गत्या दृश्यन्ते ततः प्रकृतिसत्तथा ।
मितश्च सम्मितश्चैव अमितश्च महाबलः ।।
ऋतजित्सत्यजिच्चैव सुषेणः श्येनजित्तथा ।
अतिमित्रो ह्यमित्रश्च पुरुजिच्च पराजितः ।।
ऋतश्च ऋतवान्धाता वरुणो विधृतो ध्रुवः ।
विधारणो महातेजा वासवस्य परः सखा ।।
ईदृशाश्चान्यादृशाश्च एतादृगमिताशनः ।
क्रीडनश्च तथा शक्तिः सभरश्च महायशाः ।।
धातुरुग्रो मुनिर्भीमः अतिमुक्तः क्षिपः सहः ।
द्युतिर्वसुरनाधृष्यो वासः कामो जयो विराट् ।।
एते त्वामभिषिञ्चन्तु मरुतश्च समागताः ।
देवा ह्येकोनपञ्चाशन्महाबलपराक्रमाः ।।
चित्राङ्गदश्चित्ररथश्चित्रसेनश्च वीर्यवान् ।
पूर्णायुरनघश्चैव उग्रसेनश्च वीर्यवान् ।।
धृतराष्ट्रश्च सोमश्च सूर्यवर्णस्तथैव च ।
उराधस्तृपणः कार्णिर्नंदश्चित्रस्तथैव च ।।
कलिश्चाप्यङ्गिरा राजन् पर्जन्यो नारदस्तथा ।
वृषपर्वात्रि हंसश्व तथा चैव हाहा हूहूः ।।
विश्वावसुस्ताम्रकश्च तथा वसुरुपश्रियः ।
एते त्वामभिषिञ्चन्तु गन्धर्वाः पृथिवीपते ।।
अनुत्तमा सुकेशी च सुरूपा च मनोवती ।।
मेनका सहजन्या च पूर्णाशा पुञ्जिकस्थली ।
ऋतुस्थला घृताची च विश्वाची पूर्वचित्यपि ।।
प्रम्लोचाथाप्यनुम्लोचा रम्भा चैवोर्वशी तथा ।
पञ्चचूडा सामवती चित्रलेखा च पार्थिव ।।

मिश्रकेशी सुगन्धिश्च विद्युत्पर्णा तिलोत्तमा ।
आवृका लक्ष्मणा क्षेमा असिका रुचिका तथा ।।
सुव्रता च सुबाहुश्च सुबोधा सुवपुस्तथा ।
पुण्डरीका सुधीरा च सुराधा सुरसा तथा ।।
हेमा सरस्वती चैव कमला सूनृता लवा ।
सुमुखी हंसपादी च वारुणी रतिलालसा ।।
एतास्त्वामभिषिञ्चन्तु राजन्नप्सरसस्तथा ।
प्रह्लादश्च महातेजास्तथा राजन् विरोचनः ।।
धन्वी बाणस्तथान्ये च दितिपुत्राः समागताः ।
अभिषिञ्चन्तु दैत्याश्च दिव्येनाप्यम्भसा स्वयम् ।।
विप्रचित्तिमुखाः सर्वे दानवास्त्वां समागताः ।
अभिषिञ्चन्तु राजानं राज्यं कर्तुं सुसत्वराः ।।
हेतयश्चैव प्रहेतयश्च सलिलेन्द्रस्तथैव च ।
सुकेशी पौरुषेयश्च यज्ञहा पुरुषोदरः ।।
विद्युत्सूर्यस्तथा व्यासो वधश्च रसनस्तथा ।
एते त्वामभिषिञ्चन्तु समागम्याद्य राक्षसाः ।।
सिद्धोऽथो मणिभद्रश्च सुमनो नन्दनस्तथा ।
कद्रूतिः पञ्चमश्चैव मणिमान् वसुमांस्तथा ।।
सर्वानुभूतः शङ्खश्च पिङ्गाक्षश्चतुरस्तथा ।
यमो नन्दरसो भीमः पद्मश्चन्द्रः प्रभाकरः ।।
मेघवर्णश्च भव्यश्च प्रद्योतश्च महायशाः ।
भूतिमान् केतुमाँश्चैव मौलिमाँश्च सुदर्शनः ।।
श्वेतश्च विपुलश्चैव प्रद्युम्नश्च जयावहः ।
पद्माक्षो पिङ्गलाक्षश्च कुमुदश्च बलाहकः ।।
पद्मनाभः सुगन्धश्च सुवीरो विजयाकृतिः ।
पूर्णमासो हिरण्याक्षः सितजिह्वश्च वीर्यवान् ।।

एते त्वामभिषिञ्चन्तु राजवृद्धाश्च सत्तमाः ।
शङ्खः पद्मश्च राजेन्द्र ! मकरः कश्यपस्तथा ।।
महापद्मश्च नीलश्च खर्वः कुन्दो मुकुन्दकः ।
एते त्वामभिषिञ्चन्तु निधयस्तु समागताः ।।
छागलाश्चैव वक्राश्च ये च सूचीमुखा नृप ।
दुष्पूरणा विषादाश्च ज्वलनाङ्गारकास्तथा ।।
कुम्भपात्राः प्रभुञ्जाश्च उपवीता उलूखलाः ।
अकर्णाश्चक्रतुण्डाश्च तथा ये पात्रपाणयः ।।
पांसवश्च वितुण्डाश्च विपुणाः स्कन्दनास्तथा ।
एते त्वामभिषिञ्चन्तु पिशाचानां च जातयः ।।
ब्रह्मचर्ये स्थिता दान्ताः सर्वज्ञाः सर्वदर्शिनः ।
नानाप्रकारवदना नानाबाहुशिरोधराः ।।
चातुष्पथसुराट्टालशून्यालयनिकेतनाः ।
त्रिपुरारिं भवं देवं ये गता मनुजेश्वर ! ।।
एते त्वामभिषिञ्चन्तु गणा भूतपतेः स्वयम् ।
महाकालं पुरस्कृत्य नरसिंहं च मातरः ।।
सर्वास्त्वामभिषिञ्चन्तु राजराज्ये नराधिप ।
ग्रहः स्कन्दो विषादश्च नैगमेयस्तथैव च ।।
अभिषिञ्चन्तु राजँस्त्वां सर्वे स्कन्दग्रहाः शुभाः ।
डाकिन्यो याश्च योगिन्यः खेचर्यो भूचरास्तथा ।।
सर्वास्त्वामभिषिञ्चन्तु समेत्य मनुजेश्वर ।
गरुडश्चारुणश्चैव आरुणिश्च महाखगः ।।
सम्पातिर्विनतश्चैव विष्णुर्गन्धकुमारकः ।
एते त्वामभिषिञ्चन्तु सुपर्णाः पृथिवीपते ।।
अनन्तश्च महानागो वासुकिः शेषतक्षकौ ।
सुपर्णारिश्च कुम्भश्च वामनोऽथाञ्जनोत्तमः ।।

ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ।
पद्मपत्रश्च शङ्खश्च कर्कोटकधनञ्जयौ ॥
महाकर्णो महानीलो धृतराष्ट्रबलाहकौ ।
कुमारः पुष्पदन्तश्च गन्धर्वश्च मनस्विकः ॥
नहुषः खररोमा च शङ्खपालस्तथैव च ।
पद्मश्च कुलिकश्चैव पाणिरित्येवमादयः ॥
नागास्त्वामभिषिञ्चन्तु राजराज्ये च पार्थिव ।
कुमुदैरावतौ पद्मः पुष्तदन्तोऽथ वामनः ॥
सुप्रतीकोऽञ्जनो नीलः पातु त्वां सर्वतो द्विपाः ।
पैतामहस्तथा हंसो वृषभः शाङ्करस्तथा ॥
उच्चैःश्रवाश्चाश्वपतिस्तथा धन्वन्तरिर्नृप ।
कौस्तुभः शङ्खराजश्च पातु त्वां सर्वतः सदा ॥
चक्रं त्रिशूलं वज्रश्च नन्दकोऽस्त्राणि चाप्यथ ।
सर्वेऽभिषेकं दत्वा च दिशन्तु विजयं ध्रुवम् ॥
धर्मश्च वृद्धशाखश्च सत्यं दानं तपस्तथा ।
यशो यज्ञास्तथैवायुर्ब्रह्मचर्यं दमः शमः ॥
एते त्वामभिषिञ्चन्तु चित्रगुप्तश्च पार्थिव ।
दण्डः पिङ्गलकश्चैव मृत्युः कालान्तकावुभौ ॥
बालखिल्यास्तथा सर्वे भवन्तु विजयाय ते ।
दिग्धेनवश्चतस्रस्त्वां सुरभिश्च तथा नृप ॥
अभिषिञ्चन्तु सर्वाभिर्गोभिः सार्धं नरेश्वर ।
वेदव्यासश्च वाल्मीकिः शमनोऽथ पराशरः ॥
देवलः पर्वतश्चैव दुर्वासा भागुरिः शुचिः ।
याज्ञवल्क्यः सजाबालिर्जमदग्निः शुचिश्रवाः ॥
विश्वामित्रः शूलकच्छुर्वर्धनोऽत्रिर्विदूरथः ।
एकतश्च द्वितश्चैव त्रितो गौतमगालवौ ॥

शाण्डिल्यश्च भरद्वाजो मौद्गल्यो वेदवाहनः ।
बृहदश्वः कुटिमठो जपजानुर्घटोदरः ।।
यवक्रीतोऽथ रैभ्यश्च आत्मधामश्च जैमिनिः ।
ऋषिः सारङ्गवश्चैव तथागस्त्यो महातपाः ।।
डुड्डुर्मृदुर्मिशश्चैव इद्धबाहुर्महोदयः ।
कात्यायनश्च कण्वश्च बलाकश्चेभनन्दनः ।
एते त्वामभिषिञ्चन्तु मुनयः पार्थिवोत्तम ।
पृथुर्दिलीपो भरतो दुष्यन्तः शत्रुजिद्बली ।।
मनुः ककुत्स्थश्चानेना युवनाश्वो जयद्रथः ।
मान्धाता मुचुकुन्दश्च तथा राजा पुरूरवाः ।।
इक्ष्वाकुश्च यदुः श्वेतः पूरुर्भूरिश्रवास्तथा ।
अम्बरीषश्च नाभागो बृहदश्वो महाहनुः ।।
प्रद्युम्नश्चाथ सुद्युम्नो भूरिद्युम्नश्च सञ्जयः ।
एते चान्ये च राजानस्तव राजन् दिवं गताः ।।
समायान्त्वभिषेकाय विजयाय तथा श्रियै ।
पुरुषश्चाप्रमेयात्मा महाभूतानि यानि वा ।।
पृथिवीवायुराकाशमापोज्योतिस्तथैव च ।
मनोबुद्धिस्तथैवात्मा अव्यक्तश्च महीपते ।।
एते त्वामभिषिञ्चन्तु समेता वसुधाधिप ।
भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।।
तपः सत्यश्च राजेन्द्र विजयाय भवन्तु ते ।
जम्बू शाकः कुशः क्रौञ्चः शालमलीद्वय एव च ।।
प्लक्षश्च पुष्करश्चैव स्वस्वाम्यं प्रदिशन्तु ते ।
उत्तराः कुरवः पुण्या रम्या हैरणमयास्तथा ।।
भद्राश्वः केतुमालश्च वर्षश्चैव इलावृतः ।
हरिवर्षः किंपुरुषो वर्षो भारतसंज्ञकः ।।

एते त्वामभिषिञ्चन्तु समेत्य वसुधाधिप ।
इक्षुद्वीपः कुसेरुश्च ताम्रपर्णो गभस्तिमान् ।।
नागद्वीपस्तथा सौम्यो गन्धर्वो वरुणस्तथा ।
अयं च नवमस्तेषां स्वस्वाम्यं प्रदिशन्तु ते ।।
हिमवान् हेमकूटश्च निषधो नील एव च ।
श्वेतशृङ्गोऽगवान् मेरुर्माल्यवद्गन्धमादनौ ।।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवाँस्तथा ।
विन्ध्यश्च पारियात्रश्च सर्व एव महीधराः ।।
समागम्याभिषिञ्चन्तु त्वामद्य वसुधाधिप ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्तथैव च ।।
अथर्ववेदो वेदास्त्वामभिषिञ्चन्तु पार्थिव ।
इतिहासो धनुर्वेदो गान्धर्वश्चायुसंज्ञितः ।।
सप्तोपवेदाश्च तथा विजयाय भवन्तु ते ।
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।।
छन्दोविचितिषष्ठानि विजयं प्रदिशन्तु ते ।
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ।
साङ्ख्ययोगः पाञ्चरात्रो वेदः पाशुपतं तथा ।।
कृतान्तपञ्चकं चैव शास्त्राणि विविधानि च ।
गायत्री पापशमनी गङ्गादेवी महाशिवा ।।
गान्धारी च तथा विद्या विजयं प्रदिशन्तु ते ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।।
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।।
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाः शुभाः ।।

स्थानानि च समस्तानि पुण्यान्यायतनानि च ।
जीमूतानि च सर्वाणि तद्विकाराश्च सर्वशः ।।
उक्तानि चाप्यनुक्तानि विजयाय भवन्तु ते ।
लवणक्षीरतोयौ च घृतमण्डोदकस्तथा ।।
दधिमण्डोदकश्चैव सुरोदश्च नराधिप ।
तथैवेक्षुरसोदश्च तथा स्वादूदकश्च यः ।।
गर्भोदकश्च तोयैस्त्वामभिषिञ्चन्तु पार्थिव ।
चत्वारः सागराश्चैव स्वेन तोयेन पार्थिव ।।
समागम्याभिषिञ्चन्तु विजयं प्रदिशन्तु ते ।
पुष्करश्च प्रयागश्च प्रभासो नैमिषं तथा ।।
तथा ब्रह्मसरः पुण्यं गयाशीर्षं च पार्थिव ।
कालोदको नन्दिकुण्डस्तथैवोत्तरमानसः ।।
स्वर्गमार्गनदश्चैव तथा पञ्चनदश्च यः ।
भृगुतीर्थं प्रभासश्च तथैवामरकण्टकः ।।
आश्रमः कालिकायाश्च नारायणसरस्तथा ।
तृणबिन्दोस्तथा तीर्थं तीर्थं चावन्तिखण्डके ।।
महासरस्तथागस्त्यः कुमारीतीर्थमेव च ।
गङ्गाद्वारं कुशावर्तो बिल्वको नीलपर्वतः ।।
वाराहपर्वतश्चैव तीर्थं कनखलं तथा ।
कालञ्जरः सकेदारो रुद्रकोटिस्तथैव च ।।
महालयश्च राजेन्द्र ! बदर्याश्रम एव च ।
नन्दा च सूर्यतीर्थं च सोमतीर्थं शतक्रतोः ।।
अश्विनोर्वरुणस्याथ वायोर्वैश्रवणस्य च ।
ब्रह्मणश्चैव शर्वस्य यमस्य च्यवनस्य च ।।
विरूपाक्षस्य धर्मस्य तथा चाप्सरसां नृप ।
ऋषीणां च वसूनां च साध्यानां मरुतां तथा ।।

अदित्यानां च रुद्राणां तथा चाङ्गिरसां नृप ।
विश्वेदेवभृगूणां च तथान्येषां च मानद ।।
प्लक्षप्रस्रवणं चैव सुषुम्णं च नराधिप ।
शालग्रामसरश्चैव वाराहो मानसस्तथा ।।
कामाश्रमस्त्रिकूटश्च चित्रकूटस्तथैव च ।
सपूर्वः ऋतुसारश्च तथा विष्णुपदं सरः ।।
कपिलस्य तथा तीर्थं वासुकेस्तीर्थमेव च ।
सिन्धूत्तमस्तपोद्वारोऽप्यथ सूर्यारकुम्भकः ।।
पौण्डरीकश्च राजेन्द्र ! गङ्गासागरसङ्गमः ।
सिन्धुसागरयोश्चैव सङ्गमः सुमनोहरः ।।
तथा कुम्भा वसुन्दश्च मानसं च तथा सरः ।
तथा बिन्दुसरः पुण्यं सरस्त्वच्छोदकं तथा ।।
धर्मारण्यं फलगुतीर्थमविमुक्तं तथैव च ।
लौहित्यश्च तथा पुण्यो वदरी पावनः शिवः ।।
तीर्थं सप्तऋषीणां च वह्नितीर्थं च पार्थिव ।
पुण्यवस्त्रा यथोमेषच्छागलेशस्तु पार्थिव ।।
पुष्पन्यासस्तथा चैव तीर्थो हंसपदस्तथा ।
अश्वतीर्थश्च कर्णाश्वो मणिमन्थस्तथैव च ।।
देविका इन्द्रमार्गश्च स्वर्णबिन्दुस्तथैव च ।
आहत्व्यकस्तथा तीर्थस्तीर्थश्चैरावतस्तथा ।।
ऐरावती समुद्भेदे तीर्थं भोगयशाः परम् ।
करवीराह्वयं चैव नागमो वणिकस्तथा ।।
पापमोचनिकश्चैव ऋणमोचनिकस्तथा ।
उद्वेजनस्तथा पुण्यः संपूज्यः ससरोवरः ।।
देवब्रह्मसरः पुण्यं सर्पिर्दधि तु पार्थिव ।
एते चान्ये च बहवः पुण्यसङ्कीर्तनाः शुभाः ।।

तोयैस्त्वामभिषिञ्चन्तु सर्वपातकनाशनैः ।
गङ्गानदी महापुण्या ह्लदिनी ह्लादिनी तथा ।।
पावनी च तथा सीता चक्षुः सिन्धुः सनर्मदा ।
सुप्रभा काञ्चनाक्षी च विशाला मानसी ह्लदा ।।
सरस्वती घनोदा च सुवंशा विमलोदका ।
शिप्रा शोणश्च तर्षश्च शरयूर्गण्डकी तथा ।।
अच्छोदा च विभागा च चन्द्रभागा इरावती ।
वितस्ता देविका रम्भा केशा देवह्लदा शिवा ।।
तथा चेक्षुमती पुण्या कौशिकी यमुना तथा ।
गोमती धूतपापा च बाहुदा च सरस्वती ।।
निर्विन्ध्या च तृतीया च लोहितश्च महानदः ।
वेदस्मृतिर्वेदमाता वेदायुर्वरदा तथा ।।
गोवर्णा चन्दना चैव सदानीरा कुमुद्वती ।
पिता चर्मण्वती धूपा विदर्भा वेणुमत्यपि ।।
अवन्ती च तथा कुन्ती सुरसा च पलाशिनी ।
मन्दाकिनी दशार्णा च सिन्धू रेवा कुमुद्वती ।।
तपनी पिप्पली श्येनी करतोया पिशाचिका ।
चित्रोत्पला चित्रवर्णा मञ्जुला वालुकावती ।।
शुक्तिमती सिनीवाली मण्डूणी तृपिका कपूः ।
तापी पयोष्णी निर्विन्ध्यासिता च निषधावती ।।
वेगा वैतरणी भीमा नन्दरा च तथा कुहूः ।
तोया चैव महागौरी दुर्गा मतिविला तथा ।।
गोदावरी भीमरथी कृष्णा वेणी भयङ्करा ।
तुङ्गभद्रा सुप्रकारा वात्या कावेरिरेव च ।।
कृतमाला ताम्रपर्णी पुष्पभद्रोत्पलावती ।
नृसमा ऋषिकुल्या च इक्षुका त्रिदिवालया ।।

लाङ्गूलिनी वंशधरी जाम्बूश्च सुकलावती ।
ऋषिका च खगा चैव मन्दगा मन्दवाहिनी ।।
क्षमा देवी दया व्योमा पयोष्णी कालवाहिनी ।
कम्पना च विशल्या च करतोया सुवाहिनी ।
ताम्रारुणा वेत्रवती सुभद्रा चाश्ववत्यपि ।।
अद्रिका च इमा चैव सुप्रकारा हिरण्मयी ।
आपगा लोपला भासी सन्ध्या च वडवानदी ।।
महेन्द्रवाणी शाला च मालिका वलयावती ।
नीलोद्धतकरा चैव बाहुदा वनवासिनी ।।
नन्दा चापरनन्दा च सुनन्दा वसुवासिनी ।
एताश्चान्याश्च राजेन्द्र ! नद्यस्त्वां विविधोदकैः ।।
सर्वपापप्रशमनाः सर्वलोकस्य मातरः ।
सतोयपूर्णैः कलशैरभिषिञ्चन्तु पार्थिव ! ।।

एतैर्यथोक्तैर्नृपराजराज्ये कृताभिषेकः पृथिवीं समग्राम् ।
ससागरांभुङ्क्ष्व चिरं च जीव धर्मे च ते बुद्धिरतीव चास्तु ।। इति

तथा ऋग्विधाने–

राजानमभिषिञ्चेत तिष्येण श्रवणेन वा ।
पौष्णसावित्रसौम्याश्विरोहिण्यासुत्तरासु च ।।
हुत्वाग्निं यज्ञलिङ्गाभिः सावित्र्या प्रयतः शुचिः ।
महाव्याहृतिभिश्चैव संपाताभिहुतो भवेत् ।।
सर्वौषधिरसैः श्लक्ष्णैर्नदीनां सलिलेन च ।
व्याघ्रचर्मण्यथासीनमासङ्घामभिषिच्य तम् ।।
तिष्ठन् प्रत्यङ्मुखो ब्रूयाज्जय त्वं पृथिवीपते ।
धर्मस्ते निखिलो राजन् वर्धतां पालयन् प्रजाः ।।
धर्मस्य च श्रियै पुष्ट्यै जयायाभ्युदयाय च ।
राजा तु सन्ततौ गोत्रे ततोऽप्रतिरथं जपेत् ।।

वैय्याघ्रं तु भवेच्चर्म समिदौदुम्बरी भवेत् ।
त्रिरेनमभिषिच्यैवं दुन्दुभीनभिमन्त्रयेत् ।।
प्राच्यां त्वां दिशि वसवो ह्यभिषिञ्चन्तु तेजसे ।
दक्षिणस्यां त्वां दिशि रुद्रा अभिषिञ्चन्तु वृद्धये ।।
प्रतीच्यां त्वां दिश्यादित्या विश्वेदेवा उदग्दिशि ।
अभिषिच्य च राजानमाशीर्भिरभिसंयुजेत् ।।
आत्वा हार्षमन्तरेधीत्यथैनमभिमन्त्रयेत् ।

अभिषेकफलमुक्तं बौधायनेन–

“दश पूर्वान् दश परानात्मानं चैकविंशतिम् । पुनाति पुत्रपौत्रैः सह षष्टिवर्षसहस्त्राणि स्वर्गलोके महीयते ब्रह्मणः सायुज्यमाप्नोतीति’ । इति प्रथमराज्याभिषेकः ।

अथ प्रतिवर्षाभिषेकः ।

गोपथब्राह्मणे–

अथ पुष्पाभिषेकस्य विधिं वक्ष्यामि सांप्रतम् ।
धर्मार्थकामसंयुक्तं राजा कुर्यात् पुरोहितम् ।।
सौवर्णै राजतैस्ताम्रैः कलशैः पार्थिवैरपि ।
सहस्त्रेण शतेनाथ तोयग्रहणमिष्यते ।।
चतुर्णां सागराणां तु नदीनां च शतस्य तु ।
अभिषेकाय राज्ञस्तु तोयमाहृत्य यत्नतः ।।
एकद्वित्रिचतुर्वर्णावासागस्त्यस्तु पञ्चमम् ।
औषधीस्तेषु सर्वेषु कुम्भेषु परिकल्पयेत् । ।।
सहा च सहदेवी च बला चातिबला तथा ।
दमयन्ती वचा श्वेता व्याघ्रदन्ती सुमङ्गला ।।
शतावरी जयन्ती च शतपुष्पा सचन्दना ।
प्रियङ्गू रोचनोशीरममृता च ससारिका ।।

अश्वत्थप्लक्षबिल्वानां न्यग्रोधपनसस्य च ।
शिरीषाम्रकपित्थानां पल्लवैः समलङ्कृतान् ।।
हेमरत्नौषधीबिल्वपुष्पगन्धाभिवासितान् ।
आच्छादितान् सितैर्वस्त्रैरभिमन्त्र्य पुरोहितः ।।
सावित्र्युभयतःकुर्याच्छन्नो देवी तथैव च ।
हिरण्यवर्णां सूक्तं च अनुवाकाद्यमेव च ।।
धरणीपादपीठस्य दूर्वामूलान् कुशाञ्शुभात् ।
तस्योपरि भवेत्पीठं हैमं रौप्यमथापि वा ।।
अनडुद्व्याघ्रसिंहानां मृगस्य च यथाक्रमम् ।
चत्वारि चर्माण्येतानि पूर्वादारभ्य विन्यसेत् ।।
चातुर्होत्रविधानेन जुहुयाच्च पुरोहितः ।
चतुर्दिक्षु स्थितैर्विप्रैर्वेदवेदाङ्गपारगैः ।।
बिल्वाहारः फलाहारः पयसा वापि वर्तयेत् ।
सप्तरात्रं घृताशी वा ततो होमं प्रयोजयेत् ।।
गव्येन पयसा कुर्यात् सौवर्णेन स्रुवेण तु ।
वेदानामादिभिर्मन्त्रैर्महाव्याहृतिपूर्वकैः ।।
शर्मवर्मगणैश्चैव तथा स्यादपराजितः ।
आयुष्यश्चाभयश्चैव तथा स्वस्त्ययनो गणः ।।
एतान् पञ्चगणान् हुत्वा वाचयेत्तु द्विजोत्तमान् ।
हिरण्येनाक्षतार्धेन त्वन्यैश्च मधुसर्पिषा ।।
पुण्याहं वाचयित्वास्य ह्यारम्भं कारयेद्बुधः ।
तिथिनक्षत्रसंयुक्ते मुहूर्ते करणे शुभे ।।
उच्चैर्घोष ईति तूर्याण्यभिमन्त्र्य पुरोहितः ।
सर्वतूर्यनिनादेन ह्यभिषिक्तो ह्यलङ्कृतः ।।
सिंहासनं समारुह्य पीठकं च यथाक्रमम् ।
चामरच्छत्रसंयुक्तं प्रतीहारविभूषितम् ।।

मत्तद्विपचतुष्कं च चतुर्दिक्षु प्रकल्पयेत् ।
उपतिष्ठँस्ततो राजा प्रजानां कारयेद्धितम् ॥
आकरा ब्राह्मणा गावः स्त्रीबालजडरोगिणः ।
ततस्तु दर्शनं देयं ब्राह्मणानां नृपेण तु ॥
श्रेणीप्रकृतिमुख्यानां स्त्रीजनं च नमस्करोत् ।
आशिषस्ते हि शस्यन्ति तुष्टा जनपदा भुवि ॥
एवं प्रजानुसज्जेत पृथिवी च वशे भवेत् ।
पुरोहितं मन्त्रिणं च सेनाध्यक्षं तथैव च ॥
अश्वाध्यक्षं गजाध्यक्षं कोष्ठागारपतिं तथा ।
भाण्डागारपतिं वैद्यं दैवज्ञं च यथाक्रमम् ॥
यथार्हेण च योगेन सर्वान्संपूजयेन्नृपः ।
राज्यं पुरोहिते न्यस्य शेषाणां च यथाक्रमम् ॥
स्थानान्तराणि चान्यानि दत्त्वा सुखमवाप्नुयात् ।
दूर्वा सिद्धार्थकान् सर्पिः शमी व्रीहियवौ तथा ॥
शुक्लानि चैव पुष्पाणि मूर्ध्नि दद्यात् पुरोहितः ।
अथर्वसहितो ह्येष विधिः पुष्पाभिषेचने ॥
राजा जातो महीं भुङ्क्ते शक्रलोकं च गच्छति ।

अयं चाभिषेकः प्रतिवर्षं महानवम्यां कर्तव्यः । 'पुष्पाभिषेको महानवम्याम् । इन्द्रोत्सवो जन्मदिने । प्रतिवर्षं वृषोत्सर्गः । कार्तिक्यां प्रतिवर्षम्' इत्याथर्वणसूत्रात् ।

इति पुष्पाभिषेकः ॥

अथ सिंहासनच्छत्रलक्षणम् ।

वास्तुमञ्जर्याम्–

सिंहासनं चोत्तममङ्गुलानां षष्ट्या दशोनं च परं वदन्ति ।
दशांशवस्वंशमतो विहीनं व्यासेन दैर्घ्यार्धसमुच्छ्रयं स्यात् ॥

मुनिभिरथ शरैर्वा भद्रभागत्रयं स्या-
दुदय इह विभागैर्भाविते पीठमष्टौ ।
कणिशमपि रसांशं सप्तधाग्रा सपट्टी
शिवमुनिनवरत्नैर्दन्तिवाहौ नृवन्द्यौ ॥

छाद्यं स्याद्रसभागमेव तिथितो भागेन कक्षाशतै-
र्युक्तं स्तम्भयुगेन तोरणयुतं रत्नैः शुभै राजितम् ।
कर्तव्यं नृपवल्लभं सुनिभृतं ज्येष्ठं च सिंहासनं
कर्तव्यं च यशोऽभिवर्धनमिभैः सिंहैर्नृकक्षासनम् ॥

छत्रं ज्येष्ठमशीतिवेदसहितं द्वासप्ततिर्मध्यमं
षष्टया कल्प्य समङ्गुलैर्नरपतेर्दैवं शतार्धं समम् ।

विष्णुधर्मोत्तरे–

"भद्रासनं नरेन्द्रस्य क्षीरवृक्षान्न कारयेत् ।
उच्छ्रायश्च तथा तस्य अध्यर्धं तु समं भवेत् ॥
हस्तत्रयं तथा विष्वग्विस्तारेण च कारयेत् ।
आयामश्चास्य कर्तव्यो विस्तारेणैव संमितः ॥
चतुरस्त्रं तु कर्तव्यं राज्ञो भद्रासनं तथा ।
नास्त्राष्टं न तथा वृत्तं न च दीर्घं भृगूत्तम ॥
सुवर्णरूप्यताम्रैश्च चित्रं कार्यं विशेषवित् ।
प्रशस्तैश्च तथा रत्नैश्चत्वारः प्रतिरूपकैः ॥
चत्वारः पुरुषास्तत्र विन्यस्ता भृगुनन्दन ।
द्विगुणाश्च तथा सिंहास्तत्र कार्या भृगूत्तम ॥
हंसपक्षैर्विरचितं मयूरस्य शुकस्य वा ।
पक्षैरथ बलाकायास्छत्रं राज्ये प्रशस्यते ॥
मिश्रपक्षैर्न कर्तव्यं हीनं परिमितं तथा ।
चतुरस्त्रं तु कर्तव्यं ब्राह्मणस्य भृगूत्तम ॥

वृत्तं राज्ञः प्रशस्तं स्याच्छुक्लवस्त्रविभूषितम् ।”
इति सिंहासनच्छत्रलक्षणम् ।।

अथ दुर्गविधिः ।

राज्ञा सहायसंयुक्तं प्रभूतप्रसवं धनम् ।
रम्यमापोऽन्नसंपन्नं मध्यदेशं समाश्रयेत् ।।
तत्र दुर्गं नृपः कुर्यात् षण्णामेकतमं बुधः ।
नवदुर्गं महीदुर्ग नरदुर्गं तथैव च ।।
वार्क्षं चैवाश्वदुर्गं च गिरिदुर्गं च भार्गव ।
सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ।।
दुर्गं च परिखोपेतं पुराट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशोऽथ समावृतम् ।।
गोपुरं सर्वबाटं च तत्र स्यात्सुमनोहरम् ।
सपताको गजारूढो येन राजा विशेत्पुरम् ।।
सुशोभाश्च तथा तत्र कार्याश्चापणवीथयः ।
एकस्मिस्तत्र वीथ्यग्रे देववेश्म भवेद् दृढम् ।।
वीथ्यग्रे च द्वितीये च राजवेश्म विधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके ।।
चतुर्थे चैव वीथ्यग्रे गोपुरं तु विधीयते ।
आयतं चतुरस्रं वा वृत्तं वा कारयेत्पुरम् ।।
अर्धचन्द्रप्रकारं च वज्राकारं तु कारयेत् ।
अर्धचन्द्रं प्रशंसन्ति नदीतीरे च तद्भवेत् ।।
अन्यत्र तु नकर्तव्यं प्रयत्नेन विजानता ।
राज्ञः शोकगृहं कार्यं दक्षिणे राजवेश्मनः ।।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ।
गजानां प्राङ्मुखी शाला कर्तव्या वाप्यवाङ्मुखी ।।

आग्नेये च तथा भागे आयुधागारमिष्यते ।
महानसं च धर्मज्ञः कर्मशाला तथा परा ।।
गृहं पुरोधसः कार्यं वामतो राजवेश्मनः ।
मन्त्रवेदविदोश्चैव चिकित्साकर्तुरेव च ।।
तस्यैव च तथा भागे कोष्ठागारं विधीयते ।
गवां स्थानं तथैवात्र तुरङ्गाणां तथैव च ।।
उत्तराभिमुखा श्रेणी तुरङ्गाणां विधीयते ।
दक्षिणाभिमुखा वाथ परिशेषा विगर्हिता ।।
तुरङ्गास्तु तथा धार्याः प्रदीपैः सार्वसत्रिकैः ।
कुक्कुटान् वानराँश्चैव मर्कटाँश्च नराधिपः ।।
धारयेदश्वशालासु सवत्सां धेनुमेव च ।
अजाश्च धार्या यत्नेन तुरङ्गाणां हितैषिणा ।।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः ।
अस्तं गते न कर्तव्यो देवदेवे दिवाकरे ।।
योगिनां शिल्पिनां चैव सर्वेषामपि शेषतः ।
दद्यादावसथं दुर्गे मन्त्रकालविदः शुभम् ।।
गोवैद्यानश्ववैद्याँश्च राजवैद्याँस्तथैव च ।
आहरेत भृशं राजा दुर्गे हि प्रबला रुजः ।।।

देवीपुराणे–

पूर्वादीन्कारयेद् द्वारान् महापद्मेषु चोत्तमान् ।
राजस्थानसमायुक्तान् वातायनसमन्वितान् ।।
मत्तवारणदेवाद्यान्ध्वजकैरुपशोभितान् ।
गजव्यालकृतापीडान् पद्मपत्रमनोहरान् ।।
दुर्गेषु कारयेद्दुर्गां महिषासुरघातिनीम् ।
द्वारस्थं गजवक्त्रं वा धनदं वाथ पद्मजम् ।।

शिलान्यासे बलिः कार्यः प्रासादोक्तो यथाविधि ।
अयं चाग्निपुराणे उक्तः ।
हेमकूर्मं सरत्नं च शाखाधः सन्निवेशयेत् ।।
पूतना शकुनी तत्र जम्भादीन्पूजयेद्ग्रहान् ।
देवान् यक्षान् ग्रहान्नागान्पूजयित्वा यथाविधि ।।
दैवज्ञान् सूत्रधारांश्च वसुहेमस्रगादिभिः ।
ब्राह्मणान् स्वस्तिवाच्याथ पशुं शान्त्यै निपातयेत् ।।
कारयेत्सर्वदानानि उत्सवं विविधं पुरे ।
शाखोच्छ्रयं तथा कार्यं छत्रं श्वेतपताकिनम् ।।
एवं समुच्छ्रयेच्छाखा सर्वद्वारेषु बुद्धिमान् ।
पूजयित्वा हरं दुर्गां ग्रहान् मातृविनायकान् ।।
प्रासादोक्तविधानेन बलिं दत्त्वा पुरं कुरु ।
इति दुर्गविधिः ।।

इति श्रीगिरिराजचक्रचूडामणिनरनारायणेत्यादिविविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजश्री५गीर्वाणयुद्धविक्रमसाहदेवकृतायां सत्कर्मरत्नावल्यां शान्तिरत्नं नाम षोडशं प्रकरणम् ।।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली तत्र सम्यक् शान्तिः समीरिता ।।

◆

अथ प्रकीर्णरत्नम् ।।

तत्र गङ्गास्नानमन्त्रः–

विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि ।
धर्मद्रवेति विख्याते पापं मे हर जाह्नवि ।।
इति गङ्गास्नानमन्त्रः ।

गण्डकीस्नानमन्त्रः–

हरिगण्डसमुद्भूते सुरासुरनमस्कृते ।
अघौघशमने देवि पापं मे हर गण्डकि ।।
इति गण्डकीमन्त्रः ।

कौशिकीमन्त्रः–

गाधिराजसुते देवि विश्वामित्रमुनेः स्वसः ।
ऋचीकभार्ये सत्यार्थे पापं मे हर कौशिकी ।।

वाग्वतीमन्त्रः–

नमस्ते वाग्वति देवि सर्वपापप्रणाशिनि ।
अद्य मे धावितं पापं दर्शनात्ते चिरार्जितम् ।।

गङ्गासागरमन्त्रः–

त्वं देवसरितां नाथ त्वं देवसरितांवर ।
उभयोः सङ्गमे स्नात्वा मुञ्चामि दुरितानि वै ।।

नर्मदामन्त्रः–

नर्मदे नर्मसंपन्ने सर्वपापहरे शिवे ।
विषसर्पभयत्राणपरे पापात्पुनीहि माम् ।।

नमोऽस्तु ते मुनिगणसिद्धसेविते
नमोऽस्तु ते शङ्करदेहनिःसृते ।
नमोऽस्तु ते धर्मभृतां वरप्रदे
नमोऽस्तु ते सकलपापविनाशिनि ।।

गोमतीमन्त्रः–

त्वं देवि सरितां श्रेष्ठे गोमति त्वं प्रसीद मे ।
स्वर्धुनीसङ्गमस्नानात्पापं मे हर मज्जतः ।।

तपनीमन्त्रः–

अग्निश्च तेजो मृड यस्य देहे[1]
रेतोऽथ विष्णोरमृतस्य नाभिः ।
एतद्ब्रुवन् पाण्डव सत्यवाक्यं
ततोऽवगाहेत्तपनीं नदीं ताम् ।।

आसनमन्त्रः–

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ।।

मृत्तिकामन्त्रः–

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।।
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मम गात्रं समारुह्य सर्वपापं व्यपोहय ।।

दन्तधावनमन्त्रः–

आयुर्बलं यशो वर्चः प्रजाः पशु वसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वन्नो धेहि वनस्पते ।।
ॐ अन्नाद्याय व्यूहध्वꣳ सोमो राजायमागमत् ।
स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च ।।

---

[1] 'मृडया च देहो' यस्तो पाठ पनि छ ।

पुत्रप्रदो मन्त्रः–

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ।।

गणेशस्य–

रायस्पोषस्य ददिता निधिदो रत्नधातुमान् ।
रक्षोहणो व्वलगहनो वक्रतुण्डाय हुम् ।।

ग्रहणस्नानमन्त्रः–

योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ।
सहस्रनयनश्चन्द्रो ग्रहपीडां व्यपोहतु ।।

मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ।
चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु ।।

यः कर्मसाक्षी लोकानां यमो महिषवाहनः ।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।।

रक्षोगणाधिपः साक्षी नीलाञ्जनसमप्रभः ।
खड्गहस्तोऽतिभीमश्च ग्रहपीडां व्यपोहतु ।।

प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः ।
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।।

नागपाशधरो देवः सदा मकरवाहनः ।
स जलाधिपतिश्चन्द्रो ग्रहपीडां व्यपोहतु ।।

योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ।
चन्द्रोपरागकलुषं वरदोऽत्र व्यपोहतु ।।

योऽसाविन्दुधरो देवः पिनाकी वृषवाहनः ।
चन्द्रोपरागपापानि स नाशयतु शङ्करः ।।

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णवर्करुद्राश्च दहन्तु मम पातकम् ।।

एवमावाहयेत्कुम्भान्मन्त्रैरेभिश्च वारुणैः ।
एतानेव तथा मन्त्रान् स्वर्णपत्रे विलेखयेत् ।।
ताम्रपट्टेऽथवाऽऽलिख्य नववस्त्रे तथैव च ।
मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः ।।
कलशान् द्रव्यसंयुक्तान् नानारूपसमन्वितान् ।
गृहीत्वा स्नापयेद्गूढं भद्रपीठोपरिस्थितम् ।।
पूर्वैरेव तु मन्त्रैश्च यजमानं द्विजोत्तमः ।
अभिषेकं ततः कुर्यान्मन्त्रैर्वारुणसूचकैः ।।
ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
आचार्यं वरयेत्पश्चात्स्वर्णपट्टं निवेदयेत् ।।
आचार्ये दक्षिणां दद्याद्गोदानं च स्वशक्तितः ।
अत ऊर्ध्वं ब्रह्मपूजां तदर्धेन विशेषतः ।।
पूजयेद्वस्त्रदानैश्च ब्राह्मणानपि शक्तितः ।
गन्धमाल्यैर्धूपदीपैः पूजयेदिष्टदेवताम् ।।
होमं चापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ।
निवृत्ते ग्रहणं सर्वं ब्राह्मणेभ्यो विशेषतः ।।
दानं च शक्तितो दद्यात् यदीच्छेदात्मनो हितम् ।
सूर्यग्रहे सूर्यनाम सदा मन्त्राँश्च कीर्तयेत् ।।
अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ।
न तस्य ग्रहणे दोषः कदाचिदपि जायते ।।

अथ वृष्टिकारकमन्त्रः ।।

कङ्काली नाम चैत्यस्य देवी तत्साधनं ब्रुवे ।
कङ्काली जलदेवीति जलं पूरय पूरय ।।
धँ धँ सप्तदशार्णोऽयं जपेद्वर्णसहस्रकम् ।
अवृष्टिकाले रात्रौ च रवौ नद्यां जले जपेत् ।।

कण्ठमात्रप्लुतश्चैवं ध्यायन् देवीं समाहितः ।
प्रभाते वृष्टिरतुला याति पञ्चदिनावधि ।।
इति वृष्टिकारकमन्त्रः ।

अन्यच्च–

'अपांगम्भ' न्निति देवं वर्षयितुकाम उदुम्बरादिसमिधो जुहुयात् । 'अपः पिबेति' शिखण्डिवेतसवारणानां दधिमधुघृताक्तानामयुतं जुहुयान्महावृष्टिर्भवतीति यजुर्विधाने वृष्टिप्रयोगः ।

अथ गतराज्यप्रदो मन्त्रः ।।

अथातः संप्रवक्ष्यामि इन्द्राणीं नष्टराज्यदाम् ।
'इं इन्द्राण्यै नम' इति मन्त्रः प्रोक्तः षडक्षरः ।।

गुरुर्मुनिश्च गायत्रीछन्दो देवेन्द्रवल्लभा ।
इं बीजं शक्तिरिन्द्राणी नमः कीलकमुच्यते ।।

वज्रपाशवराऽभीतिहस्ता श्यामा वराम्बरा ।
चतुर्दन्तगजाकल्पच्छायासंस्था हिरण्मया ।।

कोणषट्केष्वङ्गपूजा तद्बाह्येऽष्टदले यजेत् ।
बगलां छिन्नमस्तां च तारां दक्षिणकालिकाम् ।।

धूमावतीं रुद्रकालीं महाकालीं प्रतिक्रियाम् ।
तत्तन्मन्त्रैस्तु तद्बाह्ये लोकेशानायुधानपि ।।

लक्षषट्कं जपेन्मन्त्रं मालतीकुसुमैर्हुनेत् ।
त्रिमध्वक्तैस्तावदेव राज्यार्थं राजवृक्षजैः ।।
इति गतराज्यप्रदोमन्त्रः ।

अथ सर्वशान्तिकृन्मनुः ।।

क्रीं हूँ ह्रीँ फडित्युक्त्वा स्वाहान्तः सप्तवर्णकः ।
न्यासादिकं दक्षिणान्तं विशेषाच्छान्तिकारकम् ।। इति ।

अथ सङ्ग्रामविजयमन्त्रः—

तारो[1] दुर्गेद्वयं प्रोक्त्वा रक्षिणीत्यग्निगेहिनी[2] ।
दशाक्षरो मनुः प्रोक्तो भजतामिष्टसिद्धिदः ।।
नारदर्षिर्विराट्छन्दो जयदुर्गा च देवता ।
ताराद्यैः पञ्चमन्त्रस्य पदैः सर्वेण संमता ।।
जातियुक्तैरङ्गक्लृप्तिः काम्यके त्वन्यथोच्यते ।
दुर्गे च हृदयं प्रोक्तं दुर्गे च शिर ईरितम् ।।
दुर्गायै स्याच्छिखा वर्म भूतरक्षिणि कीर्तितम् ।
तारादि दुर्गेद्वितयं रक्षिण्यक्षि प्रकीर्तितम् ।।
तारादियुगलं दुर्गे रक्षिण्यस्त्रमुदीरितम् ।
मेघश्यामां ग्लौकिरीटां त्रिनेत्रां सिंहवाहिनीम् ।।
चक्रदरौ[3] खड्गशूलौ भुजाग्रैर्दधतीं भजे ।
दौर्गे पीठे यजेद्देवीमुक्तमार्गेण मन्त्रवित् ।।
प्रजपेत्पञ्चलक्षं च चतुर्दश्यां हुनेत् घृतैः ।
तर्पणादि ततः कुर्यात् ततः सिद्धो भवेन्मनुः ।।
अथ सिद्धमनुर्मन्त्री प्रयोगानाचरेत्सुधीः ।
इमं मनुं जपेद्भूयः प्रविशेच्छत्रुसङ्गरम् ।।
अशेषेण रिपुं हन्यान्नात्र कार्या विचारणा ।
विवादे व्यवहारादौ जप्तो विजयदो भवेत् ।।
अनया विद्ययाङ्क्तां हि पताकां ध्वजदुन्दुभिम् ।
शृङ्गं शङ्खादिकं सर्वं यानं सेनां च सैन्यकम् ।।
संजप्तं तच्च सङ्ग्रामे सम्यग्विजयकृद्भवेत् ।
अथास्याः प्रोच्यते भेदो यद्याद्योऽरिस्थले पतेत् ।।

---

[1] तारः— प्रणवः ।

[2] अग्निगेहिनी— स्वाहा ।

[3] दरः— शङ्खः ।

ऋणं वा जायते हारो नमः प्रोक्त्वा च पूर्ववत् ।
द्वादशार्णो[1] भवेन्मन्त्रः संग्रामविजयप्रदः ।।
इति संग्रामजयमन्त्रः ।

अथ गजेन्द्रमोक्षणम्–

शतानीक उवाच– मया हि देवदेवस्य विष्णोरमिततेजसः ।
श्रुताः संभूतयः सर्वा जगतस्तव सुव्रत ।।१।।
यदि प्रसन्नो भगवाननुग्राह्योऽस्मि वा यदि ।
तदहं श्रोतुमिच्छामि नृणां दुःखप्रणाशनम् ।।२।।
स्वप्ना हि सुमहाभाग दृश्यन्ते ये शुभाऽशुभाः ।
फलानि ते प्रयच्छन्ति तद्गुणान्येव भार्गव ।।३।।
यद्यत्पुण्यं पवित्रं च नृणामपि शुभप्रदम् ।
दुःस्वप्नोपशमायालं तन्मे विस्तरतो वद ।।४।।
शौनक उवाच– इदमेव महाराज स्पृष्टवाँस्ते पितामहः ।।
भीष्मं धर्मभृतां श्रेष्ठं धर्मपुत्रो युधिष्ठिरः ।।५।।
देवव्रतं महाप्राज्ञं सर्वशास्त्रविशारदम् ।
विनयेनोपसंगम्य पर्यपृच्छद्युधिष्ठिरः ।।६।।
युधिष्ठिर उवाच– दुःस्वप्नदर्शनं घोरमवेक्ष्य भरतर्षभ ।
प्रयतः कि जपेज्जप्यं विबुद्धः किमनुस्मरेत् ।।७।।
पितामह महाबुद्धे बुद्धेर्भेदो महानयम् ।
तदहं श्रोतुमिच्छामि ब्रूहि मे वदतांवर ।।८।।
भीष्म उवाच– शृणु राजन् महाबाहो कथयिष्यामि तेऽखिलम् ।
दुः स्वप्नदर्शने जप्यं यद्वै नित्यं समाहितम् ।।९।।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गजेन्द्रमोक्षणं पुण्यं कृष्णस्याक्लिष्टकर्मणः ।।१०।।

---

[1] दुर्गे दुर्गे रक्षिणि स्वाहा नमः ।

सर्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्वतः ।
सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः ।।११।।
क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः ।
उत्थितः सागरं भित्वा देवर्षिगणसेवितः ।।१२।।
अप्सरोभिः समाकीर्णः श्रीमान् प्रस्रवणाकुलः ।
गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणपन्नगैः ।।१३।।
मृगैर्द्विपैर्द्विजैश्चैव वृतः सौवर्णराजतैः ।
पुन्नागैः कर्णिकारैश्च पुष्पितैरुपशोभितः ।।१४।।
चूतनीपकदम्बैश्च चन्दनागरुचंपकैः ।
शालैस्तालैस्तमालैश्च कुटजैश्चार्जुनैस्तथा ।।१५।।
एवं बहुविधैर्वृक्षैः सर्वतः समलङ्कृतः ।
नानाधातूज्ज्वलैः शृङ्गैः प्रस्रवद्भिः समन्ततः ।।१६।।
मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः ।
जीवं जीवकसंघुष्टं चकोरशिखिनादितम् ।।१७।।
तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः ।
नानापुष्पसमाकीर्णं नानागन्धसमाकुलम् ।।१८।।
द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः ।
पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम् ।।१९।।
वज्रेन्द्रनीलवैदूर्यतेजोभिर्भासयन्नभः ।
तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमद्भुतम् ।।२०।।
न तत्कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः ।
नातप्ततपसः शैलं तं वै पश्यन्ति मानवाः ।।२१।।
तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम् ।
कारण्डवसमाकीर्णं राजहंसोपशोभितम् ।।२२।।
उत्पलैः शतपत्रैश्च काञ्चनैः समलङ्कृतम् ।
पत्रैर्मणिदलप्रख्यैः पुष्पैः काञ्चनसन्निभैः ।।२३।।

गुल्मैः कीचकवेणूनां समन्तात्परिवारितम् ।
तस्मिन् सरसि दुष्टात्मा विरूपोऽन्तर्जलाश्रयः ।।२४।।
आसीद्ग्राहो गजेन्द्राणां दुराधर्षो महाबलः ।
अथ दन्तोज्ज्वलमुखः कदाचिद्गजयूथपः ।।२५।।
आजगामासिताऽभ्राभः करेणुपरिवारितः ।
मदस्रावी महारौद्रः पादचारीव पर्वतः ।।२६।।
वासयन्मदगन्धेन गिरिमैरावतोपमः ।
सगजोऽञ्जनसंकाशो मदाच्चलितमानसः ।।२७।।
सलिलं पङ्कजवने यूथमध्यगतो व्रजन् ।
गृहीतस्तेन रौद्रेण ग्राहेणाऽव्यक्तमूर्तिना ।।२८।।
पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम् ।
वारुणैः संयतः पाशैर्निष्प्रयत्नगतिः कृतः ।।२९।।
वेष्ट्यमानः सुघोरैस्तु पाशैर्नागैर्दृढैस्तथा ।
विस्फूर्य च यथाशक्ति विक्रुश्य च महारवान् ।।३०।।
व्यथितः सन्निरुत्साहो गृहीतो घोरकर्मणा ।
परमापदमापन्नो मनसाऽचिन्तयद्धरिम् ।।३१।।
स तु नागवरः श्रीमान् नारायणपरायणः ।
तमेव परमं देवं गतः सर्वात्मना तदा ।।३१।।
एकाग्रश्चिन्तयामास विशुद्धेनान्तरात्मना ।
जन्मजन्मान्तराभ्यासाद्भक्तिमान् गरुडध्वजे ।।३२।।
आद्यं देवं महात्मानं पूजयामास केशवम् ।
नवमेघप्रतीकाशं शङ्खचक्रगदाधरम् ।।३३।।
सहस्रशुभनामानमादिदेवमजं परम् ।
प्रगृह्य पुष्कराग्रेण काञ्चनं कमलोत्तमम् ।
आपद्विमोक्षमन्विच्छन् गजः स्तोत्रमुदीरयत् ।।३४।।

गजेन्द्र उवाच– नमो नमः कारणवामनाय
नारायणायामितविक्रमाय ।
श्रीशार्ङ्गचक्रासिगदाधराय
नमो ऽस्तु तस्मै पुरुषोत्तमाय ।।३५।।
आद्याय वेदनिलयाय महोदराय
सिंहाय दैत्यनिधनाय चतुर्भुजाय ।
ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय
देवोत्तमाय वरदाय नमो ऽच्युताय ।।३६।।
नागेन्द्रभोगशयनासनसुप्रियाय
गोक्षीरहेमशुकनीलघनोपमाय ।
पीताम्बराय मधुकैटभनाशनाय
भक्तिप्रियाय करदीप्तसुदर्शनाय ।।३७।।
नाभिप्रजातकमलस्थचतुर्मुखाय
क्षीरोदकार्णवनिकेतयशोधराय ।
नानाविचित्रमुकुटाङ्गदभूषणाय
सर्वेश्वराय वरदाय नमो वराय ।।३८।।
विश्वात्मने परमकारणकारणाय
फुल्लारविन्दविमलायतलोचनाय ।
देवेन्द्रदानवपरीक्षितपौरुषाय
योगेश्वराय विजयाय नमो वराय ।।३९।।
लोकायनाय त्रिदशायनाय
ब्रह्मायनायात्मभवायनाय ।
धर्माग्निनायैकजलायनाय
महावराहाय सदा नतोऽस्मि ।।४०।।
अचिन्त्यमव्यक्तमनन्तरूपं
नारायणं कारणमादिदेवम् ।

युगान्तशेषं पुरुषं पुराणं
तं वासुदेवं शरणं प्रपद्ये ।।४१।।
अदृश्यमच्छेद्यमनादिमध्यं
महर्षयो ब्रह्मविदः सुरेशम् ।
वदन्ति यं वै पुरुषं सनातनं
तं वासुदेवं शरणं प्रपद्ये ।।४२।।
यदक्षरं ब्रह्म वदन्ति सर्वगं
निशामयन्मृत्युमुखात्प्रमुच्यते ।
तमीश्वरं तृप्तमनौपमैर्गुणैः
परायणं विष्णुमुपैमि शाश्वतम् ।।४३।।
कार्यं क्रियाकारणमप्रमेयं
हिरण्यनाभं वरपद्मनाभम् ।
महाबलं वेदनिधिं सुरोत्तमं
व्रजामि विष्णुं शरणं जनार्दनम् ।।४४।।
विचित्रकेयूरमहार्हनिष्कं
रत्नोत्तमालङ्कृतसर्वगात्रम् ।
पीताम्बरं काञ्चनभक्तिचित्रं
मालाधरं केशवमभ्युपैमि ।।४५।।
भवोद्भवं वेदविदां वरिष्ठं
योगात्मानं साङ्ख्यविदां वरिष्ठम् ।
आदित्यचन्द्राश्विवसुप्रभावं
प्रभुं प्रपद्ये ऽच्युतमात्मभूतम् ।।४६।।

श्रीवत्साङ्कं महादेवं देवगुह्यमनुत्तमम् ।
प्रपद्ये सूक्ष्ममचलं भक्तानामभयप्रदम् ।।४७।।
प्रभवं सर्वलोकानां निर्गुणं परमेश्वरम् ।
प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम् ।।४८।।

भगवन्तं सुराध्यक्षमक्षरं पुष्करेक्षणम् ।
शरण्यं शरणं भक्त्या प्रपद्ये ब्रह्मणः प्रियम् ।।४९।।
त्रिविक्रमं त्रिलोकेशमाद्यमेकमनामयम् ।
भूतात्मानं महात्मानं प्रपद्ये मधुसूदनम् ।।५०।।
क्षेत्रज्ञं पुरुषं यज्ञं त्रिगुणातीतमव्ययम् ।
नारायणमणीयांसं प्रपद्ये परमेश्वरम् ।।५१।।
एकाय लोकप्रियाय परतः परमात्मने ।
नमः सहस्त्रशिरसे अनन्ताय महात्मने ।।५२।।
वरेण्यमनघं देवमृषयो वेदपारगाः ।
कीर्तयन्ति च यं सर्वे तं प्रपद्ये सनातनम् ।।५३।।
नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद ।
सुब्रह्मण्य नमस्ते ऽस्तु त्राहि मां शरणागतम् ।।५४।।
भक्तिं तस्यानुसञ्चिन्त्य नागस्यामोघसंस्तवम् ।
प्रीतिमानभवद्राजन् शङ्खचक्रगदाधरः ।।५५।।
सान्निध्यं कल्पयामास तस्मिन्सरसि माधवः ।
ग्राहग्रस्तं गजं तं च संगृह्य सलिलाशयात् ।।५६।।
उज्जहाराऽप्रमेयात्मा तरसैवारिसूदनः ।
स्थलस्थं दारयामास ग्राहं चक्रेण माधवः ।।५७।।
मोक्षयामास च गजं पापेभ्यः शरणागतम् ।
स हि देवलशापेन हूहूर्गन्धर्वसत्तमः ।।५८।।
गजत्वमगमत्कृष्णान् मोक्षं प्राप्य दिवं गतः ।
शापाद्विमुक्तः सद्यश्च गजो गन्धर्वतां गतः ।।५९।।
ग्राहो ऽपि यक्षतां यातो यः कृष्णेन निपातितः ।
तस्यापि शापमोक्षो ऽसौ जैगीषव्यकृतो ऽभवत् ।।६०।।

प्रीतिमांस्त्राति गोविन्दः सद्यः संसारसागरात् ।
क्रुद्धोऽपि निघ्नन्देवत्वमरातीनां प्रयच्छति ।।६१।।
तौ च स्वं स्वं वपुः प्राप्य प्रणिपत्य जनार्दनम् ।
गन्धर्वराट् तथा यक्षः परां निर्वृतिमागतौ ।।६२।।
इदं चैव महाबाहो देवदेवोऽभ्यभाषत ।
दृष्ट्वा मुक्तौ गजग्राहौ भगवान् मधुसूदनः ।।६३।।
यो ग्राहं नागराजं च मां चैव प्रणिधानवान् ।
स्मरिष्यति सरश्चेदं युवयोर्मोक्षणं तथा ।।६४।।
गुल्मं कीचकवेणूनां तच्च शैलवनं तथा ।
अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च ।।६५।।
संस्मरिष्यन्ति ये मर्त्याः सम्यक् श्रोष्यन्ति वापि ये ।
न ते दुःस्वप्नपापस्य भोक्तारो सत्परिग्रहात् ।।६६।।
सर्वपापैः प्रमोक्ष्यन्ते कल्याणानां च भागिनः ।
भविष्यन्ति तथा पुण्यां गतिं यास्यन्ति मानवाः।।६७।।
दुःस्वप्नश्च नृणां तेषां सुस्वप्नश्च भविष्यति ।
कौर्म्यं मात्स्यं च वाराहं वामनं तार्क्ष्यमेव च ।।६८।।
नारसिंहं तथा रूपं सृष्टिसंहारकारकम् ।
एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः ।।६९।।
सर्वपापविनिर्मुक्तास्ते यान्ति परमां गतिम् ।
एवमुक्त्वा तु राजेन्द्र देवदेवो जनार्दनः ।।७०।।
अस्पृशद्गजगन्धर्वं ग्राहं यक्षं च तं तदा ।
तेन स्पृष्टावुभौ सद्यो दिव्यमाल्याम्बरान्वितौ।७१।
विमाने ऽभिमते प्राप्य जग्मतुस्त्रिदशालयम् ।
ततो देवपतिः कृष्णो मोचयित्वा गजोत्तमम् ।।७२।।

ऋषिभिः स्तूयमानो हि गुह्यैर्वेदपदाक्षरैः ।
गतः स भगवान् विष्णुर्दुर्विज्ञेयगतिः प्रभुः ॥७३॥
गजेन्द्रमोक्षणं दृष्ट्वा सर्वे चेन्द्रपुरोगमाः ।
ब्रह्माणमग्रतः कृत्वा सर्वे प्राञ्जलयोऽभवन् ॥७४॥
गजेन्द्रमोक्षणं पुण्यं सर्वपापप्रमोचनम् ।
श्रावयेत्प्रातरुत्थाय सर्वपापैः प्रमुच्यते ॥७५॥
श्रद्धया हि कुरुश्रेष्ठ स्मृतेन कथितेन च ।
गजेन्द्रमोक्षणेनेह दीर्घमायुरवाप्नुयात् ॥७६॥
मया ते कथितं दिव्यं पवित्रं पापनाशनम् ।
कीर्तयस्व महाबाहो महादुःस्वप्ननाशनम् ।
कीर्त्यमानं च विप्रेभ्यः शृणु भक्त्या यथोदितम् ॥७७॥
शौनक उवाच– गजेन्द्रमोक्षणं श्रुत्वा कुन्तीपुत्रो युधिष्ठिरः ।
भीष्माद्भागीरथीपुत्रात् पूजयामास केशवम् ॥७८॥
ये चापि पाण्डुपुत्रस्य समीपस्था द्विजोत्तमाः ।
तेऽपि भीष्मस्य पार्श्वस्थं वासुदेवं प्रणेमिरे ॥७९॥

वरं वरेण्यं वरपद्मनाभं
नारायणं ब्रह्मनिधिं सुरेशम् ।
तं देवगुह्यं पुरुषं पुराणं
ववन्दिरे ब्रह्मविदां वरिष्ठम् ॥८०॥

एतत्पुण्यं महाराज नराणां पापकर्मणाम् ।
दुःस्वप्नदर्शने घोरे श्रुत्वा पापाद्विमुच्यते ॥८१॥
भक्तिमान् पुण्डरीकाक्षे गजो दुःखाद्विमोचितः ।
तथा त्वमपि राजेन्द्र प्रपद्य शरणं हरिम् ।
विमुक्तः सर्वपापेभ्यः प्राप्स्यसे परमां गतिम् ॥८२॥
इति श्रीविष्णुधर्मे गजेन्द्रमोक्षणम् ॥

अथानुक्रमणिका

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
ग्रन्थसौकर्यसिद्ध्यर्थमनुक्रमणिकोच्यते ॥१॥

मङ्गलं प्रथमं तत्र श्रीमहाराजवर्णनम् ।
नारायणमुखोद्गीर्णो वेदः सर्वप्रमाणवान् ॥२॥

वेदेन विहितं कर्म दृष्टादृष्टफलं च तत् ।
तत्कर्मप्रतिबन्धस्य दुरितस्योपशान्तये ॥३॥

गणेशपूजनं चेति क्रमः प्रथम ईरितः ।
पुण्याहवाचनं तस्मात् कलशस्थापनक्रमः ॥४॥

मङ्गलप्रार्थनं चैव पुण्याहस्य विधिर्गतः ।
तृतीये मातृपूजा च चतुर्थे वास्तुपूजनम् ॥५॥

पञ्चमे ग्रहशान्तिश्च तत्र पूजाक्रमस्तथा ।
ग्रहाणां बलयस्तद्वत् ग्रहसूक्तक्रमस्तथा ॥६॥

अग्निस्थापनमत्रैव ग्रहहोमस्ततः परम् ।
ग्रहदानाभिषेकादि ग्रहप्रकरणं गतम् ॥७॥

तुलादानप्रकरणे तुलानिर्माणमीरितम् ।
षोडशारादिभद्राणां पूजा तत्र क्रमस्ततः ॥८॥

दानरूपं दानपात्रं दानदेवविनिर्णयः ।
नानाद्रव्यादिमन्त्राणां कथनं तदनन्तरम् ॥९॥

गोदानविधिरत्रैव हरिवंशविधिस्तथा ।
कस्य नूनं पावमानं तत्र सूक्तद्वयं गतम् ॥१०॥

पुरश्चर्याक्रमः प्रोक्तः कूर्मचक्रविनिर्णयः ।
पुरश्चरणविस्तारस्तत्प्रयोगस्ततः स्मृतः ॥११॥

भूतशुद्धिस्ततःप्राणप्रतिष्ठा मातृका तथा ।
पीठपूजार्थपूजा च आसनाद्युपचारकम् ।।१२।।
ततोऽन्यपटले चैव सर्वतोभद्रयुग्मकम् ।
नवनाभं च पञ्चाब्जं कुलाकुलमतः परम् ।।१३।।
सिद्धसाध्यसुसिद्धारिचक्रं तस्मादृणाभिधम् ।
वर्गचक्रं राशिचक्रं भचक्रं गणचक्रकम् ।।१४।।
अन्त्यं चाकडमं चैव तन्त्रप्रकरणं गतम् ।
श्रौतप्रकरणे तत्र पौर्णमासेष्टिपद्धतिः ।।१५।।
दर्शेष्टिकथनं चैव तर्पणस्य क्रमस्तथा ।
निरग्निवैश्वदेवश्च नित्यश्राद्धं ततः स्मृतम् ।।१६।।
रुद्रमन्त्रविभागश्च पुरश्चर्याक्रमस्ततः ।
पञ्चाङ्गरुद्रन्यासश्च रुद्रपूजाक्रमस्तथा ।।१७।।
सन्ध्याप्रयोगो गायत्र्या द्विधार्थः कथितः शुभः ।
पूजाप्रयोगो गायत्र्या न्यासमुद्रादिकं तथा ।।१८।।
अथ सन्ध्याकालमानं जपदेशविनिर्णयः ।
जपस्वरूपार्थ इति सन्ध्याप्रकरणं गतम् ।।१९।।
विभूतेस्तिलकस्यापि भोजनस्य च निर्णयः ।
शयनस्य विधानं च दारोपगम एव च ।।२०।।
ततो रक्षाविधानं च श्रावणीनिर्णये विधिः ।
अथ प्रतिष्ठा देवानामधिवासनपूर्विका ।।२१।।
अग्निःसप्तिमितीहोक्तं सूक्तमृग्वेदगोचरम् ।
तत्त्वादिन्यासकथने श्रीकण्ठादिप्रकीर्तनम् ।।२२।।
केशवादिस्ततो न्यासो होमकार्यं ततः परम् ।
स्थापनं देवमूर्तीनां चतुर्थीकर्म चोत्तरम् ।।२३।।

ततो जलाशयविधिर्ब्राह्मणानां निमन्त्रणम् ।
अत्रैव वारुणीदीक्षा ततः कुण्डस्य संस्कृतिः ।।२४।।
तर्पणं वारुणं स्नानं प्रतिष्ठाग्रन्थ ईरितः ।
प्रेतप्रकरणे तावद् दाहादेश्च विनिर्णयः ।।२५।।
चितायां पिण्डदानादिदशपिण्डविधिस्ततः ।
दीपपानीयपुष्पाणां त्रिकाष्ठोपरिदानतः ।।२६।।
काकेभ्यो बलिदानं च पाथेयश्राद्धपद्धतिः ।
आशौचे नियमास्तत्र अस्थिसञ्चयनक्रमः ।।२७।।
अस्थिक्षेपविधानं च दशाहेतिक्रियाक्रमः ।
एकादशाहकृत्ये तु षोडशश्राद्धपद्धतिः ।।२८।।
सपिण्डीकरणं तस्मात् पुनः पाथेयपद्धतिः ।
विनायकस्य पूजा च एकोद्दिष्टं ततः परम् ।।२९।।
अन्वारोहविधिश्चैव प्रथमाब्दे निषिद्धकम् ।
पालाशप्रकृतिस्तस्मात्पञ्चकादिमृते विधिः ।।३०।।
रजस्वलाया मरणे सूतिकामरणे तथा ।
गर्भिण्यादिमृते चैव नारायणबलिस्तथा ।।३१।।
अथाशौचप्रकरणे शिशोर्मरणनिश्चयः ।
ततो ह्यनुपनीतस्य पुत्रस्य मरणे तथा ।।३२।।
कन्याया मरणे चैव उपनीतमृते तथा ।।
सोदरादेस्तथाऽऽशौचमसगोत्रमृते तथा ।।३३।।
अतिक्रान्ताशौचमतो देशान्तरमृते तथा ।।
शवनिर्हरणाऽऽशौचं शवानुगमने तथा ।।३४।।
अतीतस्य तथा मृत्युविशेषे शुद्धिनिर्णयः ।
ततः सङ्करजातीनामाशौचं परिकीर्तितम् ।।३५।।

अनौरसादिपुत्राणां   दासादीनामशौचकम् ।
प्रवृत्ताशौचमध्ये तु   अन्याशौचविनिर्णयः ।।३६।।
अथाशौचनिषेधाय   नियमाश्चापि कीर्तिताः ।
एवं समाप्तं पूर्वार्धमुत्तरार्धमुदीर्यते ।।३७।।
गोत्राणां प्रवराणां च   विवाहस्य विधिस्ततः ।
कन्यादानविधौ तत्र   महासङ्कल्प ईरितः ।।३८।।
चतुर्थीपद्धतिश्चैव   गर्भाधानं ततः परम् ।
अथ पुंसवनं तस्मात्   सीमन्तोन्नयनं तथा ।।३९।।
जातकर्म ततः प्रोक्तं   षष्ठिकापूजनं ततः ।।४०।।
नामकर्म ततश्चैव   निष्क्रमस्य विधिस्ततः ।
ततो ऽन्नप्राशनं चूडा   कर्णवेधस्तथैव च ।।४१।।
औपनायनिकं कर्म   वेदारम्भस्तथैव च ।
समावर्तनमित्येतत्   संस्कारे कथितः क्रमः ।।४२।।
वर्षकृत्ये तु चैत्रस्य   वैशाखस्य च निर्णयः ।
ज्येष्ठाषाढविधिश्चैव   श्रावणाश्वयुजोस्तथा ।।४३।।
कार्तिकस्य च मार्गस्य   पौषस्यापि विनिर्णयः ।
माघफाल्गुनयोश्चेति   वर्षकृत्यमुदीरितम् ।।४४।।
प्रकीर्णकं च मन्त्रार्थः   शान्तिप्रकरणं तथा ।
रजोदर्शनशान्तिश्च   शान्तिर्वैधव्ययोगकः ।।४५।।
उक्तश्चार्कविवाहोऽथ   गोमुखप्रसवस्तथा ।
तथा कृष्णचतुर्दश्याः   सिनीवाल्याश्च शान्तिकम् ।।४६।।
शान्तिः कुह्वाश्च दर्शस्य   मूलाश्लेषविधिस्ततः ।
ज्येष्ठाशान्तिः ततः प्रोक्ता नक्षत्रैक्ये च शान्तिकम् ।।४७।।
नक्षत्राणां तिथीनां च   गण्डान्ते शान्तिकं तथा ।
उत्तरादौ दिनस्यापि   पक्षे विषघटीषु च ।।४८।।

शान्तिर्ग्रहणजेऽप्युक्ता यमलोत्पत्तिशान्तिकम् ।
शान्तिः सदन्तजनने त्रिकशान्तिस्ततः परम् ॥४९॥
सिंहादिषु प्रसूतस्य गवादेः शान्तयः परम् ।
दिनस्य शाब्दभेदेन बालशान्तिस्ततः परम् ॥५०॥
रोगर्क्षतिथिवारादिशान्तयो ज्वरशान्तयः ।
पञ्चकेषु मृते शान्तिस्त्रिपुष्करमृते ततः ॥५१॥
त्रिपादर्क्षमृते शान्तिर्गजशान्तिस्ततः परम् ।
अश्वगोपीडने शान्तिः काकमैथुनदर्शने ॥५२॥
वायसान्तः प्रवेशे च पल्लीशरटशान्तिकम् ।
कपोतस्य ततः शान्तिः कृत्याशान्तिस्ततः परम् ॥५३॥
विद्युद्धते तथा शान्तिरुत्पातानां च लक्षणम् ।
उत्पातकालशान्तिश्च शान्तिः साधारणी ततः ॥५४॥
देवताग्न्योर्वृक्षवृष्टिर्जलानां च विकारके ।
उपस्करे विकारे च मृगपक्षिविकारके ॥५५॥
अनिमित्ते गृहादेश्च पाते शान्तिस्ततः परम् ।
नानोत्पातेषु शान्तिश्च मृतजीवनशान्तिकम् ॥५६॥
उक्ता शान्तिरकाले च हस्तिनां मद आगते ।
हस्तिन्याश्च तथा धेनोर्मदशान्तिस्ततः परम् ॥५७॥
शान्तिर्भङ्गे च दुष्टानां भङ्गे लिङ्गादिकस्य च ।
दुःस्वप्नदर्शने शान्तिः पर्जन्याभावशान्तिकम् ॥५८॥
आद्यो राजाभिषेकश्च प्रतिवर्षाभिषेचनम् ।
सिंहासनच्छत्रविधिर्दुर्गस्य विधिरीरितः ॥५९॥
गजेन्द्रमोक्षणं प्रोक्तं ततोऽनुक्रमणं स्मृतम् ।
ग्रन्थाननेकानवलोक्य सम्यङ्

निरूपितं कर्मविचारतत्त्वम् ।
कृपा विधेया कृतिभिर्ममोपरि
पितेव पुत्रस्य सखेव सख्युः ।।६०।।

सिन्धोरुद्धृतरत्नजातिनिकरैर्विन्यासदक्षो यथा
सच्चित्राभरणानि साधु रचयन् शिल्पीजनः पूज्यते ।
नानाधर्मनिबन्धसङ्ग्रहकृतः सद्भिः प्रयोगैस्तथा
गीर्वाणादिमयुद्धविक्रमनृपो रत्नावलीकारकः ।।६१।।

ग्रन्थाः किं जगतीतले बहुविधाः सत्कर्मसंपादकाः
प्रामाण्यैरुपशोभिता इति न नोद्योगः कृतो वै मया ।
श्रौतस्मार्तधुरन्धरे मम निबन्धे चेद्विशेषः क्वचि–
द्विद्वद्भिः प्रतिगृह्यतामयमहो रत्नावलीसङ्ग्रहः ।।६२।।

शाके वेदधनञ्जयाद्रिवसुधा (१७३४) युक्ते सिते चाश्विने
द्वादश्यां शनिवासरे शतभिषङ्नक्षत्रसद्योगिनि ।
वृद्धौ योगवरे स्वकान्तिनगरे रत्नावलीनामको
गीर्वाणादिमयुद्धविक्रमनृपेणायं निबन्धः कृतः ।।६३।।

विद्युद्भासवती घनाम्बरचया प्रावृट् तथा कामिनी
या चन्द्रायुधसत्कटाक्षलसिता गम्येव रत्नावली ।
वृत्ताकारपयोधरातिविमला नीलाम्बुदाऽऽलम्बिनी
सा विद्या सकलात्मिका नृपशिरो गीर्वाणयुद्धात्मिका ।।६४।।

इति निगदितमिष्टं शास्त्रदृष्टं विधानं
गुरुबुधपदपद्माराधनादेव लभ्यम् ।
कविकुलजनवन्द्यं श्रीमहाराजकान्ती–
श्वरकविवरविद्वद्भूषणेनैव दत्तम् ।।६५।।

इति श्रीगिरिराजचक्रचूडामणिनररानायणेत्यादिविविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजश्रीश्रीश्रीश्रीश्रीगीर्वाणयुद्धविक्रमसाहदेवकृतायां सत्कर्मरत्नावल्यां प्रकीर्णरत्नं नाम सप्तदशं प्रकरणम् ।

श्रीमहाराजगीर्वाणयुद्धविक्रमवर्मणा ।
कृता रत्नावली पूर्णा श्रीविष्णोश्चरणार्पिता ॥
समाप्तश्चायं धर्मशास्त्रनिबन्धग्रन्थः ।

॥ शुभम् ॥

अथ परिशिष्टम्[1]

(पूर्वार्धको ७० पृष्ठ देखि ७५ पृष्ठ सम्म उल्लेख गरिएका ग्रहादिदेवताहरूका जपसूक्तहरू यसप्रकार छन्)

नवग्रहाणां जपसूक्तानि

तत्रादौ सूर्यस्य–

ॐ बिभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो ऽ अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ।।१।।
उदुत्यञ्जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ।।२।। येना
पावक चक्षसा भुरण्यन्तञ्जनाँ२।।ऽ अनु । त्वं वरुण पश्यसि ।।३।।
दैव्यावध्वर्यू ऽआगत ꣳ रथेन सूर्यत्वचा । मध्वा यज्ञ ꣳ समञ्जाथे । तं
प्रत्नथायं वेनश्चित्रं देवानाम् ।।४।। तं प्रत्नथा पूर्वथा विश्वथेमथा
ज्येष्ठतातिं बर्हिषदꣳ॰ स्वर्विदम् । प्रतीचीनं वृजनन्दोहसे धुनिमाशु–

---

[1] १. प्रकाशित यस सत्कर्मरत्नावली ग्रन्थको मूलमा वैदिक मन्त्रहरू धेरै परेका छन् र साथै धेरै धेरै मन्त्रका लम्बे लम्बे सूक्तहरू पनि निकै नै परेका छन् । ती मन्त्र र सूक्तहरू ग्रन्थकारले पूरा नलेखेर केवल मन्त्रको प्रतीक र सूक्तको नाम मात्र उच्चारण गरेर छोडिदिएका छन् । त्यस्ता अपूरा मन्त्रहरू जुन जुन पृष्ठमा परेका छन् सम्भव भए सम्म अर्थात् थोरै मन्त्र भएका ठाउँमा तिनै तिनै पृष्ठमा टिप्पणीमा राखेर मन्त्रहरू पूरा गरिएका छन् । धेरै धेरै मन्त्रहरू लेख्नु पर्ने ठाउँमा टिप्पणीमा राख्न असम्भव भएकोले पूर्वार्ध तथा उत्तरार्ध दुवैमा परेका मन्त्रहरू यसरी परिशिष्टको संज्ञा दिएर पूरा गरिएका छन् ।

ञ्जयन्तमनु यासु वर्धसे ।।५।। अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाꣳ सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभीरिहन्ति ।।६।। चित्रं देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवीऽ अन्तरिक्षꣳ सूर्यऽ आतमा जगतस्तस्थुषश्च ।।७।। आ नऽ इडाभिर्विदथे सुशस्ति विश्वानरः सविता देवऽ एतु । अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्वे मनीषा ।।८।। यदद्य कच्च वृत्रहन्नुदगाऽ अभि सूर्य । सर्वं तदिन्द्र ते वशे ।।९।। तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ।।१०।। तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सञ्जभार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।।११।। तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ।।१२।। बण्महाँ२।। असि सूर्य बडादित्य महाँ२।। असि । महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२।। असि ।।१३।। बट्सूर्य श्रवशा महाँ२।। असि सत्रा देव महाँ२।। असि । मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।।१४।। श्रायन्तऽ इव सूर्यं विश्वेदिन्द्रस्य भक्षत । वसूनि जाते जनमानऽ ओजसा प्रति भागं न दीधिम ।।१५।। अद्या देवाऽ उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽ उत द्यौः ।।१६।। आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।१७।।

सोमस्य-

ॐ अषाढं युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां वृजनस्य गोपाम् । भरेषुजाꣳ सुक्षितिꣳ सुश्रवसञ्जयन्तं त्वामनुमदेम सोम ।।१।। सोमो धेनुꣳ सोमोऽ अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति । सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ।।२।। त्वमिमाऽ

ओषधीः सोम विश्वास्त्वमपोऽ अजनयस्त्वं गाः । त्वमाततन्थोर्वन्तरिक्षं त्वञ्ज्योतिषा वि तमो ववर्थ ।।३।। देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभियुध्य । मा त्वातनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सागविष्टौ ।।४।।

भौमस्य–

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽ अयम् । अपाꣳ रेताꣳसि जिन्वति ।।

बुधस्य–

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयञ्च । अस्मिन्त्सधस्थेऽ अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ।।

बृहस्पतेः–

ॐ बृहस्पतेऽ अति यदर्योऽ अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽ ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् । उपयामगृहीतोसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ।।

शुक्रस्य–

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोमृतं मधु ।।

शनेः–

ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ।।

राहोः-

ॐ कया नश्चित्रऽ आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

केतोः-

ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्याऽ अपेशसे । समुषद्भिरजायथाः ॥

अथाधिदेवानाम् ।

तत्रादौ ईश्वरस्य-

ॐ नमस्ते रुद्र मन्यव ऽ उतो त ऽइषवे नमः । बाहुभ्यामुत ते नमः ॥१॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥२॥ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषञ्जगत् ॥३॥ शिवेन वचसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना ऽ असत् ॥४॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुव ॥५॥ असौ यस्ताम्रोऽ अरुणऽ उत बभ्रुः सुमङ्गलः । ये चैनꣳ रुद्राऽ अभितो दिक्षु श्रिताः सहस्रशोवैषाꣳ हेडऽ ईमहे ॥६॥ असौ योवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपाऽ अदृश्रन्नदृश्रन्नुदहार्यः सदृष्टो मृडयाति नः ॥७॥ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो येऽ अस्य सत्वानोहं तेभ्योकरं नमः ॥८॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्तऽ इषवः परा ता भगवो वप ॥९॥ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ उत । अनेशन्नस्य याऽ इषवऽ आभुरस्य निष-

ङ्गधिः ।।१०।। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ।।११।। परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो यऽ इषुधिस्तवारेऽ अस्मन्निधेहि तम् ।।१२।। अवतत्यधनुष्ट्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।।१३।। नमस्तऽ आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।१४।। मा नो महान्तमुत मा नोऽ अर्भकं मानऽ उक्षन्तमुत मा नऽ उक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।१५।। मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः । मा नो वीरान्रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।।१६।। नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो बभ्लुशाय ।।१७।। नमो बभ्लुशाय व्याधिनेन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमो नमो रोहिताय ।।१८।। नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम ऽ उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नायतया ।१९।।। नमः कृत्स्नायतया धावते सत्त्वनां पतये नमो नमः सहमानाय निव्याधिन ऽ आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमो वञ्चते ।।२०।। नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण ऽ इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमो नमऽ उष्णीषिणे ।।२१।। नमऽ उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमऽ इषुमद्भ्यो धन्वायिभ्यश्च वो नमो

नमऽ आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽ आयच्छद्भ्योस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ।।२२।। नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः ।।२३।। नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोश्वेभ्योश्वपतिभ्यश्च वो नमो नमऽ आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नमऽ उगणाभ्यस्तृꣳ हतीभ्यश्च वो नमो नमो गणेभ्यः ।।२४।। नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ।।२५।। नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽ अरथेभ्यश्च वो नमो नमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽ अर्भकेभ्यश्च वो नमः ।।२६।। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ।।२७।। नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने ।।२८।। नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय ।।२९।। नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोग्र्याय च प्रथमाय च नमऽ आशवे ।।३०।। नमऽ आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽ ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ।।३१।। नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः सोभ्याय ।।३२।। नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नमऽ उर्वर्याय च खल्याय च नमो वन्याय

।।३३।। नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नमऽ आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ।।३४।।नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ।।३५।। नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय ।।३६।। नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च नमः कूप्याय ।।३७।। नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो वात्याय ।।३८।। नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे ।।३९।। नमः शङ्गवे च पशुपतये च नमऽ उग्राय च भीमाय च नमोग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।।४०।। नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।।४१।। नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय ।।४२।। नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमऽ इरिण्याय च प्रपथ्याय च नमो व्रज्याय ।।४३।। नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय ।।४४।। नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽ ऊर्व्याय च सूर्व्याय च नमः पर्णाय ।।४५।। नमः पर्णाय च पर्णशदाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽ इषुकृद्भ्यो धनुष्कृ-

द्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः ।।४६।। द्रापेऽ अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानाम्मेषां पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत् ।।४७।। इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽ अस्मिन्ननातुरम् ।।४८।। या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृड जीवसे ।।४९।। परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ।।५०।। मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्षऽ आयुधं निधाय कृत्तिं वसानऽ आचर पिनाकं बिभ्रदागहि ।।५१।। विकिरिद्र विलोहित नमस्तेऽ अस्तु भगवः । यास्ते सहस्रꣳ हेतयोन्य मस्मन्निवपन्तु ताः ।।५२।। सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ।।५३।। असङ्ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम् । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५४।। अस्मिन्महत्यर्णवेन्तरिक्षे भवाऽ अधि । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५५।। नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽ उपश्रिताः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५६।। नीलग्रीवाः शितिकण्ठाः शर्वाऽ अधः क्षमाचराः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५७।। ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५८।। ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५९।। ये पथां पथिरक्षयऽ ऐलबृदाऽ आयुर्युधः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६०।। ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६१।। येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सहजयोजनेव धन्वानि तन्मसि ।।६२।। यऽ एतावन्तश्च भूयाꣳ सश्चदिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेव

धन्वानि तन्मसि ।।६३।। नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६४।। नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां वातऽ इषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६५।। नमोस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६६।।

उमायाः–

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रं पार्श्व नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ।।

कन्दस्य–

ॐ यदक्रन्दः प्रथमं जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यं महि जातं तेऽ अर्वन् ।।

विष्णोः–

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ।।१।। पुरुषऽ एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।२।। एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।३।। त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशनेऽ अभि ।।४।। ततो विराडजायत विराजोऽ अधि-

पूरुषः । स जातोऽ अत्यरिच्यत पश्चाद्भूमिमथो पुरः ।।५।। तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।।६।। तस्माद्यज्ञात्सर्वहुतऽ ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।।७।। तस्मादश्वाऽ अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ।।८।। तं यज्ञं बर्हिषि प्रौक्षन् पुरुषञ्जातमग्रतः । तेन देवाऽ अयजन्त साध्याऽ ऋषयश्च ये ।।९।। यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किं बाहू किमूरू पादाऽ उच्येते ।।१०।। ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽ अजायत ।।११।। चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।१२।। नाभ्याऽ आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२।। अकल्पयन् ।१३।।। यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोस्यासीदाज्यं ग्रीष्मऽ इध्मः शरद्धविः ।।१४।। सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाऽ अबध्नन्पुरुषं पशुम् ।।१५।। यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।१६।।

ब्रह्मणः-

ॐ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽ इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।।

इन्द्रस्य-

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभण-

श्चर्षणीनाम् । सङ्क्रन्दनोनिमिषऽ एकवीरः शतꣳ सेनाऽ अजयत्साकमिन्द्रः ॥१॥ सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नरऽ इषुहस्तेन वृष्णा ॥२॥ सऽ इषुहस्तैः स निषङ्गिभिर्वशी सꣳ स्रष्टा सयुधऽ इन्द्रो गणेन । सꣳ सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥ बृहस्पते परिदीया रथेन रक्षोहामित्राँ२॥ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥४॥ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमानऽ उग्रः । अभिवीरोऽ अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५॥ गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाताऽअनु वीरयध्वमिन्द्रꣳ सखायोऽ अनु सꣳ रभध्वम् ॥६॥ अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योस्माकꣳ सेनाऽ अवतु प्र युत्सु ॥७॥ इन्द्रऽ आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽ एतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञऽ आदित्यानां मरुताꣳ शर्धऽ उग्रम् । महामनसां भुवनच्यवानां घोषो देवानाञ्जयतामुदस्थात् ॥९॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानाञ्जयतां यन्तु घोषाः ॥१०॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं याऽ इषवस्ता जयन्तु । अस्माकं वीराऽ उत्तरे भवन्त्वस्माँ २॥ उ देवाऽ अवता हवेषु ॥११॥ अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥

यमस्य—

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥

कालस्य-

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽ उन्नयामि । स मापोऽ
अद्भिरग्मत समोषधीभिरोषधीः ।।

चित्रगुप्तस्य-

ॐ चित्रावसो स्वति ते पारमशीय ।।

अग्नेः-

ॐ अस्या जरासो दमामरित्राऽ अर्चद्धूमासोऽ अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ।।१।। हरयो
धूमकेतवो वातजूताऽ उपद्यवि । यतन्ते वृथगग्नयः ।।२।। यजा नो
मित्रावरुणा यजा देवाँ२।। ऋतं बृहत् । अग्ने यक्षि स्वन्दमम् ।।३।। युक्ष्वा
हि देव हूतमाँ२।। अश्वाँऽ अग्ने रथीरिव । नि होता पूर्व्यः सदः ।।४।।
द्वे विरूपे चरतः स्वर्थेऽ अन्यान्या वत्समुपधापयेते । हरिरन्यस्यां भवति
स्वधावाञ्छुक्रोऽ अन्यस्यां ददृशे सुवर्चाः ।।५।। अयमिह प्रथमो धायि
धातृभिर्होता यजिष्ठोऽ अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु
चित्रं विभ्वं विशेविशे ।।६।। त्रीणि शता त्रीसहस्राण्यग्निं त्रिꣳशच्च
देवा नव चासपर्यन् । औक्षन्घृतैरस्तृणन्बर्हिरस्माऽ आदिद्धोतारं न्यसा-
दयन्त ।।७।। मूर्धानन्दिवोऽ अरतिं पृथिव्या वैश्वानरमृतऽ आजात-
मग्निम् । कविꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त
देवाः ।।८।। अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्रऽ
आहुतः ।।९।। विश्वेभिः सोम्यं मध्वग्नऽ इन्द्रेण वायुना । पिबा मित्रस्य
धामभिः ।।१०।। आयदिषे नृपतिं तेजऽ आनट् शुचि रेतो निषिक्तं
द्यौरभीके । अग्निः शर्धमनवद्यं युवानꣳ स्वाध्यं जनयत्सूदयच्च ।।११।।
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु । सञ्जास्पत्यꣳ
सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ।।१२।। त्वाꣳ हि

मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने । इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ।।१३।। त्वेऽ अग्ने स्वाहुत प्रियासः सन्तु सूरयः । यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ।।१४।। श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः । आसीदन्तु बर्हिषि मित्रोऽ अर्यमा प्रातर्यावाणोऽ अध्वरम् ।।१५।। विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् । अग्निर्देवानामवऽ आवृणानः सुमृडीको भवतु जातवेदाः ।।१६।। महोऽ अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये । श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽ अद्या वृणी महे ।।१७।।

अपाम्–

ॐ आपो हि ष्ठा मयोभुवस्ता नऽ ऊर्जे दधातन। महे रणाय चक्षसे ।।१।। यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।।२।। तस्माऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ।।३।।

भूमेः–

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।।

विष्णोः–

ॐ सहस्रशीर्षा...सन्ति देवाः ।(शुक्लयजुः ३१ अध्याय १-१६ मन्त्राः)

(परिशिष्टको ६ पृष्ठमा छ)

इन्द्रस्य-

ॐ आशुः शिशानः . . . तमसा सचन्ताम् । (शु. य. १७ अ. ३३-४४ द्वादशमन्त्राः प्राग्वत् ।)

(परिशिष्टको १० पृष्टमा छ ।)

इन्द्राण्याः-

ॐ अदित्यै रास्नासीन्द्राण्या ऽ उष्णीषः । पूषासि घर्माय दीष्व ।

प्रजापतेः-

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः परिरेकऽ आसीत् । स दाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम ।।१।। उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृहणाम्येष ते योनिः सूर्यस्ते महिमा । यस्तेहन्त्संवत्सरे महिमा संबभूव यस्ते वायावन्तरिक्षे महिमा संबभूव यस्ते दिवि सूर्ये महिमा संबभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ।।२।। यः प्राणतो निमिषतो महित्वैकऽ इद्राजा जगतो बभूव । यऽ ईशेऽ अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ।।३।। उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा यस्ते रात्रौ संवत्सरे महिमा संबभूव यस्ते पृथिव्यामग्नौ महिमा संबभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा संबभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ।।४।।

सर्पस्य-

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये ऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।१।। याऽ इषवो यातुधानानां ये वा वनस्पतीं १

रनु । ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ।।२।। ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ।।३।।

ब्रह्मणः–

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः । स बुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।।

विनायकस्य–

ॐ गणनान्त्वा गणपति ꣳ हवामहे प्रियाणान्त्वा प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपति ꣳ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ।।

दुर्गायाः–

ॐ अम्बे ऽ अम्बिकेम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।।

वायोः–

ॐ नियुत्वान्वायवागह्यय ꣳ शुक्रो ऽ अयामि ते । गन्तासि सुन्वतो गृहम् ।।१।। वायो शुक्रोऽअयामि ते मध्वोऽअग्रं दिविष्टिषु । आयाहि सोमपीतये स्पार्हो देव नियुत्वता ।।२।। वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ।।३।। वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ।।४।। एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये वि ꣳ शती च । तिसृभिश्च वहसे त्रि ꣳ शता च नियुद्भिर्वायविह ता विमुञ्च ।।५।। तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवा ꣳ स्यावृणीमहे ।।६।।

आकाशस्य-

ॐ ऊर्ध्वा ऽ अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोची ꣳ ष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥१॥ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो ऽ अनक्तु मध्वा घृतेन ॥२॥ मध्वा यज्ञं नक्षसे प्रीणानो नराश ꣳ सोऽ अग्ने । सुकृद्देवः सविता विश्ववारः ॥३॥ अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्नि ꣳ स्रुचोऽ अध्वरेषु प्रयत्सु ॥४॥ स यक्षदस्य महिमानमग्नेः सऽ ईं मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥५॥ द्वारो देवीरन्वस्य विश्वे व्रतादन्तेऽ अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥६॥ तेऽ अस्य योषणे दिव्ये न योनाऽ उषासानक्ता । इमं यज्ञमवतामध्वरं नः ॥७॥ दैव्या होताराऽ ऊर्ध्वमध्वरं नोग्नेर्जिह्वामभिगृणीतम् । कृणुतं नः स्विष्टिम् ॥८॥ तिस्रो देवीर्बर्हिरेद ꣳ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥९॥ तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । रायस्पोषं विष्यतु नाभिमस्मे ॥१०॥ वनस्पतेवसृजा रराणस्त्मना देवेषु । अग्निर्हव्य ꣳ शमिता सूदयाति ॥११॥ अग्ने स्वाहा कृणुहि जातवेद ऽ इन्द्राय हव्यम् । विश्वेदेवा हविरिदं जुषन्ताम् ॥१२॥

अश्विनोः-

ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोस्यश्विभ्यां त्वैषते योनिर्माध्वीभ्यां त्वा

अथ दिक्पालानाम् ॥ तत्र-

इन्द्रस्य-

ॐ आशुः शिशानः .... तमसा सचन्ताम् । १२ मन्त्राः प्राग्वत् । (शु. य. १७ अ. ३३-४१ म.)

(परिशिष्टको १० पृष्ठमा छ)

अग्नेः–

ॐ अस्या जरासः · · · · · अद्या वृणीमहे । १७ मन्त्राः प्राग्वत् । (शुः यः ३३ अः १–१७ मः)

(परिशिष्टको १२ पृष्ठमा छ ।)

यमस्य–

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ।।

निर्ऋतेः–

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सात ऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।१।। नमः सुते निर्ऋते तिग्मतेजोयस्मयं विचृता बन्धमेतम् । यमेन त्वं यम्या संविदानोत्तमे नाके ऽ अधिरोहयैनम् ।।२।। यस्यास्ते घोरऽ आसन्जुहोम्येषां बन्धानामवसर्जनाय । यां त्वाजनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः ।।३।।

वरुणस्य–

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ।।१।। तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुश ꣳ स मा नऽ आयुः प्रमोषीः ।।२।।

वायोः–

ॐ नियुत्वान्वायो · · · · अवा ꣳ स्यावृणीमहे । ६ मन्त्राः प्राग्वत् । (शु. य. २७ अ. २९–३४)

(परिशिष्टको १५ पृष्ठमा छ ।)

सोमस्य-

ॐ अषाढं युत्सु० · · · साग्विष्टौ ।। ४ मन्त्राः प्राग्वत् । (शु. य. ३४ अ. २०-२३ म.)

(परिशिष्टको २ पृष्ठमा छ ।)

ईशानस्य-

ॐ नमस्ते रुद्र० ··· जम्भे दध्मः ।। ६६ मन्त्राः प्राग्वत् । (शु. य. १६ अ. १-६६ म.)

(परिशिष्टको ४ पृष्टमा छ ।)

सर्पस्य-

ॐ नमोस्तु सर्पेभ्यः०····सर्पेभ्यो नमः ।। ३ मन्त्राः प्राग्वत् । (शु. य. १३ अ. ६-८ म.)

(परिशिष्टको १४ पृष्टमा छ ।)

ब्रह्मणः-

ॐ ब्रह्मजज्ञानम्० ।। प्राग्वत् ।

(परिशिष्टको १५ पृष्ठमा छ ।)

ध्रुवाद्यष्टवसूनाम्-

ॐ सुगावो देवाः सदना ऽ अकर्मय ऽ आजग्मेद ꣳ सवनञ्जुषाणाः ।
भरमाणा वहमाना हवी ꣳ ष्यस्मे धत्त वसवो वसूनि स्वाहा ।।

धात्रादिद्वादशादित्यानाम्-

ॐ इमा गिर ऽ आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो ऽ अर्यमा भगो नस्तुविजातो वरुणो दक्षो ऽ अ ꣳ शः ।।

वीरभद्राद्येकादशरुद्राणाम्–

ॐ नमस्ते रुद्र……जम्भे दध्मः ।। ६६ मन्त्राः प्राग्वत् ।
(शु. य. १६ अ. १–६६ म.)
(परिशिष्टको ४ पृष्टमा छ ।)

गौर्यादिषोडशमातृणाम्–

ॐ गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभुवुषि सहस्राक्षरा परमे व्योमन् ।।

आवहादिसप्तमरुताम्–

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च । शुक्रश्च ऋतपाश्चात्यꣳ हाः ।।१।। ईदृङ् चान्या दृङ्च स दृङ्च प्रतिसदृङ्च । मितश्च संमितश्च सभराः ।।२।। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ।।३।। ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरे ऽ अमित्रश्च गणः ।।४।। ईदृक्षास ऽ एतादृक्षास ऽ ऊषुणः सदृक्षासः प्रतिसदृक्षास ऽ एतन । मितासश्च संमितासो नोऽ अद्य सभरसो मरुतो यज्ञे ऽ अस्मिन् ।।५।। स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ।।६।।

विनायकस्य– ॐ गणानां त्वा० । प्राग्वत् ।
(परिशिष्टको १५ पृष्ठमा छ ।)

ब्रह्मणः– ॐ आ ब्रह्मन्० । प्राग्वत् ।
(परिशिष्टको १० पृष्ठमा छ)

विष्णोः– ॐ सहस्रशीर्षा०…… सन्तिदेवाः । प्राग्वत् ।
(परिशिष्टको ९ पृष्ठमा छ)

रुद्रस्य– ॐ नमस्ते रुद्र०…… जम्भे दध्मः । प्राग्वत् ।
(परिशिष्टको ४ पृष्ठमा छ ।)

अर्कस्य- ॐ बिभ्राड् बृहत्०……भुवनानि पश्यन् । प्रागवत् ।
(परिशिष्टको १ पृष्टमा छ ।)

वनस्पतेः-

ॐ वनस्पते वीड्वङ्गोहि भूया ऽ अस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धोऽ असि वीडयस्वास्थाता ते जयतु जेत्वानि ।।

इति जपसूक्तानि ।।

वारुणमण्डलस्थदेवानां मन्त्राः ।।

(पूर्वार्धको १२५ पृष्ठमा उल्लेख भएका वारुणमण्डलका देवताका मन्त्रहरू यसप्रकार छन्)

ब्रह्मणः-

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । स बुध्न्याऽ उपमा ऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः।।

कुवेरस्य-

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ।।

ईशानस्य-

ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।।

इन्द्रस्य-

ॐ त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमिन्द्रम् । ह्वयामि शक्रं पुरुहूतमिन्द्र ꣳ स्वस्ति नो मघवा धात्विन्द्रः ।।

अग्नेः-

ॐ अग्निन्दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँऽ आसादयादिह ।।

यमस्य–

ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे । देवस्त्वा सविता मध्वानक्तु पृथिव्याः स ꣳ स्पृशस्पाहि । अर्चिरसि शोचिरसि तपोसि ।।

निर्ऋतेः–

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु ।।

वरुणस्य–

ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳ समानऽ आयुः प्रमोषीः ।।

वायोः–

ॐ वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ।।

वीरभद्राद्येकादशरुद्राणाम्–

ॐ यऽ एतावन्तश्च भूयाꣳ सश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।

धात्रादिद्वादशादित्यानाम्–

ॐ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आवोर्वाची सुमतिर्ववृत्याद ꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा।।

अश्विनोः–

ॐ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ।।

विश्वेदेवानाम्–

ॐ विश्वेदेवासऽ आगत शृणुता मऽ इमꣳ हवम् । एदं बर्हिर्निषीदत ।।

सप्तयक्षाणाम्–

ॐ अभि त्यन्देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभिप्रियं मतिं कविम् । ऊर्ध्वा यस्यामतिर्भाऽ अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः । प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजास्त्वमनुप्राणिहि ।।

भूतनागानाम्–

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ।।

गन्धर्वाप्सरसाम्–

ॐ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं प्रयुग्भ्यऽ उन्मत्तꣳ सर्पदेवजनेभ्योप्रतिपदमयेभ्यः कितवमीर्यतायाऽ अकितवं पिशाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ।।

स्कन्दनन्दिनोः–

ॐ यदक्रन्दः प्रथमं जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यं महि जातं तेऽ अर्वन् ।।

शूलमहाकालयोः–

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽ उन्नयामि । समापोऽ अद्भिरग्मत समोषधीभिरोषधीः ।।

दक्षादिसप्तानाम्–

ॐ सप्तऽ ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽ अस्वप्नजौ सत्रसदौ च देवौ ॥

दुर्गायाः–

ॐ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरसितरसे नमः सुतरसितरसे नमः ॥

विष्णोः–

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । स मूढमस्यपाꣳ सुरे स्वाहा ॥

स्वधाकारस्य–

ॐ उदीरतामवरऽ उत्परासऽ उन्मध्यमः पितरः सोम्यासः । असुंयऽ ईयुरवृकाऽ ऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥

मृत्युरोगयोः–

ॐ परं मृत्योऽ अनु परेहि पन्थां यस्तेऽ अन्यऽ इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रमीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥

गणपतेः–

ॐ गणानान्त्वा० ॥

अपाम्–

ॐ शन्नो देवी रभिष्टयऽ आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

मरुताम्–

ॐ मरुतो यस्य हि क्षये पाथा दिवो विमहसः । ससुगोपातमो जनः ।।

पृथिव्याः–

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।।

गङ्गादिनदीनाम्–

ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधासो देशे भवत्सरित् ।।

सप्तसागराणाम्–

ॐ धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च । यदाहुरघ्न्याऽ इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।।

मेरोः–

ॐ प्रपर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिचऽ इयानाः । ताऽ आववृत्रन्नधरागुदक्ताऽ अहिं बुध्न्यमनुरीयमाणाः । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ।। इति ।

गणेशसूक्तम् । (ऋग्वेदीयम्)

(यो सूक्त पूर्वार्धको ३८१ पृष्ठमा उल्लेख गरिएको छ)

ॐ आतूनऽ इन्द्र क्षुमन्तं चित्रं ग्राभं सङ्गृभाय । महाहस्ती दक्षिणेन ।। विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ।। न हि त्वा शूर देवानमर्तासोदित्सन्तम् । भीमं न गां वारयन्ते ।। एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् । नराधसामर्धिषं नः।।

प्रस्तोषदुपगासिषच्छ्रवत्सामगीयमानम् । अभि राधसा जुगुरत् ।। आ नो भर दक्षिणेनाभि सव्येन प्रमृश । इन्द्रमा नो वसोर्निर्भाक् ।। उपक्रमस्वाभर धृषताधृष्णो जनानाम् । अदाशूष्टरस्य वेदः ।। इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सुतं सनुहि ।। सद्योजुवस्तोवाजाऽ अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ।। इति ।

सौरसूक्तम् (ऋग्वेदीयम्)

(यो सूक्त पूर्वार्धको ३८१ पृष्ठमा उल्लेख गरिएको छ)

ॐ उदुत्यञ्जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ।। अपत्येतायवो यथा नक्षत्रायन्त्यक्तुभिः । सूराय विश्वचक्षसे ।। अदृश्रमस्य केतवो विरश्मयो जनाँऽ अनु । भ्राजन्तोऽ अग्नयो यथा ।। तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ।। प्रत्यङ देवानां विशः प्रत्यङ्ङुदेषि मानवान् । प्रत्यङ विश्वं स्वर्दृशे ।। येना पावक चक्षसा भुरण्यन्तञ्जनाँऽ अनु । त्वं वरुण पश्यसि ।। विद्यामेषि रजस्पृथ्वहा मिमानोऽ अक्तुभिः । पश्यञ्जन्मानि सूर्य ।। सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ।। अयुक्त सप्त शुन्ध्युवः शूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ।। उद्वयन्तमसस्परि ज्योतिष्पश्यन्तऽ उत्तरम् । देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।। उद्यन्नद्य मित्रमहऽ आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य हरिमाणं च नाशय ।। शुकेषु मे हरिमाणं रोपणाकासुदध्मसि । अथो हारिद्रवेषु मे हरिमाणं निदध्मसि ।। उदगादयमादित्यो विश्वेन सहसा सह । द्विषन्तं मह्यं रन्धयन्मोऽ अहं द्विषतेरधम् ।। चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावापृथिवीऽ अन्तरिक्षꣳ सूर्यऽ आत्मा जगतस्तस्थुषश्च ।। सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् । यत्रा नरो देवयन्तो युगानि वितन्वते प्रति

भद्राय भद्रम् ।। भद्राऽ अश्वा हरितः सूर्यस्य चित्राऽ एतग्वाऽ अनु माद्यासः । नमस्यन्तो दिवऽ आपृष्ठमस्थुः परिद्यावापृथिवीयन्ति सद्यः ।। तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सञ्जभार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ।। तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ।। अद्या देवाऽ उदिता सूर्यस्य निरꣳहसः पिपृतानिरवद्यात् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽ उत द्यौः ।। इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।। कृष्णं नियानं हरयः सुपर्णाऽ अपोवसाना दिवमुत्पतन्ति । तऽ आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते । हꣳ सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽ ऋतजाऽ अद्रिजाऽ ऋतम् ।। यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः । अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः ।। यदद्य सूर्यब्रवो नागाऽ उद्यन्मित्राय वरुणाय सत्यम् । वयं देवत्रादिते स्याम तव प्रियासोऽ अर्यमन्गृणन्तः ।। उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वाजनिममानुषाणाम् । समो दिवा ददृशे रोचमानः क्रत्वाकृतः सुकृतः कर्तृभिर्भूत् ।। ससूर्य प्रति पुरो नऽ उद्गाएभिः स्तोमेभिरेतशेभिरेवैः । प्र नो मित्राय वरुणाय वोचोनागसोऽ अर्यम्णेऽ अग्नये च ।। विनः सहस्रंशुरुधोरदन्त्वृतावानो वरुणो मित्रोऽ अग्निः । यच्छन्तु चन्द्राऽ उपमन्नोऽ अर्कमानः कामं पूपुरन्तु स्तवानाः ।। उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् । चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेवयः समविव्यक्तमांसि ।। उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य । समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षुयुक्तः ।। बिभ्राजमानऽ उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः । एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ।। दिवो रुक्मऽ उरुचक्षाऽ उदेति दूरेऽ अर्थंस्तरणिर्भ्राजमानः । नूनं जानाः

सूर्येण प्रसूताऽ अयं नर्थानि कृणवन्नपांसि ।। यत्रा चक्रुरमृता गातुमस्मै श्येनो नदीयं नन्वेति पाथः । उदुत्यद्दर्शतं वपुर्दिवऽ एति प्रतिह्वरे ।। यदीमाशुर्वहति देवऽ एतशो विश्वस्मै चक्षसेऽ अरम् । शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमारजः ।। सप्तस्वसारः सुविताय सूर्यं वहन्ति हरितो रथे । तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।। पश्येम शरदः शतञ्जीवेम शरदः शतम् ।। बण्महाँऽ असि सूर्यबडादित्य महाँऽ असि । महस्ते सतो महिमापनस्यतेद्धादेव महाँऽ असि ।। बट्सूर्यश्रवसा महाँऽ असि सत्रा देवमहाँऽ असि । मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।। नमो मित्रस्य वरुणस्य चक्षसे महोदेवाय तदृतं सपर्यत । दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय श ꣳ सत ।। सामास्त्योक्तिः परिपातु विश्वतो द्यावा च यत्र ततनन्नहानि च । विश्वमन्यन्निविशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ।। न तेऽ अदेवः प्रदिवो निवासते यदेतशेभिः पतरैरथर्यसि । प्राचीनमन्यदनुवर्तते रजऽ उदन्येन ज्योतिषा यासि सूर्य ।। येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना । तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपदुःष्वप्न्यं सुव ।। विश्वस्य हि प्रेषितो रक्षसि व्रतमहेडयन्नुच्चरसि स्वधाऽ अनु । यदद्य त्वा सूर्योपब्रवामहै तन्नो देवाऽ अनुमंसीत क्रतुम् ।। तन्नो द्यावापृथिवी तन्नऽ आपऽ इन्द्रः श्टृण्वन्तु मरुतो हवं वचः । माशूनेभूम सूर्यस्य सन्दृशि भद्रं जीवन्तो जरणामशीमहि ।। विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तोऽ अनमीवाऽ अनागसः । उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रतिपश्येम सूर्य ।। महिज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषे चक्षुषे मयः । आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रतिपश्येम सूर्य । यस्य ते विश्वा भुवनानि केतुना प्रचेरते नि च विशं तेऽ अक्तुभिः ।। अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि । शं नो भव चक्षसा शं नोऽ अह्ना शं भानुना शं हिमा शं घृणेन ।। यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् । अस्माकं देवाऽ

उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।। अदत्पिबदूर्जयमानमाशितं तदस्मे शंयोररपो दधातन । यद्वो देवाश्चकृम जिह्वया गुरुमनसो वाप्रयुतीदेवहेडनम् ।। अरावायो नोऽ अभिदुच्छुनाय तेतस्मिन्तदेनो वसवो निधेतन ।। सूर्यो नो दिवस्पातु वातोऽ अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः ।। जोषा सवितर्यस्य ते हरः शत ꣳ सवाँऽ अर्हति । पाहि नो दिद्युतः पतन्त्याः ।। चक्षुर्नो देवः सविता चक्षुर्नऽ उत पर्वतः । चक्षुर्धाता दधातु नः ।। चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः । सं चेदं वि च पश्येम ।। सुसन्दृशं त्वा वयं प्रतिपश्येम सूर्य । विपश्येम नृचक्षसः।। बिभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् । वातजूतो योऽ अभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ।। बिभ्राड् बृहत्सुभृतं वाजसातमं धर्मन्दिवो धरुणे सत्यमर्पितम् । अमित्रहा वृत्रहा दस्युहन्तमञ्ज्योतिर्जज्ञेऽ असुरहा सपत्नहा ।। इदं श्रेष्ठं ज्योतिषाञ्ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् । विश्वभ्राड् भ्राजो महि सूर्योदृशऽ उरु प्रप्रथे सहऽ ओजोऽ अच्युतम् ।। विभ्राजञ्ज्योतिषा स्वरगच्छो रोचनं दिवः । येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ।। आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरञ्च प्रयन्त्स्वः । अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ।। त्रि ꣳ शद्धाम विराजति वाक्पतङ्गाय धीयते । प्रतिवस्तोरहद्युभिः ।। ऋतञ्च सत्यञ्चाभीद्धात्तपसोध्यजायत । ततो रात्र्यजायत ततः समुद्रोऽ अर्णवः ।। समुद्रादर्णवादधि संवत्सरोऽ अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ।। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ।। सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ।

इति ऋग्वेदीयं सौरसूक्तम् ।।

ध्रुवसूक्तम् । (यजुर्वेदीयम्)

(यो सूक्त पूर्वार्धको ४०७ पृष्ठमा उल्लेख गरिएको छ)

ॐ ध्रुवासि धरुणास्तृता विश्वकर्मणा । मा त्वा समुद्रऽ उद्वधीन्मा सुपर्णोव्यथमाना दृ ꣳ ह ।। प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् । व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ।। भूरसि भुमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीन्दृ ꣳ ह पृथिवीं मा हि ꣳ सीः ।। विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय । अग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवासीद ।। इति ध्रुवसूक्तम् ।

अथ पितृसूक्तम् ।।

(पितृसूक्त पूर्वार्धको ४३९, ४७१ र ५६९ पृष्ठमा उल्लेख गरिएको छ)

हरिः ॐ अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा । अपहताऽ असुरा रक्षा ꣳ सि व्वेदिषदः ।।१।। ये रूपाणि प्रतिमुञ्चमानाऽ असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ।।२।। अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ।।३।। नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वासऽ आधत्त ।।४।। आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोसत् ।।५।। ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधा स्थ तर्पयत मे पितॄन् ।।६।।

हरिः ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ताऽ आपः स प्रजापतिः ।।१।। सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।।२।। न तस्य प्रतिमाऽ अस्ति यस्य नाम महद्यशः । हिरण्यगर्भऽ इत्येष मा मा हिꣳसीदित्येषा यस्मान्न जातऽ इत्येषः ।।३।। एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः सऽ उ गर्भेऽ अन्तः । सऽ एव जातः स जनिष्यमाणः प्रत्यङ जनास्तिष्ठति सर्वतोमुखः ।।४।। यस्माज्जातं न पुरा किञ्च नैव यऽ आबभूव भुवनानि विश्वा । प्रजापतिः प्रजया सꣳ रराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी ।।५।। येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्तभितं येन नाकः । योऽ अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।६।। यङ्क्रन्दसी अवसा तस्तभानेऽ अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूरऽ उदितो विभाति कस्मै देवाय हविषा विधेम । आपो हयद्बृहतीर्यश्चिदापः ।।७।। व्वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् । तस्मिन्निदꣳ सं च वि चैति सर्वꣳ सऽ ओतः प्रोतश्च विभूः प्रजासु ।।८।। प्रतद्वोचेदमृतं नु विद्वान्गर्धर्वो धाम विभृतं गुहा सत् । त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ।।९।। स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवाऽ अमृतमानसानास्तृतीये धामन्नध्यैरयन्त ।।१०।। परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च । उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश ।।११।। परिद्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः । ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ।।१२।। सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सर्नि मेधामयासिषꣳ स्वाहा ।।१३।। याम्मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ।।१४।। मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ।।१५।। इदं मे ब्रह्म च क्षत्रं

चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ।।१६।।

हरिः ॐ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२।। इभेन । तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्षसस्तपिष्ठैः ।।१।। तव भ्रमासऽ आशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपूꣳ ष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ।।२।। प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशोऽ अस्याऽ अदब्धः । यो नो दूरेऽ अघशꣳसो योऽ अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ।।३।। उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२।। ओषतात्तिग्महेते । यो नोऽ अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ।।४।। ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् । अग्नेष्ट्वा तेजसा सादयामि ।।५।।

हरिः ॐ सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳ हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ।।१।। यस्ते रसः सम्भृतऽओषधीषु सोमस्य शुष्मः सुरया सुतस्य । तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ।।२।। यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय । इमं तꣳ शुक्रं मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ।।३।। यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रोऽ अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि ।।४।। पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ।।५।। पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण

शतायुषा विश्वमायुर्व्यंश्णवै ।।६।। अग्नऽ आयूꣳषि पवसऽ आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ।।७।। पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।।८।। पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने ऋत्वा ऋतूँ२।। रनु ।।९।। यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ।।१०।। पवमानः सोऽ अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ।।११।। उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ।।१२।। वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्वयस्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ।।१३।। ये समानाः समनसः पितरो यमराज्ये । तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम्।।१४।। ये समानाः समनसो जीवा जीवेषु मामकाः । तेषाꣳश्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ।।१५।। द्वे सृतीऽ असृणवं पितृणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरञ्च ।।१६।। इदꣳ हविः प्रजननं मेऽ अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽ अस्मासु धत्त ।।१७।। उदीरतामवरऽ उत्परासऽ उन्मध्यमाः पितरः सोम्यासः । असुं यऽ ईयुरवृकाऽ ऋतज्ञास्ते नोवन्तु पितरो हवेषु ।।१८।। अङ्गिरसो नः पितरो नवग्वाऽ अथर्वाणो भृगवः सोम्यासः । तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ।।१९।। ये नः पूर्वे पितरः सोम्यासोनूहिरे सोमपीथं वसिष्ठाः । तेभिर्यमः सꣳ रराणो हवीꣳष्युशन्नुशद्भिः प्रतिकाममत्तु ।।२०।। त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनुनेषि पन्थाम् । तव प्रणीती पितरो नऽ इन्दो देवेषु रत्नमभजन्त धीराः ।।२१।। त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीँ२।। रपोर्णु वीरेभिरश्वैर्मघवा भवानः ।।२२।। त्वꣳ सोम पितृभिः संविदानोनु द्यावापृथिवीऽ आततन्थ ।

तस्मै तऽ इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ।।२३।। बर्हिषदः पितरऽ ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । तऽ आगतावसा शन्तमेनाथा नः शंयोररपो दधात ।।२४।। आहं पितॄन्त्सुविदत्राँ२।। अवित्सि नपातं च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्तऽ इहागमिष्ठाः ।।२५।। उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । तऽ आगमन्त तऽ इह श्रुवन्त्वधिब्रुवन्तु तेवन्त्वस्मान् ।।२६।। आयन्तु नः पितरः सोम्यासोग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन् यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् ।।२७।। अग्निष्वात्ताः पितरऽ एह गच्छत सदः सदः सदत सुप्रणीतयः । अत्ता हविꣳ षि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ।।२८।। येऽ अग्निष्वात्ता येऽ अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते । तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ।।२९।। अग्निष्वात्तानृतुमतो हवामहे नाराशꣳ से सोमपीथं यऽ आशुः । ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ।।३०।। आच्या जानु दक्षिणतो निषद्येमं यज्ञमभिगृणीत विश्वे । मा हिꣳ सिष्ट पितरः केनचिन्नो यद्वऽ आगः पुरुषता कराम ।।३१।। आसीनासोऽ अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय । पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत तऽ इहोर्जं दधात ।।३२।। यमग्ने कव्यवाहनत्वं चिन्मन्यसे रयिम् । तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ।।३३।। योऽ अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्यऽ आ ।।३४।। त्वमग्नऽ ईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी । प्रादाः पितृभ्यः स्वधया तेऽ अक्षन्नद्धि त्वं देव प्रयता हवीꣳ षि ।।३५।। ये चेह पितरो ये च नेह याँश्च विद्म याँ २।। उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतञ्जुषस्व ।।३६।। इदं पितृभ्यो नमोऽ अस्त्वद्य ये पूर्वासो यऽ उपरासऽ ईयुः । ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ।।३७।। अधा यथा नः पितरः परासः प्रत्नासोऽ

अग्नऽ ऋतमाशुषाणाः । शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽ
अरुणीरपव्रन् ॥३८॥ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।
उशन्नुशतऽ आवह पितॄन्हविषेऽ अत्तवे ॥३९॥ अपां फेनेन नमुचेः
शिरऽ इन्द्रोदवर्तयः । विश्वा यदजयस्पृधः ॥४०॥

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ
सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽ एवेदꣳ सर्वं यद्भूतं
यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ एतावानस्य
महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतं
दिवि ॥३॥ त्रिपादूर्ध्वऽ उदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ
व्यक्रामत्साशनानशने ऽ अभि ॥४॥ ततो विराडजायत विराजोऽअधि
पूरुषः । स जातोऽ अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥ तस्माद्यज्ञात्सर्वहुतऽ ऋचः सामानि जज्ञिरे । छन्दाꣳसि
जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ तस्मादश्वाऽ अजायन्त ये के
चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽ अजावयः ॥८॥ तं
यज्ञं बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः । तेन देवाऽ अयजन्त साध्याऽ
ऋषयश्च ये ॥९॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत्किं बाहू किमूरू पादाऽ उच्येते ॥१०॥ ब्राह्मणोस्य मुखमासीद्बाहू
राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रोऽ अजायत ॥११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽ अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥ नाभ्याऽ आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२॥ अकल्पयन् ॥१३॥ यत्पुरुषेण
हविषा देवा यज्ञमतन्वत । वसन्तोस्यासीदाज्यङ्ग्रीष्मऽ इध्मः शरद्धविः
॥१४॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वानाऽ अबध्नन्पुरुषं पशुम् ॥१५॥ यज्ञेन यज्ञमयजन्त देवास्तानि
धर्माणि प्रथमान्यासन् । तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः

सन्ति देवाः ।।१६।।

हरिः ॐ नमस्ते रुद्रमन्यवऽउतो तऽ इषवे नमः । बाहुभ्यामुत ते नमः ।।१।। या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ।।२।। यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यंस्तवे । शिवाङ्गिरित्र ताङ्कुरुमा हिꣳ सीः पुरुषञ्जगत् ।।३।। शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमनाऽ असत् ।।४।। अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो धराचीः परासुव ।।५।। असौ यस्ताम्रोऽ अरुणऽ उत बभ्रुः सुमङ्गलः । ये चैनꣳ रुद्राऽ अभितो दिक्षु श्रिताः सहस्रशोवैषाꣳ हेडऽ ईमहे ।।६।। असौ योवसर्पति नीलग्रीवो विलोहितः । उतैनङ्गोपाऽ अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ।।७।। नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो येऽ अस्य सत्वानोहं तेभ्योकरं नमः ।।८।। प्रमुञ्च धन्वनस्त्वमुभयोरात्न्योर्ज्याम् । याश्च ते हस्तऽ इषवः परा ता भगवो वप ।।९।। विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२।। उत । अनेशन्नस्य याऽ इषव ऽ आभुरस्य निषङ्गधिः ।।१०।। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ।।११।। परिते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो यऽ इषुधिस्तवारे ऽ अस्मन्निधेहि तम् ।।१२।। अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।।१३।। नमस्तऽ आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ।।१४।। मा नो महान्तमुत मा नो ऽ अर्भकं मा नऽ उक्षन्तमुत मा नऽ उक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ।।१५।। मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः। मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।।१६।। नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः

शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो बभ्लुशाय ।।१७।। नमो बभ्लुशाय व्याधिनेन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमो नमो रोहिताय ।।१८।। नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमऽ उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नायतया ।।१९।। नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिनऽ आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमो वञ्चते ।।२०।। नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणऽ इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳ सद्भ्यो मुष्णतां पतये नमो नमोसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ।।२१।। नमऽ उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमऽ इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽ आतन्वानेभ्यः प्रतिदधानेभ्यश्चवो नमो नमऽ आयच्छद्भ्योस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ।।२२।। नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽ आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः ।।२३।। नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोश्वेभ्योश्वपतिभ्यश्च वो नमो नमऽ आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नमऽ उगणाभ्यस्तृꣳ हतीभ्यश्च वो नमो नमो गणेभ्यः ।।२४।। नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ।।२५।। नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽ अरथेभ्यश्च वो

नमो नमः क्षतृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽ अर्भकेभ्यश्च
वो नमः ।।२६।। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः
कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो
नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ।। २७।। नमः
श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च
पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने ।।२८।।
नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च
नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च
नमो ह्रस्वाय ।।२९।। नमो ह्रस्वाय च वामनाय च नमो बृहते च
वर्षीयसे च नमो वृद्धाय च सवृधे च नमोग्र्याय च प्रथमाय च नमऽ
आशवे ।।३०।। नमऽ आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय
च नमऽ ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ।।३१।।
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो
मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नमः सोभ्याय
।।३२।। नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च
नमः श्लोक्याय चावसान्याय च नमऽ उर्वर्याय च खल्याय च नमो
वन्याय ।।३३।। नमो वन्याय च कक्ष्याय च नमः श्रवाय च
प्रतिश्रवाय च नमऽ आशुषेणाय चाशुरथाय च नमः शूराय
चावभेदिने च नमो बिल्मिने ।।३४।। नमो बिल्मिने च कवचिने
च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय
च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ३५।। नमो धृष्णवे
च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे
चायुधिने च नमः स्वायुधाय च सुधन्वने च ।।३६।। नमः स्रुत्याय च
पथ्याय च नमः काटचाय च नीप्याय च नमः कुल्याय च सरस्याय च
नमो नादेयाय च वैशन्ताय च नमः कूप्याय ।।३७।। नमः कूप्याय
चावटचाय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय

च नमो वर्ष्याय चावर्ष्याय च नमो वात्याय ।।३८।। नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे ।।३९।। नमः शङ्गवे च पशुपतये च नमऽ उग्राय च भीमाय च नमोग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।।४०।। नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ।।४१।। नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय ।।४२।। नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमऽ इरिण्याय च प्रपथ्याय च नमो व्रज्याय ।।४३।। नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय ।।४४।। नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽ ऊर्व्याय च सूर्व्याय च नमः पर्णाय ।।४५।। नमः पर्णाय च पर्णशदाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ।।४६।। द्रापेऽ अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानामेषां पशूनां मा भेर्मा रोङमो च नः किञ्चनाममत् ।।४७।। इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामेऽ अस्मिन्ननातुरम् ।।४८।। या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृड जीवसे ।।४९।। परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ।।५०।। मीढुष्टम शिवतम शिवो नः सुमना

भव । परमे वृक्षऽ आयुधन्निधाय कृत्तिं वसानऽ आचर पिनाकं बिभ्रदागहि ।।५१।। विकिरिद्र विलोहित नमस्तेऽ अस्तु भगवः । यास्ते सहस्रꣳ हेतयोन्यमस्मन्निवपन्तु ताः ।।५२।। सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ।।५३।। असङ्ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम् । तेषाꣳ सहस्रयोजनेवधन्वानि तन्मसि ।।५४।। अस्मिन्महत्यर्णवेन्तरिक्षे भवाऽ अधि । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५५।। नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽ उपश्रिताः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५६।। नीलग्रीवाः शितिकण्ठाः शर्वाऽ अधः क्षमाचराः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५७।। ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५८।। ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।५९।। ये पथां पथिरक्षयऽ ऐलबृदाऽ आयुर्युधः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६०।। ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६१।। येन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६२।। यऽ एतावन्तश्च भूयाꣳ सश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।६३।। नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६४।। नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां वातऽइषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६५।। नमोस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो

दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽ अस्तु ते नोवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।।६६।।

हरिः ॐ[1] आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोनिमिषऽ एकवीरः शतꣳ सेनाऽ अजयत्साकमिन्द्रः ।।१।। सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नरऽ इषुहस्तेन वृष्णा ।।२।। सऽ इषुहस्तैः स निषङ्गिभिर्वशी सꣳ स्रष्टा स युध इन्द्रो गणेन । सꣳ सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ।।३।। बृहस्पते परिदीया रथेन रक्षोहामित्राँ२।। अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ।।४।। बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमानऽ उग्रः । अभिवीरोऽ अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ।।५।। गोत्रभिदं गोविदं वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाताऽ अनु वीरयध्वमिन्द्रꣳ सखायोऽ अनुसꣳ रभध्वम् ।।६।। अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योस्माकꣳ सेनाऽअवतु प्र युत्सु ।।७।। इन्द्रऽ आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽ एतु सोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ।।८।। इन्द्रस्य वृष्णो वरुणस्य राज्ञऽ आदित्यानां मरुता शर्धऽ उग्रम् । महामनसां भुवनच्यवानां घोषो देवानाञ्जयतामुदस्थात् ।।९।। उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मना सि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानाञ्ज-

---

[1] १–सत्कर्मरत्नावलीमा भएको पितृसूक्तमा अप्रतिरथसूक्त अर्थात् 'आशुः शिशानः' यो सूक्तको कुनै पुस्तकमा उल्लेख गरेको पाइन्छ कुनैमा पाइंदैन । भएको प्रतिमा पनि कहीं १७ मन्त्रको उल्लेख गरेको छ कहीं १२ मन्त्रमात्र उल्लेख गरेको छ । श्राद्धमयूखमा वाजसनेयशाखीहरुले अप्रतिरथसूक्तको जप गर्नू, भनेको छ । अप्रतिरथसूक्त १२ मन्त्र मात्र हो तर यहाँ अन्तिम १७ मन्त्रको पक्षलिएर उल्लेख गरिएको छ ।

यतां यन्तु घोषाः ।।१०।। अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं याऽइषवस्ता जयन्तु । अस्माकं वीराऽ उत्तरे भवन्त्वस्माँ२।। उदेवाऽ अवता हवेषु ।।११।। अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ।।१२।। अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिते । गच्छामित्रान्प्रपद्यस्व मामीषाङ्कञ्चनोच्छिषः ।।१३।। प्रेता जयता नरऽ इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोनाधृष्या यथासथ ।।१४।। असौ या सेना मरुतः परेषामभ्यैति नऽ ओजसा स्पर्धमाना । ताङ्गूहत तमसापव्रतेन यथामीऽ अन्योऽ अन्यन्न जानन् ।।१५।। यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽ इव । तन्नऽ इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्मयच्छतु ।।१६।। मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् । उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ।।१७।।

अथ शतपथब्राह्मणम्[१]

हरिः ॐ पयऽ आहुतयो ह वा ऽ एता देवानाम् । यदृचः स यऽ एवं विद्वानृचोहरहः स्वाध्यायमधीते पयऽ आहुतिभिरेव तद्देवाँस्तर्पयति तऽ एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्स्वधाऽ अभिवहन्ति ।।

आज्याहुतयो ह वाऽ एता देवानाम् । यद्यजूꣳषि स यऽ एवं विद्वान्यजूꣳष्यहरहः स्वाध्यायमधीतऽ आज्याहुतिभिरेव तद्देवाँस्तर्पयति तऽ एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना

१– मूलमा ब्राम्हणको केही उल्लेख गरिएको छैन तापनि राखिदिनु उचित संझेकोले यहां यो ब्राह्मण भाग पनि राखिएको छ ।

सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्त्स्वधाऽ अभिवहन्ति ।।

सोमाहुतयो ह वा एता देवानाम् । यत्सामानि स यऽ एवं विद्वान्त्सामान्यहरहः स्वाध्यायमधीते सोमाहुतिभिरेव तद्देवाँस्तर्पयति त एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्त्स्वधाऽ अभिवहन्ति ।।

मेद आहुतयो ह वाऽ एता देवानाम् । यदथर्वाङ्गिरसः स यऽ एवं विद्वानथर्वाङ्गिरसोहरहः स्वध्यायमधीते मेदऽ आहुतिभिरेव तद्देवाँस्तर्पयति तऽ एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्त्स्वधाऽ अभिवहन्ति ।।

मध्वाहुतयो ह वाऽ एता देवानाम् । यदनुशासनानि विद्यावाकोवाक्यमितिहासपुराणं गाथानाराशꣳस्यः स यऽ एवं विद्वाननुशासनानि विद्यावाकोवाक्यमितिहासपुराणंगाथानाराशꣳसीरित्यहरहः स्वाध्यायमधीते मध्वाहुतिभिरेव तद्देवाँस्तर्पयति तऽ एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिर्घृतकुल्या मधुकुल्याः पितॄन्त्स्वधाऽ अभिवहन्ति ।।

तस्य वाऽ एतस्य ब्रह्मयज्ञस्य । चत्वारो वषट्कारा यद्वातो वाति यद्विद्योतते यत्स्तनयति यदवस्फूर्जति तस्मादेवंविद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामच्छम्बषट्कारायाति ह वै पुनर्मृत्युं मुच्यते गच्छति ब्रह्मणः सात्मताꣳ स चेदपि प्रबतमिव न शक्नुयादप्येकं देवपदमधीयीतैव तथा भूतेभ्यो न हीयते ।। हरिः ॐ अथातः स्वाध्यायप्रशꣳसा ।।

इति पितृसूक्तम् ।।

नारायणबलिप्रयोगे होममन्त्राः ।

(पूर्वार्धको ५८६ पृष्ठमा उल्लेख भएका मन्त्रहरू)

१– ॐ युञ्जते मनऽ उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेकऽ इन्मही देवस्य सवितुः परिष्टुतिः ।।

ॐ इदं विष्णुर्विश्चक्रमे त्रेधा निदधे पदम् । समूढमस्यपाꣳसुरे स्वाहा ।।

ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ।।

ॐ देवश्रुतौ देवेष्वाघोषतं प्राची प्रेतमध्वरङ्कल्पयन्तीऽ ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् । स्वङ्गोष्ठमावदतं देवि दुर्येऽ आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमत्र रमेथां वर्ष्मन्पृथिव्याः ।।

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । योऽ अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ।।

ॐ दिवो वा विष्णऽ उत वा पृथिव्या महो वा विष्णऽ उरोरन्तरिक्षात् । उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ।।

ॐ प्र तद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।

ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ।।

२– ॐ लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः

स्वाहा । माꣳ सेभ्यः स्वाहा माꣳ सेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ।।

ॐ आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ।।

ॐ तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा । निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ।।

ॐ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा । विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा ।।

ॐ अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः । तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ।।

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विद्धद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ।।

ॐ वेदाहमेतं पुरुषं महान्तमादित्यवर्णन्तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनाय ।।

ॐ प्रजापतिश्चरति गर्भेऽ अन्तरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ।।

ॐ यो देवेभ्यऽ आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।।

ॐ रुचं ब्राह्मञ्जनयन्तो देवाऽ अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽ असन्वशे ।।

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मऽ इषाण सर्वलोकं मऽ इषाण ।।

नारायणबलिप्रयोगे तर्पणमन्त्राः ।

(पूर्वार्धको ५८७ पृष्ठमा उल्लेख भएका मन्त्रहरू)–

(पुरुषसूक्तका १६ ऋचा यसै परिशिष्टको ९ पृष्ठमा छ । अरू मन्त्र यिनै हुन्)–

ॐ सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः । इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्ष ।।

ॐ अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् । विष्णुस्त्वाक्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च ।।

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽ उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । देवीरापोऽ अग्रेगुवोऽ अग्रेपुवोग्रऽ इममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवम् ।।

ॐ अदित्यै व्युन्दनमसि विष्णोः स्तुपोस्यूर्णम्म्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यो भुवपतये स्वाहा भुवनपतये स्वाहा भूतानांपतये स्वाहा ।।

ॐ घृताच्यसि जुहूर्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सदऽ आसीद घृताच्यस्युपभृन्नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सदऽ आसीद घृताच्यसि ध्रुवानाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सदऽ आसीद प्रियेण धाम्ना प्रियꣳ सदऽ आसीद । ध्रुवाऽ असदन्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ।।

ॐ अस्कन्नमद्य देवेभ्यऽ आज्यꣳसम्भ्रियासमङ्घ्रिणा विष्णो मा त्वावक्रमिषं वसुमतीमग्ने तेच्छायामुपस्थेषं विष्णो स्थानमसीतऽ इन्द्रो वीर्यमकृणोदूर्ध्वोध्वरऽ आस्थात् ।।

ॐ दिवि विष्णुर्व्यक्रꣳ स्त जागतेन च्छन्दसा ततो निर्भक्तो योष्मान्द्वेष्टि यं च वयं द्विष्मोन्तरिक्षे विष्णुर्व्यक्रꣳ स्त त्रैष्टुभेन च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रꣳ स्त गायत्रेण च्छन्दसा ततो निर्भक्तो योष्मान्द्वेष्टि यं च वयं द्विष्मोस्मादन्नादस्यै प्रतिष्ठायाऽ अगन्म स्वः सञ्ज्योतिषाभूम ॥

ॐ ऊर्गस्याङ्गिरस्यूर्णम्म्रदाऽ ऊर्जं मयि धेहि । सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व वनस्पतऽ ऊर्ध्वो मा पाह्यꣳ हसऽ आस्य यज्ञस्योदृचः ॥

ॐ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥

ॐ युञ्जते मनऽ उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेकऽ इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्यपाꣳ सुरे स्वाहा ॥

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहं तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं वलगमुत्किरामि यं मे सबन्धुर्यमसबन्धुर्निचखानेदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥

ॐ उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतङ्घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥

ॐ अत्यन्याँ२।। अगानान्याँ२।। उपागामर्वाक् त्वा परेभ्योविदं परोवरेभ्यः । तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा । ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳ सीः ।।

ॐ याते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारिभूरि । ब्रह्मवनित्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ।।

ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनां पयोसि ।।

ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ।।

ॐ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ।।

ॐ उपयामगृहीतोसि मधवे त्वोपयामगृहीतोसि माधवाय त्वोपयामगृहीतोसि शुक्राय त्वोपयामगृहीतोसि शुचये त्वोपयामगृहीतोसि नभसे त्वोपयामगृहीतोसि नभस्याय त्वोपयामगृहीतोसीषे त्वोपयामगृहीतोस्यूर्जेत्वोपयामगृहीतोसि सहसे त्वोपयामगृहीतोसि सहस्याय त्वोपयामगृहीतोसि तपसे त्वोपयामगृहीतोसि तपस्याय त्वोपयामगृहीतोस्यꣳहसस्पतये त्वा ।।

ॐ मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषेगृह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ।।

ॐ उपयामगृहीतोसि हरिरसि हारियोजनो हरिभ्यां त्वा । हर्योर्धानास्थ सहसोमाऽ इन्द्राय ।।

ॐ उपयामगृहीतोसि ध्रुवोसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोच्युताना मच्युतक्षित्तमऽ एषते योनिर्वैश्वानराय त्वा ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि । अथा नऽ इन्द्रऽइद्विशोसपत्ना: समनसस्करत् ।।

ॐ उपयामगृहीतोस्याग्रयणोसि स्वाग्रयण: पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभिसवनानि पाहि ।।

ॐ इन्द्रऽ आसां नेता बृहस्पतिर्दक्षिणा यज्ञ: पुरऽएतु सोम: । देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ।।

ॐ इन्द्रश्च मरुतश्च क्रयायोपोत्थितोसुर: पण्यमानो मित्र: क्रीतो विष्णु: शिपिविष्टऽ ऊरावासन्नो विष्णुर्नरन्धिष: ।।

ॐ विश्वेदेवाऽ अꣳशुषुन्युप्तो विष्णुराप्रीतपाऽ आप्यायमानो यम: सूयमानो विष्णु: सम्भ्रियमाणो वायु: पूयमान: शुक्र: पूत: शुक्र: क्षीरश्रीर्मन्थी सक्तुश्री: ।।

ॐ अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषं विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण चतुष्पद: पशूनुदजयत्तानुज्जेषम् ।।

ॐ अग्नये स्वाहा सोमाय स्वाहापांमोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ।।

ॐ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ।।

ॐ मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहा ꣳ हसस्पतये स्वाहा ।।

ॐ आयुर्यज्ञेन कल्पताꣳ स्वाहा प्राणो यज्ञेन कल्पताꣳ स्वाहापानो यज्ञेन कल्पताꣳ स्वाहा व्यानो यज्ञेन कल्पताꣳ स्वाहोदानो यज्ञेन कल्पताꣳ स्वाहा समानो यज्ञेन कल्पताꣳ स्वाहा चक्षुर्यज्ञेन कल्पताꣳ स्वाहा श्रोत्रं यज्ञेन कल्पताꣳ स्वाहा वाग्यज्ञेन कल्पताꣳ स्वाहा मनो यज्ञेन कल्पताꣳ स्वाहात्मा यज्ञेन कल्पताꣳ स्वाहा ब्रह्मा यज्ञेन कल्पताꣳ स्वाहा ज्योतिर्यज्ञेन कल्पताꣳ स्वाहा स्वर्यज्ञेन कल्पताꣳ स्वाहा पृष्ठं यज्ञेन कल्पताꣳ स्वाहा यज्ञो यज्ञेन कल्पताꣳ स्वाहा ॥

इति परिशिष्टे पूर्वार्धगतमन्त्राः ॥

अथ परिशिष्टे उत्तरार्धगतमन्त्राः ।।

(सत्कर्मरत्नावलीको उत्तरार्धमा परेका मन्त्रहरू यसप्रकार छन्)

श्रीसूक्तम्

(उत्तरार्धको ३३३, ३६१ र ३८२ पृष्ठहरूमा यो सूक्तको उल्लेख गरिएको छ)

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽ आवह ।।

तां मऽ आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।।

कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तपयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनीमीं शरणमहं प्रपद्येऽ अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।

आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्याऽ अलक्ष्मीः ।।

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोस्मि राष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ।।

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ।।

गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनाꣳ रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।

कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ।।

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मऽ आवह ।।

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनिम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मऽ आवह ।।

तां मऽ आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान्विन्देयं पुरुषानहम् ।।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पन्चदशर्चं च श्रीकामः सततं जपेत् ।।

पद्मानने पद्मऽ ऊरू पद्माक्षी पद्मसंभवे ।
तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् ।।

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ।।

पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ।।

पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम् ।
प्रजानां भवसी माताऽ आयुष्मन्तं करोतु मे ।।

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ।।

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ।।

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ।।

सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।।

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।।

महालक्ष्मीं च विद्महे विष्णुपत्नीं च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ।।

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ।।

इति श्रीसूक्तम् ।

(उत्तरार्धको ३३४ र ३७९ पृष्ठमा उल्लेख गरिएको रुद्रसूक्तमध्येको रुद्राध्याय–'नमस्ते०– जम्भे दध्मः' ६६ मन्त्र यसै परिशिष्टको ४ पृष्ठमा छ) अरू मन्त्र यिनै हुन्–

'कद्रुद्रायेति नवर्चम्'--

ॐ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमं हृदे ।।
यथा नोऽ अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ।।

यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ।। गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ।। यः शुक्रऽ इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठो देवानां वसुः ।। शन्नः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ।। अस्मे सोम श्रियमधि निधेहि शतस्य नृणाम् । महिश्रवस्तुवि नृम्णम् ।। मा नः सोम परिबाधो मारातयो जुहुरन्त । आ नऽ इन्दो वाजे भज ।। यास्ते प्रजाऽ अमृतस्य परस्मिन्धामन्नृतस्य । मूर्धानाभा सोम वेनऽ आभूषन्तीः सोमवेदः ।।

'इमा रुद्रायेत्येकादशर्चम्'–

ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथाशमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽ अस्मिन्ननातुरम् ।। मृडानो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते तच्छंचयोश्च मनुरायेजेपि तातदश्याम तव रुद्र प्रणीतिषु ।। अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः सुम्नायन्निद्विशोऽ अस्माकमाचरारिष्ट वीरा जुहवाम ते हविः।। त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे निह्वयामहे । आरेऽ अस्मद् दैव्यं हेडोऽ अस्यतु सुमतिमिद्द्वयमस्यावृणीमहे ।। दिवो वराहमराषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्मवर्मच्छर्दिरस्मभ्यं यंसत् ।। इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् । रास्वा चनोऽ अमृतमर्तभोजनं त्मने तोकाय तनयाय मृड।। मा नो महान्तमुत मा नोऽअर्भकं मा नऽउक्षन्तमुत मा नऽ उक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्ररीरिषः ।। मा नस्तोके तनये मा नऽआयौ मा नो गोषु मा नोऽअश्वेषु रीरिषः । वीरान् मा नो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।। उप ते स्तोमान् पशुपाऽ इवाकरं रास्वापितर्मरुतां सुम्नमस्मे । भद्रा हिते सुमतिर्मृडयत्तमाथावयमवऽ इत्ते वृणीमहे ।। आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे तेऽ अस्तु । मृडा च नोऽ अधि च ब्रूहि देवाधाचनः शर्म

यच्छद्विबर्हाः ।। अवोचाम नमोऽ अस्माऽ अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽ उतद्यौः ।।

'आते पितरिति पञ्चदशर्चम्'–

ॐ आते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य सन्दृशो युयोथाः ।। अभि नो वीरोऽ अर्वति क्षमेत प्रजायेमहि रुद्र प्रजाभिः ।। त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमाऽ अशीय भेषजेभिः ।। व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातय स्वा विषूचीः ।। श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो । पर्षिणः पारमंहसः स्वस्ति विश्वा अभीतिरपसो युयोधि ।। मा त्वा रुद्र चुक्रुधा मा नमोभिर्मा दुष्टुती वृषभ मा सहूती । उन्नो विरांऽ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ।। हवीमभिर्हवसे यो हविर्भिरवस्तोमेभी रुद्रं दिषीय । ऋदूदरः सुहवो मा नोऽ अस्यै बभ्रुः सुशिप्रो रीरधन्मनायै ।। उन्मामन्द वृषभो मरुत्वान् त्वक्षीयसावयसा नाधमानम् । घृणीवच्छायामरपाऽ अशीयाविवासेयं रुद्रस्य सुम्नम् ।। क्व१स्यते रुद्र मृडयाकुर्हस्तो योऽ अस्ति भेषजो जलाषः । अपभर्तारपसो दैव्यस्याभीनुमा वृषभ चक्षमीथाः ।। प्रबभ्रवे वृषभाय श्विती चे महोमहीं सुष्टुतिमीरयामि । नमस्याकल्मलीकिनं नमोभिर्गृणीमहि त्वेषं रुद्रस्य नाम ।। स्थिरेभिरङ्गैः पुरुरूपऽ उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः । ईशानादस्य भुवनस्य भूरेर्नवाऽ उ योषद्रुद्रादसूर्यम् ।। अर्हन् बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम् । अर्हन्निदं दयसे विश्वमभ्वं न वाऽ ओजीयो रुद्र त्वदस्ति ।। स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्रस्तवानोन्यं तेऽ अस्मन्निवपन्तु सेनाः ।। कुमारश्चित्पितरं वन्दमानं प्रतिनानामरुद्रोपयन्तम् । भूरेर्दातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजारास्यस्मे ।। या वो भेषजा मरुतः शुचीनि या सन्तमा वृषणो या मयोभु । यानि मनुरवृणीता पिता नस्ता शञ्चयोश्च रुद्रस्य वश्मि ।। परिणो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्महीगात् । अवस्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय

तनयाय मृड ।। एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि । हवनश्रुन्नो रुद्रेह बोधि वृहद्वदेम विदथे सुवीराः ।। (१५)

'इमा रुद्राय स्थिरधन्वन इति चतस्रः'–

ॐ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने । अपाह्लाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ।। स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति । अवन्नवन्तीरुपनो दुरश्चरानमीवो रुद्र जासु नो भव ।। याते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः । सहस्रं ते स्वति वातभेषजा मा नस्तोकेषु तनयेषु रीरिषः ।। मा नो वधी रुद्र मा परादा मा ते भूम प्रसितौ हीडितस्य । आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ।। (४)

'आवो राजानमित्येका'–

ॐ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः । अग्नि पुरातनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ।।

'तमुष्टुहीत्येका'–

ॐ तमुष्टुहि यः स्विषु सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ।।

'भुवनस्यपितरमित्येका'–

ॐ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ । बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ।।

'त्र्यम्बकमित्येका'–

ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।।

इति रुद्रसूक्तानि ।।

उत्तरार्धको ३३४ पृष्ठको टिप्पणीसंख्या २ अनुसार रुद्रजप (नमस्ते०... जम्भेदध्मः) १– ६६ मन्त्र यसै परिशिष्टको ४ पृष्ठदेखि हेर्नुहोला । ३ संख्याको टिप्पणी यस प्रकार छ ।

'शन्नऽ इन्द्राग्नीति पञ्चदशर्चम्'–

ॐ शन्नऽ इन्द्राग्नी भवतामवोभिः शन्नऽ इन्द्रावरुणा रातहव्या । शमिन्द्रासोमा सुविताय शंयोः शन्नऽ इन्द्रापूषणा वाजसातौ ।। शन्नो भगः शमुनः शंसोऽ अस्तु शन्नः पुरन्धिः शमु सन्तु रायः । शन्नः सत्यस्य सुयमस्य शंसः शन्नोऽ अर्यमा पुरुजातोऽ अस्तु ।। शन्नो धाता शमु धर्ता नोऽ अस्तु शन्नऽ उरूची भवतु स्वधाभिः । शं रोदसी बृहती शन्नोऽ अद्रिः शन्नो देवाना सुहवानि सन्तु ।। शन्नोऽ अग्निर्ज्योतिरनीकोऽ अस्तु शन्नो मित्रावरुणावश्विना शम् । शन्नःसुकृतां सुकृतानि सन्तु शन्नऽइषिरोऽ अभिवातु वातः ।। शन्नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नोऽ अस्तु । शन्नऽ ओषधीर्वनिनो भवन्तु शन्नो रजसस्पतिरस्तु जिष्णुः ।। शन्नऽ इन्द्रो वसुभिर्देवोऽ अस्तु शमादित्येभिर्वरुणः सुशंसः । शन्नो रुद्रो रुद्रेभिर्जलाषः शन्नस्त्वष्टाग्नाभिरिह शृणोतु ।। शन्नः सोमो भवतु ब्रह्म शन्नः शन्नो ग्रावाणः शमु सन्तु यज्ञाः । शन्नः स्वरूणां मितयो भवन्तु शन्नः प्रस्वः शम्वस्तु वेदिः ।। शन्नः सूर्यऽउरुचक्षाऽ उदेतु शन्नश्चतस्रः प्रदिशो भवन्तु । शन्नःपर्वता ध्रुवयो भवन्तु शन्नःसिन्धवः शमु सन्त्वापः।। शन्नोऽ अदितिर्भवतु व्रतेभिः शन्नो भवन्तु मरुतः स्वर्काः । शन्नो विष्णुः शमु पूषा नोऽ अस्तु शन्नो भवित्रं शम्वस्तु वायुः ।। शन्नो देवः सविता त्रायमाणः शन्नो भवन्तूषसो विभातीः । शन्नः पर्जन्यो भवतु प्रजाभ्यः शन्नः क्षेत्रस्यपतिरस्तु शंभुः ।। शन्नो देवा विश्वेदेवा भवन्तु शं सरस्वती सह धीभिरस्तु । शमभिषाचः शमुरातिषाचः शन्नो दिव्याः पार्थिवाः शन्नोऽ अप्याः ।। शन्नः सत्यस्य पतयो भवन्तु शन्नोऽ अर्वन्तः शमु सन्तु गावः । शन्नऽ ऋभवः सुकृतः सुहस्ताः शन्नो भवन्तु पितरो हवेषु ।। शन्नोऽ अजऽ एकपाद्देवोऽ अस्तु शन्मोहिर्बुध्न्यः १ शं समुद्रः । शन्नोऽ अपां नपात्पेरुरस्तु शन्नः पृश्निर्भवतु देवगोपा ।। आदित्या

रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः । शृण्वन्तु नो दिव्याः पार्थिवासो गोजाताऽ उत ये यज्ञियासः ।। ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्राऽ अमृताऽ ऋतज्ञाः । ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ।।

अभिषेकमन्त्राः । (रजोशान्तिप्रकरणोक्ताः)।

(उत्तरार्धको ३३५ पृष्ठको)

'आपो हिष्ठेति नवभिः'–

ॐ आपो हिष्ठा मयोभुवस्तानऽ ऊर्जे दधातन। महे रणाय चक्षसे।। यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ।। तस्माऽ अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ।। शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ।। ईशानावार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् ।। अप्सु मे सोमोऽ अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशम्भुवम् ।। आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक्च सूर्यन्दृशे ।। इदमापः प्रवहत यत्किञ्च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वाशेपऽ उतानृतम् ।। आपोऽ अद्यान्वचारिषं रसेन समगस्महि । पयस्वानग्नऽ आगहि तं मा संसृज वर्चसा ।।

'य एकऽ इद्विदयतइत्येकया'–

ॐ यऽ एकऽ इद्विदयते वसु मर्ताय दाशुषे । ईशानोऽ अप्रतिष्कुतऽ इन्द्रोऽ अङ्ग ।।

'त्रिभिष्ट्वं देव इति सप्तर्चेन'–

ॐ त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोमधामभिः । अग्ने दक्षैः पुनीहि नः ।। पुनन्तु मां देवजनाः पुनन्तु वसवो धिया । विश्वेदेवाः पुनीत मा जातवेदः पुनीहि मा ।। प्रप्यायस्व प्रस्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्यऽ उत्तमं हविः ।। उपप्रियं पनिप्नतं युवानमाहुतीवृधम् । अगन्म

बिभ्रतो नमः ।। अलाय्यस्य परशुर्ननाशतमापवस्व देव सोम । आखुं चिदेव देव सोम ।। यः पावमानीरध्येत्यृषिभिः संभृतं रसम् । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ।। पावमानिर्यो ऽ अध्येत्यृषिभिः संभृतं रसम् ।। तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ।।

'उभयं शृणवच्चन इत्येकया'-

ॐ उभयं शृणवच्च नऽ इन्द्रोऽ अर्वागिदं वचः । सत्राच्या मघवा सोमपीतये धिया शविष्ठऽ आगमत् ।।

'स्वस्तिदाविश इति च'-

ॐ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुरऽ एतु नः सोमपाऽ अभयंकरः ।।

'त्र्यम्बकमिति'-

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् ।।

'जातवेदस इत्येकया'-

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ।।

'समुद्रज्येष्ठा इति चतसृभिः'-

ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः । इन्द्रो या वज्री वृषभो रराद ताऽ आपो देवीरिह मामवन्तु ।। याऽ आपो दिव्याऽ उत वा स्रवन्ति खनित्रिमाऽ उतवा याः स्वयंजाः । समुद्रार्था याः शुचयः पावकास्ताऽ आपो देवीरिह मामवन्तु ।। यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो याः

पावकास्ताऽ आपोदेवीरिह मामवन्तु ।। यासु राजा वरुणो यासु सोमो विश्वेदेवा यासूर्जं मदन्ति । वैश्वानरो यास्वग्निः प्रविष्टस्ताऽ आपो देवीरिह मामवन्तु ।।

'त्रायन्तामिति तिसृभिः' –

ॐ त्रायन्तामिह देवास्त्रायतां मरुतां गणः । त्रायन्तां विश्वा भूतानि यथायमरपाऽ असत् ।।आपऽ इद्वाऽ उभेषजीरापोऽ अमीव चातनीः। आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।। हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी । अनामयित्नुभ्यां त्वा ताभ्यां त्वोपस्पृशामसि ।।

'इमाऽ आप इति तिसृभिः'–

ॐ इमाऽ आपः शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ।। आपोऽ अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽ एमि ।।

'देवस्य त्वा इति त्रिभिः'–

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामि।। देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ।। देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि ।।

'तमीशानमित्येकया'–

ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।।

‘त्वमग्ने रुद्र इत्येकेन[1]’–

ॐ त्वमग्ने रुद्रोऽअसुरो महो दिवस्त्वं शर्धो मारुतं पृक्षऽ ईशिषे । त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ।।
(ऋक् २।५।१८)

‘तमुष्टुहीति मन्त्रेण’–

ॐ तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य ।।

‘भुवनस्य पितरमिति च’–

ॐ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ । बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ।।

‘या ते रुद्र इति’–

ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ।।

‘यज्जाग्रत इति षण्मन्त्रैः’–

ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ।। येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ।। यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्नऽ ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ।। येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ।। यस्मिन्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तꣳ

---

[1] यो मन्त्र ऋग्वेदमा पनि छ र आपस्तम्व शाखा अन्तर्गत कृष्णयजुर्वेद तैत्तिरीय शाखाको काण्ड १, अष्टक १, प्रपाठक ३, अनुवादक १४, मन्त्र १ मा पनि छ ।

सर्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ।। सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीषुभिर्वाजिनऽ इव । हृत्प्रतिष्ठं यदजिरञ्जविष्ठन्तन्मे मनः शिवसङ्कल्पमस्तु ।।

'इन्द्र त्वा वृषभं वयमिति पञ्च'–

ॐ इन्द्र त्वा वृषभं वयं सुते सोमे हवामहे । स पाहि मध्वोऽ अन्धसः ।। इन्द्र क्रतुविदं सुतं सोमं हर्य पुरुष्टुत। पिबावृषस्वतातृपिम्।। इन्द्र प्रणोधितावानं यज्ञं विश्वेभिर्देवेभिः । तिरस्तवानविश्पते ।। इन्द्र सोमाः सुताऽ इमे तव प्रयन्ति सत्पते । क्षयं चन्द्रासऽ इन्दवः ।। दधिष्वाजठरे सुतं सोममिन्द्र वरेण्यम् । तव द्युक्षासऽ इन्दवः ।।

'सुरास्त्वामभिषिञ्चन्त्विति नवभिः'–

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताश्चैव दिक्पालाः पान्तु वः सदा ।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रियामतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ।।
एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च पूजिताः ।
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।।
ऋषयो मनवो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।।

अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ।।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकार्यार्थसिद्धये ।।

महाशान्तिमन्त्राः ।।

(उत्तरार्धको ३३५ पृष्ठको)

'आनो भद्रा इति दश'-

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोदब्धासोऽ अपरीतासऽ उद्भिदः । देवा नो यथा सदमिद्वृधेऽ असन्नप्रायुवो रक्षितारो दिवे दिवे।। देवानाम्भद्रा सुमतिर्ऋजूयतां देवाना ꣳ रातिरभि नो निवर्तताम् ।। देवाना ꣳ सख्यमुपसेदिमा वयं देवा नऽ आयुः प्रतिरन्तु जीवसे ।। तान्पूर्वया निविदा हूमहे वयं भगम्मित्रमदितिं दक्षमस्रिधम्। अर्यमणं वरुण ꣳ सोम मश्विना सरस्वती नः सुभगा मयस्करत् ।। तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।। तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।। स्वस्ति नऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। पृषदश्वा मरुतः पृश्नि मातरः शुभं यावानो विदथेषु जग्मयः । अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवाऽ अवसा गमन्निह ।। भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ।। शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।। अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वेदेवाऽ अदितिः पञ्चजनाऽ अदितिर्जातमदितिर्जनित्वम् ।।

'स्वस्ति नो मिमीतामिति पञ्च'–

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषाऽ असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ।। स्वस्तये वायुमुपब्रवामहै सोमꣳ स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिꣳ सर्वगणꣳ स्वस्तये स्वस्तयऽ आदित्यासो भवन्तु नः ।। विश्वेदेवा नोऽ अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवाऽअभवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वꣳहसः ।। स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति नऽ इन्द्रश्चाग्निश्च स्वस्ति नोऽ अदिते कृधि ।। स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव । पुनर्ददताघ्नताजानतासङ्गमेमहि ।।

'शन्नऽ इन्द्राग्नीति पञ्चदश'–

(यो सूक्तका १५ मन्त्रहरू परिशिष्टको ५५ पृष्ठमा हेर्नुहोला)

'त्यमूषु इति तिस्रः'–

ॐ त्यमूषु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् । अरिष्टनेमिं पृतनाजमाशुꣳ स्वस्तये तार्क्ष्यमिहाहुवेम ।। इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवारुहेम ।। उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ।। सद्यश्चिद्यः शवसा पञ्चकृष्टीः सूर्यऽ इव ज्योतिषापस्ततान । सहस्रसाः शतसाऽ अस्यरंहिनस्मावरं ते युवतिं न शर्याम् ।

'तच्छंयोरित्येका'–

ॐ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यऽऊर्ध्वं जिगातु भेषजꣳ शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे ।।

जपसूक्तानि ।।

(उत्तरार्धको ३५३ पृष्ठको)

'भद्राऽ अग्न इति द्वादश मन्त्राः'-

ॐ भद्राऽ अग्नेर्वध्र्यश्वस्य सन्दृशो वामी प्रणीतिः सुरणाऽ उपेतयः। यर्दि सुमित्रा विशोऽ अग्रऽइन्धते घृतेनाहुतो जरते दविद्युतत् ।। घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्वस्य मेदनम् । घृतेनाहुतऽ उर्विया वि पप्रथे सूर्यऽ इव रोचते सर्पिरासुतिः ।। यत्ते मनुर्यदनीकं सुमित्रः समीधेऽ अग्ने तदिदं नवीयः । सरेवच्छोच स गिरो जुषस्व स वाजं दर्षि सऽ इह श्रवोधाः ।। यं त्वा पूर्वमीडितो वध्र्यश्वः समीधेऽ अग्ने सऽ इदं जुषस्व । स नः स्तिपाऽ उत भवा तनूपा दात्रं रक्षस्व यदिदं तेऽ अस्मे ।। भवा द्युम्नीवाध्र्यश्वोत गोपा मा त्वातारीदभिमातिर्जनानाम् । शूरऽ इव धृष्णुश्च्यवनः सुमित्रः प्रनुवोचं वाध्र्यश्वस्य नाम ।। समज्र्या पर्वत्या३ वसूनि दासा वृत्राण्यार्या जिगेथ । शूरऽ इव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभिष्याः ।। दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथऽऋभ्वा। द्युमान्द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ।। त्वे धेनुः सुदुघा जातवेदो सश्चतेवसमनासबर्धु । त्वं नृभिर्दक्षिणावद्भिरग्नेत्रेसुमि भिरिध्यसे देवयद्भिः ।। देवाश्चित्तेऽ अमृता जातवेदो महिमानं वाध्र्यश्व प्रवोचन् । यत्संपृच्छं मानुषीर्विशऽ आयन्त्वं नृभिरजयस्त्वा वृधेभिः ।। पितेव पुत्रमबिभरुपस्थे त्वामग्ने वध्र्यश्वः सपर्यन् । जुषाणोऽ अस्य समिधं यविष्ठोत पूर्वाँऽ अवनोर्व्राधतश्चित् ।। शश्वदग्निर्वध्र्यश्वस्य शत्रून्नृभिर्जिगाय सुतसोमवद्भिः । समनं चिददहश्चित्रभानो वव्राधन्तमभिनद्बृधश्चित् ।। अयमग्निर्वध्र्यश्वस्य वृत्रहा रानकात्प्रेद्धो नमसोपवाक्यः । स नो अजार्मीँरुतवाविजामीनभितिष्ठ शर्धतो वाध्र्यश्व ।।

'सहस्रशीर्षा १६ मन्त्राः'-

(यो सूक्त परिशिष्टको ६ पृष्ठमा छ)

'कद्रुद्राय ९ मन्त्राः'–'

(यो सूक्त परिशिष्टको ५१ पृष्ठमा छ)

'हिरण्यवर्णामिति श्रीसूक्तेन'–

(उत्तरार्धको ३६१ पृष्ठमा उल्लेख गरेको श्रीसूक्त परिशिष्टको ४९ पृष्ठमा छ)

जपसूक्तानि ।।

(उत्तरार्धको ३७९ पृष्ठमा उल्लेख गरिएका जतसूक्तहरू)–

'कद्रुद्राय'–

(यो सूक्तको ९ मन्त्र परिशिष्टको ५१ पृष्ठमा छ)

'इमा रुद्राय तवसे'–

(यो सूक्तको ११ मन्त्र परिशिष्टको ५२ पृष्ठमा छ)

'आते पितः'–

(यो सूक्तको १५ मन्त्र परिशिष्टको ५३ पृष्ठमा छ)

'आशुः शिशान इति'–

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनो निमिषऽ एकवीरः शत ꣳ सेनाऽ अजयत्साकमिन्द्रः।। सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नरऽ इषुहस्तेन वृष्णा ।। सऽ इषुहस्तैः सनिषङ्गिभिर्वशी स ꣳ स्रष्टासयुधऽ इन्द्रो गणेन । स ꣳ सृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ।। बृहस्पते परिदीया रथेन रक्षोहामित्राँऽ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधाजयन्नस्माकमेध्यविता रथानाम् ।। बलविज्ञायस्थविरः प्रवीरः सहस्वान्वाजी सहमानऽ उग्रः । अभिवीरोऽ अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ।। गोत्रभिदङ्गोविदं वज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा । इम ꣳ सजाता अनुवीरयध्वमिन्द्र ꣳ सखायोऽ अनु स ꣳ

रभध्वम् ।। अभिगोत्राणि सहसा गाहमानोदयोवीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योस्माक ꣳ सेनाऽ अवतु प्रयुत्सु ।। इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽ एतु सोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ।। इन्द्रस्य वृष्णो वरुणस्य राज्ञऽ आदित्यानां मरुता ꣳ शर्धऽ उग्रम्। महामनसाम्भुवनच्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ।। उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मना ꣳ सि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानाञ्जयतां यन्तु घोषाः ।। अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं याऽ इषवस्ता जयन्तु । अस्माकं वीराऽ उत्तरे भवन्त्वस्माँऽ उ देवाऽअवता हवेषु ।। अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभिप्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ।। प्रेताजयता नरऽ इन्द्रो वः शर्म यच्छतु । उग्रावः सन्तु बाहवोनाधृष्या यथासथ ।।

'त्वमग्ने रुद्र'-

ॐ त्वमग्ने रुद्रोऽ असुरो महो दिवस्त्व ꣳ शर्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना ।। आवो राजानमध्वरस्य रुद्र ꣳ होतार ꣳ सत्ययज ꣳ रोदस्योः । अग्नि पुरातनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ।। अग्निर्होता निषत्सादा यजीयानुपस्थे मातुः सुरभावु लोके । युवा कविः पुरुनिष्ठः ऋतावा धर्ता कृष्टीनामुत मध्यऽ इद्धः ।। साध्वीमकर्देववीतिं नोऽ अद्य यज्ञस्य जिह्वामविदाम गुह्याम् । सऽ आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नोऽ अद्य।। अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धोऽ अख्यदा रोदसी भानुना भात्यन्तः ।। त्वे वसूनि पूर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः । क्षामेव विश्वा भुवनानि यस्मिन्त्स ꣳ सौभगानि दधिरे पावके ।। तुभ्यन्ताऽ अङ्गिरस्तम विश्त्राः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ।। अश्याम तं काममग्ने तवोत्यश्याम रयि ꣳ रयिवः सुवीरम् । अश्याम वाजमभि वाजयन्तोश्याम

द्युम्नमजराजरं ते ।। श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर। वसो पुरुस्पृहꣳ रयिम् ।। स शिवतानस्तन्यतू रोचनस्थाऽ अजरेभिर्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरुणि पृथून्यग्निरनुयाति भर्वन् ।। आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राणऽ आयति परा यक्ष्मꣳ सुवामि ते ।। आयुर्दाऽ अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम् ।। तस्मै ते प्रति हर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ।। दिवस्परि प्रथमञ्जज्ञेऽ अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणाऽ अजस्रमिन्धानऽ एनञ्जरते स्वाधीः ।। शुचिः पावक वन्द्योग्ने वृहद्विरोचसे । त्वं घृतेभिराहुतः ।। दृशानो रुक्मऽ उर्व्याव्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतोऽ अभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ।। आ यदिषे नृपतिन्तेजऽ आनट् शुचिरेतो निषिक्तन्द्यौरभीके । अग्निः शर्धमनवद्यं युवानꣳ स्वाधियञ्जनयत्सूदयच्च ।। स तेजीयसा मनसा त्वोतऽ उत शिक्ष स्वपत्यस्य शिक्षोः । अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ।। अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् । विश्वा यश्चर्षणीरभ्यासा वाजेषु सासहत् ।। तमग्ने पृतनासहꣳ रयिꣳ सहस्वऽ आ भर । त्वꣳ हि सत्योऽ अद्भुतो दाता वाजस्य गोमतः।। उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ।। वद्मा हि सूनोऽअस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् । स त्वन्नऽ ऊर्जं सन ऽ ऊर्जं धा राजेव जेरवृके क्षेष्यस्तः ।। अग्नऽ आयूꣳषि पवसऽ आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्।। अग्ने पवस्व स्वपाऽ अस्मेवर्चः सुवीर्यम् । दधत्पोषꣳ रयिं मयि ।। अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ।। स नः पावक दीदिवोग्ने देवाँऽ इहावह । उप यज्ञꣳ हविश्च नः ।। अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ।। उदग्ने शुचयस्तव शुक्रा भ्राजन्तऽ ईरते । तव ज्योतीꣳष्यर्चयः ।। इति ।

(कृष्णयजुः – काण्ड १, प्रपाठक ३, अनुवाक १४)

'त्वमग्ने'–

ॐ त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा ।। हव्यवाडग्निरजरः पिता नो विभुर्दिभावा सुदृशीकोऽ अस्मे । सुगार्हपत्याः समिषो दिदीह्यस्मद्रियक्सं मिमीहि श्रवाꣳसि ।। त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ।। ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन् ।। आ विश्वदेवꣳ सत्पतिꣳ सूक्तैरद्या वृणीमहे । सत्यसवꣳ सवितारम् ।। आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवना विपश्यन् ।। यथा नोऽ अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ।। मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामिनो वधीर्हविष्मन्तो नमसा विधेम ते ।। उदप्रुतो न वयो रक्षमाणा वावदतोऽ अभ्रियस्येव घोषाः । गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्काऽ अनावन् ।। हꣳसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् । बृहस्पतिरभिकनिक्रदद्गाऽ उत प्रास्तौदुच्च विद्वाँऽ अगायत् ।। एन्द्र सानसिꣳ रयिꣳ सजित्वानꣳ सदासहम् । वर्षिष्ठमूतये भर ।। प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्मऽ इह रातिरस्तु । इन्द्राभर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ।। त्वꣳ सुतस्य पीतये सद्यो वृद्धोऽ अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ।। भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः। भुवोनॄँश्च्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ।। मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । सत्यं चित्रश्रवस्तमम् ।। मित्रो जनान्यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम ।। प्र स मित्र मर्तोऽ अस्तु प्रयस्वान्यस्तऽ आदित्य शिक्षति व्रतेन । न

हन्यते न जीयते त्वोतो नैनम ꣳ हो अश्नोत्यन्तितो न दूरात् ।। यत् चिद्धि ते विशो यथा प्र देव वरुण व्रतम् । मिनीमसि द्यवि द्यवि ।। यत्किञ्चेदं वरुण दैव्ये जनेभिद्रोहं मनुष्याश्चरामसि । अचित्तीयत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।। कितवासो यद्रिपुर्नदीवि यद्वा घा सत्यमुत यन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथाते स्याम वरुण प्रियासः ।। इति ।

(कृष्णयजुः – काण्ड ३ प्रपा. ४ अनु. ११)

'रक्षोहणम्'

ॐ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म । शिशानोऽ अग्निः क्रतुभिः समिद्धः स नो दिवा सरिषः पातु नक्तम् ।। अयोदंष्ट्रोऽ अर्चिषा यातुधानानुपस्पृश जातवेदः समिद्धः । आजिह्वयामूरदेवान्भस्व क्रव्यादोवृक्त्व्यपिधत्स्वासन् ।। उभोभयाविन्नुपधेहि दंष्ट्रा हिंस्रः शिशानोवरं परं च। उतान्तरिक्षे परियाहि राजञ्जम्भैः सन्धेह्यभि यातुधानान् ।। यज्ञैरिषूः सन्नममानोऽ अग्ने वाचा शल्याँऽ अशनिभिर्दिहानः । ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्येषाम् ।। अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् । प्रपर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्विचिनोतु वृक्णम् ।। यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्नेऽ उत वा चरन्तम् । यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ताविध्य शर्वा शिशानः ।। उतालब्धं स्पृणुहि जातवेदऽ आलेभानादृष्टिभिर्यातुधानात् । अग्ने पूर्वो नि जहि शोशुचानऽ आमादः क्ष्विङ्कास्तमदन्त्वेनीः ।। इह प्रब्रूहि यतमः सोऽ अग्ने यो यातुधानो यऽ इदं कृणोति । तमारभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ।। तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्रणय प्रचेतः । हिंस्रं रक्षांस्यभिशोशुचानं मा त्वा दभन्यातुधानानृचक्षः ।। नृचक्षारक्षः परिपश्य विक्षुतस्य त्रीणि

प्रतिशृणीह्यग्रा । तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥ त्रिर्यातुधानः प्रसितिं तऽ एत्वृतं योऽ अग्नेऽ अनृतेन हन्ति । तमर्चिषा स्फूर्जयञ्जातवेदः समक्षमेनं गृणते निवृङ्धि ॥ तदग्ने चक्षुः प्रतिधेहि रेभेशफारूजं येन पश्यसि यातुधानम् । अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥ यदग्नेऽ अद्य मिथुनाशपातो यद्वचस्तृष्टं जनयन्तरेभाः । मन्योर्मनसः शरव्या१ जायते यातयाविध्य हृदये यातुधानान् ॥ परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि । परार्चिषामूरदेवाञ्छृणीहि परासुतृपोऽ अभिशोशुचानः ॥ पराद्यदेवावृजिनं शृणन्तु प्रत्यगेनं शपथायन्तु तृष्टाः । वाचास्तेनं शरवऽ ऋच्छन्तु मर्मन्विश्वस्यैतु प्रसितिं यातुधानः ॥ यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः । योऽ अघ्न्यायाभरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥ संवत्सरीणं पयऽ उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः । पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यञ्चमर्चिषा विध्य मर्मन् ॥ विषं गवां यातुधानाः पिबन्त्वावृश्च्यन्तामदितये दुरेवाः । परैनान्देवः सविता ददातु परा भागमोषधीनाञ्जयन्ताम् ॥ सनादग्ने मृणसि यातुधानान्न त्वारक्षाꣳसि पृतनासुजिग्युः । अनु दह सह मूरान् क्रव्यादो मा ते हेत्यामुक्षत दैव्यायाः ॥ त्वन्नोऽ अग्नेऽ अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् । प्रति ते तेऽ अजरासस्तपिष्ठाऽ अघशंसं शोशुचतो दहन्तु ॥ पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परिपाहि राजन् । सखे सखायमजरो जरिम्णेग्ने मर्ताँऽ अमर्त्यस्त्वं नः ॥ परि त्वाग्ने पुरं वयं विप्र ८. सहस्य धीमहि । धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ॥ विषेण भङ्गुरावतः प्रतिष्म रक्षसो दह । अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥ प्रत्यग्ने मिथुना दह यातुधाना किमीदिना । सन्त्वाशिशामि जागृह्यदब्धं विप्र मन्मभिः ॥ प्रत्यग्ने हरसाहरः शृणीहि विश्वतः प्रति । यातुधानस्य रक्षसो बलं विरुजवीर्यम् ॥ इति ।

होममन्त्राः ।। (मूलशान्तिप्रकरणोक्ताः)

(उत्तरार्ध ३८२ पृष्ठको)

‘कृणुष्वेति’–

ॐ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँऽ इभेन । तृष्वीमनु प्रसितिं द्रूणानोस्तासि विध्य रक्षसस्तपिष्ठैः ।। तव भ्रमासऽ आशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्बगुल्काः ।। प्रतिस्पशो विसृज तूर्णितमो भवा पायुर्विशोऽ अस्याऽ अदब्धः । यो नो दूरेऽ अघशꣳसो योऽ अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ।। उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राऽ ओषतात्तिग्महेते । यो नोऽ अरातिꣳसमिधान चक्रे नीचा तं धक्ष्यतसन्न शुष्कम्।। ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनाञ्जामिमजामिं प्रमृणीहि शत्रून् ।। स ते जानाति सुमतिं यविष्ठ यऽ ईवते ब्रह्मणे गातुमैरत् । विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरोऽ अभिद्यौत् ।। सेदग्नेऽ अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा यऽ उक्थैः । पिप्रीषति स्वऽ आयुषि दुरोणे विश्वेदस्मै सुदिनासासदिष्टिः ।। अर्चामि ते सुमतिं घोष्यर्वाक्संतेवावाता जरतामियं गीः । स्वश्वास्त्वा सुरथामर्जयेमास्मे क्षत्राणि धारयेरनुद्यून् । इह त्वा भूर्याचरेदुपत्मन्दोषावस्तर्दिदिवासमनुद्यून् । क्रीडन्तस्त्वा सुमनसः सपेमाभिद्युम्ना तस्थिवांसो जनानाम् ।। यस्त्वा स्वश्वः सुहिरण्योऽ अग्नऽ उपयाति वसुमता रथेन । तस्य त्राता भवसि तस्य सखायस्तऽ आतिथ्यमानुषग्जुजोषत् ।। महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय । त्वन्नोऽ अस्य वचसश्चिकिद्धोतर्यविष्ठ सुक्रतो दमूनाः ।। अस्वप्नजस्तरणयः सुशेवाऽ अतन्द्रासो वृकाऽ अश्रमिष्ठाः । ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ।। ये पायवो मामतेयन्तेऽ अग्ने पश्यन्तोऽ अन्धं दुरितादरक्षन् । ररक्षतान्त्सुकृतो विश्ववेदादिप्सन्तऽ इद्रिपवो

नाहृदेभुः ।। त्वया वयं सधन्य१ स्त्वोतास्तव प्रणीत्यश्याम वाजान् । उभाशंसा सूदय सत्यता तेनुष्ठुया कृणुह्यह्रयाण ।। अयातेऽग्ने समिधा विधेम प्रतिस्तोमं शस्यमानं गृभाय । दहाशसो रक्षसः पाह्य१स्मान्द्रुहोनिदो मित्रमहोऽ अवद्यात् ।।इति।

'हिरण्यवर्णाम्'–

(यो सूक्तको १५ ऋचा परिशिष्टको ४६ पृष्ठमा हेर्नुहोला)

(उत्तरार्ध ३८३ पृष्ठको)

"त्वन्नः सोमः[1]"–

ॐ त्वन्नः सोम विश्वतो गोपाऽ अदाभ्यो भव । सेध राजन्नपस्रिधो विवोमदे मा नो दुःशंसऽ ईशताविवक्षसे । (ऋक् ७।७।१२)

(ऐन्द्रो विमदऋषिः, आस्तारपंक्तिश्छन्दः सोमो देवता)

पूर्णाहुतिमन्त्राः ।।

'समुद्रादूर्मिरित्येकादशर्चम्'–

ॐ समुद्रादूर्मिर्मधुमाँ२।। उदारदुपा ꣳ शुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ।। वयन्नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुः शृङ्गोवमीद्गौरऽ एतत् ।। चत्वारि शृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य । त्रिधा बद्धो वृषभो रोरवीति महो

---

[1] यो मन्त्रप्रतीक उत्तरार्धको ३८३ पृष्ठमा उल्लेख भएको छ । यसमा ग्रन्थकारको भनाइ अनुसार (प्रगाथऋषिः सोम देवता त्रिष्टुप्छन्दः) भएको १३ मन्त्रको सूक्त हुनु पर्दथ्यो। तर त्यस्तो 'त्वन्नःसोमः'आदिमा भएको १३ मन्त्रको सूक्त कहीं पनि भेट्टाइएन । यहाँ यो जुन 'त्वन्नः सोमः' मन्त्र राखिएको छ । यो त परिशिष्टदीपकको आधारमा राखिएको हो । परिशिष्ट दीपकमा नित्यानन्द पन्त पर्वतीयले यस मन्त्रले १३ आहुति होम गर्नु भनेंका छन् । ग्रन्थकारले भने अनुसारको १३ मन्त्रको सूक्त छैन एक मन्त्रमात्र छ तर पनि ऋषि, देवता र छन्द यो मन्त्रमा सवै मिल्छ । जुन यस प्रकार छः–

"त्वन्नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वन्नऽ इन्द्रऽ ऊतिभिः सजोषाः पाहि पश्चात्तादुत वा पुरस्तात् ।।" (ऋक्– ६।४।१३)

देवो मर्त्याँ२॥ आविवेश ॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्रऽ एकꣳ सूर्यऽ एकञ्जजान येनादेकꣳ स्वधया निष्टतक्षुः ॥ एताऽ अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धाराऽ अभिचाकशीमि हिरण्ययो वेतसो मध्यऽ आसाम् ॥ सम्यक्स्रवन्ति सरितो न धेनाऽ अन्तर्हृदा मनसा पूयमानाः । एतेऽ अर्षन्त्यूर्मयो घृतस्य मृगाऽ इव क्षिपणोरीषमाणाः ॥ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धाराऽ अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽ अग्निम् । घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ कन्याऽ इव वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽ अभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ अभि तत्पवन्ते ॥ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त । इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि । अपामनीके समिथे यऽ आभृतस्तमश्याम मधुमन्तन्तऽ ऊर्मिम् ॥ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नोऽ अस्तु वयꣳ स्याम पतयो रयीणाम्॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहाऽ इषमूर्जꣳ शतक्रतो ॥ सप्त तेऽ अग्ने समिधः सप्त जिह्वाः सप्तऽ ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा ॥ इति ।

(उत्तरार्धको ३८३ पृष्ठको)

अभिषेकमन्त्राः ॥

‘अक्षीभ्यामिति षण्मन्त्रैः’–

ॐ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि । यक्ष्मं शीर्षण्यं मस्तिकाञ्जिह्वाया विवृहामि ते ॥ ग्रीवाभ्यस्तऽ उष्णिहाभ्यः

कीकसाभ्योऽ अनूक्यात् । यक्ष्मं दोषण्यꣳ मंसाभ्यां बाहुभ्यां विवृहामि ते ।। आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि । यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते ।। ऊरुभ्यां तेऽ अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् । यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृहामि ते ।। मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते ।। अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते ।।

'पवस्व विचर्षणीति त्रिंशन्मन्त्रैः'–

ॐ पवस्व विश्वचर्षणेभिविश्वानि काव्या । सखा सखिभ्यऽ ईड्यः।। ताभ्यां विश्वस्य राजसि ये पवमानधामनी । प्रतीची सोम तस्थतुः ।। परिधामानि यानि ते त्वं सोमासि विश्वतः । पवमानऽ ऋतुभिः कवे ।। पवस्व जनयन्निषोभिविश्वानि वार्या । सखा सखिभ्यऽ ऊतये ।। तव शुक्रासोऽ अर्चयो दिवस्पृष्ठे वितन्वते । पवित्रं सोम धामभिः ।। तवेमे सप्तसिन्धवः प्रशिषं सोम सिस्रते । तुभ्यं धावन्ति धेनवः ।। प्रसोम याहि धारयासुतऽ इन्द्राय मत्सरः । दधानो ऽ अक्षितिश्रवः ।। समुत्वाधीभिरस्वरन्हिन्वतीः सप्तजामयः । विप्रमाजाविवस्वतः ।। मृजन्ति त्वा समग्रुवोव्येजीरावधिष्वणि । रेभोयदज्यसेवने ।। पवमानस्य ते कवे वाजिन्त्सर्गाऽ असृक्षत । अर्वन्तो न श्रवस्यवः ।। अच्छाकोशं मधुश्चुतमसृग्रंवारेऽ अव्यये । अवावशन्त धीतयः ।। अच्छा समुद्रमिन्दवोस्तं गावो न धेनवः । अग्मन्नृतस्य योनिमा ।। प्राणऽ इन्दो महेरणऽ आपोऽ अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे ।। अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः । इन्दो सखित्वमुश्मसि ।। आपवस्व गविष्टये महे सोम नृचक्षसे । एन्द्रस्य जठरे विश ।। महाँऽ असि सोम ज्येष्ठऽ उग्राणामिन्दऽ ओजिष्ठः। युध्वासञ्छश्वज्जिगेथ ।। यऽ उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्यश्चिन्मंहीयान् ।। त्वꣳ सोम सूरऽ एषस्तोकस्य

सातातनूनाम् ।। वृणीमहे सख्याय वृणीमहे युज्याय ।। अग्नऽ आयूᳪषि पवसऽ आसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् ।। अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ।। अग्ने पवस्व स्वपाऽ अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ।। पवमानोऽ अतिस्रिधोंभ्यर्षति सुष्टुतिम् । सूरो न विश्वदर्शतः ।। सममृंजानऽ आयुभिः प्रयस्वान्प्रयसे हितः ।। इन्दुरत्योविचक्षणः ।। पवमानऽऋतं बृहच्छुक्रं ज्योतिरजीजनत् । कृष्णा तमांसि जङ्घनत् ।। पवमानस्य जङ्घ्नतोहरेश्चन्द्राऽ असृक्षत । जीराऽ अजिरशोचिषः ।। पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चन्द्रो मरुद्गणः ।। पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः । दधत्स्तोत्रे सुवीर्यम् । प्रसुवा न ऽ इन्दुरक्षाः पबित्रमत्यव्ययम् । पुनानऽ इन्दुरिन्द्रमा ।। एष सोमोऽ अधित्वचि गवां क्रीडत्यद्रिभिः । इन्द्रं मदाय जोहुवत् ।। यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः । तेन नो मृड जीवसे ।।

'सहस्राक्षेण इति त्रिभिः'–

ॐ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् । शतं यथेमं शरदो न यातीन्द्रो विश्वस्य दुरितस्य पारम् ।। शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् । शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ।। आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव । सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेविदम् ।

'देवस्य त्वेति त्रिभिः'–

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामि ।।

ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ।।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेभिषिञ्चामि ।।

'यज्जाग्रत इति षड्भिः'–

ॐ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति । दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ।। येन कर्माण्यपसो मनीषिणो यज्ञे कृन्वति विदथेषु धीराः । यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ।। यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्नऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ।। येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् । येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसङ्कल्पमस्तु ।। यस्मिन्नृचः साम यजूᳪंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः । यस्मिँश्चित्तᳪं सर्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ।। सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेभीषुभिर्वाजिनऽ इव । हृत्प्रतिष्ठं यदजिरञ्जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ।।

'तच्छंयोरित्येकेन'–

ॐ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजᳪं शन्नोऽ अस्तु द्विपदे शञ्चतुष्पदे ।।

शकुन्तसूक्तम् ।।

(उत्तरार्धको ४७३ पृष्ठको)

ॐ कनिक्रदज्जनुषं प्रब्रुवाणऽ इयर्ति वाचमरितेव नावम् । सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभाविश्व्याविदत् ।। मा

त्वा श्येनऽ उद्वधीन्मा सुपर्णो मा त्वाविददिषुमान्वीरोऽ अस्ता । पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह ।। अवक्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते । मा नः स्तेनऽ ईशत माघशंसो बृहद्वदेम विदथे सुवीराः ।। प्रदक्षिणिदभिगृणन्ति कारवो वयोवदन्तऽ ऋतुथा शकुन्तयः । उभे वाचौ वदंति सामगाऽ इव गायत्रं च त्रैष्टुभं चानुराजति ।। उद्गातेव शकुने साम गायसि ब्रह्मपुत्रऽ इव सवनेषु शंसति । वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद ।। आवदँस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकिद्धि नः । यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ।। भद्रं वद दक्षिणतो भद्रमुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल ।। भद्रं वद पुत्रैर्भद्रं वद गृहेषु च । भद्रमस्माकं नो वद भद्रं नोऽ अभयं कृधि ।। भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद ।। भद्रं भद्रं नऽ आवद भद्रं नः सर्वतो वद ।। असपत्नः पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ।। यौवनानि महयसि जिग्युषामिव दुन्दुभिः । शकुन्तक प्रदक्षिणं शतपत्राभि नो वद ।। आवदँस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकिद्धि नः । यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ।।

इति परिशिष्टे उत्तरार्धगतमन्त्राः ।।

इति परिशिष्टम् ।।

।। शुभमस्तु ।।

❁

श्री ५ को सरकारको छापाखाना
काठमाडौं
नेपाल
मुद्रक